युवा तन्नस्य साधुर्यविष्ठ्यः। कदाचिदपि स्थविरत्वरहित इत्यर्थः। तथाविध हे अग्ने बृहच्छोचे प्र
वृद्धं यथा भवति तथा दीप्यस्व॥ का०स्या०॥ उप त्वेति जपतीति॥ पाठस्तु॥ उप त्वाग्ने ममेति।
हे अग्ने हविष्मतीः। हविषस्तो हविर्युक्ता घृताचीर्घृतान्वो घृतेनाक्ता रताः समिधः त्वाउ
सु पयंतु। तांप्रति उपगच्छंतु। हर्यत हे कांतिमन्नित्यर्थः। हर्यत। आ च क इति कांतिकर्मसु पठितं
तत्वात्। तथाविध हे अग्ने मे मदीयाः समिधो जुषस्व। सेवस्व॥ का०स्या०॥ द्वाभ्यां [illegible] लं
आदधाति भूर्भुवरिति संभारेष्विति। भूर्भुवः स्वरिति पूर्ववदिति। च। अस्यायमर्थः॥ आ
पो हिरण्यमित्यादीन्पंच संभारान्संपाद्य स्फ्येनोल्लिखितायां शुद्धायां भूमौ तान्संभा
रानवस्थाप्य तेषु संभारेषु शुष्ककाष्ठैर्ज्वलितमग्निं भूर्भुवरित्यक्षरत्रयमुच्चारयन्ना
दध्यात्। तदिदं गार्हपत्याधानं। तस्मात्प्राच्यां तथैव संभृत्य भुवः सुवरिति पंचाक्षराण्यु
च्चारयन्नादध्यात्। तदिदमाहवनीयाधानं। सोयमर्थस्तित्तिरिणा दर्शितः। त्रिभि

वे भूरेषु २

रक्षरैर्गार्हपत्यमादध्यात् पंचभिराहवनीयं। अष्टौ संपद्यते अष्टाक्षरा गायत्री गायत्रोऽग्निः।
यावानेवाग्निस्तमाधत्त इति। अग्नेर्गायत्र्या सह प्रजापतिमुखादुत्पन्नत्वात्। गायत्रत्वं
द्रष्टव्यं। एतेष्वाधानमंत्रेषु भूरिति प्रथमा। भुवइति द्वितीया। सुवरिति तृतीया। एतास्तिस्रो व्याहृतयः।
पृथिव्यादि लोकत्रयं नामानि एतदुच्चारणपुरःसरं प्रजापतिना लोकत्रयस्य सृष्टत्वात्। स्य४
कथंब एतएवाग्निरनुतिष्ठन् लोकत्रयमर्थेनेन सम्स्मारत्। एतासां व्याहृतीनां महिमा भूयान्।
य ८ तं च कण्वस्तदाहुर्नेच्छन्ति बहुधा नसाम्नाग्निराधीयं तत्वग्निरित्यादिना बहुधा प्रपंच तेके ६
यामास॥ का०॥ ३॥ भूमपरवांद्धि दृष्ही लाद्यौरिव भूम्ना स्वाहेति। पाठस्तु॥ द्यौरिव भूम्नौ
दध इति। देवा इज्यंते यस्यां पृथिव्यां सा देवयजनी तथाविधे हे पृथिवि तस्यास्ते पृष्ठे देव ८७
८७ यजन्यो ग्यायास्तवोपरि वाग्निं गार्हपत्यादिरूपमादधे स्थापयामि। किमर्थं मन्नाद्याय
अन्नं योग्यस्यान्नस्य सिद्ध्यर्थं कथं भूतमग्निं द्यौरिव भूम्ना बहुत्वेन वो भूमाय द्यावो न
क्षत्रादि बहुत्वेन युक्ता। तथा ज्वाला बहुत्वेन युक्तं किंच पृथिवी वरिम्णा वरेण श्रेष्ठत्वस्याः

त्व
वोवरिमा यथा भूमिः सर्वप्राण्याश्रयत्वरूपेण श्रेष्ठ। त्वोनोपे। तातथा सर्ववस्तुरोधकरूपेण
श्रेष्ठत्वेनोपेतं। अतएवान्यत्र क्वचिद्विधिवाक्ये अग्नये पावकायेति पावकत्वविशेषणमुक्तं। मंत्रां
तरे चाग्निः शुचिर्व्रततमइत्याम्नातं। का०॥ आयं गौरित्युपतिष्ठते सार्पराज्ञीभिर्दक्षिणा
ग्निमादध्यातीति। आयंगौरित्यादीनां तिसृणामृचां सार्पराज्ञीति नामधेयं। अथ सर्पराज्ञ्या ऋ
ग्भिरुपतिष्ठत इति कण्वश्रुतेः। सर्पराज्ञ्या दृष्टत्वात्। तासिर्ऋग्भिराहवनीयमुपतिष्ठते दक्षिणा
ग्निमपि ताभिरेवादध्यात्। तत्र प्रथमायाः ऋचः पाठस्तु॥ आयं गौः पृश्निरक्रमीदिति॥ गच्छतीति
गौः। यज्ञनिष्पत्तये तत्तद्यजनगृहेषु गंता पृश्निः श्वित्रवर्णः। लोहितशुक्लादि बहुविधज्वालोपे
पेतः। तथाविधोयं दृश्यमानोऽग्निः आक्रमीत्। सर्वत आहवनीयगार्हपत्यदक्षिणाग्निस्थाने
षु क्रमणं पादविक्षेपं कृतवान्। यस्मादेवं तस्मात्पुरः प्राच्यां दिशि मातरं पृथिवीं असदत्। आ
सीदत्। आहवनीयरूपेण प्राप्तवान्। तथा स्वः प्रयन् आदित्यरूपेण स्वर्गे संचरन्। पितरं च सु

लोक असदन्त। आमवान्। भूर्लोकद्युलोकयोर्माता पितृत्वमन्यत्रापि श्रूयते द्यौः पिता पृथिवी मा
तेति। द्वितीयस्याऋचः पाठस्तु॥ अंतश्चरति रोचनेति। अस्याग्नेः रोचना काचिद्दीप्तिरंतश्च
रति। किं कुर्वती प्राणादपानती। प्राणव्यापारादूर्ध्वमपानव्यापारं कुर्वती प्राणापानयोर्वायुविशे
षयोः प्रेरकेत्यर्थः। सति हि जाठराग्नौ जीवनहेतौ रोचन्यस्य शरीरे सद्भावात्प्राणापानौ प्रव
र्तेते। जाठरस्थो ह्यस्य पुरुषजीवनत्वमन्यत्र श्रुतं। पुष्णा एवं षयक्षां तामशिवं घ्नन्तिति। महि
माहात्म्यं यागकर्तृस्वरूपं सनोति ददातीति महिष्वोग्निः। सर्वादिवं द्युलोकं भोगस्थानं व्य
ख्यत्। अनुष्ठातृभ्यो विशेषेण प्रकाशितवान्॥ तृतीयस्याऋचः पाठस्तु॥ त्रिंशद्धाम घुषि
रिति। धाम स्थानं तच्च त्रिंशत्। मासगतदिनभेदेन त्रिंशत्संख्याकं तद्देतद्दिराजति विशेषे
णादीप्यते। अग्नेः स्वरहितानां यजमानानामनुष्ठानेनाहवनीयाद्यायाग्नीनां स्थानं मासंग
तेषु त्रिंशत्संख्याकेषु दिनेषु विशेषेण शोभत इत्यर्थः। पतंगाय पक्षिसदृशोग्निः पतंगः
यथा पक्षी कश्चिदेकस्मात्स्थानादपरं स्थानं गच्छति। तथाग्निरपि गार्हपत्यस्थानादाहवनीय

९२

स्थानं गच्छतीत्यग्नेः पक्षिसादृश्यं। तथाविधायाग्नये सर्वं वाग्धीयते स्तुतिरूपा वागुच्चार्यते। अहेति नि
पातः पूर्वोक्तनिषेधार्थः। तथा हि। अस्याऋचः पूर्वार्द्धे अग्निमाहात्म्यं व्यापनाय यद्धास्यद्वयेनार्थ
द्वयमुक्तं तावदेव न भवति किं तन्यदपि माहात्म्यमुच्यत इति भावः। वस्तोरित्यहर्नाम सुपठितं। प्रति व
स्तोः प्रत्यहं घुभिः पादाविशेषैर्घातनैर्वा दीव्यं नीति। दीव्यति धातोस्तदर्थवाचित्वादयमग्निः प्र
स्तोः प्रत्यहं द्युभिः ॥ इति प्रथमोनुवाकः॥ ॥ प्रथमेनुवाके गन्याधानमंत्रा उक्ताः। द्वितीये त्वग्निहो
त्रांतर्व्याहारः॥ इति प्रथमोनुवाकः॥
त्रमंत्रा उच्यंते॥ कास्या०॥ उपविश्य दक्षसमिधमादधात्यग्निज्योतिषमिति। पाठस्तु॥ अ
ग्निज्योतिषं त्वा वायुमंतीं प्राणवतीमिति। हे समित् स्वर्गाय स्वर्गसिद्ध्यर्थं नानाविधविशेषण
युक्तां त्वामुपदधामि। वह्नौ प्रक्षिपामि। कथंभूतां त्वां अग्निज्योतिषं अग्निसंबंधिज्योतिर्यस्याः
समिध्यते। निषद्यते तादृशी शुष्कायाः समिधः अग्निज्वालाहेतुत्वं प्रसिद्धं। वायुमतीं वायुस
हायोपेतां सति वायुसाहाय्यकाष्ठेषु ज्वालापद्धति भवति। प्राणवतीं बलवतीं प्राणो वै बलमिति
श्रुत्यंतरं। शुष्कतृणपर्णादिषु वह्निज्वालाः समिधिसहसा नश्यन्तीत्यर्थः। स्वर्ग्यां अनुष्ठातृ

णांस्वर्गहेतुंभास्वंतीअग्नेःसमिंधनेनसूर्यवत्प्रकाशोपेतां॥कात्या०॥प्रदीप्तामग्निंजुहोत्यग्नि
र्ज्योतिरिति।यासमित्प्रदीप्तातामग्निंलक्ष्यंजुहुयात्॥पाठस्तु।अग्निर्ज्योतिर्ज्योतिरग्निः
स्वाहेति।योयमग्निर्देवःसएवज्योतिर्हूयमानंज्योतिःस्वरूपं।यच्चेदंहूयमानंज्योतिस्तदं

अग्नेः

वाग्निर्देवःदेवस्यज्योतिषश्चकदाचिदपिअवियोगादेकत्वेनप्रतिपादनंज्योतिस्वाहाज्योती
रूपायाग्नयेहविःप्रदत्तं।सायंसायंकालीनोग्निहोत्रहोमः।अनेनैवनीत्याप्रातःकालेपिसमि
दाधानंहोमंचमंत्रद्वयेनकुर्यादितिकात्यायनेनाभिप्रेतं।तयोरुक्तयोःमंत्रयोःपाठस्तु।सू

६३

र्योज्योतिषस्वाहेति।पूर्वोक्ताग्निविषयमंत्रद्वयवदिदंपूर्वविषयंमंत्रद्वयंव्याख्येयं।काले
द्वयेमंत्रद्वयव्यवस्थांकण्वादिस्पष्टंदर्शयति।सजुहोत्यग्निर्ज्योतिर्ज्योतिरग्निःस्वाहेतिसा

६३

यंसूर्योज्योतिर्ज्योतिःसूर्यःस्वाहेतिप्रातरिति।सूर्यसंबंधियत्तेजोस्तितत्सर्वंरात्रावग्निं
प्रविशतितस्मात्सायंहोमेग्निर्ज्योतिरितिमंत्रःप्रयुक्तः।ननुतमर्थंश्रुतिःसंगच्छदर्शयति।
अग्निंवैवादित्यःसायंप्रविशतितस्मादग्निर्दूरान्नक्तंददृशेउभेहितेजसीसंपद्येते।उद्यं
तंचैवादित्यमग्निरनुसमारोहति।तस्माद्धूमएवाग्नेर्दिवाददृशइति॥कात्या०॥सजूरितिवेति।

जुहोत्यनुवर्तते।पूर्वोक्ताभ्यामग्निर्ज्योतिःसूर्योज्योतिरितिमंत्राभ्यांसहसजूरित्यादिकंमंत्रद्वयं
होमेविकल्पितमित्यर्थः।तत्रप्रथममंत्रपाठस्तु॥सजूर्देवेनस्वाहेति॥सवित्रादेवेनप्रेरकेणापर
मेश्वरेणसहसजूः।जुषीप्रीतिसेवनयोरितिधातुः।समानाजूःप्रीतिर्यस्यासोसजूः।तथाइं
द्रवत्याराज्याइंद्रेणदेवेनापितयारात्रिदेवतयासजूःसमानप्रीतिः।उक्तगुणद्वयवानग्निर्देवः।
जुषाणोस्मासुप्रीतियुक्तःसन्वेतुअस्मदीयंकर्मप्राप्नोतु।वीगतिप्रजननकांत्यसनखादने
ष्वितिधातुः।स्वाहातथाविधायाग्नयेहूयमानमिदंद्रव्यंदत्तं।द्वितीयमंत्रपाठस्तु।सजूर्देवे
नस्वाहेति।।अग्निमंत्रवदयंसूर्यमंत्रोव्याख्येयः।अत्रउषादेवतापूर्वोक्तरात्रिदेवतायाःस्था
नेयोजनीया।अत्राग्निमंत्रस्यरात्रिमर्तंकृष्णोव्याचष्टे।सजूर्देवेनसवित्रेति।सवितृम
प्रसवायसजूरात्र्येंद्रवत्याराज्याभिथुनीकरोति।ऽग्यत्लस्यदेवतासेंद्रदेवतांकरोतिजुषा
णोअग्निर्वेतुस्वाहेति।प्रत्यक्षंदत्तस्यैदेवतायैजुहुतियस्याअग्निहोत्रमिति।सूर्यमंत्रोपि
तथैवसजूर्देवेनसवित्रेत्येवप्रातरित्यादिनाव्याख्यातः॥कात्या०॥पुष्टिकामःस्याल्यास्तुवे

नेह पुष्टिमिति गार्हपत्ये इति। जुहोतीत्यनुवर्त्तते। सर्वहोमस्थालीरूपेण स्रुवेण कार्यः। पाठस्तु॥
इह पुष्टिं स्वाहेति। पुष्टिपतिः पुष्टिपालको देव इह कर्मणि पुष्टिं दधातु। पोषणं संपूर्तिं करोतु।
इहास्मत्कुले प्रजां पुत्रादिरूपां प्रजापतिः पुष्टिप्रजापालको देवो रमयतु क्रीडयतु। गृहपतये गृहपा
लकाय रयिमते धनवते पुष्टिपतये पुष्टिपालकायाग्नये गार्हपत्याय देवाय स्वाहा हविर्दत्तं॥ का॰ सा॰॥
अग्नयेन्नादायेति दक्षिणाग्नाविति। जुहोतीत्यनुवर्त्तते। पाठस्तु॥ अग्नयेन्नादायान्नपतये स्वा
हा। अन्नं पुरतः सग्रासं सर्वमत्तीत्यन्नादः। तथान्नपतिरस्मदीयान्नस्य पालकः। तथाविधायाग्न
ये स्वाहा हविर्दत्तं॥ अनमित्रं म इन्द्रः पश्चादिति द्वौ मंत्रौ जपार्थाविष्टव्यौ। तयोः पाठस्तु॥ अनमित्र
त्वं अस्य नाद्धिति। हे इन्द्र मम मे सर्वपर्युत्क्रान्तेन मम माधरां दक्षिणतः अनमित्रं। अनस्य प्राणस्य
मित्रं रक्षकं कृधि। कुरु। यद्वा अनमित्रं शत्रुरहितं स्थानं कुरु। तदानुडामच्छांदसः। तथा मे उदङ्केन्द्रः उ
तरतः अनमित्रं कृधि। मे मम पश्चात्। पश्चिमतः। अनमित्रं कृधीति वर्त्तते। मे मम पुरः पूर्वस्यां दिशि
अनमित्रं कृधि। अयमिन्द्रः पश्चाद्मम पश्चिमदिशि अस्मानभिपातु सर्वतः पालयतु। तथेन्द्रः
उदङ्कन्त्रात्मस्य सन्निधेरग्राक्दक्षिणार्थः।

२४

२४

पुरस्तात्सर्वस्यां दिशि अस्मानभिपातु तथेन्द्रो विश्वतः सर्वासु दिक्षु अस्मानभिपातु। अयमिन्द्रो
जिघांसतां अस्मान् हंतुमिच्छतां शत्रूणां मनांसि विषूचीना विष्वग्गमनानि उद्दिष्टं स्थानं वि
हाय अन्यगमनयुक्तानि यथा भवंति तथा व्यस्यतात्। असु क्षेपण इति धातुः। विशेषेण क्षिपतात्।
का॰ सा॰॥ समिधमादधाति सर्वे पुषधा पर्युक्षितं समिदसीति। पाठस्तु॥ समिदसि दीदिवस्व
मिति। हे अग्ने त्वं समिदसि अस्मदीयकाष्ठप्रक्षेपेण सम्यग् इध्यमानो दीप्यमानो भवसि। समि
द्धः स्मामिदीपितः सन् त्वमस्मदनुग्रहार्थं दीदिहि अतिशयेन दीप्यस्व। दिवी दीप्ति देवन्या
श्चिति धातुः। हे अग्ने ते तव समिद्धः सम्यग्दीपयिताहं दीघासं त्वत्प्रसादादतिशयेन दीप्तिमन्
यासं॥ इति द्वितीयोनुवाकः॥ ॥ द्वितीयेग्निहोत्रमंत्रा उक्ताः। तृतीयेग्न्युपस्थानमंत्रा उच्यं
ते॥ तस्योपस्थानस्य कर्त्तव्यतामग्नाउ हवे देवाः सर्वान्यदस्मिन्नि दधिर इत्येतदिना कण्वो ब
हुधा प्रपंचयामास॥ का॰ सा॰॥ सायमाहुत्यां हुतायां यजमानोग्नीउपतिष्ठेते उपप्रयंत इति।

अस्मिन्ननुवाके ब्रह्व उपस्थानमंत्राः तत्रायं प्रथमो मंत्रः । उपप्रयंतो ऽध्वरत इति । अध्वरं यज्ञं
उपप्रयंतः । उपगच्छंतो वयमनुष्ठातारो ऽग्नये ऽग्निप्रीत्यर्थं मंत्रं मननेन त्रातारं मंत्रं वक्ष्यामहे । वो
चेम । ब्रूयाम । कथंभूतायाग्नये आरे दूरे अस्मे अस्माकं समीप इति शेषः । शृण्वते दूरे स
मीपे चास्मदीयं वाक्यं श्रोतुमुद्युक्ताय । अस्य मंत्रस्य प्राथम्यं कण्वो दर्शयति । स उपवसा प्रथ
मयोपतिष्ठत इति । अथ द्वितीयः ॥ अग्निर्मूर्द्धा ऽजिन्वतीति । अयं इध्यमानो अग्निर्दिवो
द्युलोकस्य मूर्द्धा शिरः समानः यथा शिरः शरीरस्योपरि वर्त्तते तथायमग्निरहनि स्वते
जसा आदित्ये प्रविष्टत्वादादित्यरूपेण द्युलोकस्योपरि वर्त्तते । ककुत्ककुद्योगवां पृष्ठगलोन्न
देशात् पश्चादवस्थितमुन्नतावयवमांसं च यथा तद्वदयमादित्यरूपो ऽग्निः सर्वेषामुपरि वर्त्तमा
नत्वात् । ककुदित्युच्यते । तथा पृथिव्याः पतिः पालकः दाहपाकप्रकाशादिलौकिकवर्तिनामुप
कारकत्वात् तो ऽयमग्निरादित्यतुल्यः । अपां द्युलोकाद्वृष्टिरूपेण पततीनां रेतांसि साराणि
व्रीहियवादिरूपेण परिणतानि जिन्वति प्रीणयति वर्द्धयतीत्यर्थः । अस्य मंत्रस्य प्रियोत्कौ

तात्पर्यं कण्वो यथावाक्यं कर्त्माणं वदेदित्यादिना दर्शयामास ॥ अथ तृतीयः ॥ उभा वामिंद्राग्नी
आहुवध्या इति । इंद्रशब्देनात्राहवनीयो विवक्षितस्तस्य सर्वयज्ञसाधकत्वपरमैश्वर्योपेतत्वा
दग्निशब्देन गार्हपत्यः अग्नेर्नयनात् । तस्य तत्प्राधान्यं प्रथमतो भवति । तथाविधौ हे इंद्राग्नी वा
मुभौ युवां उभौ आहुवध्यै आह्वातुमिच्छामीति शेषः । किंच उभौ युवामुभौ राधसोन्नात् हविः
स्वरूपाद्धनसह मादयध्यै युगपदेककर्मणि हर्षयितुमिच्छामीति शेषः । उभा युवामुभौ इषां
इष्यमाणानां रयीणां धनानां दातारौ । अतो वामुभौ युवामुभौ वाजस्य सातये अस्मभ्यमन्नदास्य
नाय हुवे आह्वयामि । अस्यापि तात्पर्यं कण्व इत्थं दर्शयति । उभौ हि मे दातारौ संतौ दत्तमि
त्येवैतदाहेति । अथ चतुर्थः ॥ अयं ते योनिरिति । हे आहवनीय ते तवायं गार्हपत्यो योनिरु
त्पत्तिस्थानं । अत एवायमृत्वियः ऋतुयोग्यः कालः ऋतुः काल उच्यते । सायंप्रातरादौ तत्र सादि
केनेन तथाविधकालोपेतः । यतो यस्मात् ऋतुकाले ऽपि ता गार्हपत्यात् । जातः सन्नस्त्वं अरो
चथाः । कर्मकाले दीप्तिमानभूः । हे अग्ने आहवनीय जानन्यथोक्तं वृत्तांतमवगतं गार्ह

पसंस्खलनकंआरोहकर्मावसानेप्रविशः। अथानंतरंनोरयिंअस्मदर्थधनंपुनःपुनर्यजनकार
णांवर्द्धयसमृद्धंकुरु। एतस्यतात्पर्यंकण्वइत्थंदर्शयिति। पुष्टैवरयिर्यदस्माकंपुष्टंतन्नोऽग्रे
च्योभूयएवकुरु तन्नोवृद्धयेसैवतदाहेति॥ अथपंचमः॥ अयमिह विद्रोविद्रइति॥ अ
यमाहवनीयःइहकर्मानुष्ठानस्थानेप्रथमोमुख्यःसन् धातृभिरधायि। आधानकर्तृ
भिराहितोः तवल। कथंभूतोयंहोतादेवानामाव्हयितायजिष्ठः अतिशयेनयागोपयुक्तो
ध्वरेषुसोमयागादिषुईड्यः ऋत्विग्भिस्तुत्यः। अप्नवानोअपत्यनामसुपठितः। अप्नवा
नःपुत्रवंतः भृगवोऽनुवंशासन्नाः सर्वेमहर्षयः विद्रोविद्रोयजमानरूपायतस्मैतस्मै
मनुष्यायतदुपकारार्थंवनेषुग्रामाद्बहिर्यजनारव्येष्वरण्यप्रदेशेषुयमाहवनीयाख्यमग्निं
विरुरुचुर्विभ्रोबेणादिपर्वतवंतः कथंभूतमग्निं चित्रंविविधकर्मोपयोगित्वेनचित्रंभ
तरवविश्वंविभुत्वशालित्युक्तंये विरुरुचुः। अयमिहप्रथमइति सर्वत्रान्वयः। अस्याः
सर्वस्यथायाचभिस्यादिनाप्रयोक्ति परसंकण्वोदर्शयामास। प्रथमशब्दस्यमुख्यत्वार्थंपर

२६ २६

रत्वंतित्तिर्दर्शयति। अयमिहप्रथमोधायिधातृभिरित्याहमुख्यमेवैनंकरोतीति। अथषष्ठः॥
अस्यप्रत्नाम् ऋषिं। अस्याग्नेःसंबंधिनींप्रत्नांचिरंतनकालोपेतां द्युतमनुदीप्तिमनुस्यूतां। अह्रयः
ह्रीलज्जायामितिधातुः। लज्जारहिताः धाराः। ऋषिं। ऋषिगताविति धातुः। अर्षतिदोहिनःस्थाने
गच्छतीत्यृषिर्गौः तांगांशुक्रंपयः श्वेतवर्णंदुग्धंदुदुह्रे अग्निहोत्रहोमार्थंदुग्धवंतः। सायंदोह
नकाले अग्निसंबंधिप्रकाशाभावे दुह्यमानंक्षीरंभूमौपतिष्यतीत्येवं दोग्धृणांलज्जाभवति।
सत्संदीमोत्स्वेदनशंकानुदयाल्लज्जादोषोनास्तीत्यर्थः। सहस्रसामित्येतत्गवोविशेषणं। षोंत
कर्मणीतिधातुः। सहस्रसंख्याकानिकर्माणिक्षीरदध्याद्युपरूपहविःप्रदानेन। स्यतिसमाप
यतीसहस्रसा। तादृशींगांदुग्धवंतइत्यर्थः। तत्रसहस्रसामित्येतस्यतात्पर्यंकण्वोव्याचष्टे।
एषावैपरमासनिर्यत्सहस्रसनिरिति॥ अथसप्तमः॥ तनूपाअग्नेसि तन्वंमेपाहीति। हेअ
ग्नेत्वंतनूपाअसि। शरीराणांपालकोसि। सतिक्षुदाग्नौभुक्तेन्नेजीर्णेसतितुशरीराणिपा
ल्यंते। अतोनेममतन्वंशरीरंपाहि। पालय॥ अथाष्टमः॥ आयुर्दाअग्नेस्यायुर्मेदेहीति। हेअग्ने

त्वं आयुर्दा असि। आयुर्दाता असि। यावंतं कालं वपुष्युदराग्नेरौष्ण्यमुपलभ्यते। तावंतं कालं न म्रियत
इति हि प्रसिद्धं। अतो मम मापमृत्युपरिहारेणायुर्देहि॥ अथ नवमः॥ वर्चोदा अग्नेसि वर्चो मे देहीति।
हे अग्ने त्वं वर्चोदा असि। वर्चसो वैदिकानुष्ठानप्रयुक्त तेजसो दातासि। अतो मे त द्वर्चो देहि। त
देतत्त्वे आहितान्ने लोके प्रसिद्धं॥ अथ दशमः॥ अग्ने यन्मे तन्वा ऊनं तन्म आपृणेति। हे अग्ने
मे तन्वाः मदीय शरीरस्य यदंगं चक्षुरादिरूपं तस्यापि यदूनं दृष्टिपाटवादिरहितं मे तदंगमा
पृण सर्वतः पूरय चक्षुषा इत्यादि मंत्रं त्र वर्तुष्ट्यतामर्थं कण्वोयदेवेकवाचाकर्म वायुष्यावे सा
दिनाविस्पष्टमुवाच। अथैकादशः॥ इंधानास्त्वा शतं हिमा इति। हे अग्ने त्वां शतं हिमाः अस्मद
युषि विद्यमानान् शतसंख्याकान् संवत्सरान्। समिधीमहि वयं नैरंतर्येण दीपयामः सम्यक्
कथंभूता वयं इंधानास्त्वदनुग्रहेण दीप्यमानाः। वयस्वंतोन्नवंतः सहस्वंतो बलवंतः। अ
दभ्यासः केनाप्यहिंसिताः। कथंभूतां त्वां द्युमंतं दीप्तिमंतं। वयस्कृतं वयोन्नं करोतीति वयस्कृतं।
सहस्कृतं सहो बलं करोतीति सहस्कृतं तं। सपत्नदंभनं सपत्नानां शत्रूणां हिंसितारं अदाभ्यं।

केनापि हिंसितुमयोग्यं। अत्र हिमा इत्येतस्य पदस्य संवत्सरवाचित्वं कण्वो व्याचष्टे। शतं वर्षाणि
जीव्यासमित्येवैतदाह। शतं हिमा इतीति॥ अथ द्वादशः॥ चित्रावसो स्वस्ति ते पारमशीयेति।
हे चित्रावसो रात्रे चित्राणि विविधानि वंदनक्षत्रांधकाररूपाणि वसंति यस्यां रात्रौ सा चित्राव
सुः। अतएव तित्तिरिराह। रात्रिर्वै चित्रावसुरिति। कण्वोपि विस्पष्टमाह। रात्रिर्ह वा चित्रावसु
रेषा हीमानि चित्राणि संगृह्येव वसति। तस्मान्नक्तं तारका चित्रं ददृश इति। हे रात्रे ते तव पा
रं समाप्तिं स्वस्ति क्षेमो यथा भवति तथा अशीय व्याप्नवानि। इहलोके हि रात्रौ मानुष्येषु निद्रा
गतेषु तस्करा गृहं प्रविशंति। तद्वदत्र देवयजने रक्षांसि प्रविशंतीति तद्भयात् तन्निवारणार्थं
रात्रिदेवतां प्रार्थयते। अथ त्रयोदशे मंत्रे किंचिद्विनियोगविशेषमाह॥ का। सा०॥ सं त्वमिस्तु
पविशयेति। पूर्वैः मंत्रैरुत्थायोपस्थानं। अत्र तूपविश्येति विशेषः। पाठस्तु॥ सं त्वमग्नेऽभिष्यी
येति॥ हे अग्ने त्वं सूर्यस्य वर्चसा सूर्यसंबंधिना तेजसा समगथाः। रात्रौ संगतोसि। आग्ना
वादित्यः सायं प्रविशतीति हि श्रुत्यंतरं पूर्वमुदाहृतं। कण्वोप्येतदुदाजहार सजपतिसंत्वमग्नेसूर

र्यस्य वर्चसागतौ थाइतियदेनं सूर्यः प्रविशतीति ॥ किंच ऋषीणां मंत्राणां संबंधिना स्तुतेन स्तो
त्रेण समगधाः । बहवो हि मंत्रा अग्निं स्तुवंति प्रियेण प्रीतिविषयेण धाम्ना स्थानेन नाम्ना
जन्मना च समगध्वाः ॥ निरुक्तकारो हि धामानीति शब्दस्य यत्क्रमर्थत्रयं दर्शयति । स्थाना
नि नामानि जन्मानीति चेति । यथा त्वमुक्तैर्गुणैः संगतोसि । एवमहमपि त्वत्प्रसादादायुषा अ
पमृत्युदोषरहितेन संगमिषीय संगतो भूयासं । तथा वर्चसा विद्यैश्वर्यादिप्रयुक्तेन तेजसा सं
गमिषीय । तथा प्रजया पुत्रादिकया संगमिषीय । तथा रायस्पोषेण धनस्य पुष्ट्या संगमिषीय ॥
अथ चतुर्दश विंशोषं कात्यायन आह ॥ गाग्न्वृ संधस्थेति ॥ कण्वोप्येतदाह ॥ अथ गामुपे

२८

संधस्थेति ॥ पाठस्तु ॥ अंधस्थांधो वो भक्षीयेति । हे गावो यूयं अंधस्थ अन्नरू

२८

पाः स्थ क्षीराज्यादिरूपस्यान्नस्य जनकत्वादन्नत्वोपचारः अतो भवत्प्रसादाद्वो युष्मान् संबं
धि अंधः क्षीराज्यादिरूपमन्नं भक्षीय सेवय । भज सेवायामिति धातुः । तथा महस्थ प
ज्यरूपाः स्थ मह पूजायामिति धातुः । वो युष्माकं पूज्यानां प्रसादादहमपि महो भक्षीय पूज्य

त्वं सेवेय । गो नं पदाः स्पृश्य बे सादिस्मृतेर्गवां पूज्यत्वप्रसिद्धिः ॥ तमेतां प्रसिद्धिं हि शब्दे नतित्तिरिः स
वयति । महस्थ महो वो भक्षीय साहं महो स्थेत इति । तथा ऊर्जस्थ बलरूपाः स्थ गोः संबंधि क्षीरा
देर्बलहेतुत्वाद्बलरूपत्वोपचारः । ऊर्ज बलप्राणनयोरिति धातुः । वो युष्माकं प्रसादादूर्जं भक्षी
य । तथा रायस्पोषस्थ धनपुष्टिरूपाः स्थ वेश्या हि क्षीराज्यादिविक्रयेण धनं पुष्टीत अतो धन
पुष्टित्वोपचारः वो युष्माकं प्रसादाद्रायस्पोषं धनपुष्टिं भक्षीय सेवय ॥ अथ पंचदश ॥ रेवती
रमध्वं मायगातेति । हे रेवतीः धनहेतुत्वेन रेवत्यो हे गावः अस्मिन्योनावुद्दृश्यमानेग्निहोत्रहविर्दो
हस्थाने रमध्वं क्रीडध्वं तथादोहनादूर्ध्वं अस्मिन्गोष्ठे यजमानसंबंधिनि गोवाटे रमध्वं । ततो
रात्रावस्मिन्क्षये यजमानसंबंधिनि गृहे रमध्वं । गोवाटशब्देन गृहाद्बहिर्विस्तीर्णेन संचारदे
शोभिहितः । सर्वदास्मिंल्लोके । लोकदर्शने इति धातुः । यजमानसंबंधिदृष्टिविषये रमध्वं । किं
बहुना इहैव एतस्मिन्यजमानसंबंधिदृष्टिविषये स्थाने एव स्त । यूयं भवत । इतोस्मद्यजमा
नस्थानान्मापगात । अपेत्य मा गच्छत । तत्र रेवतीशब्दस्य गोवाचित्वं कण्वो दर्शयति । पशवो

वैरेवंतस्तस्मादाहरेवतीरमध्वमितीति ॥ तित्तिरिश्चैतद्दर्शयति । रेवतीरमध्वमित्याहपशवोवै
रेवतीरिति । षोडशोविशेषमाह । कात्यायनः ॥ सधहितेत्यालभतेइति । गामित्यनुवर्तते । कण्वो
धिस्यष्टमो । तदाह । अथगामभिस्पृशतिसधहितासीति ॥ पाठस्तु ॥ सधहितासिगोपत्येनेति ॥
हेगोस्त्वंसधहितासि । क्षीराज्यरूपहविर्दानाययज्ञियैः कर्मभिः संयुक्तासि । विश्वरूपीश्रुक्लक्ष्ण
ष्णादिभिर्बहुभीरूपैर्युक्तासती उर्जाक्षीरादिरसैः मगोपत्येनबहुविधगोस्वामित्वेनमाविश
मांसर्वतः प्रविश । त्वत्प्रसादान्ममबहुविधोरसोबहुविधगोस्वामित्वंचसंपद्यतां । सप्तदशोविशे
विशेषमाह । कात्या० ॥ गार्हपत्यंसंमुखोपतिष्ठतउपत्वेतीति । कण्वोप्याह । अथगार्हपत्यमुपेत्यु
पत्वेतीति । पाठस्तु ॥ उपत्वाग्नेदिवेदिवेदोषावस्तर्धियावयंनमोभरंतएमसीति ॥ हेदोषावस्तरग्नेदोषारात्रिस्तस्यामपिवसति

१९

अजस्रंधार्यमाणत्वान्नोपक्षाम्यतीति दोषावस्तः । तथाविधहेगार्हपत्यस्वदिवेदिवेप्र
तिदिनंवयंयजमानाधियाश्रद्धायुक्तयाबुध्यानमोभरंतः नमस्कारंसंपादयंतः उपस
मीपेत्वाएमसि त्वांप्रत्यागच्छामः । अष्टादशः ॥ राजंतमध्वराणांदमइति ॥ राजंतंदीप्य

दीप्यमानंधातोर्गुणस्यार्थः । अस्यासस्येकारः । इतिरावद्धिसिद्धिः । अष्यासाधिदेनपक्षेप्येवं १ =

मानंअध्वराणांगोपांयज्ञानांगोप्तारंऋतस्यसत्यवचनलक्षणस्यव्रतस्यदीदिविंदीपयितारं
स्वेदमेअस्मदीयेगृहेवर्द्धमानंचातुर्मास्यपश्वादिभिरभिवर्द्धिंगच्छंतंत्वामुपेमो सन्नुवर्तते । अ
त्रवर्द्धमानस्यशब्दस्यतात्पर्यंकाण्वोदर्शयति । यदस्माकंपुष्टंतन्नोभूयोभूयएवकुरु तन्नोवर्द्धय
स्वैतदाहेति ॥ अथैकोनविंशः ॥ सनः पितेवसूनवेग्नेसूपायनोभव सचस्वानः स्वस्तयइति हेअग्नेगार्हपत्यअत्रपूर्वोक्तगुणयु
क्तस्त्वन्नोस्माकंसूपायनोभवसुखेनप्राप्तुंशक्योभव । तत्रदृष्टांतः सूनवेपितेवयथापुत्रायपि
तान्यंविनासुखेनप्राप्तुंशक्यस्तद्वन्नोस्माकंस्वस्तयेक्षेमायसचस्वअनेनकर्मणासमवेतोभव । सचसमवायइतिधातुः । यद्वासचस्वसेवस्वषचसेवनइतिधातुः । अत्रदृष्टांततात्पर्यंक
ण्वोदर्शयति । यथापितापुत्रायसूपचरएवंनःसूपचरएधीत्येवैतदाहेति ॥ अथविंशः ॥ अग्नेत्वंनो
अंतमउतत्राताशिवोभवावरूथ्यइति । हेअग्नेगार्हपत्यत्वंनोस्माकंअंतमः अंतिकतमःसर्वदासमीपवर्तीभवेत्यन्वयः । उतापिच । त्राता पालयिताशिवः । दुर्गंतः वरूथ्यः पुत्रपौत्रादिसमृहो वरूथ्यस्तस्मैहितो
वरूथ्योभव । इमंमंत्रमारभ्यचतस्रऋचोद्विपदाः । तासांपुरुषरूपायत्स्याचनेतात्पर्यं कण्वो

दर्शयिति। पुरुषछंदसं वै द्विपदा द्विपाद्ध्ययं पुरुषः पुरुषान्वाएतत्पावतइति॥ अथैकविंशः॥ वसु
रग्निर्वसुश्रवा इति। हे गार्हपत्याग्ने हविष्मान्स्य वसुर्जनानां वासयिता। वसुश्रवाः वसुना धनेनेनत्र
वः कीर्तिर्यस्यासौ वसुश्रवाः धनप्रदोयमित्येवमस्य कीर्तिर्महती अच्छ निर्मलस्वरूपो हे अग्ने
निक्षि अस्मदीयं होमस्थानं नक्षि। गच्छ। नक्षगताविति धातुः। यद्यद्राव यंहो घ्यामस्तदा तद
स्माग बे स धः। द्युमत्तमं दीप्तिमत्तं वर्ण विशेषयुक्तं रयिं धनं दाः देहि। अथद्वाविंशः॥ तन्त्वा

न ६

शोचिष्ठ दीदिव इति। हे शोचिष्ठ दीप्तिमत्तं दीदिवः सर्वस्य दीपयितः। तं पूर्वोक्तगुणयुक्तं
त्वामग्निं सुम्नाय सुखार्थं सखिभ्यः अस्मदीयानां सखीनामुपकाराय च नूनं निश्चयेन ईम
हे याचामहे॥ अथत्रयोविंशः॥ स नो बोधि श्रुधी हवमिति। हे अग्ने स त्वं नो अस्मान्वसवे व

१०० १००

कान् बोधि बुध्यस्व। हवमस्मदीयाह्वानं श्रुधि शृणु। समन्ना! सर्वशब्दपर्यायः। अघं पापं
अस्मानिच्छती स धाघायतः शत्रुः सं मस्मादघायतः॥ सर्वस्मादस्मदीयशत्रोर्नोऽस्मान् उरु
ष्य पालय उरुष्यतिस्तु रक्षणकर्मा चित्तुर्विंशो विभाह॥ अथचतुर्विंशः॥ कास्या०॥ गां गच्छति

विंशो

च्छे हीति। हे इळे एहि हे अदिते एहि। आगच्छ होमस्थानमिति शेषः। इडा मनोर्दुहिता। अदितिर्देवमाता।
इडा मनुमित्वा स्मानस्तु। अदितिरादित्योर्दितिवित्। अतस्मिन्नूतच्छब्दस्त धर्मनिर्देशार्थः। इळा
दिशब्दानां गोपरत्वं कात्वादर्शयिति। इळा हि गौरदितिर्हि गौः काम्या हि गोरिति॥ कास्या०॥ का
म्यरहीस्यालज तद्विति। पाठस्तु॥ काम्य एहि मूयादिति। हे काम्ये सर्वैः कामयितव्ये धेनो एहि।
अस्मद्धोमीयस्थानमागच्छ यि। वो युष्माकं गवां कामधरणं अपेक्षितफलधारकत्वं यदस्ति
तमप्यनुष्ठातरि भूयाल। अस्तु। युष्मत्प्रसादादहमभीष्टफलस्य धारयिता भूयासमित्यर्थः। अ
त्र माध्यवट्टस्यस्यतात्पर्यं कण्वो दर्शयिति। मयि कैवः कामधरणं भिसहवः प्रियो भूयासमित्ये
वैतदाहेति॥ अथषड्विंशः॥ सोमानं स्वरणमिति। सुत्रू अभिषव इति धातुः। तस्मान्मभि
म्नसयेन कारांतौ सोमानमभिषोतारं स्वशब्दोपतापयोरिति धातुः। स्वरणं शब्दयितारं हे
ब्रह्मणस्पते वेदपाल कारणेसो मयागकर्तारं स्तुतिरूपशब्दयुक्तं च मामभिसंध्याहारः। कृणु
हि कुरु। तत्रोपमानमुच्यते कक्षीवंतं कक्षीवन्नामकं महर्षिं यथा सोमयागयुक्तं स्तुतियुक्तं च

कृतवानसि। तथा मां कुरु। उपमानद्योतनाय इवशब्दोत्र लुप्तो द्रष्टव्यः। कोसौ कक्षीवानिति सोभि
धीयते यः पुमान् औशिजः। उशिजः पुत्रः। तं कक्षीवंतमिति योजनीयं। सोयमर्थो यास्केन स्पष्टीकृतः।
सोमानं सोतारं प्रकाशनवंतं कुरु कृणुहि ब्रह्मणस्पते कक्षीवंतमिव य औशिजः कक्षीवान् औ
शिजः उशिजः पुत्रः इति। सोमानमित्येतस्य तात्पर्यं तित्तिरिरपि स्पष्टं दर्शयति। सोमानं स्वरणं सो
मपीथमेवावरुंध इति। अत्र सोमानमित्यादेस्तृचस्य लोकत्रयोपस्थानभावनायां तात्पर्यमाह
कण्वः। यदाहवनीयमुपतिष्ठते दिवं तदुपतिष्ठते यद्गार्हपत्यं पृथिवीं तथैतदंतरिक्षमुपतिष्ठ
ते तस्माद्ब्राह्मणस्य येन तत्त्वेनोपतिष्ठत इति॥ अथ सप्तविंशी॥ यो रेवान्यस्तुर इति॥ यः पुत्रो
रेवान् धनवान् पुनरपि यः पुत्रो अमीवहा अमीवस्य रोगस्य हंता। वसुवित् वसुनो धनस्य सा
रं तत्त्वं वेत्तीति वसुवित्। पुष्टिवर्द्धनः पोषणस्य वर्द्धयिता पुनरपि यः पुत्रः तुरस्त्वरायुक्तः शीघ्रका
री स तादृशः पुत्रोग्नेः प्रसादान्नोस्मान् सिषक्तु सेवतां। तथा च यास्केन व्याख्यातं। स नः सेवतां
यस्तुर इति॥ अथाष्टाविंशी॥ मा नः शंसो अररुष इति। रा दाने इति धातोः क्वसुः तस्य षष्ठ्ये
कवचनं अररुषः इति दानं कृतवत इत्युक्तं भवति। तस्य निषेधादररुष इत्युक्ते कदाचिदपि हविर्दान

मकृतवत इत्यर्थः संपद्यते। तादृशस्य मर्त्यस्य मनुष्यस्य शंसः प्रशंसिता धूर्त्तिः कर्माननुष्ठानप्रशंसा
रूपेण धौर्त्येन युक्तः पुत्रो नोस्मान् मा प्रणक् प्रकर्षेण मा व्याप्नोतु। न हिंस्यादित्यर्थः। यद्वा
पृची संपर्के इति धातुः। मा प्रणक् प्रकर्षेण मा विनाशयत्वित्यर्थः। हे ब्रह्मणस्पते नोस्मा
न्रक्ष। नास्तिकः पुत्रो यथा नो संधत्ते तथा पालय॥ अथैकोनत्रिंशी॥ महि त्रीणां वरुणस्ये
ति॥ योयं मित्रः यश्चार्यमा यो वरुणः एतन्नामकानां त्रीणां त्रयाणां देवानां संबंधि अवः पा
लनं अस्तु भवतु। कथंभूतमवनं महि महत्। सर्वविद्विनाशकं। द्युक्षं द्युमंति सुवर्णादि
द्रव्याणि क्षियंति निवसंति यस्मिन् पालने तथाविधं। दुराधर्षं अन्यैराधर्षयितुं तिरस्कर्तुं
अशक्यं अत्र महि त्रीणामित्यादि तृचस्य मध्ये नाध्वसु वारणेष्विति यदुक्तं तस्य द्युलोकभूलोकयो
र्न सर्वमार्गाभिप्रायं कण्वो दर्शयति। इमे वा अध्वानो वारणा यदंतरा द्यावापृथिव्यौ स्तेनैवैतदुप
तिष्ठत इति॥ अथ त्रिंशी॥ नहि तेषां शंस इति अमाशब्दो गृहनामसु पठितः। अपि यस्मिन्न
र्थे चनशब्दो वर्त्तते अमा चन गृहेपि वर्त्तमानानां तेषां मित्रार्यमवरुणाख्यैस्त्रिभिर्देवैः पालितानां
यजमानानामुपद्रवायेति शेषः। अघशंसः सर्वदा पापस्य प्रशंसको रिपुः शत्रुः न ईशे न समर्थो

भवति खलु। तथा वारणेषु चोरव्याघ्रादिषु भयवरुणान्निवारितेष्वपि अध्वसु मार्गेषु रिपुर्नेनो बा
धितुं न समर्थः। मित्राभिर्दिभिः पालकानामस्माकं गृहेऽरण्ये वा नास्ति। चोरादिबाध इत्यर्थः।।
अथैकविंशः।। तेहि' अजस्रमिति।। अदितेरखंडितेरक्ते देवमातुः पुत्रासः। पुत्रास्ते पूर्वो
क्ता मित्रार्यमवरुणाः मर्त्याय मनुष्याय यजमानाय अजस्रं निरंतरं अनुपक्षीणं ज्योतिः तेजः यच्छंति
प्रयच्छंतु किमर्थं जीवसे जीवितुं यथा चिरंजीवनं भवति तथा तदुपायज्ञानं प्रयच्छंतु।। अथ द्वावि
शः।। कदाचन' प्रच्यत इति। हे इन्द्र परमैश्वर्ययुक्त कदाचन अस्माभिः पुनःपुनर्याच्यमानः स
न् कदाचिदपि स्तरी नासि हिंसको न भवसि न कृपणोसीत्यर्थः।। किंच हे मघवन् धनवन् दाशुषे
हविर्दत्तवते त्वदनुग्रहार्थं उपोपन् संतत्सौपे इन्द्र नु क्षिप्रमेव दृश्च इव एवकारार्थः नु शब्दः क्षि
प्रवचनः स्तवसि सवस्ते असंतानुग्रहेण सेवकवत् क्षिप्रमेवातिसमीपमागच्छसीत्यर्थः। देव
स्यते प्रकाशप्रकाशमानस्य तव भूयोदानं बहुतरं फलदानं प्रच्यते यजमानेन संयुज्यते। अ
त्रैन्द्रावरुणस्य तासर्यं कण्वो दर्शयति। इन्द्रो यज्ञस्य देवता सैव मेवैतदग्न्युपस्थानं करोतीति।।
अथ त्रयस्त्रिंशः।। ।। तत्सवितुः' प्रचोदयादिति।। यः परमेश्वरो अंतर्यामी नोस्माकं धि

१०२

१०२

योधीः कर्माणि प्रचोदयात् सत्कर्मानुष्ठानाय प्रकर्षेण प्रेरयति। तस्य देवस्य द्योतनात्मकस्य सवितुः प्रेरक
स्यांतर्यामिणो भर्गः सर्वपापानां सर्वसंसारस्य भर्जनसमर्थं तेजः सत्यज्ञानादिवेदांतप्रतिपाद्यं वरे
ण्यं वरेण्यं सर्वैः प्रार्थनीयं यदस्ति तत् धीमहि तादृशं तेजो ध्यायामः। सवितृपदस्य तात्पर्यं
कण्वो दर्शयति। सविता वै देवानां प्रसविता तथो हास्माएते सवितृप्रसूताः सर्वे कामाः समृध्यंते
इति।। अथ चतुस्त्रिंशः।। परिते' [illegible]ति।। हे अग्ने ते तव रथोस्मान्यजमानान् विश्वतः सर्वासु
दिक्षु पर्यश्नोतु परितो व्याप्नोतु। कस्यांचिदपि दिशि अस्माकं परिरक्षणाय व्याप्नोतु।
कथंभूतो रथः दूळभः दुर्दभः। छांदसो वर्णविपर्ययः। दभ्नोति बधकर्मा दुःखेन दभ्यते केनापि हि
हिंसितुमशक्य इत्यर्थः। येन रथेन दाशुषे हविर्दत्तवते यजमानाय तदुपकारार्थं रक्षसि। र
क्षां करोषि। स रथः पर्यश्नोत्वित्यन्वयः। स्वमिद्धोमया सम्यक् प्रदीपितस्त्वं प्रजया च पुत्रादिक
या धनेन च सुवर्णादिना गोसमृद्ध्या च मां यजमानं समृद्धं कुरु। दाशुष इति पदं कण्वो व्याचष्टे। य
जमानो वै दाश्वानिति।। ।। तृतीयोनुवाकः।। ।। तृतीयेनुवाके विस्तरेणाग्न्युपस्थानमं
त्रा उक्ताः। चतुर्थे संक्षेपेणाग्न्युपस्थानमंत्रा उच्यंते।। का स्या।। भूर्भुवः स्वरिति वेति। वात्रा

दोषिकल्प्यार्थः पूर्वोक्तेनोपप्रयंत इत्यादिनावाक्ष्यमाणेन भूर्भुवः स्वरित्यादिनाद्वयोरन्यतरेणा
नुवाकेनोपस्थानं कुर्यादित्यर्थः॥ मं प्रथममंत्रेण कण्वोप्येतदुपस्थानं दर्शयति। सवाअग्निहोत्रं हु
त्वासायमुपतिष्ठते भूर्भुवः स्वरितीति॥ पाठस्तु॥ भूर्भुवः स्वः ''पोषैरिति हे अग्ने भूर्भुवःस्वः भू
रादिव्याहृतित्रयात्मकः तदर्थभूतलोकत्रयात्मको वासि। अतस्त्वत्प्रसादादहं यदा प्रजया बंधुत्व
स्याद्रिरूपयायुक्तःस्यां तदानीं सुप्रजाः अनुकूलत्वेन शोभनाः प्रजायस्य। ममतादृशो भूयासं
सं। तथा वीरैः स्वस्वकार्येषु शूरैर्यदायुक्तःस्यां तदानीं सुवीरः शास्त्रीयमार्गवर्तित्वेन पुत्रयुक्तो भूया
सं। तथा पोषैर्हिरण्यपश्वादिपोषणैर्यदायुक्तःस्यां तदानीं सुपोषः बहुभिर्धनैः हिरण्यादिभिर्यु
क्तो भूयासं॥ द्वितीयतृतीयमंत्रयोर्विनियोगमाह॥ कात्या०॥ प्रवत्स्यन्नुभौ नर्येति प्रतिमंत्रमिति।
कण्वोप्याह॥ अथ खलु प्रवत्स्यन्गार्हपत्यमेवाग्रउपतिष्ठतेथाहवनीयमिति। यदा यजमानो ग्रामां
तरं गंतुमिच्छति तदानीं तु आहवनीयगार्हपत्याग्नी मंत्रद्वयेनोपतिष्ठते॥ तयोः पाठस्तु॥ नर्य

प्रजां मे पाहीति। हे नर्य नरेभ्यो यजमानेभ्यो हित गार्हपत्य मे प्रजां पाहि। हे शंस्यानुष्ठातृभिः
शंसितुं योग्याहवनीय मे मे पशून्पाहि॥ चतुर्थपंचमयोर्विनियोगमाह॥ कात्या०॥ उपतिष्ठत ओ

१०३

हवनीयगार्हपत्यावागन्मेति शांतिमंत्रमिति। ग्रामांतरं गत्वा प्रत्यागतो यजमानो मंत्राभ्यामाह॥ वनीयगार्ह
पत्यावुपतिष्ठेत। कण्वोप्येतदुभयं दर्शयति। स आहवनीयमुपतिष्ठत आगन्मेति। स गार्हपत्यमुपतिष्ठते॥ अ
यमग्निरिति॥ आहवनीयार्थमंत्रस्तु॥ आगन्म ''आयच्छस्वेति। विश्वं वेत्ति वेदयतीति वा विश्ववेदाः तं सर्व
ज्ञं अस्मभ्यामस्मदर्थं वसुवित्तमं अतिशयेन वसुनो धनस्य वेदितारं लब्धारं विद्लृ लाभ इति धातुः तथा
विधमाहवनीयमुद्दिश्यागन्म वयं ग्रामांतरात्प्रत्यागताः। सम्यग्भ्राजते दीप्यत इति सम्राट् हे तथाविधाग्ने
हे आहवनीय अग्ने द्युम्नं सर्वतोवस्थितं धनं अभिसहः॥ सर्वतः शत्रून्निर्जित्य भवितुं बलं आयच्छस्व। दाण् दाने
इति धातोर्यच्छादेशः॥ धनं बलं चानीयास्मभ्यं देहि॥ गार्हपत्यार्थमंत्रपाठस्तु॥ अयमग्निर्गृहपति ''आयच्छ
स्वेति अयं पुरोवस्थितो गार्हपत्य एतन्नामकोग्निर्गृहपतिर्गृहस्य पालकः प्रजावान् अस्मदीयपुत्रपौत्रा
दिस्वामी वसुवित्तमः॥ प्रजानुग्रहार्थमितिशयेन धनस्य लब्धा। अन्यत्पूर्ववद्व्याख्येयं॥ षष्ठे विनियोगमाह॥

॥का०सा०॥ गृहामाबिभ्रीतेतिगृहानुपैतीति। ग्रामांतरागतः स्वगृहान्प्राप्नुयात्। कण्वस्त्वेवमाह। सउपति
तिष्ठते गृहामा बिभ्रीतेति॥ पाठस्तु॥ गृहामा मोदमान इति॥ हे गृहामा बिभ्रीत। पालको यजमानो
गत इति नयंमा कार्षिष्ट मावेपध्वं यः कोपि भ्रातृतुरागसविनाशयिष्यतीति बुध्या मनसि कंप
नंमाकार्षीष्ट्वायतो यूयंतु ऊर्जं बिभ्रतः अन्नं संपूर्णं धारयमाणान्। युष्मान्प्रति एम सिआ
गताः स्म। यथा० यूयंतु ऊर्जं बिभ्रतः तथाहमप्यूर्जं बिभ्रद्धारयन् सुमनोः शोभनमनस्कः सु
मेधाः शोभन धारणाप्रलोपेतः मनसादुःखरहितेन मोदमानो हृष्यन् गृहान्वो गृहरूपान्यु
ष्मान्प्रति एमि आगच्छामि॥ अथसप्तमः॥ येषामध्येति आनतइति। प्रवसन्देशांतरं गच्छन्यं
जमानो येषामध्येति द्वितीयार्थे षष्ठी। इकूस्मरण इति धातुः। तथाविधान् गृहान्स्वस्तिय
धान्नवति तथास्मरति गृहविषयं स्नेहं सर्वदा चिंतयतीत्यर्थः। तथा येषु गृहेषु यजमानस्य सौ
मनसो बहुः सुमनसो भावः सौमनसं प्रीत्यतिशयः सच भूयान् गृहानुपह्वयामहे तान्
प्रीतिविषयान् आह्वयामः। गृहाभिलिमानी देवो अस्मत्प्रेमी पेसमागच्छतीति सर्वदा यज

१०४

१०४

मानः ते च गृहदेवा जानन्तु उपकारार्थं जिज्ञासन्तो अस्मान् जानंतु एते भूतद्धान भवंतीत्यवगच्छंतु।
॥अथाष्टमः॥ उपहूता इह गृहेषु न इति। इह गृहेषु गावउपहूताः धेनवो बलीवर्दाश्च सुखेन
तिष्ठंति स्त्वि सेवमनुज्ञाताः तथा इह गृहेषु अजावयः। अजाश्चाविश्च जातिद्वययुक्ताः पशवउपहूताः
सुखेन वर्त्तंतामित्यस्माभिरनुज्ञाताः। अथो अपिच अन्नस्य कीलालः अन्नसंबंधी रसविशेषो
नो अस्मदीयेषु गृहेषु उपहूताः समृद्धो भवत्वित्येवमस्माभिरनुज्ञाताः। नवमे विशेषमाह। का०सा०॥
क्षेमायवइतिप्रविश्यालीति। पाठस्तु॥ क्षेमायवः शंयोरिति। हे गृहा वो युष्मान्प्रपद्ये प्राप्नोमि। किम
क्षेमाय शंयोः
र्थं क्षेमायविद्यमानस्य वस्तुनोरक्षणं क्षेमस्तदर्थं तथा शंसे मम सर्वानिष्टशमनाय। शंयोः
शमितिसुखनाम तत्कामयमान इति शंयुः। इदंयुरिदंकामयमान इति यास्केनोक्तत्वात्। तादृशा
स्य मम निर्विघ्नागमनमिति द्विः सुखनामनी। तत्राद्यमैहिकं द्वितीयमामुष्मिकं उभयविधं सुखं भूयादि
तिशेषः। शंयोरित्यभ्यासो आदरार्थः॥ ॥इति चतुर्थोनुवाकः॥ ॥चतुर्थे संक्षेपणागृहोपस्था
नमंत्राउक्ताः। पंचमेवरुणप्रघासमंत्राउच्यंते॥ चातुर्मास्याख्ययागः पर्वचतुष्टयात्मकः॥ वैश्व

देववरुणप्रघासससा ॥ कमेधशुनासीरीयाख्यानिचत्वारिपर्वाणि। तत्रवरुणप्रघासाख्येद्वितीयपर्वणिदक्षिणोत्तरयोर्द्वयोर्वेद्योर्हविःप्रघासादितेषुप्रतिप्रस्थातापत्नीमुदानयन्नुजारंतदीयंपृच्छेत्तस्यापितंजारंब्रूयात्। तदाहकण्वः॥ सपत्नीमुदानयतितदानेष्यन्पृच्छतिकेनचरसीतिवरुण्यंहवाएतत्स्त्रीकरोतियदन्यस्यसत्यन्येनचरतीति। वरुण्यमकृत्यत्वेनतन्निवारणीयमित्यर्थः। तिन्तिरिष्वप्येतत्सर्वंविस्पष्टमाह। पत्नीवाचयतिनैमेध्यामेवैनांकरोति।

प्र॰

अथैनांतमरवेनानुपर्यतियज्जारंसन्तन्नब्रूयात्। प्रियंज्ञातिरुंध्यात्। असौमेजारइतिनिर्दिशेत्। निर्दिश्यैवैनंवरुणप्रघासेनग्राहयतीति॥ आपस्तंबोप्येतद्दर्शयति। प्रतिप्रस्थातापत्नीमुदानयिष्यन्तंवाचयतितांपृच्छतिपत्नि।कतितेजाराइति। यानाचष्टेतान्वरुणोगृह्णात्वितिनिर्दिशतीति॥ कात्या॰॥ आख्यातेप्रघासिनइ।सेनांवाचयतिनयन्निति। जारेपत्न्याकथितेसतिसेनांपत्नीनयन्प्रतिप्रस्थाताप्रघासिनइति। मंत्रंवाचयेत्। कण्वोप्याह। तांवाचयतिप्रघासिनइति॥ पाठस्तु॥ प्रघासिनोसजोषसइति॥ घसेळ्ठ्ठअदनइतिधातुः। प्रकर्षेणघस्यतेभक्ष्यतइतिहविर्विशेषः। प्रघासःसएषामस्तितिप्रघासिनो

मरुतएतन्नामकान्देवान्हवामहेआह्वयामः। मरुतश्चेतिचकारेणतदीयपरिचारकाःसन्तु। ईयंते। तेसर्वेविरिशादसःरिशातिहिंसार्थः॥ दस्तुउपक्षयेइतिधातुः। रिशंवैरिकृतांहिंसांदस्यन्तुपक्षयेतीतिरिशादसः। करंभेमयवमयोहविर्विशेषःकरंभः। तेनसजोषसःसमानप्रीतयः। तथाविधान्मरुतोहवामहइतिपूर्वत्रान्वयः॥ कात्या॰॥ करंभपात्राणिजुहोतिशूर्पेणमूर्ध्निकृत्वादक्षिणाग्नौप्रसङ्मुखीजायापतीवादक्षिणेनाहवनीयंसतीर्थेनपूर्वेणवेदिमपरेणचयद्ग्रामइतीति। यत्तत्पक्षेनविर्मितानिमेष्यादिरूपाणिकरंभपात्राणितानिशूर्पेणपत्नीजुहुयादित्येकःपक्षः। दंपतीद्वौजुहुयातामित्यपरःपक्षः। तौचदक्षिणेनमार्गेणतानिपात्राण्यादायवेदेःपूर्वदिशिपश्चिमदिशिवास्थित्वाजुहुयाताम्। कण्वस्तुपत्नीहोमपक्षमाश्रित्याह। साजुहोतियद्ग्रामइति॥ पाठस्तु॥ यद्ग्रामेस्वाहेति॥ ग्रामेवसन्तोवयंयदेनःपापंग्रामोपद्रवरूपंचकृमतथारण्येवसन्तोवयंयदेनोमृगवधोपद्रवरूपंचकृम। तथासभायामवस्थितावयंयदेनोमहाजनतिरस्कारादिकंचकृम। तथेन्द्रियेलिङ्गोपस्थरूपेप्रीतियुक्तावयंयदेनःकलंजभक्षणपरस्त्रीगमनादिकं

वक्ष्म तथान्यत्रापि त्वस्त्वाम्यादो यदेनस्ताऽनावज्ञादिकं चकृम अत्र त्वस्त्वाभिधवस्त्वयेवतिन्निरिणा
मंत्र एवमाम्नातः। यच्चूडे यदर्य एतच्च कर्मेति तदिदं सर्वपापं अवयजामहे विनाशयामः। अवकृत्वेयिको
तिर्नाशार्थः। स्वाहा एतच्चैद्धविर्देवतायै पापविनाशिन्यै दत्तं॥ का सा०॥ मोषूणइतियत्तमानो जप
तीति पाठस्तु॥ मोषूणं वन्द्रते गीर्भिति। एत्स्विति संग्रामनामहे इन्द्र अत्र पस्तु एषु संग्रामेषु वर्त्तमानः
दैवेस्त्वया सहस्रखं प्राप्तैर्महन्नामके देवैः सहितस्त्वं नो स्मान् मो विनाशयेति त्राषः मो त्राद्धेनिषे
चार्थः। सुशब्दो विनाशाभावस्य सौष्ठवं ब्रूते। तथासति विनाशाद्धे लेशो मा भूदित्ययमर्थः संपद्य
ते। कः प्रसंगो विनाशस्येत्याशंक्यास्ति हीत्यादिना नाशप्रसंगोऽभिधीयते मुषेति बलनामहेतु
षिन्बलवन् इन्द्र तेन त्व अवयाः। अवे ह्यारूपो व्यापारः। अस्ति हि स्म विघात एव खलु। अवपूर्वस्य
अजनेरवया इति रूपं। अवगतो यागोऽवयाः यद्यपि तत्कालोचित त्वदीययागाभावरूपो पराधो
स्मासु विद्यते। तथापि कृपालुस्त्वमस्मान्मा विनाशयेत्यर्थः। मिह सेचन इति धातुः। मीढुषो दृष्टिप्र
दद्धेन सेनुः हविष्मतः हविर्योग्यस्य यस्य तव यथायथमये। करस्नपात्रेऽभिषिच्य ज्ञाहोमक्रियाम
हस्विन्न। प्रज्ञारखलु। तस्य तव यथोक्तपूजोपेतस्यास्मासु कृपालुत्वं युक्तमिति सक्तिप्रायः। किंचगी

१०६

१०६

रस्मदीया स्तुतिरूपा वाक् मरुतो भवतः सखीनूर्वं दतेन नमो मरुद्भ्य इत्येवमादिकायास्तुतेर्नमस्कार
रूपत्वात् मरुद्विषय नमस्कारेणाभितुष्टस्य तव कृपे वयुक्तेत्यर्थः॥ का सा०॥ अक्रन्कर्मेत्येनावाचयती
ति। पाठस्तु॥ अक्रन्कर्म जुवद इति। कर्मकृतः वरुणप्रघासाख्य कर्मकारिण ऋत्विजः वाचास्तुतिरूपया
सह कर्म वरुणप्रघासानुष्ठानरूपं। अक्रन्कृतवंतः कथंभूतया वाचा मयो भुवा मय इति सुखनाम तन्म
यो भवति निष्पद्यते यया स्तुतिरूपया वाचा सा स्तुतिर्मयोभुवा वाचा मंत्ररूपस्तु सेत्यर्थः। सचाभुवः
सह भवनशीलाः परस्परं यजमानेन पत्न्या वास्मिन्कर्मणि सहावस्थिता हे ऋत्विजः देवा मोदवार्थ
कर्म कृत्वा वरुणप्रघासनामकं कर्मानुष्ठानेन यास्तं प्रेत गृहान् आगच्छत। सोयमर्थः कण्वेन दर्शितः॥
अस्तं प्रेतेति गृहा उवा अस्तं कृतदेनान् गृहेष्वेव प्रतिष्ठापयतीति। तित्तिरिरप्यमुमेवार्थं दर्शयति॥
अक्रन्कर्म कर्मकृत इत्याह देवान् ऋणां निरवदाय अनृणो गृहानुपप्रेतेति वा वेतदाहेति देवानुद्दिश्यके
र्तव्यो यस्य ऋणं तं निरवदाय निःशेषेण परिहृत्येत्यर्थः॥ का सा०॥ अवभृथेति जायापती स्नात इति।
वरुणप्रघासस्य कर्मणोऽन्ते तदंगभूतं यदवभृथाख्यं कर्म जलसमीपे क्रियते तत्रानेन मंत्रेण दंपती

ध्यां अन्ते स्नानं कर्त्तव्यं ॥ पाठस्तु ॥ अवभृथ निचुंपुणेऽविस्वाहेति ॥ अवाचीनानि पात्राणि जलमध्ये क्षि
प्यंते यस्मिन् स्नानविशेषे सोयमवभृथः। हे अवभृथ त्वं निचुंपुण नितरां मंदं गच्छ। चुपि मंदायां गतावि
ति धातुः। निवेरूरसि नितरां चरणशीलो सि तथाप्यत्र निचुंपुण नितरां मंदं गच्छ। मंदगतौ किं प्र
योजनमिति उच्यते। देवैर्द्योतनात्मकैरस्मदीयैरिंद्रियैर्देवकृतं हविः स्वामिषु देवेषु कृतमेनः पा
पं यदस्ति तदवयासिषं। अस्मिन् जले अहमवनीतवानस्मि। तथा मर्त्यैर्मनुष्यैरस्मत्सहायभूतै
र्ऋत्विग्भिर्मर्त्यकृतं मर्त्येषु मनुष्येषु यज्ञदर्शनार्थमागतेषु कृतमवज्ञारूपं यदेनोस्ति तदप्यह
मवयासिषं अभिसमनुवर्त्तते इदमस्मात्तिः परिसमाप्तमेनो यथा वा न प्राप्नोति। तथार्ऽहे यज्ञ मंदं गच्छे
त्यभिप्रायः। हे देव अवभृथ अस्य यजमानस्य पुरुषस्य पुरुराव्णः रा दाने इति धातुः। बहुविधविरुद्धफलदा
यिनो रिषो वधात्साहि पाल य रिषिर्हिंसार्थः। विरुद्धफलदायी वधस्तस्मात् अस्माकं ना
कृदित्यर्थः ॥ इति पंचमोनुवाकः ॥ ॥ पंचमे वरुणप्रघासमंत्रा उक्ताः। षष्ठे साकमेधगतं कर्म किं
चिदुच्यते ॥ का स्या ० ॥ स्थाल्या दर्व्याद्दिने पूर्णा दर्वि परापतेति ॥ पाठस्तु ॥ पूर्णा दर्वि शतक्रतो इति

१०७

हे दर्वि अन्नप्रदानसाधनभूते काष्ठादिनिर्मिते त्वं पूर्णा प्रास्थाल्याः सकाशात् अन्नेन गृही
तासं पूर्णा भूत्वा परापत ऊर्ध्वं याहि देवान् प्रति गच्छ इंद्रदेवतां प्रति गच्छ सुपूर्णा कर्मफलेन सुपू
र्णा सती पुनरायत अस्मान् प्रत्यागच्छ। हे शतक्रतो इंद्र त्वं चाहं च उभौ वस्नेव वसुना धनेनेव इष
मूर्जं हविःस्वरूपमन्नं ऊर्जं हविर्दानफलरूपं रसं विनिमयं च विक्रीणावहै परस्परं द्रव्यविनिमयरू
पं विक्रयं करवावहै। अहं तुभ्यं हविर्ददामि त्वं च मह्यं फलं देहीत्यर्थः ॥ का स्या ० ॥ देहि मे ददामि ते नि हो
तीति। कण्वोप्याह। स जुहोति देहि मे ददामि ते नि मे धेहि नि ते दधे। निहारमिन्निहरामि ते निहा
रं निहराणि स्वाहेति। हे यजमान त्वं मे मह्यमभीष्टं देहि हविः प्रथमं प्रयच्छ। ते तुभ्यं यजमाना
य ददामि। अपेक्षितं पश्चात्प्रयच्छामि। अनेन प्रथमपादेन उक्तस्यार्थः पुनरपि द्वितीयपादेनाद
निशायार्थमुच्यते। मे मह्यमभीष्टं निधेहि प्रथमं त्वं हविर्नितरां संपादय। ते तुभ्यं यजमानाय नि
दधे अपेक्षितफलं संपादयामि। निहारशब्दो मूल्यवाची। नितरां ह्रियत इति व्युत्पत्तेः। निहा
रं मूल्यकृतं हविः ते तुभ्यं इंद्राय निहराणि यजमानोहं नितरां समर्पयामि। उत्तरे निहारशब्दो

मूल्येन क्रेतव्यं पदार्थं ब्रूते। तत्रापि निरन्तरां क्रियत इति व्युत्पत्तिः। निहारं क्रेतव्यवस्तुस्वरूपं फलं मे मह्यं यजमानाय नि हारास्मि पश्चान्नितरां प्रयच्छ पूर्वार्द्धे पाद द्वयेनोक्तोर्थः। आदरेण द्विवारं मिंद्रेणोक्तः। तमर्थमुत्तरार्द्धेन यजमानः सम्यगंगीकरोति। स्वाहेत्ययं शब्दो हविर्दानार्थः॥ इति षष्ठो नुवाकः॥ षष्ठे साकमेधगत पूर्णादर्व्याख्यकर्मांगभूत मंत्रा उक्ताः। सप्तमेपि साकमेधगतपि तृयज्ञाख्यकर्मांगभूता मंत्रा उच्यंते॥ कात्या०॥ यज्ञोपवीतिनः सर्वे निः क्रम्यादं चोक्षन्नमीमदंतेत्याहवनीयमुपतिष्ठंते द्वाभ्यामिति। कण्वोप्याह। ऐंद्र्यर्चमुपतिष्ठंते इन्द्रो ह्याहवनीयो क्षन्नमीमदंतेति। तत्र प्रथममंत्रपाठस्तु॥ अक्षन्नमीमदन्त हरी इति। अदन भक्षणे इति धातोर्लुङि घस्लादेशे अक्षन्निति रूपं। पितृयज्ञाख्ये कर्मणि पितरः संति ते स्मान्निर्दत्तं हविः १०८
स्वरूपं मन्नं अक्षन्भक्षितवंतः। कथमेतदवगम्यते उच्यते हि। यस्मादमीमदंत हर्षप्राप्ताः। मदी हर्ष इति धातुस्तस्मादक्षन्नित्यवगम्यते। अत्रास्मदीयो भक्तिमवगम्य प्रियाः प्रीतियुक्ताः संतः अधूषत स्वकीयं शरीरं कंपितवंतः धूञ् कंपन इति धातुः। किं चैव स्व भानवः। स्वयं दीप्ति

नवनीतेन नवनीत पूर्णो नुलोमः सपादको महीनां पयोसीति। प्राचीनशालायाः पूर्वभागे स्थितखाकु शेषु लग्नं नवनीतं गृहीत्वा शिर आरभ्य पादांतस्य शरीरस्याभ्यंगं कुर्यात्। पाठस्तु॥ महीनां पयोसि देहीति। हे नवनीत त्वं महीनां गवां महीशब्दो गोनामसु पठितः पयोसि क्षीरजन्यत्वात् तस्याः स्वापस्वारः वर्चोदा असि स्निग्धत्वेन कांतिप्रदत्वं अतो मे मह्यं यजमानाय वर्चोदिहि कांतिं प्रयच्छ॥ कात्या०॥ वृत्रस्य कनीनिकासि चक्षुर्दा असि चक्षुर्मे देहीति त्रिककुत्सर्वतो युसन्नं तल्लभ्यते चैतेना ञ्जनेन चक्षुर्द्वयमंज्यते तदंजनावेन्यदञ्जनमस्तु। पाठस्तु। वृत्रस्य कनीनिकासि चक्षुर्दा असि चक्षुर्मे देहीति। अंजन त्वं वृत्रस्य वृत्रनामकस्य कनीनिकासि परापतत्तदांजनं मत्र वदिति चक्षुर्दा असि कनीनिकारूपत्वाद् दृष्टिप्रदत्वमुपपन्नं अतो मे मह्यं चैव चक्षुर्मे देहि दृष्टिपाटवं प्रयच्छ॥ कात्या०॥ कुशापवित्रैश्च पवस्व मेपावतेति सप्तभिः प्रतिमंत्रमुष्णिरिणाति। शेषानुषज्येत प्रतिमंत्रं पृथक्सप्तभिः कुशैः पावनेक्रियमाणे मिलित्वा कुशापवित्राण्येकविंशतिः संपद्यंते। एतदेवाभिप्रेत्य तित्तिरिराह एकविंशत्या
× असि। नेत्रमध्यगत कृष्णमंडलरूपासि। तदेवाह तित्तिरिः। इंद्रो वृत्रमहन्तस्य कनीनका × ७

पश्यति दक्षहस्तस्य अंगुलयोः। दक्षपार्श्वे आत्मे कर्षिणं दृशोर्या वाने वपुरुषमसुंपश्यिवर्गेपूव यतीति।
॥पाठस्तु॥ चित्पतिर्मा तत्त्वके यमिति॥ चित्ब्वीज्ञानं वांची चितां ज्ञानानां पतिश्चित्पतिर्मा नो त्रिंमा-
नीदेवः मनोवै चित्पतिरिति तित्तिरिणो क्तत्वात्। अछिद्र पवित्रं अथवा दित्यमंडलं सोवा आदित्यो
छिद्रं पवित्रमिति श्रुतेः। तेन पवित्रेण सूर्यसंबंधि रश्मिभिः स्यात् पवित्र पते पवित्र पूतस्य य-
त्कामः पुनेत तत्त्वके यमिति॥ चित्ब्वीज्ञान वाची चितां ज्ञाना नां पतिश्चित्पतिर्मा नो त्रिमानी देवः
मनो वै चित्पतिरिति तित्तिरिणो क्तत्वात्। यथा प्रजापति वैं चित्पतिरिति श्रुतेः। सवान्त्वव
तु॥ शुद्धिं हे तु वर्षपुच्छिद्ररहित त्वात्। अच्छिद्रं पवित्रं अथवा दित्यमंडलं सोवा आदित्योछि-
द्रं पवित्रमिति श्रुतेः। तेन पवित्रेण सूर्यसंबंधि रश्मिभिश्च मां यजमानं चित्पतिः पुनातु शुद्धं करो-
तु। हे पवित्रपते शुद्धिपालक ते तव अनुग्रहात् पवित्र पूतस्य पूर्वोक्तेन पवित्रेण शुद्धस्य तस्य यज-
मानस्य ममत्त्वद्भिर्न्यादिति शेषः। ते देवा मे चिंतस्य शुद्धिं क्रियत। यत्कामः यस्मिन्त्वन्त्र्वने कामवान्
हं पुनेः शुद्धोत्त्व शामि। तत्स्वकेयं तदनुष्ठानं कर्तुं शक्तो भूयासं। वाक्पतिर्बृहस्पतिः सविता दे
[illegible]

११७

दृ०
वोंतर्यामी एतैर्मंत्र द्वयं पूर्ववद्घोऽप्यं॥ कात्या०॥ आवो देवास इति वाचयतीति। अध्वर्युर्यजमानं
वाचयेत्॥ पाठस्तु॥ आवो देवास ईमहे हवाम हे इति। हे देवासो देवा अध्वरे स्मदीये ज्ञेवामंत्र-
यति। वननीयं संभजनीयं अनुष्ठानं प्राप्तवतिस्त्वति तदीयं संभावितं फलं वो युष्मान् आई
महे स्वाकल्येन वाचामहे। किं वहे देवासो देवासः यज्ञियास आशिषो यज्ञसंबंधीनि फलानि
आसमाने तुं वो युष्मान् हवामहे आह्वयामः॥ कात्या०॥ स्वाहायज्ञमित्यंगुली अवयते नानाह-
स्तयोरेवं शेषं प्रतिमंत्र मुत्तमेन मुष्टी करोति। हस्तयोर्द्वयोर्यदेतत्कनिष्ठिकांगुलिद्वयं तत्प्र-
थममंत्रेण यथा प्रस्तं तं न त्त्ववति तैसंकोचयेत्। एव मुत्तरैर्मंत्रैस्तत्तदनंतर मोधितानां गुलिद्व-
यस्य संकोचो द्रष्टव्यः। द्यावापृथिवीभ्यामित्येतस्मदं यथामंत्र द्वयं न्त्ववति तथा विधेदनीयं।
तत श्चत्वारो मंत्राः संपद्यंते। स्वाहायज्ञं वा तादित्य उत्तमेन मंत्रेण मुष्टिद्वयं कुर्यात्। तदेतत्सर्वमा-
पस्तं बो विस्पष्टयति। स्वाहायज्ञं मनसेति द्वे स्वाहा दिवइति द्वे स्वाहापृथिव्या इति द्वे स्वाहो-
रोरंतरिक्षादिति द्वे स्वाहायज्ञं वातादारभ इति मुष्टी करोतीति। अत्रत्यः पाठस्तु॥ स्वाहायज्ञं

वाता ८ ह्रस्व –

दास्त्वइति। मनःशब्दोऽस्ति त्रिशीयकेत्वतीयांतः अत्र तु पंचम्यंतः स्वाहाशब्दस्य निपातत्वेन बह्वर्थवा
चित्वात्तत्र तत्र उपचिता अर्था ब्राह्मणानुसारेणोपलक्षणीयाः। ते चात्र लक्ष्यंते। मनसो यज्ञं स्वा
हा चित्तेन यत्र ज्ञमत्तिगच्छामि उरोरंतरिक्षात्स्वाहा विस्तीर्णेतरिक्षे यज्ञ आश्रितः। द्यावापृथि
वीभ्यां स्वाहा द्यावापृथिव्योर्यज्ञ आश्रितत्वात् तु स्वाहा रन्के वायुप्रसादात्र वर्तनीयमिदं
कर्मप्रारब्धं करोमि सोयमुपलक्षितः सर्वोर्थ स्त्रिनिरिणास्पष्टमुदाहृतः स्वाहाय ज्ञं मनासे
मनइ स्वाहा यंशावयः पवंते स यज्ञास्तामेव साक्षादारब्धे ते मुष्टीकरोति। वाचं यच्छति यज्ञस्य धृ
त्या इति वातस्य क्रियाहे तुत्वात्तद्यज्ञस्तूपत्वं॥ इति द्वितीयोनुवाकः॥ ॥द्वितीये मंजनादिसंस्का
रमंत्रा उक्ताः। तृतीये खो ऊहृहणहोममंत्रा उच्यंते॥ कास्तं॥ उ ऊहृहणाभिस्तु होति स्थाल्यां स्रुवेणा
कूत्या इति प्रतिमंत्रमिति। तत्र प्रथममंत्रपाठस्तु॥ आकूत्यै प्रयुजेग्नये स्वाहेति। यज्ञं करिष्यामीत्येवं विधो मानसः संकल्प आकूतिः तस्यै आकूत्यै तत्त्वं प्रत्यर्थं प्रयुजे निर्विघ्नेन मां प्रे
रयते अग्नये वह्निदेवाय स्वाहा। इदं हूतमस्तु। द्वितीयमंत्रपाठस्तु। मेधायै मनसेग्नये स्वाहेति।

× मनसा हि यज्ञमत्तिगच्छति पुरुषः। स्वाहा द्यावापृ(म) थिवीभ्यामित्याह। द्यावापृथिव्योर्हि यज्ञः। स्वाहोरोरंतरिक्षादित्याह।
अंतरिक्षे हि यज्ञः। स्वाहा यज्ञं वातादारभ इत्याह। ×८

यच्छ्रुत योर्मत्र तं त्रयो दूरिणाशक्ति मेधा तत्सिद्ध्यर्थं मनसे मदीयमनो भिमानिनेग्नये हुतमस्तु॥
तृतीयमंत्रपाठस्तु॥ दीक्षायै तपसेग्नये स्वाहेति। व्रतनियमो दीक्षा तत्सिद्ध्यर्थं मदीयशारीर
तपोभिमानिनेग्नये हुतमस्तु। चतुर्थमंत्रपाठस्तु॥ सरस्वत्यै पूष्णेग्नये स्वाहेति। मंत्रोच्चारणशक्तिः
सरस्वती तत्सिद्ध्यर्थं वाग् इंद्रियपोषकाय वह्नये हुतमस्तु। पंचममंत्रपाठस्तु। आपो देवीर्बृहतीर्विश्वशंभुवो द्यावापृथिवी उरो अंतरिक्ष बृहस्पतये हविषा विधेम स्वाहेति।
हे आपो यूयं येच द्यावापृथिवी द्यावापृथिव्यो याश्चोरु विस्तीर्णमंतरिक्षं तेषामेतासां देवानां सर्वे
षां देवानामनुग्रहाद्दितिद्दोषः। बृहस्पतये एतन्नामकाय देवाय हविषा विधेम आज्येन परि
चर्यां करवाम कथंभूता आपः देवीर्द्योतमानाः। बृहतीः प्रभूताः। विश्वशंभुवः विश्वं सुखेन
भावयित्र्यः एता भिविद्वेषणादिवृष्टिजान्या स्वपस्तु युज्यंते। तदाहुतिनिरिः। यावै वर्ष्यास्ता आपो दे
वीर्बृहतीर्विश्वशंभुवइति। षष्ठमंत्रपाठस्तु॥ विश्वो देवस्य पुष्यसे स्वाहेति। विश्वो मर्तः सर्वो मनुष्यः
नेतुः फलप्रापकस्य देवस्यादानादिगुणयुक्तस्य सख्यं सखित्वं वृणीत तद्वृणुते प्रार्थयते किंच।
विश्वः सर्वो जनः रायो धनाय पुष्यति प्रार्थयते। यो वाक्कर्मरवायं धातुः पाठितः किंच। पुष्यसे पोषणाय

सवितारमिति शेषः।१

द्युम्नं यशो ऽन्नं वा यास्केन तथोक्तत्वात् । वृणीत सर्वो जनः प्रार्थयते तस्मै त्रैरकाय देवाय हुतमस्तु ॥ ॥
॥ इति चतुर्थोऽनुवाकः ॥ तृतीये कृष्णारव्य होममंत्रा उक्ताः । चतुर्थे कृष्णाजिनादिमंत्रा उच्यंते ॥ का
स्या० ॥ शुक्लकृष्णसंबंधिमालक्ष्णत ऋक्सामयोरितीति ॥ पाठस्तु ॥ ऋक्सामयोः शिल्पे स्थ इति
हे शुक्लकृष्णरेखे कृष्णाजिनगते युवां ऋक्सामयोः शिल्पे स्थः ऋगभिमानिसंबंधिनी देवतयोः
ये शिल्पे वा तु थर्ये तद्रूपे तव थः । ते वां तथाविधे युवां आरभे अहं स्य इमामिते मा पातं तथाविधे मां पा
लयतं क्रियं तं कालमितीचे तदुच्यते । अस्य यज्ञस्यो द्दृचः अनुष्ठीयमानस्य यज्ञस्य ये यम्हगुनमा
स्ति तस्यं तं यज्ञसमाप्तिपर्यंतं भिरस्तु इत्यर्थः । ऋक्सामाभिमानिन्यो देवते के नापि निमित्तेन देवा
नां यज्ञसार्थमवस्थिते सत्यौ कृष्णमृगेन्द्र [illegible] तदीयं रूपं सम्यक् कृत्वा देवेभ्योऽपक्रम्य दूरादे
शे क[illegible]दतिष्ठतां तस्य मृगस्य चर्मणि यः शुक्लो वर्णः सोयमृचः शिल्परूपं यस्तु कृष्णो व
र्णः सोऽयं साम्नः शिल्परूपमिति । एषवा ऋक्सामयोर्वर्णो यच्छुक्लं कृष्णाजिन अस्य वं साम्नो य के कृष्ण
मितिच ॥ का स्या० ॥ दक्षिणमारोहति शर्मासीति ॥ पाठस्तु ॥ शर्मासि शर्म मे यच्छेति । हे कृष्णाजिनत्वं

शर्मासि । शरणमसि । अतो मे मह्यं शर्म यच्छ शरणं देहि । स्वकीयत्वेन स्वीकुर्वित्यर्थः । तेतु त्वं कृष्णा
जिनाय नमोऽस्तु मा मा हिंसीः मां यजमानं हिंसितं मा कुरु ॥ का स्या० ॥ मेखलां बध्नीत ऊर्ग
सीतीति । आपस्तंबो विशेषमाह । शरमयी मौंजी वा मेखला त्रिवृत्स्य थान्य तरन्तः पाशातयोर्य
आमानं दीक्षयतीति । पाठस्तु ॥ ऊर्गस्याङ्गिरस्यूर्णम्रदा ऊर्जं मे यच्छेति । हे मेखले त्वमांगिरसी
अंगिरोनामकानामृषीणां संबंधिनी ऊर्गन्नरसस्वरूपा ऊर्णम्रदा असि कंबलवन्मृदुरसि तथावि
धा त्वं ऊर्जमन्नरसं मे यच्छ मह्यं देहि । अस्याः शरमय्या मेखलाया अंगिरोभिः संबंधं निति रि
दर्शयति । अंगिरसः सुवर्गं लोकं यंत ऊर्जं व्यभजन्त ततो यदत्यशिष्यत ते शरा अभवन् ऊर्ग्वै शराः
शरमयी मेखला भवति ऊर्जमेवावरुंधे इति । अंगिरोनामकानामृषीणां परस्परमन्नरसे विभज
यमाने वै दत्तशिष्टं तच्छर नामक तृणविशेषेणाविर्भूतं तस्मादूर्गसीत्यादिमंत्र उपपन्न इत्यर्थः ।
॥ का स्या० ॥ नीविं कुरुते सोमस्य नीविरसीति ॥ असीतिमंत्रशेषः । हे मेखले त्वं सोमस्य नीविरसि ।
सोमदेवतायाः प्रियकृतग्रंथिरसि । मूलाग्रकरणेन योरेकीकरणेन ग्रंथिविशेषो नीविरस्तु

स्य ४ / रा ६ / यो ८

च्यते॥ का॰स्या॰॥ शिरः प्रोर्णुते विष्णोः शर्मासीति। आच्छादयतीत्यर्थः। पाठस्तु॥ विष्णोः शर्मासि शर्म य-
जमानस्येति। हे वस्त्र त्वं विष्णोर्व्यापिनो यज्ञस्य शर्मासि सुखहेतुर्भवसि। अतो यजमानस्य शर्म
सुखं संपादयेति शेषः॥ का॰स्या॰॥ कृष्णविषाणां त्रिवलिं पंचवलिं वो न्नतानां दशायां बध्नीते तया
कंडूयनमिंद्रयोनिरसीतीति। आपस्तंबोप्याह। कृष्णविषाणां यजमानो यस्यां बध्नाति। सा केचित्त्रि-
वलिः पंचवलिर्वेति। असीति मंत्रशेषः। हे कृष्णविषाण त्वं पूर्वमिंद्रस्य योनिरसि तथेदानीमस्य
स्थानं भवेति शेषः। पुरा कदाचिद्यज्ञपुरुषो दक्षिणां देवीं समभवत तस्मात्तं भवनादिंद्रो जायतत-
दानीमत्रान्यस्योत्पत्तिर्मा भूदिति विचार्य इंद्रस्य योनिमाछिन्नैयंम्गे न्यदधात् निहितासा योनिः कृ-
ष्णविषाणाभूत् सोयमर्थस्तित्तिरिणा यज्ञो दक्षिणामभ्यध्यायदित्यस्मिन्नाख्याने समाख्या-
तः। तस्मात् अस्याः खेस्मि इंद्रयोनित्वमुपपन्नं॥ का॰स्या॰॥ कृष्णो चोल्लिखति सुसस्या इतीति।
आपस्तंबोप्याह। तयोत्तरवेदिं लोष्टं तु हंतीति॥ पाठस्तु॥ सुसस्याः कृषीस्कृधीति॥ सस्यं व्री-
हियवादि तदर्थो भूमि[illegible]ताव्यापारः कृषिः याः कृषयः। संहिताः सर्वाः सुसस्याः शो-

घ ८ ११० १२०

भनधान्याः कृधि। हे कृष्णविषाणे कुरु। एतन्मंत्रलभ्यं फलं तित्तिरिरुदाजहार। कृष्णोयासु सस्या
यास्याह तस्मादकृष्टपच्या ओषधयः पच्यंत इति॥ का॰स्या॰॥ सुखसंमितमौदुंबरं दंडं प्रयच्छ-
त्युच्छ्रयस्वेत्येनमुच्छ्रयतीति॥ पाठस्तु॥ उच्छ्रयस्व वनस्पत इति॥ हे वनस्पते वृक्षावयवस्वरूप दंड
उच्छ्रयस्व उन्नतो भव। एवमूर्ध्वं कृत्वा अंहसः पाथान्मा मां पाहि तत्र तत्रैव कालेष्वधिरूच्यते। अस्यानुष्ठी-
यमानस्य यज्ञस्य आ उदृचः उत्तमाया ऋचः समाप्तिं गताया आ तेन क्रियापर्यंतमित्यर्थः॥ इति चतु-
र्थोनुवाकः॥ ॥ चतुर्थे कृष्णाजिनादिमंत्रा उक्ताः। पंचमे व्रतकरणादिमंत्रा उच्यंते॥ का॰स्या॰॥ व्रतं
कृणुतेति वाग्विसर्जनं त्रिरुक्तेति। मौनेनावस्थितस्य यजमानस्य वाग्विसर्जनं साधनमेतन्मंत्रवा-
क्योच्चारणं विधीयते॥ पाठस्तु॥ व्रतं कृणुत व्रतं कृणुत व्रतं कृणुतेति॥ दीक्षितस्य भोजनाय पयसो
नियतं तद्व्रतमित्युच्यते। हे परिचारका व्रतं कृणुत। दोहनादिना क्षीरं संपादयत। त्रिवारं वाक्यावृत्ति-
द्रा॰१ रादर्थ्या॥ अनेन मंत्रेण मौनपरित्यागं तित्तिरिरपि विधत्ते। व्रतं कृणुतेति वाचं विसृजतीति॥ का-
त्या॰॥ अग्निर्ब्रह्मेति वैसृजदिति। एतमपि मंत्रं मुसकृदुच्चारयेत्॥ पाठस्तु॥ अग्निर्ब्रह्मा अग्निर्यज्ञिय-

इति। ब्रह्मशब्देन वेदत्रयमभिधीयते। तस्य वेदत्रयस्याग्नित्वमुपचर्यते। आधानेन निष्पन्नस्य वेदिकस्याग्नेर्वेदव्यतिरेकेण। संभवते। तस्य चाग्नेर्यज्ञसाधनत्वाद्यज्ञत्वमुपचर्यते। तथा यज्ञयोग्यस्य
स्या दिव्यादेर्वनस्पतेर्यज्ञसाधनत्वाद्धनसैस्पतिर्यज्ञइत्यनुवर्त्तनीयं॥ का॰स्या॰॥ दैवीं धियमभि
तिश्रुतयोयस्यदर्शनमिति। बोधायनः॥ अथाप आचमति दैवीं धियमिति। आपस्तंबः। दैवीं धियं
मनासहइतिहस्तावव निज्येति॥ पाठस्तु॥ दैवीं धियं असद्वराइति॥ अग्निष्ठये अग्निमुखत्वेन त्रा
त्तस्य यज्ञस्य सिद्ध्यर्थं धियमनुष्ठानविषयां बुद्धिं मनामहे याचाम हे याचा कर्म स्वैतत्सदं प्रहितं। कथं भूतां धियं दैवीं देवसंबंधिनी देवलोद्देश्येन प्रवृत्तां सुम्रडीकां शोभनसुखहेतुं वर्चोदां
अनुष्ठानविषयस्य तेजसो दात्रीं। विश्वधायसं विश्वस्य सर्वस्यानुष्ठानक्रमस्य धारयित्रीं त
थाविधा। याधीः सुतीर्था अस्माभिः सुखुशरीतुं प्राप्तुं शक्यासती। बेरोअसत्। अस्मा कमधीनत्वे
नवतु॥ का॰स्या॰॥ ये देवाइति व्रतयतीति। बोधायनः॥ अथास्मै कंसैवैमा स्वेवानिषिच्य व्रतं
प्रयच्छति तं दक्षिणतः परिश्रित्य व्रतनं वे क्षिति ये देवाइति॥ पाठस्तु॥ ये देवा स्वहेति॥ दीर्घांति

स्व १२१ २ ६ १२१ १२१ मं२

तं
घौंतइति देवाश्चक्षुरादीन्द्रियरूपाः प्राणाः ते च देवा मनोजाता दर्शनश्रवणादिहृद्यारूपामसस
उत्पन्नाः तथा विधायोभिस्त्रायामुत्पन्नायां पश्चाच्चक्षुरादीनां प्रवर्त्तमानत्वा तथा मनोयुजः स्वरू
पादिदर्शकालेपि मनसायुक्तारवव र्नते अन्यचित्तस्य रूपादि प्रतिभासाभावात्। एतमेवार्थमभिप्रे
त्य चक्षुरादिप्राणपरत्वं तैत्तिरीयैर्व्याचष्टे। प्राणा वै देवा मनोजाता मनोयुज इति। ते च देवा दक्षक्रतवः।
दक्षाः कुशलाः क्रतवः संकल्पा येषां चक्षुरादीनां ते दक्षक्रतवः संकल्पितार्थकारिण इत्यर्थः। ते दे
वा ये संति ते देवा नो अस्मानेवं तु अनुष्ठां विघ्नपरिहारेण पालयंतु। तथा ते देवा नो अस्मात्पांतु फ
लप्राप्त्या पालयंतु तेभ्यः प्राणरूपेभ्यो देवेभ्यः स्वाहा इदं क्षीरं हुतमस्तु॥ का॰स्या॰॥ श्वात्राः पीता
इति नाभिमालभत इति॥ पाठस्तु॥ श्वात्राः पीतो भतावधइति॥ हे आपः क्षीररूपायूयं मया पीता
सत्यः श्वात्रा भवत। क्षिप्रपरिणामाः शीघ्रं जीर्णा भवत। श्वात्रमिति क्षिप्रनामेति यास्केनोक्तं। किंवा
स्माकं पीतवतामं तरुदरे जलपाकस्थाने सुशोवाः शोभनसुखवान्भवतेत्यनुवर्त्तते। सुखमिति सुख
नाम। तास्तथाविधा आपः अस्मभ्यमस्मदुपकारार्थं स्वदं तु स्वादु लघु भावं तु। कथं भूतास्ता

स्व२ म६ मं२

अयक्ष्माः प्रबलरोगविशेषरहिताः। अनमीवाः अल्पेनरोगसामान्येनापिरहिताः। अनागसः पापरहिताउपद्रवकारिण्यानभवंतीत्यर्थः। देवीः दिव्यः शरीरपुष्टिहेतुत्वेन घोतमानाः अपंम्र ता अपमृत्युरहिताः कृतावधः यज्ञकर्द्धिहेतवः। का सा०॥ मेक्षन्कृष्णविषाण यो लोष्टकिंचिया २
न ४ द्वादनइयं नवृतीति। मे क्ष्यन्मेहमूत्रेकरिष्यन् किंचिद्दियं तद्दस्यनेनलोष्टव्यतिरिक्तं तृणादिकंवा विवाक्षितं॥ इयं तेयज्ञियातनूरिति। हेयज्ञ पुरुषइयंपृथिवीते तवयज्ञियातनूः यज्ञयोग्यादेहः। अतोस्यांमूत्रोपहति। परिहाराय व्यवधानं कर्त्तुं लोष्टंतरणं वास्वीकरोमीत्यभिप्रायः। ॥ का सा०॥ अपो मुंचामीतिमेहतीति। पाठस्तु॥ अपो मुंचामिं पृथिवीमाविशतेति। अपोमुंचामि अस्यां पृथिव्यां लोष्टादिव्यवहितायांमूत्ररूपा अपो मुंचामिपरिस्रवाभिनप्रज्ञोप्रज्ञोसंतिनि भिन्नंरेतोनमुंचामिपरिस्रवामिनाप्रज्ञांप्रज्ञोसंत्तिं भिंभिन्नंरेतोन मुंचामिं। अतोहेआपः अंहो
१२२ मुचः अंहसः पापात्मुरूपं पृथक्कुर्वन्त्यः स्वाहाकृताः पूर्वक्षीरपानकाले स्वाहेत्यनेनमंत्रेण स्वीकृतायूयंपृथिवीमाविशतइदानीं पृथिवीं प्रविशत॥ का सा०॥ अग्नेत्वमित्युकाम्यधितीति॥
× पृथिव्यासंजवेसातंनिदधातीति। पुरास्वीकृतं लोष्टादिकं मूत्रस्थानेनिदध्यात्। हेलोष्टादिक पृथिव्यासहत्वमीकी भव॥ का सा०॥ ×

१२२

पाठस्तु॥ अग्नेत्वं पुनस्सुबुधीति॥ हेअग्नेत्वंसुजागृहि सुष्ठु निद्रारहितोभव। वयंयजमानाः सुमं दिषीमहि साधुस्वप्स्यामः मंदितिः स्वापार्थः मुद्यप्रमादइति धातुः अप्रयुच्छन्प्रमादरहितः स न्नोरक्ष अस्मान्पालय नोस्माकं प्रबुधे प्रबोधाय पुनस्सुधि कृयोपि प्रयत्नं कुरु। अस्याग्नेः प्रार्थनायास्तात्पर्यंतिन्तिरिदंइर्यपिति। अग्निमेवाधिपंकृत्वास्वपितिरक्षमपहत्साइति॥ का सा ४
स्व ५ सा०॥ विबुद्धमेष्यंतंपुनर्मनइति वाचयतीति॥ पाठस्तु॥ पुनर्मनः पुनं दुरितादवघादिति॥ मेमनः यजमानस्यमनः पुनरागात्। सुप्तिकाले विलीयपुनरिदानीं शरीरे समागतं किंचस्वा
म ७ पकाले नामेदीयमायुर्नष्टप्रायं भूत्वा पुनरागात्। इदानीं पुनरुत्पन्नमिवासीत् तथामेचक्षुः पुनरागात्। तथामेश्रोत्रं पुनरागात् तथामे प्राणवायुः पुनरागात् तथामे आत्मा तनुरूपो जीवः नु पुनरागात्। एवंसर्वे ष्वगतेषु अतकुर्ध्वमयमग्निः अवधात् जिह्मया वदितुमयोग्यान्निंदितात् दुरितात् पापात्। मांपातु मां पालयतु। कथंभूतोग्निः वैश्वानरः विश्वानरसंबंधी सर्वपु

रूपोपकारकः अदब्धः केनाप्यहिंसितः तनूपाः अस्मदीयशरीरस्य पालकः ॥ का॰सू॰ ॥ अग्ने
त्वमेव व्रतपाः एकमेव करोति यो दीक्षितः स्वपिति ॥ त्वमग्ने व्रतपा असि ॥ स्वाहाग्निर्वै देवानां व्र
तपतिः स एवैनं व्रतमालंभयतीति ॥ का॰सू॰ ॥ लक्षणाल्पस्यवाव्ययतिरास्वेयदितिमि । क्रतौ दीय
द्रव्यं यथा स्वैरिचारकेशानी तं तत्सर्वमुपस्थ इय मंत्रं पठेत् । पाठस्तु ॥ रास्वेयत्सोमे वस्वदादि
ति । हे सोम एतन्नामक देव इयत्प्रशास्वरतावद्धनं देहि भूयः पुनरपि आभर धनमाहर । वसो
र्धनस्य दाता सविता देवो नोऽस्मभ्यं वस्वदात् । पूर्वमपि धनं दत्तवान् । भूयः इत्यस्य पदस्य
परिमितपशुरूपधनाहरणे तात्पर्यं तदाहे तितिन्निरिः । सोमान्भूयो भरेत्याहापरिमितादेवपरूरुन्नवरुंधइति । × त्वमग्ने इत्याह कुध्याश्च्यं वा व्याहृत्येति दीक्षितो यदा कुध्यति यदा व्रतविरु
द्धं ब्रूते तदानीं त्वमग्नइति मंत्रं भूयात् । पाठस्तु ॥ त्वमग्ने यज्ञेष्वीड्यइति ॥ हे अग्ने देव घातनात्मकत्वं आम
र्षे शुमनुष्यपर्यंतेषु सर्वप्राणिषु व्रतपा असि व्रतस्य कर्मणः पालकोऽसि । तथा आसमंतात् घज्ञेष्वी
ड्यस्तुत्योऽसि । अत्र स्वापस्य व्रतविरोधित्वात् तत्परिहारोऽनेन मंत्रेण संपद्यते ॥ तदाह तितिन्निरिः ॥ × १

१२३ १२३

॥ इति पंचमोऽनुवाकः ॥ ॥ पंचमे व्रतचरणादिमंत्रा उक्ताः ॥ षष्ठे सोमक्रयण्यानयनमंत्रा उच्यंते ॥
कात्यायनः ॥ ध्रोवं जुहूं चतुर्गृहीतमिति । बर्हिस्तृणेन हिरण्यं बध्वावदध्यात्सेषातइति । ध्रुवायां स्थित
माज्यं जुहूं गृहीत्वा तस्मिन्नाज्ये दर्भतृणेन बद्धं हिरण्यमवदध्यात् । पाठस्तु ॥ एषा ते शुक्रेत्वा
जं गच्छेति । हे शुक्र दीप्यमानाग्ने ते तव एषा तनूः छेयमानमाज्यरूपं शरीरं तदाज्ये प्रक्षिप्यमानं हिरण्य
ण हिरण्येवद्धे त्वया संगवा आज्यरूपया तन्वा एकीभव । ततो भ्राजं गच्छ हिरण्यगतां दीप्तिं प्रा
प्नुहि । एतन्मंत्रपाठेनाग्नेः स तेजस्त्वं स तनुत्वं च संपद्यते । स तेजसं नैव नं स तनुं करोतीति ॥
का॰सू॰ ॥ जूरसीति जुहोतीति ॥ पाठस्तु ॥ जूरसि स्वाहेति ॥ हे सोमक्रयणि वाग्रूपा त्वं जूरसि ।
वेगयुक्तासि । तथा मनसा ध्यानानियमितासि विष्णवे यज्ञाय यज्ञार्थं प्रीतियुक्तासि । सत्यस
वसः अवितथा अनुज्ञाया यस्यास्तेन तथाविधायास्तव सोमक्रयण्याः प्रसवे अनुज्ञायां सत्यां
तनुस्वत्वं यं त्रीं नियमनं अशीय प्राप्नुयां विनयोत्स्यानियमस्य स्वल्पत्वमुच्यते । परमार्थतस्तु

नियमस्ययज्ञसमाभिपर्यत्वात्महत्वं। स्वाहाइदमाज्यंहुतमस्तु। नमेतंमंत्रंतित्तिरिर्विवृत्त्यव्याचष्टे।
वाग्वाएषायत्सोम। क्रयणीजूरसि स्वाहयन्मनसाध्यायते तद्वाचावदति। धृतामनसेस्वाह। मनसा
हिवाकूधृतादजुष्टंविष्णावइस्वाहयज्ञोवैविष्णुः यज्ञायैवेनांजुष्टांकरोतितस्यास्तेसत्यसवसः
प्रसवइस्वाहसवितृप्रसूतामेववाचमेवरुंधइति। भवतेरनृरीघ्रकर्तव्यतामवगच्छतीत्यर्थः॥ कात्या०॥
चंद्रमसीतिहिरण्यमुद्धरेति। पुराज्जुह्वांबध्वास्थापितंहिरण्यमुद्धरेत्॥ पाठस्तु॥ चंद्रमसिंवै
श्वदेवमसीति। हेहिरण्यत्वंचंद्रमसि आल्हादहेतुर्भवसि। चदि आल्हाद इति धातुः। शुक्रमसि। दीप्य
मानमसि। अमृतमसि। विनाशरहितमसि। अग्निसंयोगेपिहिरण्यस्यविनाशाभावः प्रसिद्धः। वै
श्वदेवमसि। सर्वदेवसंबंध्यसि। सर्वोपिदेवोहिरण्यदानाद्दिनानुष्यतेच॥ कात्या०॥ चिदसीत्येना
मभिमंत्रयति। एनांसोमक्रयणीमित्यर्थः। पाठस्तु॥ चिदसिमना [illegible]॥ वाग्देवतारूपेसोमक्र
यणि। त्वंचिदादिरूपप्रतिपद्यासि। अंतःकरणस्यचित्तंमनोबुद्धयरितितिस्त्रोवस्थः देहादि
संघातस्यचेतनत्वंआवस्यचेतनत्वंचिदादिशब्दसंपादयंतीवाक्सवस्तुषुवानिर्विकल्पंरूपं

सामान्यज्ञानंजनयंतीवृत्तिश्चित्तं। तदेवात्रचिदित्युच्यते। लोकेयःकृष्णःसपथा। दार्थएवंभवतुवा
नवेतिसंकल्पविकल्पौकुर्वाणावृत्तिर्मनः तदेवात्रमनइत्युच्यते। भवत्येवेतिनिश्चयरूपावृत्तिर्बु
द्धिःसैवात्रधीशब्देनोच्यते। सोमक्रयण्याश्चिन्मनोधीरूपत्वेनप्रशंसाक्रियते। ततित्तिरिर्दर्शय
ति। वाग्वाएषायत्सोमक्रयणी। चिदसिमनासीत्याहइत्यस्यैवैनामेतद्दिति। वागात्मिकांसोमक्रय
णींचिदादिशब्दवाच्याभिस्सैवंप्रशंसतीत्यर्थः। चिदादिरूपत्वमुपचारेणसंपाद्यप्रशंसाकृता दक्षि
णादिरूपत्वेनतुविद्यमानेनैवप्रशंसाक्रियते। कर्मस्सुगवांदेयद्रव्यत्वेनदक्षिणात्वंप्रसिद्धंसोम
क्रयसाधनत्वेनयज्ञसंबंधित्वात्यज्ञियात्वं देवेषुक्षत्रजात्यभिमानीसोमः॥ तथाचबृहदार
ण्यकेसमाम्नायते। यान्येतानिदेवत्रा क्षत्राणीन्द्रोवरुणःसोमोरुद्रइति। तेनसोमेनक्षत्रेणा
त्मिमंतव्यस्यसोमलताद्रव्यस्यक्रयहेतुत्वेनक्षत्रियात्वंज्योतिष्टोमस्याद्यंतयोःप्रायणीयोद
यनीययोःअदितिदेवताकत्वात्। सेयमदितिरुत्रयतः शीर्षणीतद्रूपत्वंचास्याःक्रयद्वारातत्सं
बंधित्वादुपचर्यते। यथोक्तमर्थंतित्तिरिर्दर्शयति। दक्षिणासीत्याहदक्षिणाह्येषायज्ञियासीत्या

हयज्ञियाभीष्टा वेनां करोति स्त्रित्र सयासीत्याह। स्त्रियाह्येषादितिरस्युभयतःशीर्ष्णी साहयदे
वादित्यः प्रायणीयायज्ञानामादित्युदयनीयस्तस्मादेवमाहेतिसा एवोक्तिचिदादित्यरूपा त्वं नो
स्मदर्थं सुप्राचीसु प्रतीचीत्त्व। प्रथमं सोमस्य क्रेतारं प्रतिसुष्ठु प्राङ्मुखी गत्वा पश्चादस्मान्प्रति समा
गंतु सुष्ठु प्रत्यङ्मुखी भव। मित्रत्वा हि तत्कारी देवस्त्वां पदि बध्नीतां दक्षिण पादे बंधनं करोतु तथा
पूषा पोषको देवः अध्वनस्यातु। पयोपेतान्मार्गात्त्वां पालयतु। सोमयागस्याध्यक्षायेंद्राय
स्वामिने देवाय तत्प्रीत्यर्थं सोमक्रयत्वं साधनत्वेन माता त्वा अनुमन्यतां। त्वदीयमाता त्वामंगीक
रोतु। एवं पित्रादयोप्यनुमन्यंतां त्वगर्भस्त्वया सहैकस्मिन्गर्भे वस्थितो वत्सः भ्राताऽनुत्वन्तःप
र्वपश्चाद्वोत्पन्नाः सखायः सहसेचारी वत्सः। सख्येव सयूथ्यः एकस्मिन्गोसमूहे वर्तमानत्वात् हे देवि
सोमक्रयणि सा त्वं इंद्राय सोममच्छ हि इंद्रार्थं सोममच्छ प्राप्तुं गच्छ रुद्रस्त्वा वर्तयतु सोमं गृहीत्वा
स्थितां त्वां रुद्रो देवनास्मान्प्रति निवर्तयतु। सोमो देवः सखायस्यास्तत्सख्या त्वं सोमसखासि। क्षेम
ए पुनरेहि। ल्पयोप्यागच्छ। मित्रस्त्वा पदि बध्नीतामित्यादिमंत्रव्यातमर्थंतिन्तिरर्थदवदवहास्या

१२५

दित्यादिना विस्पष्टं प्रपंचयामास॥ इति षष्ठोनुवाकः॥ षष्ठे सोमक्रयण्यामंत्रा उक्ताः सप्तमे सोम
क्रयण्यानुगमनादिमंत्रा उच्यंते॥ का०सा०॥ उदीचीं नियमानामनुगच्छतो वस्व्यसीति तिति। अनुगच्छतो
ध्वर्युयजमानावित्यर्थः॥ पाठस्तु॥ वस्व्यस्यदितिर्चक्र इति॥ सोमक्रयणी गौर्वसुरूपेणादित्यरूपेणा
त्यरूपेण रुद्ररूपेण चंद्ररूपेण च स्तूयते वस्वीत्यादिभिः पंचभिर्वाक्यैः किं च बृहस्पतिर्देवः त्वां
सुम्ने रम्णातु त्वां सुखे रमयतु आ चक्र इति कांतिकर्मसु पठितं। रुद्रो देवो वसुभिरष्टभिर्देवैः स
हत्वां रक्षितुं कामयत इत्यर्थः। का०सा०॥ षष्ठं पदं प्यतीत्य सप्तमं पर्युपविशतीति हिरण्यमस्मिन्निधा
यात्रि जुहोत्यदित्यास्त्वेतीति॥ पाठस्तु॥ अदित्यास्त्वा स्वाहेति॥ अदित्याः अखंडितायाः पृथिव्या
०मुवाम ई दुनिन्द्रियास्यपदे देवयजने देवानां यागयोग्यस्थाने त्वा आजिघर्मि हे सोमक्रयणी पदत्वमो
क्षारयामि क्षरणदीप्त्योरिति धातुः देवयजनस्य पृथिवीमद्धे तिप्रसिद्धेति निर्दिश्यते। पृथि
व्याः सेषमद्धे यद्देवयजनमिति। किं च इळायास्पदमसि हे स्थानविशेषगोपादोसि तेन पदेनांकि
तत्वात्तद्रूपत्वं तत्र पदं घृतवत् घृतसंयुक्तं तथा कर्तुं स्वाहा जुहोमि। इळा रव्या या गोः पादस्य घृत

१२६

वत्सं घृतस्रवणहेतुत्वादवगंतव्यं। नद्यौ तिनिरिर्दर्शयति। यदेवास्याः पदाद्घृतमपीड्यतेतस्मा देवमाहेति। सायत्रयत्रन्यक्रामत्ततो घृतमपीड्यतेतिच॥ कात्या०॥ पृषेन्नपदेत्रिः परिलिखत्यस्मे रमस्वेतीति। हे गोपादत्वं अस्मे॰ अस्मासु रमस्व क्रीडांकुरु॥ कात्याय०॥ समुद्गृह्य यदंस्थाल्यामावयत्यस्मे तेबंधुरिति। हे गौपादस्क॥ अस्मे ते बंधुरिति हे सोमक्रयणीपदते तव अस्मे बंधुः। वयंबंधुन्नूताः स्मः॥ कात्याय०॥ यजमानायपदंप्रयच्छति त्वेरायइतीति। हे यजमान त्वेत्वयिरायो धनान्येतत्पदरूपेण तिष्ठंत्विति शेषः। अनेनमंत्रेणधनसंपत्तिंनिरिर्दर्शयति। त्वेरायइति यजमानायप्रयच्छति यजमानएवरयिंदधानीति॥ कात्याय०॥ अस्मेरायइति यजमानः प्रतिगृह्णातीति। अस्मे अस्मासु यजमानेषु रायो धनानि पदरूपेण तिष्ठंतु॥ कात्याय०॥ मावयमित्यध्वर्युरात्मानं स्वं स्त्रातीति॥ पाठस्तु॥ मावयं रायस्पोषेण वियोष्मेति। वयमध्वर्युप्रभृतयो रायस्पोषेण धनस्य पुष्ट्या मावियोष्म वियुक्ता मा भूवाम। कात्याय०॥ तृत्यापत्न्यैपदं प्रयच्छति नेष्टा तोतइत्येनांवाचयतीति। तोत शब्दः कोशवाची तस्मिन्कलत्रे रायः पदरूपाणि धनानि तिष्ठंतु। पत्न्यैपदप्रदानेनैतन्निरिरूपयपादयति। तोतोराय इति पत्न्या अर्द्धवा एषआत्मनोयत्पत्नीयथा

ग्य॰

गृहेषु निधत्तेनाद्धेवतद्विति॥ कात्याय०॥ सोमक्रयणीवसमीक्षमाणांसमख्येइत्नीति। एनांवाचयतीत्यनुवर्तते॥ पाठस्तु॥ समख्ये देव्या संदृशीति। देव्या द्योतमानया धिया बुध्या समख्ये अहंपत्नी सोमक्रयण्या सम्यक्थाज्ञेव तितथा समख्ये दृष्टवत्यस्मि किं च उरुचक्षसा विस्तीर्णदर्शनया दक्षिणया दक्षिणया त्वयोग्यगवा सोमक्रयण्यासमित्युनेनोपसर्गेण संयुज्य स्थितास्मीत्यमर्थ उपलक्ष्यते। एवंविधसोमक्रयेणित्वमे पत्न्या आयुर्मा प्रमोषीः प्रमुषितं विनष्टं मा कार्षीः। मो अहं तव सोमक्रयण्यास्तव आयुरहं पत्नी प्रमोषिषमित्यध्याहारः। प्रमुषितं मा कर्षं किंच तेव सोमक्रयिण्याः संदृशि संदर्शने सति वीरान्पुत्रान् विदेयलभेय॥ ॥इति चतुर्थोध्यायेसप्तमानुवाकः॥ ॥सप्तमे सोमक्रयण्यनुगमनादिमंत्राउक्ताः। अष्टमे यजमानवाचनादिमंत्राउच्यंते॥ ॥कात्यायनः॥ एषतइति वाचयतीति। आपस्तंबोप्याह। एषतेगायत्रो भागइत्येतैर्यजमानो भागरूपं राजानमुपतिष्ठतइति। मंत्रचतुष्टयस्य प्रतीकमिदं। तत्र प्रथममंत्रपाठस्तु॥ ॥एषतेगायत्रो भागइति मे सोमाय ब्रूतादिति। हे सोम ते तव एषपुरो दृश्यमानो भागो गायत्रः गायत्री संबंधः इति मे एवं प्रकारं मम यजमानस्य वचनं सोमाय ब्रूतात्। हे अध्वर्यो सोमाभिमानि देवाब्रूहि। गायत्रीछंदोयं सोमस्य तव क्रयः। नतु वृथार्थमित्येषयजमानाभिप्रायः। तमेतंमध्वर्युः सोमायकथयेत्यादिकण्व आह। द्वितीयमंत्रयोः पाठस्तु॥ एषते त्रैष्टुभो भागइति मे सोमाय ब्रूतात्। एषते भागतो

१२६

नगइतिमेसोमायब्रूतादिति। त्रैष्टुभेन त्रिष्टुप्छंदसः संबंधी आगतो जगतीछंदसः संबंधी अन्यत्सर्वं
व्याख्येयं॥ चतुर्थमंत्रपाठस्तु॥ छंदोमानानां साम्राज्यं गच्छतादितिमेसोमायब्रूतादिति। अस्मिन्
छंदस्येतावंत्यक्षराणीतिमानं परिमाणं यैर्देवैर्ज्ञायते छंदोमानाः तेषां छंदोमानानां संबंधी लो
कः साम्राज्यः समीचीनराज्योपेतः तं लोकं हे सोम गच्छतात् त्वं गच्छ इति मे मम यजमानस्यैव व
चनं सोमाय ब्रूतात्। हे अध्वर्यो सोमदेवाय कथय। एतेषां मंत्राणां तात्पर्यं तित्तिरिर्दर्शयति।
यो वा एवं सोमं राजानं साम्राज्यं लोकं गमयित्वा क्रीणाति गच्छति स्वानां साम्राज्यं छंदा
सि खलु वै सोमस्य क्रयादेवमभिमंत्रयते साम्राज्यमेवैनं लोकं गमयित्वा क्रीणाति गच्छति
स्वानां साम्राज्यमिति। अस्यायमर्थः। यो यं यजमानः सोमाभिप्रेतं राजानं समीचीनराजार्ह ९२७
लोकं प्रथमतो वाचा प्रापय्य संतोषं जनयित्वा पश्चात्क्रीणाति स यजमानो ज्ञातीनां मध्ये सा
९२७ म्राज्यं प्राप्नोति। सोमस्य तथाविधो लोकः कः इति चेत् गायत्र्यादिछंदोदेवता यत्र तिष्ठंति स एव
तथाविधो लोकः तस्मात्कारणात्सोमक्रयात्पूर्वमेभिर्मंत्रैरभिवाक्यं कुर्वीत साम्राज्यं प्राप

प्य क्रीतवान् भवति। तेन स्वयमपि ज्ञातीनां मध्ये साम्राज्यं प्राप्नोति॥ कात्या०॥ प्राङुपविश्यास्माको
सीति सोममालभत इति। पाठस्तु॥ आस्माकोसि ॰॰ विचिन्वन्त्विति। हे सोम त्वं क्रयपथमागतः सन्
अस्माको ऽसि। अस्मदीयो ऽसि। ते तव संबंधी यः शुक्रः तन्नामको यो ग्रहो ऽस्ति सो ऽयं ग्रह्यो ग्रहेषु साधुः
एतदुपलक्षणमेतत् वायव्यादिग्रहाणामपि ते सर्वे ग्रहाः साधव इत्यर्थः। विचितो विवेकेन चयनस्य
कर्तारः त्वा विचिन्वंतु सोमरूपं त्वां विविच्य सारविवेकं कृत्वा सारभूतमेकत्र यच्छंतु हयंतु॥ कात्या०॥
सोममभिमंत्रीते दक्षाकृतो ऽभित्यमितीति॥ पाठस्तु॥ अभित्यं देवं ॰॰ कृपा स्वरिति। तं देवं यः प्रकृतः सो
माख्यो देवस्तमभ्यर्चामि सर्वतः पूजयामि। कथंभूतं देवं ओण्योः द्यावापृथिव्योः सवितारं सोमया
गानां ओण्योरिति द्यावापृथिवीनाम सुपठितं। कविक्रतुं मेधाविकर्माणं सत्यसवं अवितथप्रेरणं।
रत्नधारकं पोषकं वा अभि सर्वतः प्रियं देवानां प्रीतिविषयं मतिं मननयोग्यं कविं क्रांतदर्शिनं किंच
यस्या दीप्तिः अमतिः केनापि मंतुमशक्यास्ति ऊर्ध्वा ऊर्ध्वगमनाभिमुखी। सवीमनि प्र
सवविज्ञोषवति देहे यत्र नक्षत्रादीनां प्रसवः प्रवृत्तिस्तत्रेत्यर्थः। अदिद्युतत् सर्वाणि वस्तूनि घो

तिलवती हिरण्यपाणिः सुवर्णाभरणयुक्तः पाणिस्तद्युक्तः स्वरादित्वः सुक्रतुः साधुसंकल्पः रूपा
अस्यंतं रूपालुरभिमीत पूर्वोक्तक्रायुक्तः सदेवः सोमं भिमीवतवानेतावत्सोमइति तदीयं परि
माणं निश्चितवान् ॥ का० स्था० ॥ उष्णीषेण बध्नाति प्रजाभ्यस्त्वेतीति । हे सोम प्रजाभ्यः प्रजानामुपका
राय त्वा सोमस्त्वं त्वां बध्नामीति मंत्रशेषः ॥ का० स्था० ॥ अंगुल्या मध्ये विवृणोति प्रजास्त्वानुप्राणन्त्विति ।
उष्णीषेण बद्धस्य सोमदेवस्य श्वासनिरोधो मा भूदिति विवरं कुर्यात् । प्रजास्त्वमनुप्राणिहीति मंत्र
शेषः । हे सोम त्वामनुप्रथमतः श्वासं कुर्वंतं त्वां अनुसृत्य प्रजाः सर्वाः प्राणंतु श्वासं कुर्वंतु । तथा
हे सोम त्वमपि प्रजा अनुप्रथमतः श्वासं कुर्वतीः प्रजा अनुसृत्य प्राणिहि श्वासं कुरु । प्रजानां तव च
कदाचिदपि श्वासनिरोधो मा भूत् । किंतु परस्परमनुसृत्य श्वासः प्रवर्त्ततामित्यनेनाति प्रायेण
विवरं करोतीत्यर्थः ॥ ॥ इति [illegible] ॥ ॥ अथ यजमानवाचनादिमंत्रा उक्ताः । नवमे हिरण्य
स्पर्शादिमंत्रा उच्यंते ॥ का० स्था० ॥ चंद्रं त्वेति हिरण्यमालभ्य वाचयतीति ॥ पाठस्तु ॥ चंद्रं त्वा अमृते
नेति । हे सोम चंद्रं त्वा । चदि आह्लादन इति धातुः । फललक्षणेन आह्लादकत्वेन । चंद्रेण क्रीणामि । आ

१२८ १२८

आह्लादकरेण हिरण्येन क्रीतं करोमि कथंभूतं त्वां शुक्रं दीप्यमानं अमृतं स्वादुत्वेनामृतसमानं । क
थंभूतेन चंद्रेण शुक्रेण दीप्यमानेन अमृतेन अग्निसंयोगादिनापि विनाशरहितेन ॥ का० स्था० ॥ सग्मे
त इति सोमविक्रयिणः हिरण्येनाभिकंपयतीति । यो हिरण्यं गृहीत्वा सोमं विक्रीणाति तमध्वर्युर्हि
रण्येनाभिकंपयेत् । तद्धस्ते हिरण्यं पुनः पुनर्दत्वा स्वीकुर्वन् व्यवहारं कुर्यादित्यर्थः । गोरिति मंत्रशे
षः । ओकारस्थाने ओकारस्यादेशः । हे सोमविक्रयिन् ते गोः सग्मेति छत्विति शेषः । या गौः सोमस्य मूल्य
त्वेन तुल्यं दत्ता सा त्वदीया गौः पुनः प्रत्यावृत्य सग्मे मदीये संगवति यजमाने तिष्ठतु ॥ हिरण्यमेव तव वास्तु गौर्मा
भूदित्यर्थः ॥ ॥ कात्यायनः ॥ ॥ अस्मे त इति यजमानसहितं निदधातीति ॥ यजमाने प्रत्यर्पितं यत्तद्धिरण्यं तस्य
नयं जमासहितं सोमविक्रयिणः पुरतो निदधातीत्यर्थः ॥ चंद्राणीति मंत्रशेषः ॥ हे सोमविक्रयिन् तेन चंद्राणि
तुभ्यं दत्तानि यानि हिरण्यानि ता न्यस्मे अस्मासु अत्यावृत्य तिष्ठंतु । तव गौरेव सोमस्य मूल्यं हिरण्यानि मा भव
न्त्वित्यर्थः ॥ का० स्थायनः ॥ अजां प्रत्यभिमुखीमालभ्य वाचयति तपसस्तनूरिति नीति ॥ पाठस्तु ॥ तपसस्तनूरसि प्राजापत्यं
पुषेयमिति । हे अजे त्वं तपसः पुण्यस्य तनूरसि देहो भवसि । यज्ञनिष्पादकस्य सोमलतस्य द्युलोके वसितस्या

नयनार्थमजां गृहीत्वा गायत्री देवता जगामेति सोमाहरणोपाख्याने तित्तिरिणा समाम्नातत्वा
स्मात् ऽदनाया: पुण्यशरीर त्वं। वर्ण्यत इति वर्णो देहः। हे अजे त्वं प्रजापतेर्वर्णोऽसि। यथा प्रजाप
तिः सर्वदेवताप्रिय एवं अजापि सर्वदेवप्रिया। तदपि तित्तिरिणा समाम्नातं सा वा एषा सर्वदेवत्या
यदजेत्येति। हे सोम त्वं परमेण पशुना उत्तमेनाजादिरूपेणानेन पशुना इदानीं क्रीयसे पशोरु
त्तमत्वं चतपसस्तनूरिति स्वादिना पूर्वमेवोक्तं अतोऽस्य प्रसादात् अहं सहस्रपोषं पुत्रपश्वादिसह
स्राणां पोषं पोषणं यथा भवति तथा पुषेयं पुष्टो भूयासं॥ का० स्या०॥ सख्येनामा प्रयच्छ मित्रो न
इति दक्षिणे। न सोममादायेति॥ पाठस्तु॥ मित्रो न एहि सुमित्रध इतीति। हे सोम त्वं नोऽस्माकं मि
त्रः प्रीतियुक्तो भूत्वा सुमित्रधः शोभनानां मित्राणां धारकः सन् एहि आगच्छ। वस्त्रेण शुद्धस्य
सोमस्य वरुणदेवताकत्वेन क्रूरत्वान्नेशांस्यर्थं मित्रत्वेन प्रार्थनं। तदाह तित्तिरिः। वारुणो वै क्री
तः सोम उपनद्धो मित्रो न एहि सुमित्रध इत्याह शान्त्या इति॥ का० स्या०॥ दक्षिणोरौ प्रस्तुत्य वासः सो
मं निदधातीन्द्रस्योरुमित्येति। वासः प्रस्तुत्य वस्त्रमुपरिस्थाप्येत्यर्थः॥ पाठस्तु॥ इन्द्रस्योरुमास्योनमि

१२९

१२९

मिति। फलरूपेण परमैश्वर्येणोपेतत्वादत्रेन्द्रशब्देन यजमानो विवक्षितः। हे सोम त्वमिन्द्रस्य य
जमानस्य दक्षिणमूरुमिमा विश दक्षिणस्मिन्नूरावुपविशेत्यर्थः। कथंभूतस्त्वं उशन् दक्षिणमूरुं
कामयमानः स्योनः सुखरूपः कथंभूतमूरुं उशन्तं त्वद्विषयकामेनोपेतं। स्योनं उपवेष्टुं सुखकरं। पुरा
देवाः क्रीतं सोममिन्द्रस्योरावुपवेशयन्। तस्मादत्र यजमानस्येन्द्रशब्देन व्यवहार इति। तदाह तित्तिरिः।
देवा वै सोममक्रीणन्। तमिन्द्रस्योरौ दक्षिण आसादयन्। एष खलु वा एतर्हीन्द्रो यजते तस्मादेवमाहे
ति॥ का० स्या०॥ स्वान भ्राजेति जपति सोमविक्रयिणमीक्षमाणमिति॥ पाठस्तु॥ स्वान भ्राजाङ्घारे वोदहन्ति
ति॥ स्वानादिभिः सप्तभिः शब्दैर्द्युलोके सोमस्य रक्षकाः सप्त देवाः संबोध्यन्ते। हे स्वानादयः सप्त दे
वा वो युष्माकं सोमक्रयणाः सोमं क्रेतुमानीता ये हिरण्यादिपदार्थास्ते पुरतः स्थापितास्तान्पदा
र्थान् स्वयं रक्षध्वं वो युष्मानस्माद्दत्तान् ते धिवेरिष्टा भूत्वा मा हिंसिषत। स्वानादीनां द्युलोके सोमर
क्षकत्वं तित्तिरिर्दर्शयति। स्वान भ्राजेत्याहैते वा अमुष्मिँल्लोके सोममरक्षन्निति॥ का० स्या०॥ गृहीत्वा तस्सो
मं परि माग्ने इति वाचयतीति॥ पाठस्तु॥ परि माग्ने भजेति॥ हे अग्ने दुश्चरितात् पापात् मा परिबाध
स्व। मां परितो निवारय। सुचरिते सदाचाररूपे पुण्यमार्गे मां यजमानं आभज सर्वतो भज। स्था

पयेत्यर्थः॥ का॰स्या॰॥ उदायुषेत्युत्थानमिति॥ पाठस्तु॥ उदायुषा अन्विति। उदायुषा उत्कृष्टेन चिरंजी
वनलक्षणेनायुषा निमित्तभूतेनोत्तिष्ठ स्वायुषा यागदानादिनानोत्थानेनायुषा निमित्तभूतेन अग्नि
तां अनु सोमाधिदेवाननु स्वस्य उदस्थां अहमुत्थितवानस्मि। देवाननुस्त्यो त्थानं तिन्तिरिदर्श
यति। उदायुषा स्वायुषेत्याह देवता एतात्वा रक्ष्यो त्तिष्ठतीति॥ का॰स्या॰॥ त्रीब्रीसोमं कृत्वा भया
पूर्विज्ञं तदूर्ध्वं प्रतिपंथामित्यनोव्रजतीति। त्र्याकटमभिलक्ष्य गच्छेदित्यर्थः। पाठस्तु॥ प्रतिपंथां अगस्व
ति। पंथां मार्गं प्रति अपद्महि वयं प्रस्यामहि। प्रतिप्रपन्नाः प्राप्ताः अक्रमेत्यर्थः। अन्यथा कथं
तं पंथानं स्वस्तिगां क्षेमेण गंतुं योग्यं अनेहसं अंहः पापरूपश्चोरादिबाधः। तद्रहितं येन पथा गच्छ
न्पुरुषो विश्वाः विश्वान्सर्वान्द्विषो द्वेषिणश्चोरादीन्परिवृणक्ति परितो वर्जयति। वसु विंदते ध
नं लभते तं पंथानमिति सर्वत्रान्वयः॥ ॥ इति नवमोनुवाकः॥ ॥ नवमे हिरण्यस्पर्शादिमंत्रा उक्ताः।

१३०

दशमे कृष्णाजिनास्तरणादिमंत्रा उच्यंते॥ का॰स्या॰॥ कृष्णाजिनमस्मिन्नास्तृणात्यदित्यास्त्वगसी
ति। अस्मिन्नाकटइत्यर्थः। असीतिमंत्रशेषः। हे कृष्णाजिन त्वं अदित्याः त्वगसि आखंडिताया:
पृथिव्यास्त्वग्रूपमसि॥ का॰स्या॰॥ तस्मिन्सोममभिदधात्यदित्यैसदइतीति। आसीदितिमंत्रशेषः।

हे सोम त्वं अदित्यै सदः। अदितेर्भूमेः संबंधि स्थानं आसीद सर्वतः प्राप्नुहि। तत्रोपविशेत्यर्थः॥ का॰स्या॰॥
अस्तभ्नाद्यामितिसोममालभ्यवाचयतीति॥ पाठस्तु॥ अस्तभ्नाद्यां वृतानीति। ऋषभः श्रेष्ठः सोमः
द्यामंतरिक्षं लघुलोकोयथानपातु तिततथास्वकीयया न्यायास्तंभनं चकार। तथांतरिक्षमस्तभ्नात्।
तथा पृथिव्या वरिमाणं भूमेर्वरिष्ठत्वं सर्वेभ्योभूतेभ्योधिकश्रेष्ठत्वं अभिमीत निर्मितवान्। तयोः सम्राट्
सम्यक् राजमानो विश्वा विश्वानि सर्वाणि भुवनान्यसीदत् सर्वान् लोकान् व्याप्तवान् इत्थमुक्तेन प्रका
रेण तानि द्युलोकस्तंभनादीनि विश्वा सर्वाणि वरुणस्य सर्वावरणसामर्थ्ययुक्तस्य सोमस्य व्रतानि
व्रतवन्नियतानि कर्माणि सर्वदा तानि करोतीत्यर्थः॥ का॰स्या॰॥ वनेषु व्यंतरिक्षमिति सोमपर्याणह
स्तेन परिनह्येति। बंधनहेतुना वस्त्रेण परितो वेष्टयेदित्यर्थः। बोधायनोप्याह। अथैनं वाससा परित
नोति वनेष्विति। पाठस्तु॥ वनेषु व्यंतरिक्षं सोमम्प्रावित्ति॥ वरुणः सर्वावरणसमर्थः सोमो वनेषु
वनगतवृक्षाग्रेषु अंतरिक्षमाकाशं विततान तत्रावरणद्वयाभावादस्य तं विस्तारितवान्। तथा अर्व
त्सु मरवेषु वाजं बलं विततानेत्यनुवर्तते। उस्रियासु गोषु उस्रिया शब्दो गोनामसु पठितः। पयः क्षी

रं वितताना। हृत्सु हृदयेषु क्रतुं संकल्पं तत्तत्स्युपेतं मनो विततान दिवि द्युलोके सूर्यं विततान। अद्रौ पर्वते सोमं वल्लीरूपं अदधात् स्थापितवान्। परमेश्वरस्यैव सोमदेवरूपेणावतीर्णत्वात् मंत्रद्वयोक्तं द्युलोकस्थं त्वमादि सामर्थ्यं दृष्टव्यं पतगतानां पाषाणानां संधिषु सोमवल्ली नाम उत्पाद्यमानत्वात् दृष्टे सोमस्थापनं द्रष्टव्यं। तदाह तित्तिरिः। सोमम द्राविस्या ह ग्रावाणो अद्रयस्तेषु सोमं दधातीति॥ का० सा०॥ कृष्णा जिने पुरस्तात् दास्यन्ति सूर्यस्य चक्षुरितीति। पाठस्तु॥ सूर्यस्य चक्षु० विपश्चितेति। हे सोम त्वं सूर्यस्य संबंधि यच्चक्षुरस्ति। तत्समानचक्षुर्युक्तो भव। तथाग्नेरक्ष्णः कनीनिकाग्नेः संबंधि यद्दक्षिविपश्यते। तस्याक्ष्णः संबंधिनी या कनीनका तारका तामारोहेत्यनुवर्तते। तत्समानदृष्टिपाठकयुक्तो भवेत्यर्थः। यद्वा सूर्याग्निदृष्टिविषयो भवेत्यर्थः। यत्र यस्मिन्देवयजने एतश्चोदिरीयसेऽश्वैर्गच्छसि एतशः इत्यश्वनामसु पठितः। १३१

तत्रैस व्याहारः। तस्मिन्देवयजने विपश्चिता विदुषा सर्वज्ञेनाग्निना सह त्वा यजमानोद्यापमानस्तिष्ठेति तत्रैस अध्याहारः। सूर्याग्निदृष्टिविषयत्वे सति मार्गो रक्षो बाधरहितो भवति। तदाह तित्तिरिः। एष वा अरवलु वा अरक्षोजुषः। सूर्याग्निदृष्टिविषयत्वे सति मार्गो रक्षो बाधरहितो भवति। तदाह तित्तिरिः। एष वा अरक्षोहतः पंथा योऽग्नेश्च सूर्यस्य चेति॥ का० सा०॥ अनडुहो युनक्त्युस्राएतमिति॥ पाठस्तु॥ उस्राएतं० गत्रमिति॥ हे उस्रा वनड्वाहावेतमागच्छतं। कथंभूतावुस्रौ। धूर्वाहौ। शकस्य धुरं वोढुं समर्थौ। अनश्रु

नेत्रौ या रश्मुरहितौ सो० सा हाविस्य र्थः। अवीरहणौ। स्यंगादिभिः वीराणां पुत्राणां हननमकुर्वाणो। ब्रह्मचोदनौ ब्राह्मणं वयस्तं प्रति प्रेरकौ न धाविधौ युवां स्वस्ति क्षेमेयजमानस्य गृहान्प्रति गच्छतं॥ का० सा०॥ ऋद्रोमेसि० सर्वस्कृतमिति। हे सोम मेहांय जमानाय भद्रुपकारार्थं भद्रो भद्रतिवावयतीति॥ पाठस्तु॥ भद्रोमेसि० सर्वस्कृतमिति। हे सोम ममेहांय यजमानाय भद्रुपकारार्थं भद्रोसि। कल्याणरूपोसि। भदि कल्याणरति धातुः। हे भुवस्पते भूशब्देनात्र स्थितानि भूतानि यजमानाध्वर्यु प्रभृतीन्युपलक्ष्यंते। तेषां भूतानां च पालकत्वात् पतिः सोमः एतदेवाभिप्रेत्य तित्तिरिराह। भूतानामेवैष पतिरिति। तथा विचर हे सोम विश्वानि सर्वाणि धामान्यभि प्राचीप्रत्यस्य भुवस्पतरित्याह भूतानां वा एष पतिरिति। तथा विचर हे सोम विश्वानि सर्वाणि धामान्यभि प्राचीप्रत्यवस्व भुवस्पतरित्याह भूतानां ह्येष पतिरिति। पत्रिपरिणाह्यनेन सर्वत्र संचरेत स्तत्स्थानं दाहविधानादि स्थानं प्रतिष्ठितस्य प्रत्यवस्व प्रकर्षेण गच्छ। पत्रि परिणाद्रत्यनेन सर्वत्र संचरेत स्तत्स्थानं दाहविधानादिस्थान्यभिलक्ष्य प्रत्यवस्व प्रकर्षेण गच्छ। यजमानयागस्य प्रतिषेधकाविरत्विन्नो पाठ्यंते। नेत्वा माविदन्परिपंथिनः। यजमानयागस्य प्रतिषेधकाविघ्नकारिणस्त्वामाविदन् अघायवः। अघं पापं हिंसारूपं इच्छंतीव का अरण्यस्थाः सामाविदन्। किंच श्येनो भूत्वा श्येनाख्य पक्षिवच्छीघ्रगामी भूत्वा स्मदीयस्य यजमानस्य गृहान्परापत शीघ्रं गच्छत त्वं गत्वा च यत्र स्थानं विघतदीतिशेषः॥ का० सा०॥ शाला हेषुनो आवयोस्तव मम स्वसंस्कृतं सर्वोपकरणसंयुक्तं स्थानं विघतदीति शेषः॥ का० सा०॥ शालाहेषुनो आवयोस्तव मम स्वसंस्कृतं सर्वोपकरणसंयुक्तं स्थानं हितसारं गंनमो पूर्वेण प्राप्तिपस्थातागनीषोमीयमन्त्रमादायतिष्ठीत कृष्णसारंगमेध्यमनावित्लो हितसारं गंनमो

मित्रस्येत्येतेनालभ्यं वाचयतीति ॥ पाठस्तु ॥ नमो मित्रस्य० शं॰ सतेति । अस्मिन्मंत्रे सूर्यरूपेण सोमः
स्तूयते मित्रस्य वरुणस्येति च तुर्थ्यर्थे षष्ठी मित्राय सूर्याय नमोऽस्तु । कथंभूताय मित्रावरुणाय स्वर
श्मिभिर्जगदावृण्वते । चक्षुषे च लुभ्यते दृष्टे । महो महते देवाय द्योतमानाय हे ऋत्विजस्त ज्योतिष्टोमनि ३
रूपं ऋतं सत्यं अवश्यफलप्रदं कर्म अनुष्ठायेति शेषः सपर्यत तेनानुष्ठानेन सपर्यां परिचर्यां कुरुत ।
किंच दूरेदृशे द्युलोकात्मके दूरदेशे प्राणिभिर्दृश्यत इति दूरेदृक् तस्मै देवजाताय देवात् द्योतमानात् स्वर
मात्मन उत्पन्नो देवजातस्तस्मै केतवे प्रज्ञानरूपाय हे ऋत्विजः दिवस्पुत्राय द्युलोकस्य पुत्रवत्प्रियाय सूर्या
य शं॰सत सूर्यप्रीत्यर्थं शंसनं स्तुतिं कुरुत ॥ का॰सा॰॥ उत्तंभनमेनोपस्तभ्नाति वरुणस्योत्तंभनमि
ति । असीति मंत्रशेषः । उत्तभ्यते शकटस्य मुखाग्रमुन्नतत्वेन स्थाप्यते यस्मिन्काष्ठे तत्काष्ठमुत्तंभनं हे १३३
काष्ठ त्वं वरुणस्य शकटस्य उत्तंभनमसि । यथा वरुणो बंधकारी देवः एवं शकटेऽपि बद्धस्य सोमस्य स्थापि
१३२ तत्वात् वरुणशब्देन शकटमुपचर्यते ॥ का॰सा॰॥ शम्ये चोद्वहति वरुणस्य स्कंभसर्जनीति । स्थ इति मंत्र
शेषः । वरुणस्य शकटस्य युगे बद्धयोर्बलीवर्दयोर्गलस्य बहिर्भागे काष्ठनिर्मिते शम्ये स्थाप्येते । ताभ्यां

बलीवर्दयोर्गलस्ततो गमननिवारणं भवतीति ते तत्स्कंभशब्देनोच्यते । हे शम्ये युवां स्कंभसर्जनी स्कंभि
तुं स्तंभमाने भवतथः ॥ का॰सा॰॥ अभिमृशत्येनां वरुणस्य ऋतसदन्यसीति । एनामित्येतेन आसंदी
परामृश्यते । औदुंबरीमासंदीति पूर्वत्र प्रकृतत्वात् । वरुणशब्देनात्र बद्धः सोम उपलक्ष्यते । हे आसं
दि त्वं वरुणस्य वस्त्रादिना बद्धस्य सोमस्य संबंधिनी ऋतसदन्यसि ऋतं यज्ञस्तन्निष्पत्त्यर्थमुपवेशन
स्थानमृतान्यसि ॥ का॰सा॰॥ अभिमृशत्येनां वरुणस्य ऋतसदन्यसीति कृष्णाजिनमस्यामास्तृणाति
वरुणस्य ऋतसदनमसीति । हे कृष्णाजिन त्वं वरुणस्य बद्धस्य सोमस्य संबंधि ऋतसदनमसि यज्ञार्थ
मुपवेशनस्थानमसि ॥ का॰सा॰॥ तस्मिन्सोमं निदधाति वरुणस्य ऋतसदनमासीदेति । हे सोम त्वं स
वरुणस्य वस्त्रबद्धस्य तव संबंधिनी ऋतसदनी यज्ञार्थं उपवेशनस्थानभूतां मासंदीं प्राप्य आसीद कृ
ष्णाजिने सुखेनोपविश ॥ का॰सा॰॥ या त इति वाचयतीति ॥ पाठस्तु ॥ या ते धामानि० सोम दुर्या इति ।
हे सोम ते तव या धामानि यानि प्रातःसवनादीनि स्थानानि प्राप्येति शेषः । हविषा यजंति ऋत्विज
स्त्वादीयरसरूपेण हविषा यागं कुर्वंति । अतो यज्ञमभिलक्ष्येति शेषः । ते तव संबंधीभिता निस्वर्या

भिस्थानानि परिस्तृणन्त्सुभवा नूपरितः प्राप्तवान्भवतु। किंच। गयस्फानो गृहाणां वर्द्धकः प्रतरणः प्र
कर्षेण याज्ञिकान्प्रसरस्मांस्तारयिता। सुवीरः शोभना स्वकस्मादि दलद्भ्वा वीरा अस्मत्पुत्रपौत्राय
स्यतवसत्वं सुवीरः अवीरहा यः वीराणां महतां पक्षिपालक इत्यर्थः। हे सोम त्वं यथोक्तगुणयुक्तः सन्
दुर्यान्नः प्रवरगृहानाभ्युहि॥ इति दशमोनुवाकः॥ ॥अत्र विनियोगसंग्रहः॥ सोमक्रयार्थे तस्मिं

न्नवनुर्थे ध्यायई रिताः। दशानुवाकास्तेषामर्थोत्र प्रविविच्यते। वेपनाभ्यंजनाद्यर्था मंत्रा ह्योग्रहणा जि

नाः। अजिनाद्यत्रतार्थाश्च क्रयण्यानयनोचिताः। सोमक्रयण्यनुगतिर्यजमानस्य वाचनं। हिरण्या
र्थानयार्थाः स्युरजिनास्तरणादयः। यज्ञदक्षा लोस्तेन जपेदमाइति समुंदने। तृणान्तर्द्धतिमोषेति दे
दनं स्वधिमंत्रिताः आपः स्नायादुदुक्राम्मेद्रोवस्तेत्र सप्तहि। महीमांन वनीतेना स्यं प्यान्नक्त्रेति चक्षुषोः।
आञ्जिनि त्रिस्त्रिश्च स इशेषो च्छिद्रेणेति द्रवे त्रिषु। आवो वाचयते स्वाहामुष्टिरेकादशेरिताः। आकूत्यैत्व
या स्वङ्गिषडेवात्रोपवर्णिताः। कृष्णमामोजिनसंस्पर्शः शर्मासीत्यवरोहणं। ऊर्गबलाप्रबध्नातिमे
मतन्नीविबंधनं। विष्णोः शिरः प्रोर्णुतेथ विषाणामिंद्रमंत्रः। कंडूयनार्थमादद्यात्कृष्णस्या लेखनं
कुर्वि। उत्कृतिदं डाञ्छ्रयणमष्टामंत्रा इहेरिताः। प्रतं त्रितिविर्वाग्निमा कोहृग्निर्ब्रह्मा सदृद्ददेत्। देवीष्यः

स्यन्नोद्दे देविबेलस्वात्राशीतिस्यद्दशोक्त। नाग्निं न धेयं तेनमन्त्रार्थं लोष्ठमाहरेत्। अपो मुंचामृत्रयेत तत्रलो
ष्ठं क्षिपेस्सुधु। अग्नेस्त्वस्य मंत्रयेत बुद्धं वावपते पुनः। कृाच्चादोस्तमिति ब्रूयादपद्यंस्य शान्वदेत्। रा
स्वयदनुकोवाके स्मिन्नुक्ता मंत्राश्चतुर्दश। घृते स्वर्णं क्षिपेदेषा ज्जरसीति जुहोतिहि। चंद्रं हिरण्य
मुक्षस्व चित्सोमक्रयत्रणी जपेत्। षष्ठेस्मिन्ननुवाके तु मंत्राश्चत्वार ईरिताः। वस्व्या क्रयण्यनुगति
रदित्याः सप्तमे पदे। जुहोत्यस्मिन्परिलिख्य पदमस्मे क्षिपेत्तद्घटे। तत्पदं स्वामिने दद्याद्दस्मे तस्त्वी
करोत्यसो। मा वयं संस्पृशो दृष्टिकृतोतोप त्वो नयेत्पदं। समख्ये वाचयेत्सप्तनवमंत्राः प्रकीर्तिताः।
चतुरो वाचयेदेष ह्यस्मासो संस्पृशेन तथा। अग्निसोमं भिमीते थ प्रजेत्युष्णीषबंधनं। प्रजास्त्वां तर्वि
दणुते मंत्रा अष्टावुदीरिताः। स्वर्णं जपेस्यद्दा जपेद्वेद सग्मे स्वर्णन कंपयेत्॥ अस्मे स्वर्णं क्षिपेदग्रे ज्ञा
स्पृष्ट्वा वाचयेत्तपः। मित्रो न सोममादत्त इंद्रोरोस्थापयेदमुं। अपेत्येनेति परिमास सोमं वाचयेद
था। उदोस्थापस्य नो गच्छतीति मंत्रा इहेरिताः। अदित्यष्णाजिनं स्तब्धा अदित्सोमं तु सादयेत्। अथ
स्पृष्ट्वा वाचयेत वने वस्त्रेण वेष्टयेत्। सर्वाजिनं पुरो दध्याद्दनड्वाहौ तु योजयेत्। उस्त्रेति वाचयेद्

द्रः सारंगे वा चयेन्नामः। वरूस्त्वातिग्माकदं कुरूत्वेदो वरूणाभ्ययोः। वरूस्य देहि हासंदीमजिना
स्तरणं वरु। चरु सोमं सादयेत जपे ध्याति चतुर्दश॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमा
र्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ॥ इति काण्वसंहितायां चतुर्थोऽध्यायः समाप्तः॥ ॥य
स्य निश्वसितं०१ सोमक्रयप्रधाने चतुर्थेऽध्याये वपनसंस्कारमारभ्य क्रीतस्य सोमस्य शाला
प्रवेशपर्यंतमंत्रा उक्ताः। अथ सौमिकवेदिप्रधानः पंचमाध्याय आरभ्यते। तत्रादौ तावदातिथ्य
हविरादिविषया मंत्राः प्रथमेऽनुवाकेऽभिधीयंते॥ कात्यायनः॥ निर्वपेदग्नेस्तनूरसीति पंचकृत्वः
प्रतिमंत्रमिति। प्रथममंत्रपाठस्तु॥ अग्नेस्तनूरसि विष्णवे त्वेति। हे हविस्त्वं अग्नेस्तनूरसि।
अग्निनामको यो देवः सोमस्य राज्ञो नरस्वरूपः तस्य तनूरिह तनुः शरीरमसि तथाविधं त्वां १३४
विष्णवे बहुषु यज्ञेषु व्यापित्वेन विष्णुशब्दाभिधेयाय सोमाय तदर्थं निर्वपामीति शेषः॥ द्विती
१३४ यमंत्रपाठस्तु॥ सोमस्य तनूरसि विष्णवे त्वेति। पूर्वत्र क्रीतायः सोमो ब[?]रूपः तदभिमानी देवो
रक्षाराज्ञा तस्यानुचरः कश्चित् सोमनामको देवोऽत्र सोमस्येति षष्ठ्यंतेन विवक्षितः। अन्यत्सर्वं
पूर्ववद्व्याख्येयं॥ तृतीयमंत्रपाठस्तु॥ अतिथेरातिथ्यमसि विष्णवे त्वेति। अत्रातिथेरित्यतिथ

नदा ३

ध्यं तेन सोमराजानुचरः कश्चिदतिथिनामको देवो विवक्षितः। हे हविस्त्वमतिथिनामकस्य देवस्याति
थ्यमसि। आतिथ्यनामकसंस्काररूपमसि। तिथिविशेषमनपेक्ष्य क्षुधया पीडितो ब्राह्मणस्तको
राधीयः परगृहे समागत इति तस्य क्रियमाणः पादप्रक्षालनभोजनादिरूपः संस्कारः आतिथ्य
मुच्यते। तथाविधस्त्वमस्य हविषो विधिर्वक्ष्यते। अन्यत्सर्ववत्। चतुर्थमंत्रपाठस्तु॥ श्येनाय त्वा
सोमभृते विष्णवे त्वेति। श्येननामकः कश्चिद्देवः सोमराजानुचरः स च नानाविधोपपन्नादिसमर्पणेन सो
मराजानं बिभर्तीति सोमभृत् तस्मै श्येनाय हे हविस्त्वां निर्वपामि। अन्यत्सर्ववत्। पंचममंत्रपाठस्तु॥ अ
ग्नये त्वा रायस्पोषदे विष्णवे त्वेति। अपरोऽपि कश्चिदग्निनामको देवः सोमस्य राज्ञोऽनुचरो रायस्पोषं
धनं पुष्टिं ददातीति राज्ञो गृहे यद्धनं नास्ति तत्क्रयविक्रयादिना बहुधोपार्जयित्वा राज्ञे समर्पयति तथा
विधायाग्नये रायस्पोषदे रायस्पोषदायिने हे हविस्त्वामग्रे क्षिपामि। अन्यत्सर्ववत्॥ विष्णुशब्दाभिधेय
स्य सोमस्य राज्ञो हविषादेस्तदनुचराणामग्न्यादिदेवानां तदर्पितत्वं बंधिगायत्र्यादिछंदोदेवतानां
चरन् तिर्नवति। तदेतदभिप्रेत्य सलोकिकन्यायस्य वचनेनेति निर्दिष्टमाह। यावद्भिर्वै राजानुचरे

ग०
सौधे तिसर्वेभ्यो निधिभ्यस्तेभ्य आतिथ्यं क्रियते। छंदांसि खलु वै सोमस्य राज्ञोऽनुचराणीति अथा
ग्निनयनमंत्रा उच्यंते।। का०स्ता०।। अग्नेर्जनित्रमसीति शकलमादाय वेद्यां करोतीति। असीतिमंत्र
शेषः। प्रजायतेऽस्मिन्निति जनित्रं हे शकल त्वमग्नेर्जनित्रमसि अग्निजननाधारभूतमसि।
॥का०स्ता०॥ वृषणाविति कुशाग्रे रणे इति। आदाये अनुवर्त्तते। स्थ इति मंत्रशेषः। हे दर्भौ युवां वृषणौ
सेक्तारौ भवतः। यथा पुत्रजननाय स्त्रीपुरुषौ वीर्यस्य सेक्तारौ तद्वद्युवामप्यरण्योरग्निजननसाम
र्थ्यसंपादकावित्यर्थः। का०स्ता०।। उर्वश्यसीत्यधरारणिं तयोरिति। शकलस्थापितयोर्दर्भयो
रधरारणिं निदध्यात्। हे अधरारणे त्वमुर्वश्यसि यथोर्वशी पुरूरवसो गाया धस्ता(?)छे तेतद्वत्त्वमप्य
धोवस्थितासीत्यर्थः।। का०स्ता०।। आयुरसीत्युत्तरया। स्थाली संस्पृशेदिति। येयमुत्तरारणि
निधास्यते। तया स्थालीं स्पृशेत्। हे स्थालीगताज्य त्वमायुरसि अरेऽद्य येन जनयिष्यमानेस्या त्वं
निरायुः प्रदमसि।। का०स्ता०।। पुरूरवा इत्यधिनिदधानमिति। असीति मंत्रशेषः। अधरारणेरभि
मुखत्वेनोत्तरारणिं निदध्यात्। हे उत्तरारणे त्वं पुरूरवा असि। यथा पुरूरवा ऊर्वश्या भिधेयः

मि २

१३५

पुरूरवा ऊर्वश्या अभिमुखत्वेनोपरि वर्त्तते तथा त्वमपीत्यर्थः। उक्ताग्निविनियोगानापस्तंबो दर्शयति।
वृषणौ स्थ इति प्रांचौ दर्भौ उर्वश्यसीत्यधरा
अग्नेर्जनित्रमसीत्यधिमंथनं शकलं निदधाति। वृषणौ स्थ इति प्रांचौ दर्भौ उर्वश्यसीत्यधरा
रणिमादत्ते पुरूरवा इत्युत्तराणिमिति।। का०स्ता०।। मंथति गायत्रेणेति मप्रतिमंत्रमिति। अमंत्रत्र
येणारण्योर्मंथनं कुर्यात्।। पाठस्तु।। गायत्रेण त्वा० मंथामीति। अहे अग्ने त्वां गायत्रीछंदोदेवत्ये
नि मानिनादेवेन सर्विनाहं मंथामि अरण्योर्मंथनेनोत्पादयामि। द्वितीयतृतीयमंत्रावप्येवं व्याख्ये
यौ।। का०स्ता०।। भवतन्न इति प्रास्यतीति। आपस्तंबोऽप्याह। भवतन्नः समनसाविति जातमाहवनीये प्रहरतीति।। पाठस्तु।। भवतन्नः० ओषन इति। यो यमाहवनीयोग्निर्यश्चायं मथितो
ग्निस्तावुत्तौ हे अग्नी नोऽस्मदर्थं समनसौ मनसा सहितौ सचेतसौ परस्परं समानचित्तयुक्तौ
अन्यविषयं मनः परित्यज्यास्मदनुग्रहाभिमुखत्वं समनस्त्वं तस्मिन्ननुग्रहे परस्परविप्रतिपत्ति
राहित्यं सचेतस्त्वं अरेपसौ पापरहितौ अस्मद्विषये प्रमादिकेनापराधेन पिकोपाभावः। पापराहि
त्यं। एवं तं यथोक्तगुणयुक्ता वुत्तौ तिष्ठतं पापराहित्यमेव स्पष्टी क्रियते। यज्ञं मा हिंसिष्टमस्मदीयं

तद्वैतौ

१३५

कर्म माविनाशयतं। तथायज्ञपति मीवमाविनाशयतं। हे जातवेदसावुभावग्नी अस्मिन्ननुष्ठानादि
नेनोस्मदर्थं शिवौशांतौ भवतं। का०स्या०॥ अग्ना अग्निरितिजुहोतीति॥ पाठस्तु॥ अग्ना अग्नि०
स्वाहेति॥ अग्नावाहवनीयाख्ये यः प्रविष्टोग्निर्मथ्यमानः सोयं चरतिह विर्भक्षयतिचरगतिभ
क्षणयोरितिधातुः। कथंभूतोग्निः ऋषीणां पुत्रः ऋषिर्ज्ञो वेदविदः अत्र ऋषय इत्युक्तं तेनैरुक्ता — च्य०४
दितत्वाद। पुनः वस्तुत्रः अभिशस्तिपावा अभिशस्तिर्वैकल्पनिमित्तो भिशापः। तस्मात्पातिर
क्षतीत्यभिशस्तिपावा। हे अग्ने स तथाविधस्त्वं नोस्मदर्थं स्योनः सुखरूपो भूत्वा सुयज्ञा भ्रो
क्षती स्वभिशस्तिपावा। हे अग्ने सतथाविधस्त्वंनोस्मदर्थं स्योनः सुखरूपो भूत्वासुयज्ञा भ्रो
तनेन संयोगेन इहास्मिन्स्थाने देवेभ्य इंद्रादिभ्यो हव्यं सोमादिरूपं यजदेहि अस्माभिर्दत्तं हवि
देवान्प्रापयेत्यर्थः। किं कुर्वन् सदं सदा अप्रयुच्छन् अप्रमाद्यन् स्वाहा तुभ्यमिदमाज्यं हुतं॥ १३६
॥ इति प्रथमोनुवाकः॥ ॥ प्रथमे आतिथ्यादिमंत्रा उक्ताः॥ द्वितीये तानूनप्त्रादिमंत्रा उच्यंते॥ का
स्या०॥ति श्रुतिः। प्राणो वा आपतिः प्राणमेवैतीति। हे आज्य त्वां आपतये प्राणदेवताप्रीत्यर्थं गृह्णामि
अस्मिन्पात्रे स्वीकरोमि। द्वितीयमंत्रपाठस्तु॥ परिपतये त्वा गृह्णामीति। इष्टप्राप्त्युपायमभिद्ध्यप्
× प्रोवंव्रतश्रद्धानेगृह्णत्सापतयइति। पंचभिः। प्रथममंत्रपाठस्तु॥ आपतये त्वा गृह्णामीति। आसमंतात्सातीत्यापतिः प्राणवायुः। × एवमेवाह × २

१३६ श्रीणा २

आ इराय शक्तिस्वरूपात्मिमानिदेवताप्रीत्यर्थं ६ — तदर्थं ६

प

परिहारोपायं चिंतयित्वा परितः पालयतीति परिपतिर्मनः। तदप्याहेति श्रुतिः। मनो वै परि
पतिर्मन एव प्रीणातीति हे आज्य त्वां परिपतये मनोदेवताप्रीत्यर्थं गृह्णामि॥ तृतीयमंत्रपाठस्तु॥ त
नूनप्त्र इति अस्य त्रिष्टुमंत्रेषु गृहीत्वां गृह्णामीत्ययं मंत्रशेषो नुषज्यते। तनूं शरीरं पातयति न वि — न ३ — अत २
नाशयतीति तनूनपा जाठराग्निः हे आज्य त्वां तनूनप्त्रे जाठराग्निरूपाय तस्मै देवताप्रीत्यर्थं गृह्णामि। — त ४
॥ चतुर्थमंत्रपाठस्तु॥ शाक्वरायेति शक्वरी बलं शाक्वरः शक्तिमान्पुरुषः तस्य संबंधी शाक्वरं — न ५
शक्तिस्वरूपं हे आज्य त्वां गृह्णामि। ओजो नामाष्टमो धातुस्तस्य सारं ओजिष्ठं तेनैव शरीरे शक्तिर — मो ६
वतिष्ठते। ओजः सारात्मिमानिदेवताप्रीत्यर्थं गृह्णामीत्यर्थः। तनूनप्त्रे संज्ञकं शरीराग्निदेव
ता विषयस्य शपथकर्मणो हेतुभूतमाज्यं तनूनप्त्रसंज्ञकं तदेतदुक्तैः पंचभिर्मंत्रैर्गृहीतं॥ का०स्या०॥
तनूनप्त्रमेतद्दक्षिणस्यां वेदिश्रोणौ निदध्याया चमत्रांस्य विज्ञाय अमानः॥ अनाधृष्टमसि पाठस्तु। ३
तनूनप्त्रमेतद्दक्षिणस्यां वेदिश्रोणौ निदध्याया चमत्रांस्य विज्ञायअमानः॥ अनाधृष्टमसि पाठस्तु। ३
ष्टमसि० माधाईति। हे आज्य त्वं अनाधृष्टमसि इतः पूर्वं केनाप्यतिरस्कृतमसि अनाधृष्यं इतः प
रमप्यतिरस्कार्यं देवानामोजः। अग्न्यादीनां संबंधि सारमसि। अनभिशस्तिः अभिपूर्वः शंसतिर्ग
× पंचममंत्रपाठस्तु॥ शाक्मन्नोजिष्ठायेति। हे शाक्मन् शक्तिमत्सु पुरुषेषु यदोजिष्ठं तस्मै हे आज्य त्वां गृह्णामि। ६

× कृत्विग्गोपरस्परविरोधेनानिंदनमक्तिनूस्ति: नस्या: पातिरक्षतीसमनस्तिदास्तपा: ×॰

हृयांवर्त्ततेतद्हितमनीतिक्षस्ति त्वमसि। अतिरास्तिपा: हिंगयवयादक्षिक्षास्तिपं अर्नीतिहासे न्यंहे आत्यतथाविधनसि। अतोहेमन्त्विकू अंजसा ऋजुमार्गेण मानस्कोटिल्यरहितेन सं आज्यस्य ग्रस्त्पंइपथं उपमोषमुपगच्छेहे तनेन म्राज्यस्तु वित इर्तीनमार्गे यज्ञकर्मणिमा ध्यास्थापय॥ का०स्या०॥ अग्ने व्रतपाइत्याहवनीयेसमिधमाधायेति॥ पाठस्तु॥ अग्ने व्रतपा॰ तपस्पतिरिति। हेव्रतपा: सर्वेषां व्रतानांपालकाग्नेत्वं व्रतपा: त्वमस्मदीयस्यवर्त्तमानस्य व्र तस्यपालकोभवसीतिद्रोषः। भवतथाविधस्यव्रतपालकस्ययातनू: शरीरमस्तिसेयंतनु र्मयिभवत्वितिद्रोषः। याचममतनुर्मदीयंशरीरंसैषाभवतनुः स्त्वयिभवतु। तथासतिहेव्रत पतेव्रतपालकाग्नेव्रतान्यनुष्ठेयानिकर्माणिनौआवयोरग्नियजमानयोःसहप्रवर्त्ततामि तिद्रोषः। व्रतेषुममयावानादरस्तावनेवतपैपिभवत्वित्यर्थः। किंचदीक्षापतिःदीक्षाया: पाल कःसोमःमेमदीयांदीक्षामनुमन्यतांतथातपस्पतिः उपसद्रूपस्यतपसःपा०लकःसोमंतपो मदीयमुपसद्रूपमनुमन्यंमितिा।वर्त्तेते॥ का०स्या०॥ यजमानपत्नी: सोममाप्याययंसपंशुरं

ता॰

१२७

सुरितीति। ऋत्विजश्चत्वार: पत्नीपंचमी यजमान:षष्ठ:॥ पाठस्तु॥ अंशुरंशुष्टे॰ उदृचमशीयेयेति॥ अं शुरंशु:सोमवल्ल्या अवयवमात्रंवल्ली सा सर्वसंग्रहार्थाहेसोमदेवतेत्वदीयोंशुरंशु: पवयवाइंद्रा यइंद्रप्रीत्यर्थंआप्यायतांअनेनप्रोक्षणेनसर्वतोवर्द्धतां। चिरकालावस्थानेनसोमस्ययोवयवोम्ला नोभवति। यश्च शुष्यतितद्भुनयमनेनाप्यायितंभवतीतीत्रस्यतासर्यं तदाह तित्तिरि:। देवये वास्याप्रवायुतैतदेवास्यैतेनाप्यायन्तीति। कथंकृतायइंद्रायएकधनविदेयावंतःसोमयागा: संतितेषुसर्वेषुसोमरूपमिदंइव्यमेकमेवधनंवर्द्धंदतेलभतइत्येकधनविल्। किंचहेसोमत्वमपिइंद्रायेंप्रीत्यर्थं प्यत्वस्प्रीत्यर्थंइन्द्रआप्यायतांबहुसोमयागेनेंद्रोवर्द्धतां। तथाहेसोमत्वमपिइंद्रायेंप्रीत्यर्थं आप्यायस्वसर्वत:प्रवर्द्धस्वएतन्मंत्रपाठेनोऋत्विग्भि: कृतान्भवति। तदाहतित्ति रि:। उभावेवेंद्रंसोमंचाप्याययतीति। किंचहेसोमसखीन्सखिवत्प्रीतिविषयान्स्मान्ऋत्विज: तिभिरिरप्याहर्त्विजोवाअस्यसखायइत्युक्तं। सन्याधनदानेनर्मेधयाअनुष्ठानेनार्थसौधारण शांत्याचआप्याययप्रवर्द्धान्कुरु। किंचहेसोमदेवतेस्वस्तिहोमोस्तुतत्प्रसादादहंउदृचंयेयम

यन्मीयते॰

नि॰

प०

गृहमासन्नाभिकालीनास्तितस्यैर्यं तां सुस्थां सोमाभिषवक्रियां आशीः प्राप्नुयां॥ का०स्या०॥ प्रस्त
रेनिन्हुवत उत्तानहस्तादक्षिणेन उत्तानाएष्टारायइतीति॥ सर्वे ऋत्विजः प्रस्तरे स्वके यूहस्तानुत्तानान्नूर्ध्वा
दक्षिणहस्तमुत्तानमुपर्यवस्थाप्य निन्हुवते तेन परियंति सोममुपचरंतीत्यर्थः॥ पाठस्तु॥ एष्टारायः०
पृथिव्या इति॥ प्रेषे प्रकर्षेणेष्यमाणायां अन्नाय जगाय ऐश्वर्यायेत्यर्थः रायः धनानि एष्टा आ समंतादि
८ ष्टा अपेक्षितां हे सोम त्वमस्मादस्माकं रायो नवं चित्यर्थं क्रियायाः। किंच ऋतवादिभ्यः सत्यवादिभ्यो ऽग्नि
होत्रिभ्यस्तस्त्री सर्थं ऋतं सत्यं अवश्यं फलाविप्रलोपेतं कर्म हे सोम संपादयेति शेषः। नमो दिवे द्युलोका
भिमानिन्यै देवतायै नमोस्तु। नमः पृथिव्यै भूमिदेवतायै नमोस्तु। तयोर्देवतयोरनुग्रहेणानुष्ठानुर्य
जमानस्याविघ्नेन स्थितिर्भवति। तदाह तित्तिरिः। द्यावापृथिवीभ्यामेव नमस्कृत्यास्मिँल्लोके प्रतिति
ष्ठतीति॥ का०स्या०॥ उपसदं जुहोति स्रुवेण या त इतीति। पाठस्तु॥ या ते अग्ने० स्वाहेति। अत्र कदाचि १२८
१२८ दाख्यायिकया कण्वो मंत्रं व्याचष्टे। असुराणां लोकत्रये तिस्रः पुर इदमुवाच ततो सुराः एषु लोकेषु पु
रश्चक्रिरे अयस्मयीमेवास्मिँल्लोके रजतीमंतरिक्षे हरिणीं दिवीति एतमेवार्थं तित्तिरिराह। तेषा

मसुराणां तिस्रः पुर आसन्नयस्मय्यवमाऽथ रजता हरिणीति तास्तिस्रः पुरो दग्धुमुपसद्देवतास्तोऽग्नि
र्यदा तासु पूर्षु प्रविश्य व्याप्नोति। तदानीमेतास्तिस्रः पुरोऽग्नेस्तनवो भवंति। तदेतदभिप्रेत्यायं मंत्रः प्रव
र्त्तते। अयाशया इत्यस्य अयःशया लोहमयीत्यर्थः। हे अग्ने तव या तनूः अयःशया लोहमयपुरव्यापित्वेन
तद्रूपास्तीव। वर्षिष्ठा देवानामतिशयेनाभिमतफलवर्षिणी गह्वरेष्ठा असुरसंबंधितया गह्वरे
विषमे देशे तिष्ठतीति गह्वरेष्ठा स्वा ते तनूः उग्रं वचः अपावधीत् त्वेषं धिग्धिग् धिग् इत्यादिकं असुरैः प्रो
क्तं तीव्रं वचनं विनाशितवती तथा त्वेषं वचः असुरैः प्रोक्तं देवाधिक्षेपरूपत्वेन प्रदीप्तं वाक्यं अपाव
धीद्विषे नाशितवती स्वाहा तथाविधोपकारकत्वेन तुभ्यमग्नये हविर्दत्तं। अथवा असुरैरुपद्रुता दे
वा अन्नपाना अलभमाना क्षुधया पिपासया च वयं पीडिता इति वदंति तदेतदुग्रं वचः। तथा किमुप
पातकमस्माभिः पुरा कृतं किं वा वीरहत्यादिरूपं महापातकमस्माभिः कृतं इत्येवं क्लिश्यंतो देवाय
हाभ्यां संतापहेतुत्वेन प्रदीप्तमेव वदंति तदिदं त्वेषं वच इत्युच्यते। तदेतत्सर्वमाह तित्तिरिः। अशनायापिपा
सा हा उग्रं वचः एनश्च वैरहत्यं च त्वेषं वच इति॥ का०स्या०॥ एवमितरे अन्वहं रजःशया हरिशयां चेति।

यन्नमा प्रथमदिने या ते अग्ने यः शयेत्युपसन्मंत्रदनुष्ठितारवभितरे द्वितीयतृतीये उपसदौ द्वितीयतृतीयदिनयो
रनुष्ठेते। तत्र द्वितीयस्यामुपसदि रजःशयेति तृतीयस्यामुपसदि हरिशयेति पाठभेदः। तयोर्मंत्रयोः पाठ
स्तु॥ या ते अग्ने रजःशया० स्वाहेति। रजःशया रजतमयी हरीशया हिरण्मयी॥ अन्यत्सर्वं पूर्ववद्व्याख्ये तनू
यं॥ ॥ इति द्वितीयोनुवाकः॥ ॥ द्वितीये तनूनपादिमंत्रा उक्ताः। तृतीये तूत्तरवेदिनिर्माणमंत्रा उ
च्यंते॥ कात्या०॥ शम्यामुदीचीं निदधाति पुरस्तात्सक्याश्च दक्षिणतः प्राचीमुत्तरतश्च स्फ्येन रेखाः कु
र्यात् तप्तायनीतीति। तदानीं पूर्वस्यां दिशि शम्यामुदगग्रां निधाय तस्याः पश्चिमपार्श्वे तद्दैर्घ्य
प्रमाणेन स्फ्येन रेखां कुर्यात्। तथा पश्चिमदिश्यप्युदगग्रां शम्यां निधाय तस्या अभ्यंतरतो रे
खां कुर्यात्। एवं दक्षिणतउत्तरतश्च प्रागग्रां शम्यां निधाय रेखाद्वयं कुर्यात्। तदेतत्सर्वमापस्तं
बोपि विस्पष्टमाह। शम्यां पुरस्तादुदगग्रां निधाय स्फ्येनोदीचीमभ्यंतरमुपलिखति तप्तायनी
मेसीत्येनं दक्षिणतः प्राचीं वित्तायनी मेसीति पश्चादुदीचीमवतान्मा नाथितमित्युत्तरतः प्राचीम
वतान्मा व्यथितमिति। अत्रस्थेषु चतुर्षु मंत्रेषु अयं प्रथमः॥ तप्तायनी मेसीति। हे पृथिवि त्वं मे ममानु

ग्रहार्थं तप्तायन्यसि। तप्तं पुरुषमयति प्राप्नोतीति तप्तायनी यो हि दरिद्रः क्षेत्ररहितो हि भीतः संतप्य
ते तं पुरुषं तापोपशांत्यर्थं प्राप्नोषीत्यर्थः॥ अथ द्वितीयः॥ वित्तायनी मेसीति। धनरहितस्य वित्तार्थं
पुरुषं प्राप्नोतीति वित्तायनी पृथिव्यां हि प्राधान्यात्सस्यनिष्पत्तिद्वारा महद्धनं लभ्यते॥ अथ तृतीयः॥
अवतान्मा व्यथितमिति। व्यथ भयचलनयोरिति धातुः व्यथितमन्नाभावाद्भीतं मां यजमानम
वतात् हे पृथिवी रक्षतात्। अथ चतुर्थः। अवतान्मा नाथितमिति। नाधृ इति धातुर्याच्ञार्थः। ना
थितं याचितवंतं मां यजमानमवतात् भूयो याञ्चापर्यानं भवति तथा पृथिवी रक्षतात्॥ कात्या०॥
विदेरग्नेरिति चात्वाले प्रहरति स्फ्येनेति। उत्तरवेदिनिर्माणार्थं यस्मिन्प्रदेशे मृदं खनति
स प्रदेशश्चात्वाल इत्युच्यते। तं प्रदेशमापस्तंबः स्पष्टं दर्शयति। उत्तरस्माद्युगं(?) अक्रमे चात्वा
लस्तमुत्तरवेदिवत्तूष्णीं शम्यया परिमिनोति तस्मिन्नाधारे स्फ्येन मृदं खनेत्॥ पाठस्तु॥ वि
देरग्ने नभो नामेति। हे चात्वालगते मृत्तिके अग्नेस्त्वदीयानि देवयजनो नाम विदेः ने त्वं इदे
नादृशं नामधेयं विद्धि। अग्निनामोच्चारणपुरःसरं प्रहरणं कण्वा विधत्ते। स या अग्नीनां नामा

निर्गच्छन् प्रहरतीति ॥ का० सा० ॥ अग्नेअङ्गिर इति पुरीषं हरतीति । खातान्मृत्पुरीषं ॥ पाठस्तु ॥ अ
ग्ने अङ्गिर आयुना नाम्नेहीति । हे अंगिरो अग्ने अंगानां मध्ये सारभूत वह्ने अंगिरः सत्वं तेनास्य शब्दस्य
निर्वचनं छंदोगा आमनंति । एवंभूत एवांगिरसं मन्यंते गानां यद्रसस्तेनेति । कृशानुः पचनहेतुत्वा
दुदराग्नेः शरीरावयवानां मध्ये सारत्वं प्रसिद्धं । एषु कर्मसु एति गच्छतीत्यायुः शब्दो यग्नेर्नामधेयं ।
हे अग्ने आयुना नाम्नाभिहितः सन्नेहि आगच्छ ॥ का० सा० ॥ योस्यामिति वपतीति । उत्तरवेदि
स्थाने मृदं निक्षिपेत् ॥ पाठस्तु ॥ योस्यां पृथिव्या० दधइति ॥ अस्यां पृथिव्यां दृश्यमानायां भूमौ
यो सि हे अग्ने यस्त्वं वर्त्तसे किंच तेन वयं क्षियं यज्ञयोग्यं यन्नाप्रसिद्धमग्निरसि एतादृशो नामाना
धृष्टकेनापि याज्ञिकेनातिरस्कृतं तेन त्वा दधे तेन नाम्नायुक्तं त्वामास्थापयामि ॥ का० सा० ॥ एवं द्वि
परं द्वितीयस्यां तृतीयस्यामिति विशेष इति । यथापूर्वं त्रिभिर्मंत्रैः खात्वा हृत्वा वपेर्थं मृत्प्रक्षि
प्य एतत् त्रितयं पुनरपि द्विः कुर्यात् । तयोः पर्याययोर्द्वितीयस्यां तृतीयस्यामिति पाठविशेषो द्रष्टव्यः ॥
पर्यायद्वयगतानां षण्णां मंत्राणां पाठस्तु ॥ विदेरग्ने० दधइति ॥ यद्यपि पृथिवीशब्दस्य प्रकृतत्वात् द्विती

यतृतीयशब्दयोर्विशेषणत्वेन संबन्धानुवर्त्तते । तथाप्यौचित्यात् द्वितीयायां अन्तरिक्षं तृतीयायां पृथिवी द्यौ
रित्युवगन्तव्यं । अन्यत्सर्वं पूर्ववद्व्याख्येयं ॥ का० सा० ॥ अनु त्वेति चतुर्थं यथा येमाहृत्येति यथापूर्वं त्रिभिर
र्यायत्रयेमृदाहृत्य प्रक्षिप्य एवं चतुर्थमपि प्रक्षेपणपर्यन्तं मृदाहरणं कुर्यात् ॥ पाठस्तु ॥ अनु त्वा देववीत
य इति । देववीतये देवानां प्रीतये त्वा हे मृत्तिके त्वां अनु पूर्वोक्तमाहरणत्रयमनु अनुसृत्य आहरामीति शेषः ॥
का० सा० ॥ सिंह्यसीति व्यूहति उत्तरवेदिं शम्यामात्रीमिति । एवमुत्तरवेदिं चतुरश्रां शम्यापरि
मितां व्यूहति विशेषेण पांसुभिराच्छादयेत् । पाठस्तु ॥ सिंह्यसि सपत्नसाही देवेभ्यः कल्पस्वेति । हे उत्त
रवेदि त्वं सिंही सिंहसमाना त्वासपत्नसाही शत्रूणामभिभवित्री असि । त्वमसि अतो देवेभ्यः देवो
पकारार्थं कल्पस्व समर्था भव ॥ का० सा० ॥ प्रोक्षत्युत्तरवेदिं सिकतांश्च प्रकिरति सिंह्यसीति प्रतिमं
त्रमिति । तत्रायं प्रोक्षणमंत्रपाठस्तु ॥ सिंह्यसि सपत्नसाही देवेभ्यः शुंधस्वेति । हे उत्तरवेदे शुंधस्व
शुद्धा भव । अन्यत्पूर्ववत् । अथ सिकताप्रक्षेपणपाठः । सिंह्यसि सपत्नसाही देवेभ्यः शुंभस्वेति । हे
उत्तरवेदे त्वं शुंभस्व सिकताप्रक्षेपेण शोभिता भव । अन्यत्पूर्ववत् ॥ इति तृतीयोनुवाकः ॥ ॥ उत्तरवे

दिनिर्माणमंत्रास्तृतीये कथिताः। चतुर्थे निर्मिताया उत्तरवेदेः प्रोक्षणादिसंस्कारमंत्रा उच्यंते॥ कात्या०॥
उत्तरवेदिं प्रोक्षतीन्द्रघोषस्त्वेतिप्रतिमंत्रं प्रतिदिशं यथालिंगमिति। तत्रायं प्रथमो मंत्रः॥ इंद्रघोष० पात्वि
ति॥ इन्द्र इत्यनेन शब्देन घुष्यते विस्पष्टं कथ्यते यो देवः सोयमिंद्रघोषः वसुभिरष्टसंख्याकैर्गणा
देवैर्युक्तः स देवः पुरस्तात्पूर्वस्यां दिशि। हे उत्तरवेदे त्वां पातु रक्षतु॥ अथ द्वितीयो मंत्रः॥ प्रचेता
स्त्वा० पात्विति॥ प्रचेताः प्रकृष्टप्रज्ञो वरुणः स च रुद्रैरेकादशसंख्याकैर्गणदेवैः संयुक्तः पश्चात्पश्चि
मायां दिशि त्वां पातु। अथ तृतीयो मंत्रः॥ मनोजवास्त्वा० पात्विति॥ मनोजवाः मनोवद्वेगयु
क्तो यमो देवः पितृभिः स्वर्लोकवासिदेवताविशेषैर्युक्तो दक्षिणस्यां दिशि त्वां पातु। अथ चतुर्थो
मंत्रः॥ विश्वकर्मा त्वा० पात्विति॥ विश्वकर्मा विश्वानि सर्वाणि जगदुत्पत्त्यादिविषयकर्माणि यस्या
सौ विश्वकर्मा तादृशो देव आदित्यैर्द्वादशसंख्याकैर्गणदेवैः सहित उत्तरस्यां दिशि त्वां पातु। उत्त
रवेदिशब्दोदिता देवता यदा देवान्प्रत्यासीत्तदानीमसुरा देवान् हन्तुमुद्यतवंतः समागताः तस्मिन्
न्नवसरे देवसेनाधिपतय इंद्रघोषादयस्तत्सु दिक्षु तानसुरानपाकुर्वन् तस्मादेतैर्मंत्रैर्दिक्षुत्

१४१

त्वेन रक्षा प्रार्थनीया॥ तदेतदाह तित्तिरिः॥ देवा वा उत्तरवेदिरूपावन्निर्हैव विजयामहा इत्यसुरा
दत्रमुद्यत देवानभ्यायंत तानिंद्रघोषो वसुभिः पुरस्तादपानुदतेत्यादि॥ कात्या०॥ बर्हिर्वेदिं द्रोणं निषिंच
तीदमहं तप्तं वारिति॥ पाठस्तु॥ इदमहं० स्तृणामीति॥ असुरनिवारणाय येनोदकेन प्रोक्षणं कृतं तदुद
कं उग्ररूपत्वाल्लतत्वमित्युच्यते। तादृशमिदं वाः एतदुदकं प्रोक्षणकाले यत्कृतं अहमनुष्ठाता यज्ञाद्बहिर्धायत्न
प्रदेशाद्बहिः प्रदेशान्निः सृजामिनिःसारयामि॥ कात्या०॥ नाभ्यां श्रोण्यंसेषु पंचगृहीतं जुहोत्यवेक्षणया
दक्षिणेंसे श्रोण्यामंसे मध्ये च हिरण्यं पञ्चयतन्त्सिंहीरसीति प्रतिमंत्रमिति। अस्यायमर्थः। योयमुत्तर
वेदेर्नाभ्याख्यो मध्यप्रदेशः यो वाग्नेये कोणप्रदेशो वेदेरंसाख्यो ये च वायव्यनैर्ऋतप्रदेशौ श्रोण्या
ख्यौ तेषु पंचसु स्थानेषु स्रुचा पंचवारं गृहीतेनाज्येन जुहुयात्। तन्न चैतेषु स्थानेषु क्रमेण होमः॥ किं त्वा
क्षणयावेक्षणेन तत्र प्रथमं दक्षिणांसे न तत उत्तरस्यां श्रोण्यां न तत उत्तरांसे ततो दक्षिणश्रोण्यां
ततो मध्ये तेषु पंचसु स्थानेषु हिरण्यं निदध्यात् देतदवलोकयम्यं च भिर्मंत्रैर्जुहुयादिति। तत्रैवं व
क्रप्रकारमापस्तंबो विस्पष्टमुदाजहार दक्षिणमंसमुत्तरां श्रोणिमुत्तरमंसं दक्षिणां श्रोणिं

मध्यमितीति॥ तत्रायं प्रथमं मंत्रपाठः॥ सिंह्यसि स्वाहेति। पुरा कदाचिदुत्तरवेदिर्देवताकेनापि निर्मि
त्तन देवेभ्योनुपक्रम्य तदानीमसुरानप्राप्य देवासुरसेनयोरुभयोर्मध्ये सिंही भूत्वा स्वरूपं धृत्वा तस्थौ। त
दाहेति त्तिरिः। ते भ्य उत्तरवेदिः सिंहीरूपं कृत्वोभयानंतरापक्रम्यातिष्ठतादिति। दैतदेतदर्थं प्रसा
स्मिन्मंत्रे सिंहीमुच्यते। हे उत्तरवेदे त्वं सिंह्यसि सिंहरूपा त्वमसि तादृश्यै ते तुभ्यं स्वाहा हविर्दत्तं। अथ
द्वितीयो मंत्रः॥ सिंह्यस्यादित्यवनिः स्वाहेति। आदित्यान्वनुते भजते प्रीणयतीत्यादित्यवनिः। अन्य
त्सर्ववत्॥ अथ तृतीयः॥ सिंह्यसि ब्रह्मवनिः क्षत्रवनिः स्वाहेति। ब्राह्मणजातिक्षत्रियजात्योः प्रीणयित्र्य
त्वमत्र विशेषः। अथ चतुर्थः॥ सिंह्यसि सुप्रजावनी रायस्पोषवनिः स्वाहेति। पुत्रपौत्रादिरूपायाः शोभ
नप्रजायाः सुवर्णरजतादिधनपुष्टेश्च संपादनमत्र विशेषः। अथ पंचमः॥ सिंह्यस्यावह देवान्यजमा
नाय स्वाहेति। यजमानोपकारार्थं देवानस्मिन्कर्मण्यानयेः। एतावानत्र विशेषः॥ का०स्रा०॥ भूतेभ्य
स्त्वेति स्रुचमुद्गृह्णातीति होमः। शेषाज्ययुक्ते हे जुहु त्वां भूतेभ्यः जरायुजाण्डजादिचतुर्विधभूतग्राम
प्रीत्यर्थं स्रुचमुद्यच्छामीति शेषः। तत्र तत्र मंत्रार्थं विनियोगपुरःसरं तिन्निर्दिष्टं स्पष्टं दर्शयिति। भूतेभ्य
स्त्वेति स्रुचमुद्गृह्णाति य एव देवा भूतास्तेषां तद्भागधेयं तानेव तेन प्रीणामीति॥ का०स्रा०॥ नाहिं

१४२

पैतुदारवैः परिदधातीति ध्रुवोसीति प्रतिमंत्रमिति। पूतदारुशब्देन देवदारुवृक्षविशेष उच्यते।
तदीयैः परिधिभिरुत्तरवेदेर्मध्ये दग्निरूपामुत्तरनाभिं परिदध्यात्। यथा दर्शपूर्णमासेष्टौ पश्चिमदक्षि
णोत्तरदिक्षु मध्यमदक्षिणोत्तरपरिधयः प्रक्षिप्ताः। तद्वदिहापि प्रक्षेप पूर्ववदित्युक्तं। तत्र प्रथमो मं
त्रः। ध्रुवोसि पृथिवीं दृंहेति। हे मध्यमपरिधे त्वं ध्रुवः स्थिरोसि अतः पृथिवीं दृंह दृढीकुरु। अथ
द्वितीयः॥ ध्रुवक्षिदस्यंतरिक्षं दृंहेति। हे दक्षिणपरिधे त्वं ध्रुवे स्थिरे यज्ञे क्षियति निवसतीति ध्रु
वक्षित्तादृशोसि। तस्मादंतरिक्षं दृढीकुरु। अथ तृतीयः॥ अच्युतक्षिदसि दिवं दृंहेति। अच्यु
ते विनाशरहिते यज्ञे क्षियति निवसतीत्यच्युतक्षित् हे उत्तरपरिधे तादृशोसि। तस्मात्त्वं द्युलो
कं दृढीकुरु॥ का०स्रा०॥ अग्नेर्भस्मोसीति निर्वपति गुग्गुलसुगंधितेजनवृष्णोस्तुका इति गुग्गुलशब्दे
न धूपार्थं द्रव्यमुच्यते। सुगंधितेजनशब्देन तृणविशेषमल्लान्युच्यंते। वृष्णोस्तुकाशब्देनाविसंबधि
रोमोच्यते। पाठस्तु॥ अग्नेर्भस्मास्यग्नेः पुरीषमसीति। हे गुग्गुलप्रभृतिसंभारसमूह त्वं उत्तरवेदि
गतस्याग्नेर्भस्मनामकमसि तथा तस्याग्नेः पुरीषं पूरकमसि। तदेतदग्निपूरकत्वं प्रसिद्धमिसेत

त्तिभिरिर्दद्रयिति। अग्ने ईर्तमुरीकंयत्त्वं त्रा रा इति॥ इति पंचमेध्याये चतुर्थोनुवाकः॥ पंचमे हविर्द्धा
नाख्यमंडपनिर्माणमंत्रा उच्यंते॥ अस्ति तावत्प्राचीनवंशाख्या काचिच्छाला तस्यामाहवनीयाद्य
ग्नित्रयमैष्टिकवेदिश्च वर्त्तते। तस्याः शालायाः पुरतः षट्त्रिंशत्पदद्दीर्घा सौमिकवेदिर्निर्मातव्या।
तस्या वेद्या अग्रभागे पूर्वानुवाकद्वयोक्तोत्तरवेदिः। पश्चान्मध्यभागे हविर्द्धानाख्यो मंडपो
निर्मातव्यः। ततोपि पश्चात्सदोभिधाना काचिच्छाला निर्मातव्या तस्याः स्थाने प्राचीनशालायाः
पुरतो दक्षिणोत्तरभागयोर्हविर्द्धाननामके द्वे शकटे स्थापिते भवतः। तच्छकटद्वयं पुरतः प्रवर्त्य
तदावरकत्वेन हविर्द्धानाख्यमंडपो निर्मातव्यः। तच्च शकटद्वयं सवितृमंत्रहोमादूर्द्ध्वं वर्त्तनीयं।
तदाह तित्तिरिः। सावित्र्यं जुहुयाद्धविर्द्धाने प्रवर्त्तयतीति। तमेतं होमं विधत्ते॥ का० स्या०॥ चतुर्ग
हीतं शालाद्वार्ये जुहोति युंजत इति सगार्हपत्य इति। प्राचीनशालायाः द्वारसमीपे पूर्वसिद्ध
आहवनीयोत्र वर्त्तते। तस्मिन् जुहुयात्। सच पूर्वमाहवनीयोपि सन्नुत्तरवेद्यामारोपितेन्यस्मिन्ना
हवनीये निष्पन्ने सति तदपेक्षया स्वयं गार्हपत्यो भवतीत्यर्थः॥ पाठस्तु॥ युंजते मन० परिष्टुतिरि

२४३ २४७

ति॥ विप्रस्य ब्राह्मणस्य यजमानस्य संबंधिनो विप्रा ब्राह्मणा ऋत्विजो मनो युंजते लौकिकचिंताभ्यो
मनो निवार्य यज्ञचिंतायां तत्सर्वं नियमंति। ततोधियं इंद्रियाण्यपि यज्ञार्थेषु नियमयंति। कीदृ
शस्य विप्रस्य बृहतो विपश्चितः। अधीतवेदत्वाद्बृहत्त्वं। अर्थाभिज्ञत्वाद्विपश्चित्त्वं। कीदृशा विप्राः
विहोत्राः होमकर्तारः। तदिदं विप्राणां मनोनियमादिसामर्थ्यमेक इद्विदधे। एकएव सविता। कीदृ
शः वयुनावित्। मार्गान्वेत्ति सर्वज्ञ इत्यर्थः। न चैकस्य सर्वस्रष्टृत्वं विस्मितव्यं यतः सवितुः प्रेरकस्यांत
र्यामिणो देवस्य परिष्टुतिः सर्ववेदोक्ता स्तुतिः। मही महती। तथा चाथर्वणिका अधीयंते यः सर्वज्ञः
ससर्वविद्यस्य ज्ञानमयं तप इति। वाजसनेयिनश्च। सएषसर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः
सर्वमिदं प्रशास्ति यदिदं किंचेति। श्वेताश्वतराश्च। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानब
लक्रिया चेति॥ का० स्या०॥ दक्षिणे वर्त्मनि दक्षिणस्यानसो हिरण्यं निधायाभिजुहोतीदं विष्णुरिति
ति। दक्षिणशकटसंबंधिदक्षिणचक्रस्य मार्गे हिरण्यं निधाय तस्मिन्नेष होमः॥ पाठस्तु॥ इदं वि
ष्णु० स्वाहेति। विष्णुस्त्रिविक्रमावतारं धृत्वा इदं विश्वं विक्रमणं क्रमते स्म। क्रमावेकं पदमंतरिक्षे द्विती

यं द्वितीयमित्येवं त्रेधा पदं निदधे। पांसवो भूम्यादिलोकरूपा यस्य पदस्य संति। पांसुरे अस्य
विष्णोस्तस्मिन्पदे विश्वं समूढं सम्यगंतर्भूतं स्वाहा तस्मै विष्णवे हविर्दत्तं॥ का॰ स्रा॰॥ स्रुक्स्थाल्यौ
प्रतिगृह्य प्रतिप्रस्थातोत्तरस्येरावतीति॰ पूर्ववदिति। यथा दक्षिणशकटसंबंधि दक्षिणचक्रमार्गे
ध्वर्युर्हुतवान्। तथोत्तरशकटसंबंध्युत्तरचक्रमार्गे प्रतिप्रस्थाता जुहुयादित्यर्थः॥ पाठस्तु॥ इराव
ती॰ स्वाहेति॥ हे द्यावापृथिव्यौ युवां मनवे मन्वानाय यजमानाय इरावती अन्नवत्यौ धेनुमती हि ब
हुधेनुयुक्ते च भूतं भवतं। किंच। सूयवसिनी शोभनैर्यवसैरन्नव्यवहार्यैर्युक्ते। दशस्या यज्ञसाधना
नां दात्र्यौ भवतं। हे विष्णो एते रोदसी द्यावापृथिव्यौ व्यस्कभ्नाः विभज्य स्तब्धया स्तंभितवानसि। किंच
तां पृथिवीं मयूखैः स्वकीयतेजोरूपैर्नानाजीवैर्वा शहाय्यनेकावतारैर्वा अभितः दाधर्थ सर्वतो धारि
तवानसि स्वाहा तस्मै विष्णवे हविर्दत्तं॥ का॰ स्रा॰॥ दक्षिणया द्वारा नीता पत्नी पाणिभ्यां शेषं प्रतिगृह्य १४४॥
क्षधुरावनक्ति पराग्देवश्रुतावितीति। प्रतिप्रस्थात्रा समानीता पत्नी होममंत्रशेषेणाज्येनाक्षस्यो भा
वै[illegible]ग्रनागो सरुदं स्यात्॥ पाठस्तु॥ देवश्रुतौ देवेष्वाघोषतमिति। हे देवश्रुतौ देवसमाज्यां प्रसि
द्धावक्षाग्रभागौ युवां यजमानायं यक्ष्यतीति देवेष्वाघोषतमुच्चैर्ध्वनिनो कथयतं॥ का॰ स्रा॰॥ प्रा

१४४

ची प्रेतमिति वाचयतीति। यदा हविर्द्धाने शकटे प्रवर्त्येते तदा यजमानं वाचयेत्॥ पाठस्तु॥ प्राची प्रेतम
ध्वरं॰ जिह्वरतमिति। हे उभे शकटे युवां प्राची प्राङ्मुखे प्रेतं प्रकर्षेण गच्छतं। कीदृशे अध्वरं कल्पयंती इ
दं कर्म यथा समर्थं कुर्वाणे। किंच। ऊर्ध्वमुपरिवर्त्ति दिवं स्वर्गं प्रति यज्ञं नयतं प्रापयतं। मा जिह्वरतं। मा कुटिले
भवतं। ह्वृ कौटिल्य इति धातुः॥ का॰ स्रा॰॥ स्वं गोष्ठमिति च वसर्जतीति। अस्यायमर्थः। प्रवर्त्यमानयोः श
कटयोरक्षे सर्जनं ध्वनिं कुर्वति सति स्वं गोष्ठमिति यजमानं वाचयेत्। चकारो मंत्रद्वयवाचनसमुच्चयार्थ इ
ति॥ पाठस्तु॥ स्वं गो॰ निर्वादिष्टमिति॥ दुर्यशब्दो गृहवाची गृहा वै दुर्या इति श्रुतेः। तेन शब्देन गृह
सदृशो स शकटे लक्ष्यते। हे दुर्ये देवी गृहसदृशशकटद्वयरूपे देवते स्वं गोष्ठं स्वकीयं गोस्थानं आव
दतं सर्वतः कथयतं। योयमक्षुशब्दस्तेन शब्देन यजमानस्य गृहं बहूनां गवां यत्स्थानं भवति। तथा क
थयतमित्यर्थः। आयुर्मा निर्वादिष्ट। यजमानस्य यावदायुरस्ति तत्सर्वं मा निराकार्षिष्ट। तथा यजमा
नस्य प्रजापुत्रादिरूपां मा निराकार्षिष्टं अनेनाक्षशब्देनायुःप्रजयोर्निराकरणं मा भूत्। किंतु
यजमानस्याशीर्वाद एव भवत्वित्यर्थः। योयमक्षस्य उत्पन्नो बद्धो भवति सोयं वरुणदेवरूपो वाक्या

रूपेणादुर्वाग्ववर्त्तते। तथाचान्यत्रश्रूयते। वरुणोवारयद्दुकाकू उत्क्रयतोबद्धोयदाज्ञइति। तस्माद्वा
पस्तस्यदुर्वाक्यपरिहारायायाजीवदिस्तूपंसुवाक्यमनेनमंत्रेणप्रार्थितं। एतदेवाभिप्रेत्यतैत्तिरीया
मंत्रमन्यथापठंति। सुवाग्देवदुर्य१आवदेति॥ कात्या०॥ पश्चादुत्तरवेदेस्त्रिपुप्रक्रमेषुमसावा
नत्यस्तेत्रिनत्रयतेत्ररमीआमितीति। अनत्यस्तेप्रवर्त्तनंपरिसद्यस्थापितेत्राकटेउक्तमंत्रयेत्
कुत्रस्थापितेइतिचेत्। उच्यते। पश्चादुत्तरवेदेस्त्रिपुप्रक्रमेषुविस्येकः पक्षः मस्याचेस्वपरःपक्षःय
त्रस्थापनीयइतिस्वस्यमतिस्तत्रेसर्थः॥पाठस्तु॥अत्ररमेथांवर्ष्मन्पृथिव्याइति। हेशाकटेयुवा
पृथिव्यावर्ष्मन्नुन्नमेःशरीरस्तूतेअत्रास्मिन्देवयजनप्रदेशेरमेथांक्रीडांकुरूतं। देवयजनस्यभू
मेःशरीरत्वमाहतित्तिरिःवर्ष्मह्येतत्पृथिव्यायद्देवयजनमिति॥ कात्या०॥ दक्षिणमुपस्तभ्ना
तिविष्णोर्नुकमिति। दक्षिणशाकटस्यायंवोढंअधारभूतंकाष्ठंस्थापयेदिसर्थः। पाठस्तु॥ विष्णो
र्नु०उरुगायइति॥ नुकमित्यव्ययंकर्मवाचकं। विष्णोर्वीर्याणिकर्माणिप्रवोचंप्रब्रवीमि। कानिता
नि कर्माणीत्युच्यते। योविष्णुःपार्थिवानिरजांसिपृथिवीपरमाणून्विममेनिर्मितवान्। परिगणि
तवांश्च। पुनरपियोविष्णुःउत्तरमुपरितनंसधस्थंदेवानांसहवासस्थानंद्युलोकरूपमस्कभायत्

१८५

१८५

मव्याधोनपततितथास्तंभितवान्। पुनरपियस्त्रेधाविक्रममाणस्त्रिषुलोकेषुपदत्रयंनिदधेउ
रुगायउरुभिर्महात्मभिर्गीयतेस॥ कात्या०॥ दक्षिणतस्थूणामुपनिहंतिविष्णवेत्वेतीति। दक्षिण
शाकटाग्रवाहनायप्रकाष्ठंस्थापितंतद्भूमौनिखन्यात्। हेकाष्ठविष्णवेहविर्द्धानशाकटात्मनेविष्णु
शाकटाग्रवाहनाय... स्थूणांपूर्ववदिति। यथाध्व
र्युस्यर्थेत्वांनिखनामीतिशेषः॥ कात्या०॥ दिवोवेत्युत्तरंप्रतिप्रस्थातोत्तरस्थूणांपूर्ववदिति। यथाध्व
र्युर्दक्षिणशाकटेमंत्रेणोपलभ्यविष्णवेत्वेतिस्थूणांनिखाततवान्। एवंप्रतिप्रस्थातोत्तरशाकटेकुर्या
दित्सर्थः॥ पाठस्तु॥ दिवोवा० विष्णवेत्वेति॥ हेविष्णो द्युलोकाद्वाअन्तरिक्षलोकाद्वामहर्लोकाद्वाउरोर्विस्ती
र्णादंतरिक्षलोकाद्वासमानीतेनवस्तुनाद्रव्येणउभाहिहस्तौस्वकीयोहस्तौपृणस्वपूर
यस्वातत्तोधनपूर्णाद्दक्षिणात्सव्याद्वहस्तात्प्रयच्छबहुअवस्वाप्रकृष्ट मणिमुक्तादिधनेम
स्मभ्यंदेहि। विष्णवेस्वयंमंत्रः। पूर्ववद्व्याख्येयः॥ कात्या०॥ प्रतद्विष्णुरितिवाचयतीति। पाठस्तु॥ प्र
तद्विष्णु० विश्वाइति॥ यस्यविष्णोःउरुषुप्रभूतेषुत्रिषुविक्रमणेषुपादप्रक्षेपणस्थानेषुविश्वावि
श्वानिसर्वाणिभुवनानिअधिक्षियंति। अधिनिवसंति। ततःसप्रसिद्धोविष्णुःवीर्येणसाधार
णाभूतेनवारकर्मादिरूनास्तवतेप्रस्तूयते। तत्रदृष्टांतः। गिरिष्ठाःपर्वतेस्थितःकुचरःकुत्सि

१४५

लप्राणिरूपक्षकः बिन्ले सस्मादिति तिन्त्री मो त्रयंकरः म्गोनसिंह इव वीर्येण स्तूयते तद्वल्॥ कात्या०॥ विष्णो ररराटमिति वाचयती सनुवर्त्तते। असीति मंत्रशेषः। हविर्द्धाना रव्यपूर्वे नेदे द्वाक टे दक्षिणोत्तर रुळागयोः स्थापयिता तदावरकत्वेन परितो हविर्द्धानारव्य मंडपं कुर्यात्। स च मंडपो विष्णु देवताकत्वाद्विष्णुरित्युप चर्यते। विष्णोश्च मूर्त्ति धरस्य सर्वावयवे सद्भावात्। ललाटारव्यावयवोस्तित द्वद्वविर्द्धानमंडपस्यापि पूर्वद्वारवर्त्तिस्तंभयोर्मध्ये। कश्चि दर्भमालाग्र ध्यते तां मालां तद्वंधना धारं तिर्यग्वंशं वा संबोध्य पुरुष ललाटत्वेनोपचर्यते। हे दर्भमय मालाधर वंश त्वं विष्णोर्विष्णुमूर्त्तित्वेनोपचरितस्य हविर्द्धानमंडपस्य ररराटमसि। ललाटस्थानीयोभवसि॥ कात्या०॥ विष्णोः श्नप्त्रेस्थ इत्युभाभ्यामिति। येयं ररराटी तस्या मूर्द्धस्थापितायामेतं मंत्रं वाचयेत्। बौधायनस्तु विस्पष्टमेतन्मंत्र विनियोगमाह। विष्णोः श्नप्त्रेस्थ इति ररराट्यामंत्रतो व्यस्पति संमन्त्रतो सेक इति। व्यस्यति विश्लिष्य प्रक्षिपती सर्थः। हे ररराट्यौ युवां विष्णोर्विष्णुनामकस्य हविर्द्धानमंडपस्य श्नप्त्रेस्थः ओष्ठसंधिरूपे भवथः॥ कात्या०॥ स्यूविष्णो स्यूरसि विष्णो ध्रुवोसीति ग्रंथिं करोतीति। हे रज्जो त्वं विष्णोर्विष्णुनामकस्य हविर्द्धानमंडपस्य संबंधिनी स्यूरसि ग्रंथिकेरणाय स्यूतासि भवसि। हे रज्जुग्रंथे त्वं विष्णोर्हविर्द्धानस्य संबंधी भूत्वा ध्रुवोसि स्थिरो भवसि॥

१४६

घे तो

॥ कात्या०॥ आग्नवैष्णवं हविर्द्धाने निधाय वैष्णवमसीत्यालभत इति विष्णवेत्वे तिमंत्रशेषः। आग्नेयैर्वैष्णवैर्मंडपं निर्मायि मंत्रेणानेन स्पृशेत्। हे हविर्द्धान त्वं वैष्णवमसि विष्णुदेवताकत्वेन तत्संबंधी भवसि। तस्माद्विष्णुप्रीत्यर्थं त्वां स्पृशामि। हविर्द्धानस्य विष्णुदेवताकत्वं तित्तिरिर्दर्शयति। वैष्णवं हि देवतया हविर्द्धानमिति॥ ॥ इति पंचमोनुवाकः। पंचमे हविर्द्धानमंडपनिर्माणमंत्रा उक्ताः॥ षष्ठे तु परिवनिर्माणमंत्रा उच्यंते॥ ॥ कात्या०॥ उपरवानभ्र्यादिकरोत्स्ववटवदिति। यथा यूपस्यावटः क्रियते तथा चत्वार उपरवनामकाश्चतुरो गर्त्तान्निखनीत्वा कारमारभ्य परिलेखन पूर्वकं कुर्यादित्यर्थः। अवटार्थं अभ्रिस्वीकारमेवमाह॥ कात्या०॥ देवस्यत्वे त्यभ्रिमादाये ति अभ्रिशब्देन काष्ठनिर्मितं खननसाधनमुच्यते॥ ॥ पाठस्तु॥ देवस्यत्वा० नार्यसीति। हे अभ्रे आददे त्वां स्वीकरोमि त्वं तु नार्यसि खननसाधनत्वेन कर्मोपयोगित्वान्नराणां पुरुषाणां मनुष्याणां संबंधिनी भवसि। अन्यत्सर्वमैष्टिक हविर्निर्वापणमंत्रवद्व्याख्येयं॥ ॥ कात्या०॥ अवटं परिलिखतीदमहमिति॥ ॥ पाठस्तु॥ ॥ इदमहं रक्षसो ग्रीवा अपिकृंतामीति। उपरवाख्यांश्चतुरोवटान्परिलिखामीति यदस्ति इद

मिति विभक्तिव्यत्ययः । अनेन परिलेखनेनाहमनुघ्नातारक्षसो राक्षसजातेर्ग्रीवाः कंठप्रदेशान् कृंतामि छि
नद्मि । अपिशब्देन कृत्स्नशरीरछेदनं समुच्चीयते । न केवलं ग्रीवामात्रं छिनद्मि किंतु कृत्स्नमपि शरी
रमित्यर्थः ॥ कात्या० ॥ बृहन्नसीति यथापरिलिखितं खनतीति आग्नेयीविदिशामारभ्य च तस्रुषु विदिक्षु
चतुर उपरवान् । बाहुमात्रेभिः परिलिखिता तेन परिलेखनक्रमेण वटान् खनेत् ॥ पाठस्तु ॥ बृहन्नसि०
वैष्णवीमिति । उपरवाख्य हे गर्त त्वं बृहन्नसि महान्भवसि वर्तुलस्य गर्तस्य प्रादेशपरिमाणे न वि
स्तृतत्वात् बहुपरिमाणेन खातत्वाच्च महत्त्वं तथा त्वं बृहद्ग्रावा बृहन्महान्ग्रावा ध्वनिर्यस्येति विग्रहः ।
सकारांतोयं शब्दः । खातु ग्रावभ्यो प्रहतायो ध्वनिर्महान्भवतीत्यर्थः । तस्मात्त्वं इंद्राय इंद्रप्रीत्यर्थं
रक्षोहणं रक्षोवधविषयां बृहतीं वाचं प्रौढध्वनियुक्तं वाक्यं वद । सेतुवाक् । वलगहनमिति वैष्ण
वीमिति च विशेष्यते । पराजित्य पलायमानै राक्षसैः रिपुविनाशार्थं मातिचाररूपेण भूमौ निखा
ता अस्थिकेशनखादिपदार्था वलगा इत्युच्यंते । तदाह तित्तिरिः । असुरा वै निर्यंतो देवानां प्रा
णेषु वलगान्न्यखनन् । तान्बाहुमात्रेन्वविंदन् तस्माद्बाहुमात्राः खायंत इति । तान्वलगान्हंति वि

१४७

१४७

नाशयती वलगहा वाक् । सा च यज्ञरक्षकस्य विष्णोः संबंधिनी तादृशीं वाचं ब्रूहि ॥ कात्या० ॥ इदमहमिति
यथाखातं प्रतिमंत्रमिति । येन क्रमेण चत्वारो गर्ताः खाताः तेन क्रमेण चतुर्भ्यो गर्तेभ्यः खातं मृत्तृणादिकं
चतुर्भिर्मंत्रैरुत्किरेत् । तत्रायं प्रथमो मंत्रः ॥ इदमहं तं० निचखानेति । ष्ट्यैङ् शब्दसंघातयोरिति धातुः । नि
तरां स्वस्यात्यंतसंघातरूपेण सह वर्तत इति निष्ट्यः पुत्रादिः । धनिकस्य स्वामिनो धनं गृहादि निर्वाहको
मास्यः । केनापि निमित्तेन कुपितः पुत्रो मा सोवा नोस्मान् उद्दिश्य वधार्थं यं वलगं निचखान निखा
तवान् तं वलगमुद्वपामि उद्धृत्यान्यत्र परिक्षिपामि । इदं शब्दः क्रियाविशेषणं प्रत्यक्षं यथा भवति त
थोद्वपामीत्यर्थः ॥ अथ द्वितीयः ॥ इदमहं तं० निचखानेति । समानो धनकुलादिभिः सदृशः । असमा
नो न्यूनोधिको वा अन्यत्पूर्ववत् । तृतीयकोटरत्वाभावान् समानासमान शब्दौ द्वावेव शत्रुवाचकौ व्यभिहितौ ।
एतदेवाभिप्रेत्य तित्तिरिराह । द्वावेव पुरुषौ यश्चैव समानो यश्चासमानो यमेवास्मै तौ वलगं निखनतस्त
मेवोद्वपतीति ॥ अथ तृतीयः ॥ इदमहं तं० निचखानेति । कुलशीलादिभिः समानो मातुलादिः सबं
धुः । तद्विपरीतोऽसबंधुः अन्यत्पूर्ववत् ॥ अथ चतुर्थः ॥ इदमहं तं० निचखानेति । समानः समानजन्मा

ज्ञातात्तद्विपरीतोऽसज्जातः। अन्यत्सर्वंवत्॥ का॰स्या॰॥ उत्कृसांकिरामीति पश्चात्सर्वेभ्य इष्टसाधारणौ
मंत्रैः पूर्वोक्तक्रमेण गर्त्तद्वयं कृत्वा पश्चात्साधारणेनानेन मंत्रेण चतुर्ष्वपि गर्त्तेष्व उद्वपेत्। मंत्रार्थस्तु। येयं
कृत्या शत्रुभिरस्तितः संपादितावलगरूपा तामुत्किरामि। उद्वपत्यदूरे परिक्षिपामि॥ का॰स्या॰॥ स्वरा
ड्सीत्यभिमंत्रयति यथाखातं प्रतिमंत्रमिति। एवंनक्रमेण चतुर्षु गर्त्तेषु यजमानस्य हस्तस्पर्शं चतुर्भि
मंत्रैः कारयेत्। तत्रायं प्रथमः। स्वराळसि सपत्नहेति। हे प्रथम गर्त्त त्वं स्वराळसि स्वयमेव राजमानो
भवसि। अतः सपत्नहा शत्रुघाती भवेति शेषः। अथ द्वितीयः। सत्रराळस्यभिमातिहेति। सत्रेषु द्वा
दशाहादिषु राजत इति सत्रराट्। अभिमातिहा शत्रुघाती। अथ तृतीयः। जनराळसि रक्षोहेति।
जनेषु यजमानेषु राजत इति जनराट्। रक्षोहा रक्षविनाशकरा रक्षसघाती। अथ चतुर्थः। सर्वरा
ळस्यभिमातिहेति। सर्वेषु राजत इति सर्वराट्। अभिमातिहा शत्रुघाती॥ का॰स्या॰॥ प्रोक्षत्येतान्रक्षोह

१४८ णाइति स्वेदेमंत्रावृत्तिरिति। एतांश्चतुरो गर्त्तान्मंत्रेण प्रोक्षेत्। तस्य च मंत्रस्य गर्त्तभेदे समावृत्तिः १४८

कर्त्तव्या॥ पाठस्तु॥ रक्षोहणो॰ वैष्णवानिति। वैष्णवान् विष्णुदेवताकान् गर्त्तान् प्रोक्षामि। कोद्रावृ

रक्षोहणो राक्षसहंतॄन् वलगहनः। अभिचारसाधनहंतॄन्॥ का॰स्या॰॥ अवनयनेवस्तरणे चेति। ग
र्त्तेषु प्रोक्षणशेषोदकसेवनमवनयनं दर्भैराच्छादनमवस्तरणं तयोः द्वयोरपि क्रिययोर्गर्त्ते दर्त्ते।
तन्मंत्रावृत्तिर्द्रष्टव्या। तत्रायमवनयनमंत्रः। रक्षोहणो वलगहनो वनयामि वैष्णवानिति। अवनया
मि सिंचामि। अन्यत्सर्वंवत्। अथावस्तरणमंत्रः। रक्षोहणो वलगहनोवस्तृणामि वैष्णवानिति। अ
वस्तृणामि दर्भैराच्छादयामि। अन्यत्सर्वंवत्॥ का॰स्या॰॥ अधिषवणफलके द्व्यंगुल्यंतरे वारत्नि
मात्रे संतृण्णे इवोपदधाति पर्यूहति च रक्षोहणो रक्षोहणावितीति। ययोः फलकयोरुपरि सोमो
भिषूयते। ते अधिषवणफलके तयोर्मध्ये द्व्यंगुलव्यवहिते च ते चारत्निप्रमाणे असतृण्णे इव दृढ
बंधनरहिते ईषद्बंधनोपेते तादृशी फलके चतुर्णां गर्त्तानामुपरि स्थापयेत्। तयोः परितो मृदा
छिद्रपिधानं कुर्यात्। तत्रायमुपधानमंत्रः॥ रक्षोहणो वलगहना उपदधामि वैष्णवीति। यावधि
षवणफलके विशेषो तौ रक्षसां वलगहनौ वलगविनाशकौ वैष्णवी विष्णुदेवताकौ उपदधामि
द्वयोर्गर्तयोरुपरि एकैकं फलकं स्थापयामि॥ अथ पर्यूहणमंत्रः॥ रक्षोहणो वलगहनो पर्यूहामि

वैष्णवीइति। पर्यहामि स्त्रदापरितः छादयामि। अन्यत्सर्वं वत्। कात्या०॥ तयोश्चर्माधिषवणं परिहृतं स
वैरोहितं निदधाति वैष्णवमसीति। यस्मिंश्चर्मणि सोमोभिषूयते तच्चर्माधिषवणाख्यं तस्य चर्म
णोग्रभागः परितः छिन्नो भवति। सर्वमपि लोहितवर्णं नाद्वहं चर्म तयोः फलकयोरुपरि स्थापये
त्। हे चर्म त्वं वैष्णवमसि। यज्ञरक्षकविष्णुसंबंधि भवसि॥ कात्या०॥ तस्मिन्ग्रावाणः पंच वैष्णवाः स्थे
तीति। निदधाति स्तनुवर्तते। तस्मिंश्चर्मणि सोमाभिषवहेतुभूतान् पंचसंख्याकान् पाषाणान् वस्था
पयेत्। हे पाषाणाः यूयं वैष्णवाः स्थ यज्ञरक्षकविष्णुसंबंधिनो भवथ॥ इति षष्ठोनुवाकः॥ ॥
उपरवनिर्माणमंत्राः षष्ठे उक्ताः॥ सप्तमे सदोनामकमंडपस्य हविर्धानप्राचीनवंशयोर्मध्यवर्तिनो
निर्माणाय मंत्रा उच्यंते॥ कात्या०॥ औदुंबरीं मिनोतीति यजमानमात्रीं यूपवद्धेतेऽभ्र्यादि करोत्युप
स्तरणादीति। उदुंबरवृक्षादुत्पन्नां काष्ठविशाखां सदोमंडपस्य मध्ये निखनेत्। सा च शाखा यज
मानदेहपरिमिता सती खननास्त्र्यवं यूपवद्भूमौ स्थिता वर्तते। यथा यूपस्यावटखनितुं अ
भ्रिस्वीकारमारभ्य दर्भप्रस्तरणपर्यंता स्तत्र मंत्रैरनुष्ठितास्तद्वदत्राप्यनुतिष्ठेदित्यर्थः। यूपा
वटप्रदेशे त्रमं त्रपिनियोगः कात्यायनेनैवमुक्तः॥ देवस्य त्वेति सत्रिमादायेति॥ पाठस्तु॥ देवस्य त्वा०

१४९

नार्यसीति॥ पूर्वानुवाके व्याख्यातं॥ कात्या०॥ अवटं परिलिखति दमहमिति॥ पाठस्तु॥ इदमहं
रक्षसो ग्रीवा अपि कृंतामीति॥ एतदपि पूर्वानुवाके व्याख्यातं॥ कात्या०॥ यवोसीति सप्तसु यवानोप्येति॥
पाठस्तु॥ यवोसि यवयास्मद्द्वेषो यवयारातीरिति। हे धान्यविशेष त्वं यवोसि मिश्रणभूतस्य यवनस्य क
र्ता भवसि। तस्माद्द्वेषो द्वेष्टॄनपि शत्रूनस्मत् यवय अस्मत्तः पृथक्कुरु। तथाऽरातीः अस्मदीयं धनम
पहृत्य पुनरस्मभ्यमदातॄनपि यवय पृथक्कुरु॥ कात्या०॥ प्रोक्षत्यग्रमध्यमूलानि दिवे त्वेति
प्रतिमंत्रमिति॥ तत्रायं प्रथमो मंत्रः॥ दिवे त्वेति। हे औदुंबर्यग्रभाग त्वां दिवे द्युलोकप्रीत्यर्थं प्रोक्षा
मीति शेषः। अथ द्वितीयः। अंतरिक्षाय त्वेति। हे मध्यम भाग त्वामंतरिक्षलोकप्रीत्यर्थं प्रोक्षामि॥
अथ तृतीयः॥ पृथिव्यै त्वेति। हे मूल भाग त्वां पृथिवीप्रीत्यर्थं प्रोक्षामि॥ कात्या०॥ अवटे शेषमा
सिंचति शुंधंतामिति॥ पाठस्तु॥ शुंधंतां लोकाः पितृषदना इति। पितरः सीदंति येषु लोकेषु
ते पितृसदना लोकाः शुंधंताम् अनेनोदकसेचनेन शुद्धा भवंतु। खननेनोत्सन्नस्य क्रौर्यस्य शां
त्यर्थमिदमुदकासेचनं। तदाह तित्तिरिः। क्रूरमिव वा एतत्करोति यत्खनत्यपोवनयति शांत्या इति॥

॥कात्या०॥ बर्हि॑षि प्रा॒ञ्चुदं बिच प्रास्यति पितृषदनमसीति। तस्मिन्नवटे प्रागग्रानुदगग्रांश्च दर्भान्
॥कात्या०॥ उ
स्तृणीत। पितर: सीदंस्तु उपविशंतीति यस्मिं स्तत्सितृषदनं हे बर्हि: त्वं तथाविधमसि॥कात्या०॥ उ
द्दिवमिस्तुभान पती लिउ कृयणम स्त्र्या ग्रत्वेन स्थापनं॥ पाठस्तु॥ उद्दिवं स्तभानांतरिक्षं पृण दृं
ह स्व पृथिव्यामिति। हे औदुंबरि त्वं दिवं द्युलोकमुत्तमान। उद्धृ स्थिरत्वाय धानपतनिति तथा
घुलोकं स्तंभय। अंतरिक्षमाप्नेण सर्वतः पूरय। पृथिव्यां दृंहस्व। दृढा भव। यद्वा पृथिवीं दृंह
कुरु॥कात्या०॥ घृतान इति मिनोति पर्यूहणाद्युपसेचनात् कृत्वेति। पर्यूहणमारभ्योपसेचनप
र्यंतं यथा यूपे कृतं तथात्रापि कुर्यात्। तस्मिन्नवटे यूपं निखनेत्॥ पाठस्तु॥ घृतानस्त्वा० धर्मणे
ति। हे औदुंबरि त्वां घृतानो दीप्यमानो मारुतो वायु र्ध्रुवेण स्थैर्येण धर्मणा धारणेन मिनोतु
प्रक्षिपतु। डुमिञ् प्रक्षेपण इति धातुः। तथा मित्रावरुणावेतन्नामकौ देवौ प्रक्षिपतामिति शेषः।
॥कात्या०॥ पर्यूहणाद्युपसेचनान्त कृत्वेति। पर्यूहणमारभ्योपसेचनपर्यंतं यथा यूपे कृतं तथा
त्रापि कुर्यादित्यर्थः॥ तत्र यूपस्थानप्रदेशमंत्रविनियोगः। कात्यायनेनैवमुक्तः। ब्रह्मवनित्वेति

पांसुभिः पर्यूहतीति॥ पाठस्तु॥ ब्रह्मवनि त्वा० पर्यूहामीति। हे औदुंबरि त्वां त्वां पर्यूहामि परितोऽभ्यन्तिकां
क्षिपामि। कीदृशीं त्वां। ब्रह्मवनि ब्राह्मणजातिं वनति संभजत इति ब्रह्मवनिः। क्षत्रियजातिं संभजत इति
क्षत्रवनिः। राय्यो धनस्य पुष्टिं संभजत इति रायस्पोषवनिः। सर्वत्र सुपां सुलुगिति विभक्तेर्लुक्। शाखांत
रे पि द्वितीयांतत्वेन स्पष्टमाम्नायते। ब्रह्मवनिं त्वा क्षत्रवनिं सुप्रजावनिं रायस्पोषवनिं पर्यूहामी
ति॥ कात्या०॥ ब्रह्मदृंहेति मैत्रावरुणदंडेन समंतत स्त्रिः पर्यूहतीति। परितो दृढीकुर्यादित्यर्थः॥ पाठस्तु॥
ब्रह्म दृंह क्षत्रं दृंहायुर्दृंह प्रजां दृंहेति। हे औदुंबरि त्वं ध्रुवासि स्थिरा भवसि। त्वमिव यजमानो स्मिं
ल्लोके स्वकीय आयतने ध्रुवो भूयात्। स्थिरो भवतु॥ कात्या०॥ द्विरग्रारेवजुहोति घृतेन द्यावापृथिवी इति।
औदुंबर्याः संबंधिनि यस्मिन्प्रदेशे द्विविधत्रा शाखा सन्ति तत्र जुहुयात्। पाठस्तु॥ घृतेन द्यावापृथिवी प्र
र्यथाम्भिरीतीति। हूयमानेनानेन घृतेन द्यावापृथिव्यौ सर्वतः पूरिते भवतं॥ कात्या०॥ इंद्रस्य छदिरिति
मध्यमं छदिरारोपयेति। औदुंबरीनिखननादूर्ध्वं सदो नामकं मंडपं निर्माय तस्योपरि प्रावरणार्थं मध्य
मं कटमानरोपयेत्॥ पाठस्तु॥ इंद्रस्य छदिरसि विश्वजनस्य छायेति। छदिर्नाशेन तृणनिर्मितः कट
उच्यते। हे तृणनिर्मित त्वं इंद्रस्य छदिरसि। इंद्रसंबंधिकटो भवसि। अतस्त्वं प्रावरणाय सदो मध्य

१५०

यर्जिनो विश्वजनस्य यजमान र्त्विग्रूपस्य सर्वप्राणिनश्छायारूप्यादित्विति शेषः। सदन्नाद्देवताकत्वेनत्व
दीयच्छदिषः इन्द्रसंबंधित्वं ॥ कास्या० ॥ परित्वेति परिवार्येति। परितः कुड्यवदावरणं कृत्वे सर्थः।
॥ पाठस्तु ॥ परित्वा० जुष्टयइति ॥ गीर्भिस्तुतिभिर्वननीयो भजनीय इति इन्द्रः सदोऽभिमानी गिर्वणः।
हे गिर्वणः इमाः स्तोत्ररूपा गिरस्त्वां सर्वतः कटरूपेण परिभवं तु वेष्टयंतु। कीदृश्यः। वद्धायुमनुवृ
द्धयः दीर्घायुषं त्वामनुसृत्य मपि वृद्धिमस्ताः। किंच। जुष्टयो सम संबंधी स्तव जुष्टाः प्रिया भवंतु ॥ कास्या० ॥
परिषीवणग्रंथ्यत्निमन्यनिन्द्येंद्रे शिति। इन्द्रदेवताकैस्त्रिभिर्मंत्रैः परिषीवणादित्रयं कुर्यात् ॥ तत्रा
यं प्रथमः ॥ इन्द्रस्य स्यूरसीति। हे रज्जो त्वं सदोऽभिमानि देवस्येंद्रस्य संबंधिनी सती स्यूरसि ग्रंथिसि
द्धर्थं स्यूता भवसि ॥ अथ द्वितीयः ॥ इन्द्रस्य ध्रुवोसीति। हे ग्रंथे त्वमिंद्रसंबंधी कृत्वा स्थिरो भवसि ॥
कास्या० ॥ हविर्द्धानापरान्तमुत्तरेणाग्नीध्रमग्न्यागारं निधाय वैश्वदेवमसीत्यालभन्त वसि ॥ कास्या० ॥

हविर्द्धानापरान्तमुत्तरेणाग्नीध्रमग्न्यगारं निधाय वैश्वदेवमसीत्यालभन्त इति हविर्द्धानमंडपस्याप ॥ १५१ ॥
रांतो वायव्यकोणस्थ्योत्तरभागे किंचिदाग्नीध्रनामकमग्निस्थानं कृत्वा तस्य स्पर्शनं कुर्यात्। हे
आग्नीध्र त्वं वैश्वमसि। सर्वदेवसंबंधित्वमसि ॥ ॥ इति सप्तमोनुवाकः ॥ ॥ सप्तमे सदोनिर्माणमं

त्र उक्ताः अष्टमे धिष्ण्यनिर्माणमंत्रा उच्यंते ॥ कास्या० ॥ धिष्ण्यानिर्वपति विभूरसीति प्रतिमंत्रमिति ॥ अ
ग्नीनामाश्रयभूतमत्तिकया निर्मितास्त्वल्पवेदिका धिष्ण्या इत्युच्यते। चात्वाले श्वा तयामृत्तिकया धि
ष्ण्यानिर्वपेत्। तदाहतित्तिरिः। धिष्ण्यान्निवपतीति। तत्रायं धिष्ण्यार्थः प्रथमो मंत्रः। विभूरसिप्रवाहण
इति विभूः प्रवाहणश्चाग्नीध्रधिष्ण्यस्य नामानि। नैवैद्दिनामान इति कण्वेनोक्तत्वात्। हे
आग्नीध्रधिष्ण्य त्वं विभूः प्रवाहणश्चासि। विविधभवनाद्विभूः एतस्मादेव धिष्ण्यादितरधिष्ण्येष्व
ग्निविहरणादेतस्य विविधभवनं द्रष्टव्यं। हविषः प्रवाहणपरत्वात् प्रवाहणत्वं एतस्य मंत्रस्याग्नीध्रधि
ष्ण्यविषयत्वं बोधायनस्पष्टीचकार। आग्नीध्रं कृत्वा स्येनोद्धसाविभूसचात्वालपुरीषं सिकृत्वा इतिनि
र्वपतिविभूरसिप्रवाहन इति। अथ द्वितीयो मंत्रः। वह्निरसि हव्यवाहन इति। यज्ञोकर्मणो निर्वाहक
त्वाद्वह्नित्वं देवान्प्रति हविः प्रापणाद्धव्यवाहनत्वं यथाग्नीध्रधिष्ण्यस्य नामद्वयमुक्तं तथा होतृधिष्ण्य
स्यापि तन्नामद्वयं द्रष्टव्यं। धिष्ण्यगतानग्नीन्प्रति अन्ये देवाः प्रत्येकं नामद्वयं संपादयेत्युः। तदा
हतित्तिरिः। तान्देवा अब्रुवन्द्वेद्वे नामनी कुरुध्वमिति। होतृमैत्रावरुण ब्राह्मणाच्छंदसिपोतृनेष्टृ
वाकानां सप्तानां संबंधिनो धिष्ण्याः सदसि कुर्यात् ॥ तदाह कात्यायनः। षड्ढ्सदसीति। अथ तृतीयः ॥

स्वात्रो सिप्रचेता इति। स्वात्रो मित्रः प्रचेता वरुणः हे मित्रावरुणधिष्ण्यानेनेन नामद्वयेन युक्तो सि॥ अथ चतुर्थः॥ तुथो सि विश्ववेदा इति। तुथशब्देन देवान्प्रति दक्षिणानां विभागकर्ता पुरुष उच्यते। तुथो हस्म वै विश्ववेदा देवानां दक्षिणा विभजतीति तित्तिरिणोक्तत्वात्। विश्वं वेत्तीति विश्ववेदाः सर्वज्ञः हे ब्राह्मणाच्छंद सिधिष्ण्य यथोक्तनामद्वयवानसि॥ अथ पंचमः॥ उशिगसि कविरिति। उशिक् कमनीयः। कविर्विद्वा न् हे पोतृधिष्ण्य यथोक्तनामद्वयवानसि॥ अथ षष्ठः॥ अंघारिरसि बंभारिरिति। द्युलोके सोमरक्ष कौ द्वावंघारिबंभारी तथा च सोमरक्षकविषयमंत्रे स्वानभ्राजांघारेबंभारइ त्याम्नातं। तयोर्नामद्व यमस्मिन्नेष्ट्रीयधिष्ण्ये इत्युपचर्यते॥ अथ सप्तमः॥ अवस्यूरसि दुवस्वानिति। रत्नोघ्नो वायुवि शेषवाचके अवस्युवेत्ता वातायदुवस्यवे बावातायस्वाहेति मंत्रांतरे समाम्नातत्वात्तत्वात्। तदेतन्ना नो मद्वयमच्छावाकधिष्ण्य उपचर्यते। तान्होत्रादिधिष्ण्यानस्पृद सिनिर्माय वेदेर्दक्षिणभागे मार्जा लीयधिष्ण्यो निर्मातव्यः॥ दक्षिणे वेद्यंते मार्जालीयं निर्वपतीति बौधायनेनोक्तत्वात्। अथाष्टमः॥ शुंध्यूरसि मार्जालीय इति। शुंध्यूः शोधकः पात्रप्रक्षालनेन लेपमार्जनस्थानत्वात् मार्जाली यः॥ तदेतन्मार्जालीयधिष्ण्यस्य नामद्वयं॥ कात्या०॥ सदोद्वारं स्पृष्ट्वैतिष्ठन्नुदिशप्योदुंबरीब्रह्मा

सन्नत्वा कालद्वयप्रां जहि ताहवनीय बहिष्पवमानदेशाच्चात्वालकराभि त्रोक्षरानृतधामेति मतिमंत्रमि ति सदो द्वारे स्पृष्ट्वा गेव स्थाप्योदुंबर्या दीन्नृतधामेत्यादि भिर्नवभिर्मंत्रैः क्रमेणानिर्दिष्टत्वात्॥ तत्रा यं प्रथमः॥ ऋतधामासि स्वर्ज्योतिरिति। हे औदुंबरि त्वं ऋतधामासामगानाम्नस्तमवस्थानेनाधिष्ठानोप वेशनस्थानं यस्यास्तादृशी सामवेगा तौदुंबरीं धृत्वा स्पृष्ट्वोद्गायंति स्वर्ज्योतिः॥ उज्वलत्वेन स्वर्गे प्रकाशिका॥ ॥अथ द्वितीयः॥ समुद्रोसि विश्वव्यचा इति। हे ब्रह्मासनप्रदेश त्वं समुद्रोसि सर्वे देवाः सम्यगुत्कर्षेणाद्रवंत्यत्रेति समुद्रः विश्वं सर्वं यज्ञं व्यचति गच्छतीति विश्वव्यचाः। अथ तृतीयः। अजो स्येकपादिति। हे प्राचीनवंशद्वार त्व मिन्। अग्ने त्वं अजो सि अजतियत्नप्रदेशो बुगच्छतीत्यजः। अथवा परब्रह्मत्वेनमुपचारेण न जायत इत्यजः। स्मि व्रीणि नतानि एकः पादो यस्यासावेकपात्। तथा च श्रुत्यंतरं। पादोस्य विश्वा भूतानीति॥ अथ चतुर्थः॥ अहि रसि बुध्न्य इति। प्राचीनवंशस्य पश्चिमभागवर्ति पुरातनो गार्हपत्यो ग्निः प्रजाहितत्वेन उच्यते। हे प्राजहि तत्वमहिरसि। न हीयत इत्यहिः। शालाद्वार्यत्वेन गार्हपत्येन समुत्पन्नो यमग्निः। स्वरूपेण न हीयते। बुध्नो मूलं तत्र भवो बुध्न्यः। आधानकाले प्रथममाहितत्वान्मूलत्वमुपपन्नं॥ अथ पंचमः॥ सम्राडसि

कृशानुरिति। उत्तरवेदिगतहे आहवनीय बहुविधाहुत्याधारत्वेन सम्यग्भ्राजनात् सम्राडसि। पद्यो व्रता दिति:
कृशानुं यजमानेभ्य अनुग्रहकृतीति कृशानुः॥ अथ षष्ठः॥ परिषद्योसि पवमान इति॥ हे बर्हिः पवमानमान देवानां त्वं
परिषद्योसि स्तोतुं समेतान् ऋत्विजः परिषत् तद्योग्यः अत एव शुद्धत्वात् पवमान इति॥ अथ सप्तमः॥ नभो
सि प्रतक्वेति॥ हे चात्वाल त्वं नभोसि। एवं नभश्छिद्ररूपत्वादाकाशात्वं प्रतक्वा प्रकर्षेण गमनयुक्तात्वं विषणा
द्यागाघ थैं हि चात्वाले: प्रकर्षेण गम्यते॥ अथाष्टमः॥ मृष्टोसि हव्यसूदन इति। शामित्र त्वं हृदन पत्नुवि
शासन प्रदेश उच्यते। हे शामित्र त्वं मृष्टोसि। क्रियमाणस्य पत्नुविशासनस्य विहितत्वेनाशुद्धिहेतुत्वाभा
वात्। सत्यपि विशासने शुद्धोसि। हव्यस्य हृदयजिह्वादिरूपस्य हविषः सूदनः पाकहेतुरसि॥ अथ नवमः॥
समृद्धोसि विश्ववेदा इति। वेदिगतस्य वर्जनीयस्य तृणादेः प्रक्षेपस्थानमुत्कर इत्युच्यते। हे उत्कर त्वं
तृणादि समस्त हृयोग्यत्वात् समृद्धोसि। विश्वं परित्यक्तं तृणादिकं सर्वं वेत्तीति विश्ववेदाः। तदेवं विकूरसी
सारस्य विश्ववेदा इसं ता सप्तम दशमंत्रा उक्तास्तेषां सर्वेषां प्रत्येकं शेषभूतः ऊनातिरिक्तस्य स्वादिकों
मंत्रभागः यद्यपि कात्यायनो रौद्रेणेति सर्वत्रेषु वाचनमूनातिरिक्तस्येति तथापि रौद्रेण स्य स्याग
स्योपलक्षणत्वान्न्यूनातिरिक्तस्य स्वादिकं सर्वोपि मंत्राणामुक्तानां शेष इति द्रष्टव्यं॥ पाठस्तु॥ ऊना

तिरिक्तस्य प्रतिष्ठा॰ मामा हिंसिष्टेति। विकूरसीस्वादिभिः प्रतिपादितायेधिष्ण्यरूपा अग्नयस्ते सर्वकर्म
णि न्यूनातिरिक्तांशस्य प्रतिष्ठास्थितिहेतवः संपूर्तिकारिणो विहितस्येवांशस्य परित्यागेन न्यूनता न
वति अविहितस्यापि कस्यचिदनुष्ठाने तिरिक्तं भवति। तदुभयविधदोषापहारेण कर्मणः संपूर्तिं मे ते
ग्नयः कुर्वंसि तेषां प्रतिष्ठा तेचाग्नयः सगराः समानस्तुतयः गॄ स्तुताविति धातुः सर्वेषां हि नामत्वात् स
मानस्तुतित्वं हे अग्नयो यूयं सगरेण नाम्ना सगर इत्येनेन शब्देन सर्वे व्यवह्रियमाणत्वात् सगराः स्थ सग
रनाबान्निधेयात्र वथ। तेयूयमग्नयो रौद्रेणानीकेन शत्रुविनाशकत्वादुग्रेण स्ववदीये न सोन्येन मा
पात। मां रक्षत। हे अग्नयः मापि पृतत धनादिभिर्मां पूरयत। वोयुष्मभ्यं नमोस्तु। मामा हिंसिष्ट। अनु
ष्ठातारं मां मा वधिष्ट॥ ॥इति अष्टमोनुवाकः॥ ॥अष्टमे धिष्ण्यनिर्माणमंत्रा उक्ताः॥ नवमे वैसर्जन
होमादिमंत्रा उच्यंते॥ का०सा०॥ आज्याधिश्रयण स्रुक् संमार्जनो द्वासनान्वेक्षणानि कृत्वेति तत्राधि
श्रितस्याज्यस्य ग्रहणार्थोयं मंत्रः॥ ज्योतिरसि विश्वरूपं विश्वेषां देवानां समिदिति। हे आज्य त्वं विश्व
रूपं ज्योतिरसि। बहुधाहुतिषूपयुक्तत्वाद्विश्वरूपत्वं दीप्यमानत्वाज्ज्योतिस्त्वं विश्वेषां देवानां समिदसि
सम्यक् दीपकमसि। देवा ह्याज्येन स्वीकृत्य दीप्यंते॥ का०सा०॥ त्वं सोमेति प्रचरण्यां जुहोतीति। त्वंसू

रिवहोमसा। यनस्तूताकाचित्प्रचरणी सुध्यते॥ पाठस्तु॥ ११ त्वं सोम तनूकृद्भ्यो० स्वाहेति॥ तनूं शरीरं कृ
न्तंति छिंदंतीति तनूकृत् । तिरस्कांसि द्वेषंतीति द्वेषांसि अन्यैरस्मद्विरोधिभिः पृथिव्यां संततं विरवरद्भिः
कृतानि प्रेरितानी अन्यकृतानि। हे सोम त्वं ताद्दशेभ्यो यंतानि यंतासि। यथा ताद्दशानि नो अस्मा
न्न बाधंते तथास्मानन्यत्र सुरक्षितं प्रदेशे स्थापयित्वा पालयसि। तस्मात्त्वमेवास्माकं उरुप्रकृतं व
रूथं बलमसि तस्मै तुभ्यं स्वाहा इदं हुतमस्तु। २॥ लोमसु रवीयो ग्निर्यश्च तस्याग्नेः समीपे स्थापितः
सोमः तदुत्नयमाग्नीध्राद्दिप्रदेशेषु नीत्वा पश्चादग्नीषोमीयपशुरुपाकरः। ततः सोमं नेतुं तमुद्दिश्य या
सावाज्याहुतिं हुत्वा॥ का स्या०॥ जुषाणो अप्तुरिति द्वितीयामिति जुहोती सन्नुवर्त्तते॥ पाठस्तु॥ जुषा

१५४

णो अप्तुराज्यस्य वेतु स्वाहेति। हे सोम त्वं जुषाणो स्मासु प्रीतिमानप्तुः सोम द दर्शनाया सुरल्पदेहः
सन्न आज्यस्य वेतु आज्यं पिब। तदेवेदं हुतमस्तु॥ का स्या०॥ अग्ने नयेति वाचयतीति॥ पाठस्तु॥ अग्ने न
य० विधेमेति॥ हे अग्ने देव विश्वानि वयुनानि विद्वान् सर्वान्मार्गान् जानानः त्वमस्मान् सुष्ठान्नराये
धनलाभाय सुपथा नयत्री नेन मार्गेण प्रापय। जुहुराणं कुटिलं फलप्रतिबंधकं यदेनः पापमस्ति त
त्सर्वमस्मद्युयोधि अस्मत्तः पृथक्कुरु। ते तुभ्यं भूयिष्ठामतिबहुलां नमउक्तिं नमस्कारविषयां वाचं

१५४

विधेम संपादयामः॥ का स्या०॥ उत्तरेण सदो हविर्धाने वा अग्नीध्रे ग्निं निदधाति आवर्ध्रोणकलशं सोमपात्राणि
चायन्न इति जुहोतीति। ३॥ लोमसु रवीयमग्निं ग्रावादीनि च सदस उत्तरभागे नीध्रे वा अग्नीध्रमंडपे निधाय
तत्र सन्निधिश्च यगते ग्नावाज्येन जुहुयात्॥ पाठस्तु॥ अयन्नो अग्नि० स्वाहेति॥ अयमग्निर्नो अस्माकं
वरिवो धनं कृणोतु। अयमेवाग्निर्मृधः संग्रामान्सुर अग्रतः प्रतिदन्वेरिण्वो विदारयन्नेतु गच्छतु अ
यमेवाग्निर्वाजसातौ संग्रामे वा जान्शत्रून्संबंधिन्यन्नान्यस्मभ्यं दातुं जयतु। ततोयमेवाग्निर्जर्हि
पाणो स्मभ्यं दूष्यन्शत्रून् जयतु तस्मै स्वाहा॥ का स्या०॥ उरु विष्णोविति जुहोतीति। पूर्वमंत्रेणाग्नीध्रीये
होमः। अनेनत्वाहवनीये पाठस्तु॥ उरु विष्णो० स्वाहेति॥ हे विष्णो व्यापिन्नाहवनीयास्मदनुग्रहार्थं उरु वि
क्रमस्व। हन्नुपुबहुलं पराक्रमं कुरु। नोस्माकं क्षयाय निवासार्थं कुरु। कृधि बहुलं गृहधनादिकं संपाद
य। घृतेन ज्वालोद्भवायोनिः घृतयोनिः। हे घृतयोने हूयमानमिदं घृतं पिब। यज्ञपतिं यजमानं प्रप्रति प्रसमुपोदः पादस्तरणमिति द्वितीयः =
रातिरायेन वर्द्धय॥ का स्या०॥ दक्षिणेऽनसि कृष्णाजिनमास्तीर्य तस्मिन्सोमं निदधाति देव सवितरिति
ति। दक्षिणेशाकटे कृष्णाजिनस्यास्तरणं कृत्वा तस्मिन्सोमं निदध्यात्॥ पाठस्तु॥ देव सवितरेषते० दनीति

ति। हे सवितः सर्वस्य प्रेरक देव एष सोमस्ते तवार्पितः। तं त्वा दूयांसो मे रक्षस्व पालय। मा त्वा दभन्न्। एवं च
नस्य सोमस्य पातारं त्वाम् सुरा माहिं सिषुः॥ का॰स्या॰॥ एतत्त्वमिति विस्रस्योपतिष्ठत इति। हूष्णा
अजेन स्थापितं बद्धं सोमं विस्रस्योपस्थानं कुर्यात्॥ पाठस्तु॥ एतत्त्वं देवसोम॰ रायस्पोषेणेति॥ हे सोम
देव त्वं देवः सन् त्वदीयान् देवानेतदिदानीमुपागाः प्राप्तोसि। अहं मनुष्यो यजमानो मदीयान्मनु
ष्यानिदमिदानीं सह रायस्पोषेण पश्वादिधनेन सार्द्धं प्राप्तोस्मि॥ का॰स्या॰॥ स्वाहा निर्वरुणस्येति।
हविर्द्धान मंडपान्निर्गच्छेदित्यर्थः॥ पाठस्तु॥ स्वाहा निर्वरुणस्य पाशान्मुच्य इति। स्वाहा सोमरूपमन्ने
देवेभ्यो दत्तं नमस्तु। अनेन सोमप्रदानेन अहं वरुणस्य पाशान्मुच्ये निर्मुक्तोस्मि॥ का॰स्या॰॥ अग्ने व्रतपा इ
त्याहवनीये समिधमाधायेति॥ पाठस्तु॥ अग्ने व्रतपास्त्वे॰ तपस्तपस्पतिरिति। हे अग्ने व्रतपाः स्वतं
त्रतः सर्वेषां व्रतानां पालकोसि। तस्मात्कारणादिदानीमपि त्वमेव व्रतपाः। त्वं व्रतपाः त्वं मदीयस्य व्रतस्य
पालको भवेति शेषः। शाखांतरे तु त्वमित्येवं पठितं। अग्ने व्रतपते त्वं व्रतानां पतिरसीति। पूर्वं त्रापत
इत्यनुवाके यजमानोग्निशरीरस्य शरीरं प्रार्थयति स्म एवं कृत्वा स्वं स्वकीयव्रतपालनं प्रार्थयामा
स। इदानीं व्रतस्य पालितत्वात् तं व्यत्ययं परिहरस्व शरीरस्वीकारादित्यभिप्रायेणाग्ने व्रतपा या
सुपांसुलुगिति ङे आदेशः।

तनूरित्यादि मंत्रशेषं पठति। हे अग्ने व्रतपालन प्रार्थनकाले तव यं संबंधिनी या तनूर्मय्यभून्मय्य
तन्नूरित्यादि मंत्रं। तां स्थिता सैवा तनूस्त्वय्यवतिष्ठ। तो॥ किंच या मम तनूस्त्वय्यवस्थिता सेयं मय्यवतिष्ठतां।
वस्थिता सैवा तनूरघत्वय्यवतिष्ठ। हे व्रतपते हे व्रतपा रुकाग्ने नौ व्रतानि आवयोः कर्माणि यथायथं स्वस्वसंबंधमनतिक्रम्यावतिष्ठ
नामिति शेषः। अनुष्ठानरूपं व्रतं ममास्तु। तत्पालनरूपं व्रतं तवास्त्वित्यर्थः। मे दीक्षां मदीयं दी
क्षार्थं नियमं दीक्षापतिः दीक्षायाः पालकोग्निरन्वमंस्त। अनुमतवानंगीकृतवानित्यर्थः। त
पस्पतिः पतपसः पालकोग्निस्तपो मदीयं तपोनुमतवान्॥ ॥ इति नवमोनुवाकः॥ ॥ नव
मे वैसर्जनहोमादिमंत्रा उक्ताः। दशमे यूपसंपादनमंत्रा उच्यंते॥ का॰स्या॰॥ गृहेषु यूपाहुतिं जुहो
ति चतुर्गृहीतं स्रुवेणोरु विष्णो विक्रमस्वेति। स्वगृहे वस्थाय चतुर्वारं गृहीतमाज्यं स्रुवेण जुहुया
त्। सेयं यूपाहुतिः॥ पाठस्तु॥ उरु विष्णो॰ स्वाहेति॥ पूर्वानुवाके व्याख्यातः॥ का॰स्या॰॥ आज्यशेष
मादाय सतक्षा गच्छति यूपमन्निमित्तस्य सन्यानि निप्राकृतिष्ठन्नभिमंत्रयत इति। यूपस्य त
णार्थं गत्वा यूपमभिमंत्रयेद्धि॥ पाठस्तु॥ अत्यन्याँ॰ देवयज्यायै जुष्टं तामिति। दक्षि

विधाः यूपाः अयूपाश्च। पलाशखदिरादयो यूपाः। निंबजंबीरादयस्त्वयूपाः। हे पुरोवर्तिन् यूपवृक्ष त्वं तेन्या
न्कांश्चिद्यूपानपि समं प्रदेशं जन्मादिलक्षणरहितान् हेमस्यगाः अन्यांश्च यूपान् लोपामाः। कीदृशाः। अ
र्वाक्परे अत्युत्कृष्टेभ्यो लक्षणेभ्यः। अस्मात्सन्निहितलक्षणयुक्तमित्यर्थः। पुनः कीदृशं परो वरेभ्यः।
असंतनिकृष्टेभ्यो लक्षणेभ्यो दूरवर्तिनं तद्रहितमित्यर्थः। किंच हे वनस्पते देवतस्य पालक दीप्यमान
वृक्ष तं तादृशं त्वां देवयज्यायै देवयागार्थं जुषामहे वयं सेवामहे। देवा अपि देवयागार्थं त्वां सेवंतां।
।।का सा०।। स्रुवेणोपस्पृशति विष्णवे त्वेति। हे वृक्ष त्वां विष्णवे यज्ञार्थमुपस्पृशामीति शेषः।
यज्ञो वै विष्णुरिति श्रुतेः।।का सा०।। ओषधइति कुशतरुणं तिरस्कृत्येति यूपवृक्षस्य कुशमंतर्द्धिं
कुर्यात्। त्रायस्वेति मंत्रशेषः।। हे ओषधे मंत्रायस्व मां स्वधितिरूपाद्दुःखात्।।का सा०।। स्वधित इति परशु १५६
१५६ नात्र हरतीति।।पाठस्तु।। स्वधिते मैनं हिंसीरिति। हे स्वधिते हे परशो एतं यूपं मा हिंसीः मा वधीः।
।।का सा०।। दिवं माल्लेखीरिति पतंतमभिमंत्रयत इति। पाठस्तु।। दिवमग्रेण मा लेखीरंतरिक्षं मध्येन मा हिं
सीः पृथिव्या संभवेति। हे यूप वृक्ष पतन् त्वं दिवं द्युलोकं मा लेखीः मा हिंसीः अंतरिक्षलोकं च मा हिंसीः।

पृथिव्या संभव। पृथिव्या सह संगतो भव। यूपस्य वज्ररूपत्वादतो लोकानां शांतिरत्र स्यात इत्यभिप्रायः।।
।।का सा०।। अयं हि त्वेति शोधनमभिमंत्रणं शोधो वेति। अनेन मंत्रेण यूपं शोधयेत्। पूर्वमंत्रं सह जि मं त्रैण
त्रयेद्वा।।पाठस्तु।। अयं हि त्वा० सौभगायेति।। हि यस्मात् हे छिन्नवृक्ष ने तिजानस्त्री क्ष्णोयं स्वधितिः कु
ठरस्त्वा त्वां महते सौभगाय दर्शनीयत्वाय तिर्यक्छेदनेन प्रणिनाय प्रकृष्टं यूपत्वं प्रापयामास।
तस्माद्दृढेन छेदनेन त्वया न नेतव्यं।।का सा०।। अतस्त्वमित्याव्रश्चने भिजुहोतिति यूपवच्छेति।। पाठस्तु।।
अतस्त्वं देव० वयं रुहेमेति।। हे दीप्यमान वनस्पते त्वं अतोऽस्मात् स्थाणोः शतवल्शो विरोह वर्धक रुः शतत्वग
रेवा विरोह विशेषेण जायस्व। एवं वयमपि सहस्रवल्शाः पुत्रपौत्रादिभिर्बहुशाखोपेताः विशेषेण रुहेम
प्रजायेमहि इति यजमानेनाशास्यत इत्यभिप्रायः।। ।।इति दशमोनुवाकः।। ।।अथ विनियोगसंग्रहः।।
अथ सोमिकवेदपूर्वमंत्राणां प्रतिपादके। पंचमेध्याये तस्मिन्ननुवाका दशोरिताः। आतिथ्यादिस्त
थातानूनप्त्रमुत्तरवेदिका। तत्संस्कारा हविर्द्धानं ततश्चोपरवाः सदः। धिष्ण्या वैसर्जनं यूपमित्यर्था
अनुवाकगाः।। ।।इति काण्वसंहिताभाष्ये पंचमोध्यायः।। ।।यस्य निश्वसितं० महेश्वरं।।१।। सौमिकवे
दिप्रधाने पंचमेध्याये आतिथ्यमारभ्य यूपनिर्माणपर्यंता मंत्रा उक्ताः।। अथाग्नीषोमीयपशुप्रधाने

पश्य॥ विष्णुर्यज्ञाधिष्ठात्री देवता। तस्य कर्माणि वीर्याणि पश्यत। यैर्वीर्यैर्व्रतानि कर्माणि अग्निवायुसूर्याणां स्वानि स्वान्यप्रमत्ताः
नियमितवान्। किंभूतः। यो विष्णुरिंद्रस्य वृत्रवधादिकर्मसु युज्यो नुरूपः सखेति। =५
संतो यजमानाः कुर्वते सेवं पस्पशे
मन्वाख्यद्रिति। एवं स्त्रुवं तं यजमानं वाचयेत्॥ विष्णोः कर्माणि पश्यतेति हे ऋत्विजः विष्णोः कर्माणि सृ
ष्टिसंहारादिचरितानि पश्यत। यतो येः कर्मभिर्व्रतानि त्वदीय लौकिकवैदिककर्माणि पस्पशे। स्प
शबंधन इति धातुः। बद्धवान् निर्मितवानित्यर्थः। स विष्णुरिंद्रस्य युज्यो योग्यः सखा यद्वा विष्णोर्य
त्तस्य कर्माणि पश्यत यतो येर्व्रतानि आधानपशुसोमादीनि कर्माणि आलभनि पस्पशे। श्लिष्ट स
मानौ॥ का०सा०॥ तद्विष्णोरितिचषालं मीक्षमाणमभिनियूपकं वटकं प्रेक्षमाणं यजमानं वाचयेत्
इति शेषः॥ पाठस्तु॥ तद्विष्णोः० चक्षुराततमिति। सूरयो विद्वांसो वेदानां पारगाः विष्णोस्तत्सरमं प
दं स्वस्वरूपं सदा पश्यंति। कीदृशं दिव्याकाशे निरावरणं चक्षुरिव विततं व्याप्तं॥ का०सा०॥ त्रिगुणत्रिव्या
यामा कौशीरशनां तया नाभिमात्रे त्रिवृतं परिव्ययति परिवीरसीति। त्रिगुणा त्रिभिर्गुणैरर
ज्जुभिः कृता त्रिव्यायामा त्रिभिरायामैर्व्यायामैर्युता कौशी कुशसंबंधिनी या रशना तया नाभिप्रमाणे अ
वयवे रूपे तां त्रिव्यायामा त्रिभिरायामैर्व्यामाकौशी कुशसंबंधिनीया रशनात यानात्रिप्रमाणेऽआ
वृत्तित्रयं कृत्वा वेष्टयेत्॥ पाठस्तु॥ परिवीरसि० मनुष्याणामिति॥ हे यूप त्वं परिवीरसि
परितो रशनया वीतो वेष्टितोऽसि। दिवी दिव्यो देवसंबंधिनी प्रजाः मरुद्गणादयस्त्वां परितो व्ययंतां वे
ष्टयंतु। तद्वदिमं यजमानं मनुष्याणां संबंधिन्यो रायो धनानि परिवेष्टयंतु॥ का०सा०॥ यूपशकल

मस्यामुपगूह स्वरुं रशनायां दिवः सूनुरसीति। अष्टाश्रेर्यूपस्य याश्रिर्यज्ञसमीपे स्थिता तस्या
उत्तरभागे रशनायां स्वरुं तं नामकं यूपशकलमवस्रजेत्॥ पाठस्तु॥ दिवः सूनुः० पशुरिति। हे यूपशकल त्वं दि
वः सूनुरसि द्युलोकस्य पुत्रोऽसि। तत्र पृथिव्यां एष लोक आश्रयस्थानमित्यर्थः॥ तेतव आरण्यसं
बंधी पशुः॥ इति प्रथमोऽनुवाकः॥ प्रथमेऽनुवाके यूपसंस्कारमंत्रा उक्ताः। द्वितीये पशूपाकरणादि
मंत्रा उच्यंते॥ का०सा०॥ उपावीरसीति तृणमादायेति। हे तृणविशेष त्वमुपावीरसि। उपसमीपेऽव
तिगच्छतीति उपावीः। तादृशोऽसि॥ का०सा०॥ तेन पशुमुपस्पृशति उपदेवानिति। गच्छतीति तेन तृणेन प
शुमुपस्पृशेत्॥ पाठस्तु॥ उपदेवा० वस्पतीनिति। वाहितमानं यजमानं स्वर्गं प्रतिवहंती प्रापयंतां देवानां
मध्ये श्रेष्ठतमास्तान् निजः हवींषि कामयमानान् देवानग्नीषोमादीन् दैवी विशस्तत्संबंधिनीः प्रजा
रम्भहे पशो त्वदीयानि हृदयादीन्यंगानि उपप्रागुरुपागच्छंतु। हे त्वष्टृनामक देव वसुपशुलक्षणं धनं रम
रमयस्वाहे पशो त्वदीयानि हव्यानि हवींषि स्वदं तां स्वादूनि भवंतु। हे रेवतीः क्षीरादिधनवंतो हे प
शवो यूयं यजमाने गृहे संक्रीड्ध्वं। हे बृहस्पते वसूनि हृदयादिद्रव्याणि धारय पोषय॥ का०सा०॥
पशुर्वै रेवतं इति श्रुतेः।

द्विगुणरशनया। द्विव्यामया कौश्यापाशां कृत्वा अंतराशृंगमध्ये दक्षिणपादं बध्नाति। ऋतस्य त्वेति।
अवयवद्वयोपेतया व्यामद्वयपरिमितया कुशादर्भनिर्मितया निर्मितेयं रशनया दक्षिणं पादं बध्नीया
त्। शृंगद्वयमध्ये तां रशनां समानियवं धनाकारेण रशनावेष्टिनं पाशं कृत्वा तेन बध्नीयात्॥ पाठस्तु॥ ऋ
तस्य त्वा० मानुषः इति। हे देवहविः देवानां हविरूप हे पशो ऋतस्य यज्ञस्य आवरणं अविफलोपेतत्वा
यज्ञस्य सत्यत्वं तस्मिन्नर्थे त्वा पाशेन प्रतिमुंचामि। बध्नामि। किंच। मानुषः सवित्रादिप्रेर्षात्। अभि
धा पाश गलस्य एतस्य रूपं। अनेनोचितव्यापारं कुर्यादित्यर्थः॥ कात्याय०॥ देवस्य त्वेति यूपे पशुं बध्नीयादिति

शेषः॥ पाठस्तु॥ देवस्य त्वा सवितुः० नियुनज्मीति। अग्नीषोमदेवताभ्यां जुष्टमभिरुचितं पशुं नियुनज्मि
यूपे निबध्नामि शिष्टं व्याख्यातं॥ कात्याय०॥ अद्भ्यस्त्वेति पशुं प्रोक्षणीभिः प्रोक्षतीति॥ पाठस्तु॥ अद्भ्यस्त्वौ
षधीभ्यः प्रोक्षामीति। हे पशो त्वामद्भिः ओषधीभिश्च प्रोक्षामि मेध्यं करोमि। दर्भैर्यामुसृतत्वादत्र ओ
षधीनामपि प्रोक्षणसाधनत्वं स्वमात्र स्वीकृताभ्यां तृणोदकाभ्यां पशोरुत्सन्नत्वात्तेनोपन्यस्य नयुक्तमिति

तित्तिरिराह। अद्भ्यस्त्वौषधीभ्यः प्रोक्षामि स्वाहाद्भ्यो ह्येष ओषधीभ्यः संभवति यत्पशुरिति वा॥ किंच।
हे पशो एवं प्रोक्ष्यमाणं त्वां माताभिरनुमन्यतां तथा पिता द्यौरनुमन्यतां। एकउत्तरः भ्रातानुमन्यतामि
ति प्रत्येकं संबध्यते। भ्राता समानजन्मा। सगर्भ्यः। समाने गर्भे उदरे भवः सोदरः। सहैव व्याख्यायत इ
ति सखा सुहृत्। समानयूथे भवः सयूथ्यः अग्नीषोमाभ्यां एवंभूतं त्वां जुष्टमभिरुचितं प्रोक्षामि।
कात्याय०॥ अपां पेरुरसीत्यस्य उपगृह्णातीति पशोर्मुखे उदकं प्राशयेत्। असीति मंत्रशेषः। हे पशो
त्वं अपां पेरुरसि। पेरुः पानशीलः उदकपानशीलो भवसि॥ कात्याय०॥ आपो देवीरित्यधस्तादुपोक्ष
तीति। पशोरधोभागं प्रोक्षयेत्॥ पाठस्तु॥ आपो देवीः स्वदंतु० देवहविरिति। हे पशो त्वा मापो देवीः अब्भ्याः
दिव्याः स्वदंतु आस्वादयंतु। स्वात्तं स्वकीयतया प्राप्तं विद्धि। अति स्वादु सत्। अत्रि स्वादु सत् देव हविः देवा
नामिव योग्यं हविर्भूयात्। अद्भ्यस्त्वेत्येतन्मंत्रयेणावश्यमनुष्ठेयमिति तित्तिरिराह। उपरिष्टात्प्रोक्षस्य
परिष्टादेवैनं मध्यं करोति पावयत्यंतरत एवैनं मध्यं करोत्यधस्तादुपोक्षति सर्वत एवैनं मध्यं करोतीति।

॥कात्याय०॥ उत्तराघारमाघार्य पशुं पूर्वं समनक्ति। ललाटांसश्रोणिषु संत इति। प्रतिमंत्रमिति। ललाटे
तावदयं मंत्रः॥ संते प्राणो वातेन गच्छतामिति। हे पशो ते तव प्राणो वातेन वायुना संगच्छतां। अंसयोरयं मंत्रः।
समंगानि यजत्रैरिति। अंसाद्यंगानि यजत्रैर्यागैः संगच्छतां। श्रोण्योरयं मंत्रः॥ संयजमान आशिषेति।
दीर्घेणयज्ञफलेन
अयं यजमानः दीर्घेणायुषा संगच्छतां॥ कात्या०॥ शाखां समाहर यूपशकलमाहरेत्युक्तो नेतोग्नीध्राय ताभ्यां
पशोर्ललाटमुपस्पृशति घृतेनाक्तौ वितीति। अध्वर्युरितरं प्रति पलाशशाखां यूपशकलं च समा
हरेति ब्रूयात्॥ पाठस्तु॥ घृतेनाक्तौ पशुं त्रायेथामिति। हे शाखे यूपशकले युवां घृतेनाक्तौ संतौ
पशुमेतं त्रायेथां पालयेथां॥ कात्या०॥ रेवति यजमान इति वाचयति॥ पाठस्तु॥ रेवति यजमाने० तन्वाऽ
१६०
वेति। रेवतीशब्दो धनवती वाग्देवतामाचष्टे। वाग्वै रेवतीति श्रुतेः। हे रेवति वाग्देवते यजमानेस्मिन्
प्रियमभिप्रेतं धाः धेहि। आशिषां ज्ञानप्रदानेन यजमानं प्रविश। हे रेवति वातेन वायुना देवेन सजूः स
मानप्रीतिर्भूत्वा उरोर्विस्तीर्णादंतरिक्षात् यजमानं गोपायेति मंत्रशेषः। किंचास्य पशुलक्षणस्य ह
यज्ञ।
विषः त्मना आत्मना यं यजमानस्य यज्ञो त्वत्वा शरीरेण संजव। हे रेवति यजमानरूपेणात्मरूपेण पशुरू
पेण वा यजत्रैः स्वर्थः॥ कात्या०॥ तृणमुपास्यति वर्ष्णो वर्षीयसीति। विशासनीयस्य पशोर्भूमिस्पर्शपरि
मंत्रेत्वाड्यादेशास्मन इति आकारलोपः॥ =

श्री

तृणं
हारार्थं अधस्ताद्भूमिं प्रक्षिपेत्॥ पाठस्तु॥ वर्ष्णो वर्षीयसि० धा इति। हे वर्ष्णोस्तृष्टि जन्ये तृणदेवते। वर्षी
यसि विस्तीर्णतरे यज्ञे यज्ञपतिं यजमानं धाः धेहि॥ कात्या०॥ स्वाहा देवेभ्य इति जुहोति होमेति निष्कुसं
लयनात् प्राक्कालीनोयं होमः॥ कात्या०॥ देवेभ्यः स्वाहा जुहोतीति। मंत्रयोरनयोः सत्यप्यर्थैक्ये
पाठभेदस्य तात्पर्यं ति भवति रिराह। पुरस्तात्स्वाहाकृतयो अन्ये देवा उपरिष्टात्स्वाहाकृतयोन्ये स्वाहा
देवेभ्यो देवेभ्यः स्वाहेति॥ कात्या०॥ नियोजनीं चात्वाले प्रास्यति माहिर्भूरिति। नितरां योजनं नियो
जनं बंधनं तद्धेतुभूतां रज्जुं चात्वाले प्रक्षिपेत्॥ पाठस्तु॥ माहिर्भूर्मा पृदाकुरिति। हे रज्जो त्वमहिः सर्पा
कारो मा भूः। मा पृदाकुः अजगराकारोपि मा भूयाः॥ ॥इति द्वितीयोनुवाकः॥ ॥द्वितीये पश्वप
करणमंत्रा उक्ताः। तृतीये संज्ञप्तपश्वाख्यहविःसंस्कारमंत्रा उच्यंते॥ कात्या०॥ यां नेजन हस्तां वाचय
ति नमस्त आतान इतीति। पादप्रक्षालनेनु पश्वर्घ्यार्थं आपः यां नेजन शब्देनोच्यंते। तदुदकधा
रणपात्रं यां नेजनं तद्धस्ते यस्याः पत्न्याः सा यां नेजनहस्ता तामभिप्रदासनमानयति तदानीमेतं
मंत्रं वाचयेत्॥ पाठस्तु॥ नमस्त आतान० शूयास्मेति। आसमंतात्तन्यते इत्यातानो यज्ञः हे तादृशाय
शतेनुग्यं नमः॥ नमस्कारोस्तु। शत्रुरहितः सन् प्रेहि समाप्तिपर्यंतं प्रकर्षेण गच्छ। इमं मंत्रमागंश
किं च त्वमनर्वा अप्रस्तुतः अन्यमनाभिनः। यद्वा। यज्ञो वा आतान इति श्रुतेः।

घृतहितार्थमितिति त्रिरिराह। अनर्वा प्रेहि स्वाहा। अनर्वात्वे वा अनर्वात्व्यापन्नुसाइति। घृतस्य कुल्याः
घृतनदीरूपगङ्गः किंच। ऋतस्य यज्ञस्य पथ्याः मार्गरूपास्ता नदीरूप प्रेहि। इति संबंधः। अत्र बहु घृत
माहुतमित्यभिप्रायः। एवं यज्ञे त्वं स्तुत्वेदानीमायस्त्वं यं ते हेतुपरिविष्टाः पात्रेषु पूरिता देवीः हे देव्य
आपः यूयं स्वधावतः संस्कारतः च शुद्धाः सत्यो देवेषु विषयभूतेषु पशुं वोढुं। वहन प्रापणे वहत पशुं प्रा
पयत। किंच यस्मिन्विदेवेषु मध्ये वस्थिताः। परिवेष्टारस्तेषां देवानां परिवेषणकर्तारो भूयास्म॥ का सा०॥
पशोः प्राणान्शुन्धति पत्नी मुखनासिके चक्षुषी कर्णौ नाभिं मेढ्रं पायुं पादान् संहत्य वाचं ते शुन्धामीति प्र
तिमंत्रमिति। पशुसंबंधीनि प्राणस्थानानि मुखादीनि छिद्राणि पत्नी तत्तन्मंत्रेण शोधयेत्। वाचं ते शुन्धा
मीत्यादि चरित्रांस्ते शुन्धामीत्यंता अष्टौ मंत्रास्तेषां पाठस्तु॥ वाचं ते शुन्धामि० चरित्रांस्ते शुन्धामी १६१
ति। हे पशो ते तव संबंधिनीं वाचं वागिंद्रियं शुन्धामि शुद्धां करोमि। तथा त्वदीयं पंचवृत्तिकं प्राणं शुन्धा
उंदनेन मिं तथा चक्षुरिंद्रियं श्रोत्रेंद्रियं नाभिच्छिद्रं गुह्येंद्रियं चरित्रान् चरणसाधनभूतान्पादान् एवं
विधानि त्वदीयानि सर्वेंद्रियाणि शुन्धामि॥ का सा०॥ शेषेण यजमानश्च शिरः प्रभृत्यभिषिंचत इति।
१६१ पत्न्या पश्ववयवजातं येनोदकेन शोधितं तेनोदकशेषेण अध्वर्युयजमानौ पशोः शिरआद्यंगान्य

नुक्रमेणाभिषिंचेतां। तदुच्यते। मनस्त इति शिर इति। मनस्त आप्यायतामित्यनेन मंत्रेण शिरः अनुसिंचे
तामित्यर्थः॥ पाठस्तु॥ मनस्त आप्यायतां० श्रोत्रं त आप्यायतामिति। हे पशो ते त्वदीयं मनः आप्याय
तां शाम्यतु। एवं त्वदीयानि वाक्प्राणचक्षुःश्रोत्राणि शाम्यंत्वित्यर्थः॥ का सा०॥ यत्ते क्रूरमित्यंगानी
ति मनः प्रभृतीनां मध्ये यान्यवशिष्टान्यंगानि तान्यवसिंचेतां॥ पाठस्तु॥ यत्ते क्रूरं० शुध्यत्विति। हे
पशो ते तव यद्बंधनं मुखनिरोधादिकं क्रूरमास्थितिः कृतं यच्च छेदादिकर्मास्थितं कर्तुमवस्थितं तत्ते स
र्वमाप्यायतां शाम्यतु। किंच तत्सर्वं तव निष्टाप्यतोस्तो व्रं भवतु तत्सर्वं शुद्धं भवतु॥ का सा०॥ शम
होभ्य इति पश्चात्सक्थ्नोर्निषिंचत इति। पशोरूर्ध्वं घनं भागम् अध्वर्युयजमानौ निषिंचेतां॥ पाठस्तु॥ श
महोभ्यः। दिवसादिकालविशेषेभ्यः शं सुखमस्माकं पशोर्वा भूयादिति शेषः॥ का सा०॥ अग्रेण ना
भिं तृणं निदध्यात् ओषधे त्रायस्वेति नाभेरग्रे देशे तृणं निदध्यात्। त्रायस्वेति मंत्रशेषः॥ व्याख्यातं पूर्वाध्या
यस्याद्यानुवाके॥ का सा०॥ स्वधित इति प्रज्ञातयासि निधाय छिनत्ति। पूर्वं प्रसिद्धं स्वधितिं तृणस्योप
रि स्थापयित्वा तया प्रसिद्धया स्वधिस्थानानि छिंद्यात्॥ पाठस्तु॥ स्वधिते मैनं हिंसीरिति। एनं
पशुं। अन्यन्मंत्रद्वयेपि पूर्वं इव व्याख्यातं॥ का सा०॥ अग्रं सव्ये कृत्वा दक्षिणेन मूलं उभयतोनक्ति लो

हितेनरक्षसाभितीति। यत्तृणं नाभ्नेरग्रेस्थापितंतस्य। तृणस्याग्रंवामहस्तेन धृत्वादक्षिणहस्तेनमूलं
धृत्वाऽग्रमूलद्वयंछेदननिष्पन्नेनरक्तेनांज्यात्। रक्षसांभागोसीतिमंत्रशेषः। हे लोहितांक्ततृणत्वंरक्षसां
भागोसि॥ कास्या०॥ निरस्तंभिस्थापास्यतीति। लोहितांक्ततृणं परिस्यजेत्। रक्षइतिमंत्रशेषः। य
रूपविघातकंरक्षोस्तितंनिरस्तंपरिस्यक्तं॥ कास्या०॥ इदमहमिस्यभितिष्ठति इ्यजमानः इति। परि
स्यक्तं तृणमभितिआक्रम्ययजमानस्तिष्ठेत्॥ पाठस्तु॥ इदमहं रक्षो० नयामीति। यत्तृणरूपंरक्षअध्वर्युणा
निरस्तंतदिदंरक्षःअहंयजमानअभितः पादेनाम्यतिष्ठामि। नकेवलंस्थितिमात्रंकिंतुअहंइदंर
क्षोवबाधे। अवाचीनंयथाभवतितथानाशयामि। अहंइदंरक्षोधमंतमअसंतनिकृष्टंतमोनयामि। नरकंप्रापयामि॥ कास्या०॥ वपाश्रुत्विवघवपाश्रवण्योप्रोर्णोति घृतेन द्यावापृथिवीइतीति। इद
इदेन्द्रोवस्थितोवपारव्योयोमांसविशेषोवपातांश्रपयतीतिवपाश्रपणी वपाश्रदरदेशस्थक्रम
पास्यदरायावपाश्रयण्यावाछादयेत्। प्रोर्णुवाथामितिमंत्रशेषः। हे द्यावापृथिवी द्युलोकभूलो
कसदृश्यौवपाश्रयण्यौ मदीयस्वरूपंघृतेनाज्यसमानेयापयौ प्रोर्णुवाथामाछादयतं॥ कास्या०॥
तृणाग्रं वाध्वर्युर्वायोवेरिन्तीति। अध्वर्युर्बर्हिषोग्र तृणमाहवनीये प्रास्यतीतिशेषः। तथाबोधाय

नोदकेन ऊर्णुञ्आछादनइतिधातुः॥

१६२

विदन्नानैस्यदृष्येतिरूत्वेमेतेइदंरूपं=

हेवायो

नोप्याह। आहवनीयस्यांतिमेष्वंगारेषुयेःप्रतितथमाहवनीयेबर्हिषोग्रमुपास्यतीति। स्तोकानामितिम
न्त्रशेषः॥ वपायास्तोकानां वपासंबंधिनांविप्रुषांसंघातमितिशेषः॥ वैः द्विवर्द्धिं पिवेसर्थः॥ कास्या०॥ वपां
स्रुवेणाभिघारयतिजुषाणोअग्निराज्यस्येतीति॥ पाठस्तु॥ जुषाणोअग्निराज्यस्यवेतुस्वाहेति। जुषाणः सेवमानआ
हवनीयोग्निः आज्यस्याज्यंवेतु पिबतुस्वाहेति सुहुतमस्तु॥ कास्या०॥ वपाश्रपण्यावनुप्रास्यतिप्राचीविशाख
खांप्रतीचीमितरां स्वाहाकृतेइतीति। द्वयोःश्रपण्योर्मध्येयाविशाखाविभिद्यशाखाविगतशाखा
वातामाहवनीयस्यप्राग्भागेइतरांप्रत्यग्भागेप्रक्षिपेत्॥ तथाचबोधायनः॥ आहवनीयेवपाश्रपणी
प्रहरेत्। तथेतिस्वाहोर्ध्वंनभसंमारुतंगच्छतमिति। हेवपाश्रपण्यौस्वाहाकृतेस्वाहाकारेणप्रक्षिप्तेयु
वामूर्ध्वंनभसंऊर्ध्वंनभअकाशंपस्यताद्दृशौवायुंगच्छतंप्राप्नुतं॥ इतिषष्ठेतृतीयोनुवाकः॥ ॥तृ
तीयेनुवाकेसंक्षेपम्वारव्याहविःसंस्कारामंत्राउक्ताः॥ चतुर्थेवसाहोमोविधीयते॥ कास्या०॥ संतेमनस्तिहृदयमभिघारयतीति। हृदयसंबंधिमांसंपृषदाज्येनाभिघारयेत्॥ पाठस्तु॥ संते
मनो० गच्छतामिति। हेहृदयतेपश्चोस्तवमनोदेवानांमनसासंगच्छतां। त्वदीयःप्राणोपिदेवानांप्राणे
संगच्छतां॥ कास्या०॥ रेळस्लीतिवसांगृहीत्वेतिमांसपाकंजुत्रंस्थितमस्तेहात्मकोद्रव्यविशेषोवसा
× प्राचीविशाखांप्रतीचीमेकमूलामिति॥ पाठस्तु॥ स्वाहाकृतेऊर्ध्वं० गच्छतमिति। ×७

= अधिपतू। अथयत् अंतरिक्षं तन्निमितिशेषः। अंतरिक्षस्यत्वंसिद्धा = विस्त्रतु। रिणान्ति र्विनर्सर्धइति शाखांतरं। २
तिरिस्यतोमितिशाखांतरे। = ५

तांगृह्णीयात्॥ पाठस्तु॥ रेळस्यग्नि० अधिपदिति॥ हेवसे खंरेळसि। रिषति र्हिंसार्थः। हिं सितान्नव
सि। तस्मादाहवनीयोग्निस्त्वां श्रीणातु आश्रयतु स्वीकरोतु। आपश्चत्वा संमरिणन् सम्यकुर्वान्तु
वंतु। तवन्नोषोमान्कृत्। हेवसे त्वां दध्यामीतिमंत्रशेषः। किमर्थं वा तस्यवायो र्दुद्येगस्य पूर्णो आदित्स
स्यरंद्वेगस्येरं द्युतिश्रजिस्थगतिकर्मा काप्वादित्स योरप्रतिहतगमनसि अर्थं त्वां दध्यामीत्यर्थः॥
स्यरंद्वेगस्येरं द्युतिश्रजिस्थगतिकर्मा ... तवायं वसारूपं हविस्त
दुष्मणः दुष्मांतरिक्षं तदर्थं त्वां गच्छामीति विशेषणाधिस्येनसीदतीति यैधिवल्कवसारूपं हविस्त
थाविर्यं नवत्तिस्यर्थः॥ का०स्या०॥ प्रयुतमितिसंसृजतिपार्श्वेनेति। पार्श्वगतेन मांसेन मिश्री कुर्यात्।
पार्श्वेनवसाहोमं प्रयौतीति। प्रसंतरात्। द्वेषेइतिमंत्रशेषः॥ द्वेषः द्विषआप्रीतो वसापार्श्व मांसयोः
परस्परमिश्रणेन यदप्रियमस्ति तदुनयोः सकाशात् प्रयुतं पृथग्भूतं भवतु॥ का०स्या०॥ वसैकदे
शं जुहोतिघृतं घृतपावानइतीति। स्वकृतायावसायाएकभागं जुहुयात्॥ पाठस्तु॥ घृतं घृतपावानः०

स्वाहेति। हे घृतपावानः पापान इत्यस्यरूपं। हे घृतस्य पातारः इंद्राकारो घृतं द्रवद्रूपं हविः
पिबत। हे वसायाः पातारो देवता अस्मै वसारूपमिदं हविः पिबत हे पत्रो तं अंतरिक्ष वासिनो दे
वगणस्य हविरसि। का०स्या०॥ दिशो व्याघारयति दिशइति प्रतिमंत्रमितीति। जुहुयादित्यर्थः॥

स्वाहास्तु हुतमस्तु। २ अतोमभिन्नं निबुनिपञ्चेतिवभिप। = ३

हे दिशः युष्मभ्यं स्वाहेत्यध्याहारएवमन्यत्रापि = २

॥ पाठस्तु॥ दिशः प्रदिश० स्वाहेति। वसाशेषेण सर्वाभ्यः प्राच्यादिदिग्भ्यो दिशइत्यादिमंत्रषट्के
न होमं कुर्यात्॥ का०स्या०॥ ऐंद्रः प्राण इति पशुं समन्वाशतीति। पशुरूपं हविः संपन्नोत्तु॥॥ पाठस्तु॥ ऐंद्रः
प्राणो अंगे अंगे निधीत० मदंक्षिति। ऐंद्रः इंद्रसंबंधी प्राणवायुरंगे अंगे पशोः सर्वेषु अंगेषु निधीतो नि
हितः। तथेंद्रसंबंधी उदानो वायुः पशोः सर्वेष्वंगेषु निक्षिप्तः। हे त्वष्टः त्वष्टनामदेवयस्तव रंगजातं
सत्स्वसमानलक्षणं सत्स्वछेदने विषुरूपं सर्वतो यापितेजोरूपं न भातिन्नबति। तत्सर्वं त्वमनुहे। ५
ण न्हरिब दुष्मस्यं तं सत् समित्यै की भावे एकीकृत्य समेत्तु संगच्छतां। हे पत्रो देवत्रा यंतं देवेषु गच्छंतं त्वां
सखाय इतरे पशवो माता पितरश्च। अनुमदंतु हर्षं कुर्वंतु। अवसेत्सुखेन स्वर्गं प्राप्स्यसि कुलं सर्वं
माप्यायतां॥ ॥ इति चतुर्थोऽनुवाकः॥ गुदतृतीयस्य परिच्छेदमनुयाजेष्वनुसमुद्रं गच्छेतिप्रतिमंत्रं प्रति
वषट्कारं जुहोति। गुदकांडस्य तृतीयभागमेकादशधा निर्यक्छित्वा तु याजानामेकैकस्मिन् वषट्कारे स
मुद्रं गच्छ स्वाहेत्येतदादि भिरग्निं वैश्वानरं गच्छ स्वाहेत्येतदंतैरेकादशभिर्मंत्रैरेकैकं गुदकांडभा
गं प्रतिप्रस्थाताजुहुयात्। एतेषां पाठस्तु॥ समुद्रं गच्छ स्वाहा० अग्निं वैश्वानरं गच्छ स्वाहेति। अथयज्ञो

ग

श्री

दे
व

१६४

सांतं मुखं स्वत्रोतं हे हवि स्त्वं समुद्राद्रि नामकान् देवान् गच्छ आ मुहि ॥ सुकृलमस्तु ॥ का० स्या० ॥ मनो म इति मुखो पस्पर्शनमिति । अथ यज्ञहोमांते मुखं स्पृशेत् । हार्दिवेति मंत्रशेषः । हे समुद्रादि देवतासमूह हृदः संबंधि हार्द्यान् हार्दं मे मदीयं मनो यच्छ निबध्नीहि ॥ का० स्या० ॥ स्वरुं जुहो । दिवं ते धूम इति ॥ पाठस्तु ॥ दिवं ते० स्वाहेति । हे स्वरो तेतव संबंधी धूमो दिवं द्युलोकं गच्छतु । तव ज्योति र्ज्वाला अंतरिक्षं लोकं गच्छतु । तव भस्मना पृथिवीं भूलोकं आपूरय समंतात् स्तर य ॥ का० स्या० य० ॥ शुष्का ई संधो हृदयशूलं मुषमूहति मापो मौषधीरिति । आलब्धस्य पशोः हृदयस्थमांसादानार्थं यः शूलो विहितः तं शुष्कार्द्रभूप्रदेशयोः संधौ निगूहेत् ॥ पाठस्तु ॥ मापो मौषधीर्हिं सीरिति । हे हृदयशूल त्वमपो देवता मा हिंसीः मौषधीः ॥ का० स्या० ॥ धाम्नो धाम्नः सुमित्रिया न इत्युपस्पृशं स्य इति ॥ आभ्यां मंत्राभ्यां मार्जयेरन् ॥ पाठस्तु ॥ धाम्नो धाम्नो राजन् इतोम् तमिति ॥ हे राजन् वरुण धाम्नो धाम्नो यस्मात् यस्मात् त्वदीयपाशसमन्वितात् स्थानात् वयं भीतास्ततः तस्मात् स्था

१६४

१६४

साध्व:

नात्नोस्मान् मुंच । मोचय । किं च हे वरुण तव दाधाः सर्वदेवता अघ्न्याः अहंतव्याः पूजनीया इत्यर्थः ॥ इतियदाहुर्ब्रह्मवादिनो वदंति इत्येवं सत्यस्माकमिष्टप्राप्त्यनिष्टपरिहारार्थं । वयं ता देवताः यत्शपा महे । ततस्तस्मात्पापात् हे वरुण नोस्मान्मुंच । अब्देवता ओषधयश्च नोस्माकं सुमित्रियाः संतु सुमित्रेषु योग्या भवंतु । यः शत्रुरस्मान् द्वेष्टि वयं च यं शत्रुं द्विष्मो द्वेषं कुर्मः तस्मा दुत्तयाः स कार्ये शत्रवेः तेषां आप ओषधयश्च दुर्मित्रियाः संतु । अमित्रत्वेनावस्थिता भवंतु । हे आप इदं पश्चात् संप्लपनं निमित्तं पापं प्रवहत । अपनयत । यत्किं च दुरितं अभिद्रोहादिरूपं पापं मयि स्थितं तदप्यपनयत । वा अथवा यत्प्राणिमात्रमहं दुद्रोह हिंसां कृतवान् स्मि उत वाहं यदनृतमनृतवादित्वं यमनभपराधिनं शेपे शापं कृतवानस्मि हे आपस्तदेतद्रोहादिरूपं पापं मपनयत ॥ ॥ इति पंचमोनुवाकः ॥ ॥ पंचमेनुदकांतहोमो वर्णितः । २ तावतान्नीषोमीयपशुः समाप्तः । अथ सोमाभिषवोपयुक्तानां वसतीवरीसंज्ञकानां अपामुपादानं षष्ठे निरूप्यते ॥ का० स्या० ॥ वसतीवरीग्रहणं हविष्मतीरिति ॥ सोमाभिषवसाधनभूता वसतीवरी संज्ञका आपो गृह्णीयात् ॥ पाठस्तु ॥ हविष्मती० सूर्य इति । हविष्मान् हविषा संयुक्तोयं यजमानः हविष्मतीः हविषा सोमेन युक्ता इमा वसतीवरीः आविवासति परिचरति । ततो देवो यातमानो

ध्वरो यागो पि स्वशरीरनिष्पत्त्यर्थं हविष्मान् भवतु। किंच सूर्योपि देवो यजमानस्य फलदानाय संस्व संत स्यर्थं हविष्मान् हविः संपन्नो भवतु॥ कास्या॰॥ अग्नेर्वइति निदधातिभ्रा॥ला दूर्यमधरेणेति। नूनं गार्हप त्यस्य पश्चिमभागवसतीवरी संज्ञका अपो निदध्यात्॥ पाठस्तु॥ अग्नेर्वोपन्नगृहस्य सदसि सादयामीति। हे वसतीवर्य्यः वो युष्मान् अपन्नगृहस्याविनश्वरगृहस्य शालामुखीयाग्नेः सदसि समीपा स्थाने सादयामि स्थापयामि॥ कास्या॰॥ दक्षिणस्यामुत्तरवेदिश्रोणौ निदधातीन्द्राग्न्योरिति। शा लामुखीयाग्नेः पश्चिमभागे स्थापिता वसतीवरीरादायोत्तरवेदेर्दक्षिणश्रोण्यां निदध्यात्। भाग धेयी स्थेति मंत्रशेषः। हे वसतीवर्यो यूयमिंद्राग्न्योरिंद्राग्निदेवतयोर्भागधेयीः स्थ भागधेयो भाग रूपा भवथ॥ कास्या॰॥ उत्तरस्यां पूर्ववन्मित्रावरुणयोरिति वेति। दक्षिणश्रोण्यां स्थापिता वसतीव रीः पुनरादाय पूर्वमंत्रेण वा अनेन मंत्रेण वोत्तरश्रोण्यां निदध्यात्। भागधेयी स्थेति मंत्रशेषः। हे व सतीवरिसंज्ञका आपो यूयं मित्रावरुणदेवतयोर्भागरूपा भवथ॥ कास्या॰॥ विश्वेषां देवानामिति सा ग्नीध्रमिति। उत्तरस्यां श्रोण्यां स्थापिता वसतीवरीः पुनरप्यादायाग्नीध्रमंडपे निदध्यात्॥ पाठस्तु॥ विश्वेषां॰ वध्वरमिति। हे वसतीवर्यो यूयं सर्वेषां देवानां भागरूपा भवथ। इदानीमभिनयेन दर्श

भागस्थेयो भागरूपाः।

यन्नाह। याः प्रसिद्धा अमरीहृष्टभूता वसतीवर्याख्या आपः उपसूर्ये सूर्यसमीपे स्थिताः सूर्योपि याभिर द्भिः सह गच्छति ता आपो नोस्मदीयमध्वरं यज्ञं हिन्वंतु प्रीणयंतु॥ ॥ इति षष्ठोनुवाकः॥ षष्ठे सोमाभिषवा र्थानां वसतीवरीणां ग्रहणमुक्तं। सप्तमेभिषोतव्यस्य सोमस्योपावहरणादिमंत्रा उच्यंते॥ कास्या॰॥ ई षांतरेणाद्रिं सोममद्रिषु सन्मुखेषु निदध्यात् हृदे त्वेति इति। ईषयोर्मध्ये सोमस्याद्रिं तागमवहृत्या नि मुखेषु ग्रावसु निदध्यात्॥ पाठस्तु॥ हृदे त्वा॰ उपावरोहेति। हे सोम त्वां हृदे हृदयवद्भ्यो मनुष्येभ्यः मनसे मनस्विभ्यः पितृभ्यो दिवे द्युलोकवासिभ्यो देवेभ्यो विशेषतः सूर्याय चोपावहरामीति शे षः। एवमुपावहृतोभिषुतस्त्वमुर्ध्वोच्छ्रितः सन्नध्वरं मदीयं यज्ञं संपाद्य दिवि द्युलोकवासिषु दे वेषु होत्राः वषट्कारवादिनः सप्त होतॄन् कान्यच्छनिवधीहि। किंच हे सोमराजन् त्वं विश्वाः सर्वाः प्रजा उपावरोहेत्यर्थं इति प्राप्नुहि। अत्रोपावहरदिति विधिं स्तुवयन् हृदयादिशब्दानां यथोक्तार्थं तित्तिरिर्दर्श यति। ब्रह्मवादिनो वदंति। स त्वा अध्वर्युः स्याद्यः सोममुपावहरन् सर्वाभ्यो देवताभ्य उपावहरेदिति हृदे त्वेत्याह मनुष्येभ्य एवैतेन करोति मनसे त्वेत्याह पितृभ्य एवैतेन करोति दिवे त्वा सूर्याय त्वेत्याह देवे भ्य एवैतेन करोत्येतावती र्वै देवतास्ताभ्य एवैनं सर्वाभ्य उपावहरतीति हृदे त्वेति मंत्रेणायः सर्वदेवता

याजि

धर्मुपावहर्तुं ग्रावा। तिस्रस्त्वमुख्यो ध्वर्युरिति ब्रह्मवादिना मुक्तिः॥ कात्या०॥ विश्वास्त्वामिति विसृज्योपति
ष्ठतइति ग्रावस्वस्थापितं सोमं विमुच्य तत उपस्थानं कुर्यात्॥ पाठस्तु॥ विश्वास्त्वां प्रजाउपावरोहंत्विति।
हे सोम त्वां विश्वाः सर्वाः प्रजा उपावरोहंतु प्राप्नुवंतु॥ कात्या०॥ अग्नेरुद्धाररूपात्संस्रुरिस्रुच्यमानेचतुर्गृहीतं
तेऽप्रवरण्या जुहोति शृणोत्वग्निरिति। प्रावरकेवाकस्यावसाने अग्नेरुद्धा इस्से तस्मिन्कांत्रे होत्रापः यमा
ते प्रचरण्या जुहोति शृणोत्वग्निरिति। प्राग्वरकेवाकस्यावसानेऽअ नंदुषा त्रिसे तस्मिन्कांत्रे होत्रापः स्यमा
नेसति चतुर्वारिं गृहीतमाज्यं प्रचरणीति जुहूसदृशी काचित्स्रुग्विशेष स्तया जुहुयात्॥ पाठस्तु॥ शृ
णोत्वग्नि० हवं मइति। अग्निः समिधा समित्संबंधिकया आहुत्या मिह वं मदीयमाह्वानं शृणोतु। आपः म
दीयमाह्वानं शृण्वंतु की दृश्यो धिषणा विघोपेताः देवीर्देव्यो देवतारूपाश्च नेस्तुपमार्थे विदुषो न विद्द १६६
यं मदीयं यज्ञं श्रोत। शृणु
त सेदृशा इव प्रसन्नतोऽज्ञानं तद्वद् हे ग्रावाणो अभिषवार्थमिहोपस्थिता यूयं मदीयं यज्ञं श्रोत। शृणु
त। तथा सविता देवो मदीयमाह्वानं शृणोतु॥ कात्या०॥ देवीरापइत्यप्सु जुहोतीति। चतुर्गृहीतमाज्यं व
सतीवरी संज्ञकास्वप्सु जुहुयात्॥ पाठस्तु॥ देवीरापो० स्वाहेति॥ हे आपदेव्यः वो युष्माकं अपां नपात् अपां नपात्संज्ञ
कइति साध्यं
तेर२=
अपत्यरूपो य ऊर्मिर्दे वृत्रादेवान्प्रति स्थितः तमूर्मिं देवेभ्यो देवार्थं दात प्रयच्छत। कीदृशमूर्मिं हविष्यो
हविषे सोमरूपाय हितः इंद्रियावान्पीतः सन्निंद्रियवृद्धिकारी मदिंतमः पीयमानोऽत्यंतं हर्षकारी। कीदृशो

१६६

भ्यो देवेभ्यः। हे आपो यूयमेषां देवानां भागः स्थ भागधेया स्तवथा। शुक्रपेभ्यः शुक्रं दीप्तं सोमं पिबंतीति
शुक्रपास्तेभ्यो देवेभ्यस्स्वाहा॥ इदमाज्यं युष्मभ्यं हुतमस्तु। गृहीष्यमाणानामपां मूल्यत्वेन हविस्त्वसंपा
दनेन चेयमाहुतिरूपयुज्यत इति निर्तिरिदिराहुः॥ देवीरापो अपान्नपादित्याह आहुत्या वै निष्क्रीय गृह्णा
त्यपो हविष्कृतानामेवाभिघुतानां गृह्णातीति॥ कात्या०॥ कार्षिरसीति मैत्रावरुणचमसेनाज्यमुपो
हतीति। अप्सु हुतमाज्यं यालोडयेदित्यर्थः। हे आज्यपदार्थ त्वं कार्षिः कर्षणात्कीलः अंगतमलस्यापने
तासि। एतमर्थं निर्तिरिद्रुयिति। कार्षिरसीत्याह शमलमेवाज्यमपप्लावयतीति॥ कात्या०॥ समुद्र
स्य त्वेति तेन गृह्णातीति तेन मैत्रावरुणचमसेनापो गृह्णीयात्॥ पाठस्तु॥ समुद्रस्य त्वाक्षित्याउन्नया
मीति। समुद्रस्य आपो वै समुद्रइतिश्रुतेः। वसतीवरीलक्षणस्याप्समुद्रस्याक्षित्यै अक्षीणत्वाय हे आ
ज्य मिश्रोदक त्वां उन्नयामीति उद्गृह्णामि॥ कात्या०॥ मैत्रावरुणचमसं वसतीवरीश्वसंस्पृशयिति स
मापइतीति॥ पाठस्तु॥ समापो अद्भि० रोषधीरिति। हे आपः संस्कृता यूयं अद्भिर्वसतीवरीभिः समग्म
प्रियंगुमुख्य धौ
तसंगच्छध्वं। ओषधीरोषधयः। ओषधीभिर्व्रीहियवादिभिः संगच्छध्वं॥ कात्या०॥ प्रचरणीसंस्रवे
माग्निष्टोमे ८ जुहोत्स्रावे चतुर्गृहीतं यमग्नइस्रुक्प्रथमपरिधिमालम्य तद्दति। यद्यनुष्ठीयमानो
अपां कारण कृतत्वादोषधीनामपि तथैवोपयोगोऽस्तीत्यर्थः।

=लब्धा। तन्नसयांतमेतत। आघुदात्तत्वादितिन्याख्यांतरे ॥=

ग्निष्टोमास्थेन हिंप्रचरणीपात्रस्थितमाज्यशेषं जुहुयात्। तदनावेवत्तुर्वारं गृहीतमाज्यं जुहुयात्। उक्तेन प्रचरणीपात्रस्थितेनाज्येन प्रथमं परिधिं संस्पृशेत्। ॥पाठस्तु॥ यमग्ने०स्वाहेति। हे अग्ने यत्तु संग्रामेषु यं मर्त्यमवाः रक्षसि। किंच वाजेषु अन्ननिमित्तं यं मर्त्यं जुनाः गच्छसि हवींषि ग्रहीतुं यस्य सकाशं गच्छसीत्यर्थः। समर्त्यस्त्वदनुग्रहेण शाश्वतीरिषा नित्यान्यन्नानि धनरूपाणि यंतो नियंस्यति प्राप्स्यती त्यर्थः। स्वाहेति होमार्थः॥ इति सप्तमोनुवाकः॥ ॥सप्तमेसोमोपावहरणादिमंत्राउक्ताः। अष्टमेसो मामिषवोभिधीयते॥ का०सू०॥ देवस्यत्वेत्यद्रिमादायेति। अत्राद्रिशब्देन सोमाभिषवहेतुः पाषाणो गृह्यते तत्सा हवर्यात्। ॥पाठस्तु॥ देवस्यत्वा० पयस्वं तं मिति। देवस्यत्वेत्यादि व्याख्यातं। हे अभि षवसाधनपाषाण सौधेन त्वं रावारादानइस स्परूपं आहुतीनां दक्षिणानां च रावादाता त्वमसीति तोग तीरं गंभीरमिमं मध्वरं कृधि। कुरु। उत्तमेनोत्कृष्टेन पविनावज्रसदृशेन त्वया हे सोम मीदृशं करोमि। कीदृशमिंद्रायेंद्राय सुषुतमं तकारलोपः छांदसो दीर्घस्य अतिसुततमं मधुमन्तं स्वादु सोपेतं पयस्वं तं पयोविशेषवतं एवं सोमं करोमीत्यर्थः॥ का०सू०॥ निग्राभ्यास्तुवाचयति निग्राभ्यास्थेति। अभिषोतव्यस्य सोमस्य सेचनीया आपो निग्राभ्याः इत्युच्यंते ता सुन्वमाणा सुयज

एतच्चोषद्वयंरासतइतिश्रुतेः। रासतेर्वा रूपं। तदासलोपः कर्षः ॥=

१६७

वनिष्पिकृते

रसवंतं

१६७

हृयहो नेम्छंदसिइतिहस्यनः ॥२=

मानं वाचयेत्॥पाठस्तु॥ निग्राभ्यास्थ० वित्तघ्निति। हे आपो यूयं निग्राभ्याः निग्राभ्यास्थ अस्माभिर्निरंतर ग्रहीतव्यास्त्वथ। देवश्रुतो देवेषु प्रख्याता यूयं मां मां तर्पयत प्रीतं कुरुत। हे आपो मदीयानि मनः प्रभृती नीन्द्रियाणि च तर्पयत। आत्मानं शरीरं प्रजां पुत्रादिसंततिं पशून् गणान् मनुष्यसंघातांश्च तर्पयत। मे मदीयागणाः मनुष्यसंघा मावित्तघन् मदीयद्रव्यदानेन पूरिताः संतो विवद्धत मामा प्रतिकूलं कुर्वन्। अनुरक्ता गणा हन्त्वयमिति यजमान आत्रास्तेइत्यर्थः॥ का०सू०॥ सोमं भिमीतइंद्रायत्वावसुमतेरुद्रवतइतिपंचकृत्वः प्रतिमंत्रमिति। अभिषोतव्यस्य सोमस्येंद्रायत्वेत्यादिभिः पंचभिर्मंत्रैः पंचवारं यथा भवति तथा मानभियत्तां कुर्यात्॥ तत्रायं प्रथमो मंत्रः। इंद्रायत्वावसुमते रुद्रवत इति। हे सोम त्वां त्वामिंद्रायेंद्रार्थं मिमे। कीदृशायेंद्राय वसुमते वसुसंज्ञक प्रातः सवन देवतावते रुद्रवते रुद्रनामक माध्यंदिनसवन देवतावते॥ अथ द्वितीयः॥ इंद्रायत्वादित्यवत इति। आदित्यवते तृतीयसवनदेवतावते इंद्राय हे सोम त्वां मिमे॥ अथ तृतीयः॥ इंद्रायत्वाभिमातिघ्न इति। अभिमातिः शत्रुस्तं हंतीत्यभिमातिहा इन्द्रस्तस्मै ते सोम त्वां मिमे॥ अथ चतुर्थः॥ श्येनायत्वा सोमभृते इति। श्येनाय पक्षिरूपाय गायत्र्यात्मने सोमभृते सोमधारकाय यद्वा सोमं हृते। सोमहृते हृयहोर्भश्छंदसीति हकारस्य भकारः। तादृशायेंद्राय हे सोम त्वां मिमे॥ का०सू०॥

अथैतान्यग्नितसीन्यये लोकः प्रातः सवनं वसंतो गायत्रीति श्रुतेः ॥२=

सभासव्यासाभ्यां

ग्रहाभिर्वधकर्म =

यन्नइतिमिताल्लंरु नइति। इयन्नी कृतस्यसोमस्यसंस्पर्शनं कुर्यात्॥ पाठस्तु॥ यत्तेसोम० वोचइति। हेसोम त्रिषुलोकेषु तेत्वदीयंज्योतिर्यदस्ति तेनज्योतिषास्मैयजमानायरायेच तुर्ध्यर्थेत्ति तीया। राया धनेनस म्रद्धमुरु विस्तीर्णंस्थानंकृधि। किंच। अधिकोयेंयजमानोन्नवत्विति। दात्रेवोवः फलप्रदायीइयत्र हि॥ का०स्या०॥ श्वात्रास्थेत्यासिंचतीति॥ पाठस्तु॥ श्वात्रास्थ० पिबतेति। हे आपोयूयमेवंविधास्थ। किंविधाः श्वात्राः क्षिप्रकारिण्यः वृत्रतुरो वृत्रघातिन्यः राधोधनमुद्दिश्यंगृतीतिराधागूर्त्ती धनानिवर्षिण्यः अमृतस्यस्यसोमस्यपत्नीः पालयित्र्यः हेदेवीर्दिव्याआपस्तास्तथाविधायूयंदेवत्रादेवानृप्रतीमंय ज्ञंनयतप्रापयत। किंच यूयमुपहूताअनुज्ञाताः संतः सोमस्यसोमंपिबत॥ का०स्या०॥ मालेरितिप्रहर तीति अभिषुणुयादित्यर्थः॥ पाठस्तु॥ मात्तेमांसं० नसोमइति। हेसोमत्वंमात्रेः माभ्रेषीः मासंविक्थाः कंपनंमाकृथाः। यतोदेवतर्पणार्थमहं त्वामभिषुणोमि। अतकुंभ्रयस्त्वरसं धेहि। एवंसोमंसंबोधयति इदानींद्यावापृथिव्यौसंबोधयतिहेधिषणेद्यावापृथिव्यौयुवांवीड्वीसतीवीड्डदृढेतनुवचनः इदं हसत्यावात्मानंवीळयेथांदृढीकुरुतंकिंचयुवंरसंदधाथांअनेनआसंस्तुतेनग्रावघातेनयजमानस्यपाप्माहतः नेऽनुसोमोहतः॥ का०स्या०॥ नियाभ्यंवाचयति प्रागपामितिदिशोभितीति। प्रागपा

श्वात्राभिर्नदि प्रनाम =

अध्वर्युणा

१५८

१५८

गितिमंत्रः सोमाभिहरणहेतुत्वान्नियाभ्यन्त्रमुच्यते। होतृत्वमसेसोमांश्रनवस्थाप्येतन्मंत्रंयजमानंवाचयेत्॥ पाठस्तु॥ प्रागपागुद० वधइति॥ हे सोमत्वांप्रागादयो दिशः सर्वतः सर्वस्मात्स्वस्वप्रदेशात्आधावंतुआभिमुख्येनागच्छंतु। परस्परंकिंसंभाषमाणा आधावन्त्विति तदाह। हे अंब हेमातर्निष्परस्वेस्वे संगेः सोमंपरयेतिवदंत्यः किंचएवंविधंसोमंअरीः आगच्छंतोदिशः संविदानाः संजानंत्यः सरूपं संविदंतु सम्यग्ज्ञानंतु। सहेन्द्र विश्वा। अतिशायनबल। त्वंनिंद्रदेवोदीप्यमानस्त्वंमर्त्यंमनुष्यंयजमानंजगच्छिप्रं प्रशंसिषः प्रशंसासिहेमघवन्धनवन्निन्द्र मर्डितायजमानस्यसुखयिताब्वदन्योनास्तिअतोहंतेवचः स्वमेवसुखयितेत्येवंरूपंत्वदीयंवचनंब्रवीमि॥ ॥इत्यष्टमोनुवाकः॥ ॥वेदार्थस्यप्रकाशेनतमोहार्दंनि वारयन्॥ पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥ ॥इतिसायणाचार्यविरचितेमाधवीयेवेदार्थ प्रकाशेकाण्वसंहिताभाष्येषष्ठोध्यायः॥ ॥यस्यनिश्वसितं० महेश्वरं॥१॥ षष्ठेध्यायेरूपसंस्कृताः दश दिसोमाभिषवपर्यंतामंत्राउक्ताः। सप्तमेग्रहग्रहणमंत्राउच्यंते॥ का०स्या०॥ उपांशुंगृह्णातिवाचस्पतयेदेवो देवेभ्योमधुमतीरितीति। मंत्रत्रयस्यप्रतीकोपादानादेत्रैकैकेनमंत्रेणोपांशुरेकैकवारंगृह्णीयात्॥ पाठस्तु॥ वाचस्पतये० गन्नस्तिपतइति। होसोमपतये०पालकदेवार्थंवृष्णः वर्षितुस्तत्वसंबंधिस्यामंशुभ्यांगत्नास्ति सोइतिश्रुतेः = हेसोमवाचस्पतयेप्राणदेवतायै। प्राणोवैवाचस्पतिरितिश्रुतेः। पवस्वपवनंगमनंदेवनार्थंप्रवृत्तिंकुर्वित्यर्थः इतिशाखांतरं। =

यणीवैगस्त

प्रतः अध्वर्युबाहुभ्यां प्रतः सन्वानः संबंधिना मंत्रेण पवस्व। शुद्धो भव॥ अथ द्वितीयः। देवो देवेभ्यः पवस्व ये
षां भागोसीति। हे सोम त्वं येषां देवानां भागो भवसि तेभ्यो देवेभ्यः देवो दीप्यमानः सन् पवस्व हरे॥ अ
थ तृतीयः॥ मधुमतीर्न इषस्कृधीति। हे सोम त्वं नोस्मदीया निइषो अन्नानि मधुमतीः मधुरसोपेता
नि कृधि कुरु॥ का०॥ यत्त इत्यातानो सोमे निदधातीति। स्वीकृतानंशून् सोमे स्थापयेत्॥ पाठस्तु॥
यत्ते सोमा० स्वाहेति। हे सोम ते तव अदाभ्यं अहिंस्यं जागृवि जागरणशीलं यन्नामास्ति हे सोम तस्मै
तन्नामवते तुभ्यं सोमाय स्वाहा दत्तमस्तु॥ का०॥ स्वाहेत्युक्त्वोर्वन्तरिक्षमित्यनिनिष्क्रमणमिति। स्वा
हेत्येतदक्षरद्वयमुक्त्वा निष्क्रामेत्॥ पाठस्तु॥ स्वाहोर्वन्तरिक्षमन्वेमीति। उरु विस्तीर्णमंतरिक्षमन्वे
म्यनुगच्छामि॥ का०॥ स्वांकृतइति हुत्वा पात्रमुपमार्ष्टीति। होमं कृत्वा पात्रोपमार्जनं कुर्यात्॥ पाठस्तु॥
स्वांकृतोसि० स्वर्यायेति। हे प्राणरूपोपांशुग्रह त्वं स्वांकृतोसि मया स्वीकृतो भवसि। किमर्थं देवजन्म
नि मनुष्यजन्मावस्थितेभ्यः सर्वेभ्य इंद्रियेभ्यः किं च तेभ्यो हितं यन्मनस्तादृशं सोमं व्याप्नोतु। स्व
तः स्वयमुत्पन्नो यः प्राणः हे उपांशुग्रह ताद्रूपं त्वां बहिः प्राणरूपायादित्याय स्वाहाकारेण जुहो
मि। सूर्यस्य प्राणरूपत्वमाथर्वणिके आम्नातं। आदित्यो ह वै बाह्यः प्राण उदयत्येष ह्येनं चाक्षुषं प्रा
= स्वयंकृतोसीति वा यकारलोपः छांदसः स्वयंप्रजात इति श्रुतेः।

शुद्धो भव =

१६३

१६९

णमनुगृह्णातइति। स्वांकृतशब्देन प्राणस्वरूपस्य ग्रहस्य स्वाधीनत्वं विवक्षितं दिव्यपार्थिवशब्दाभ्यां च म
नुष्यं च विवक्षितमिति तिनिरिंद्रियैरिति। स्वांकृतोसीत्याह। प्राणमेव समन्वक् विश्वेभ्य इंद्रियेभ्यो देवे
भ्यो दिव्येभ्यः पार्थिवेभ्य इत्याह। तेऽयं च देवमनुष्येषु प्राणान् दधाति॥ का०॥ प्रथमे परिधावुत्ता
नं पाणिं प्रागुपमार्ष्टि देवेभ्यस्त्वेति। पश्चिमभागे वस्थितो यः परिधिस्तस्मिन् पाणिं मूर्ध्नि निरुत्त
कृत्वा प्रागग्निमुखं यथा भवति तथोपमार्जनं कुर्यात्॥ पाठस्तु॥ देवेभ्यस्त्वा मरीचिपेभ्य इति। हे लेपलग्न
मरीचिपेभ्यः मरीचिपा लक्केभ्यो देवेभ्यः परिमार्ज्मि॥ का०॥ वासउरोबाहुभिष्टमंत्रगुनिमंवरम
न जुहुयाद्देवांशो वितती। वस्त्रोरुबाहुषु यः सोमांशुः संश्लिष्टस्तमभिचरं जुहुयात्॥ पाठस्तु॥ देवांशो०
फडिति। हे देवांशो दीप्यमान सोमांशो यस्मै वधाय त्वा मीढ्वे इच्छिरभ्ये पणकर्मा। वां प्रार्थयामि। त
द्वधकर्मस्य समाहितं दोषः परिपृक्ता फल्गुवतिर्गस्यर्थः। उपर्यागतेन जगेनाम द्दैन असाविति देवदत्ता
दि नाम निर्देशः। असौ द्वेष्यो हतो निहतः फट् विशीर्णो भवेत्॥ का०॥ प्राणाय त्वेति पात्रासादन
मिति। खरस्य यस्मिन् दक्षिणप्रदेशे पूर्वमुपांशुपात्रं स्थापितं तदानीं तत्रैव स्थापयेत्। हे उपांशु
पात्र प्राणदेवतासंतोषार्थं त्वामासादयामीति विशेषः॥ का०॥ उपांशुसवनं पाणिना प्राच्यो देवे

स्या नायत्वेति। उपांशुसवनार्थं येन पाषाणेन सोमोभिषुतः स उपांशुसवनः तं पाणिना प्रमार्ज्येति कृत्वो
दगग्निमुखं यथा भवति तथा सादयेत्। हे उपांशुसवन त्वा न देवतार्थं सामासादयामि॥ ॥इति प्रथ
मोनुवाकः॥ ॥प्रथमेनुवाके उपांशुग्रहार्थमंत्रा उक्ताः। द्वितीयें तर्यामिग्रहार्थमंत्रा उच्यंते॥ कात्या०॥
उदितें तर्यामिग्रहणं उपयामगृहीत इत्युपांशुवदिति। सूर्योदयात् उत्तरकाले अंतर्यामिग्रहं गृह्णी
यात्। उपांशुग्रहेन मंत्रेण यत्कर्मानुष्ठितं अंतर्यामिग्रहणानंतरं तेन तेन मंत्रेण तत्तत्कर्मानुष्ठेत्।
॥पाठस्तु॥ उपयामगृहीतोस्यंत॰ मा दृष्यस्वेति। उपयामयती स्वुपयामो ग्रहस्तेन गृह्यते इति उपयाम
गृहीतः। हे सोमरस त्वं तो दृढो भवसि। हे मघवन् धनवन्निन्द्र त्वं तादृशं ग्रहपात्रं यें अंतर्यच्छ इत्यनुस्यो
तद्व्यंति व्यवधानं यथा न भवति तथा नियमय। ततः सोमं पाहि। पालय। तथा रायोधनानि उरुष्य अभि
मुखे नागस्य अवरक्ष। इषोन्नानि यजस्व देहि। ते न वा अनुग्रहात् द्यावापृथिवी द्यावापृथिव्यो अंतर्दधा १७०
मि। व्यवधायिके करोमि॥ किंच उरु विस्तीर्णमंतरिक्षमंतर्दधामि हे मघवन् धनवन्निंद्र। अवरैः परैः
१०० सर्वैर्देवैः सजूः समानप्रीतियुक्तः सन्नंतर्यामिग्रहे मादयस्व। मेत्वं इंद्र छः सन्याहि। हर्षय। स्वाहा
कारभूमुखो निष्क्रामेत्। स्वाहोर्वंतरिक्षमन्वेमी त्ययं पूर्वं व्याख्यातः। अथ होमं कृत्वा पात्रं प्रमृज्यात्॥

पाठस्तु॥ स्वांकृतोसि॰ सूर्यायेति। पूर्ववद्व्याख्येयं। अथ परिधौ पापुरा युपमार्जनमंत्रो देवेभ्यस्त्वा मरी
चिपेभ्य इति पूर्ववद्व्याख्यातव्यः॥ कात्या० ॥ इदानायत्वेति पात्रासादनमिति। अंतर्यामिग्रहः पूर्वं यस्मिन् स्था
ने स्थितः इदानीं तस्मिन्नेवासादयेत्। हे अंतर्यामिग्रह त्वां मुदा दुनदेवतासंतो षार्थं मासादयामीति शे
षः॥ इति द्वितीयोनुवाकः॥ ॥द्वितीयें तर्यामिग्रह उक्तः तृतीये ऐंद्रवायवग्रह उच्यते॥ कात्या०॥ ऐं
द्रवायवं गृह्णात्या वायो॰ वीति॥ ऐंद्रवायवग्रहं वायुदेवतार्थं सोमं गृह्णीयात्॥ पाठस्तु॥ आ वायो॰ वायवे
त्वेति। हे वायो त्वं आगत्य स्तूयग्रहानकुरु। हे शुचिपाः पवित्रस्य सोमस्य पातः त्वं नोस्मानुपगच्छ हे विश्व
वार विश्वव्यापक ते तव सहस्रे नियुतः संति नियुत्शब्देन वायुवाहनमृगा उच्यंते। मधुमदनीयमंधः
सोमरसरूपमन्नं ते तव उपो उपसमीपं अयामि गमयामि। हे देव दीप्यमान वायो यस्य सोमस्य ते
सं पूर्वपेयं प्रथममेव त्वा पातव्यमिति दधिषे मनोधृतवानसि। तादृशं सोमरसरूपमन्नं तव समीप
गमयामीत्यन्वयः। हे सोमरस त्वां वायुदेवतायै गृह्णामीति शेषः॥ कात्या०॥ अमंपगृह्य पुनरिंद्रवायु
इत्यादि। पूर्वमैंद्रवायवग्रहे वायुदेवताकं सोमं गृहीत्वा इदानीं तस्मिन्नेव ग्रहे इन्द्रवायुदेवताकं गृह्णी

= अयोभिः प्रयद्भिर्वेरितिका पाठांतरं। २

याद्दितिशेषः॥ पाठस्तु॥ इंद्रवायू इमे० सजोषोभ्यां त्वेति। हे इंद्रवायू। युष्मदर्थं इमे सोमाः सुता अभिषु-
ताः युवां प्रयोभिरतेतैः सोमरसरूपैरन्नैर्निर्मितरूपैरूपसमीपे आगतं आगच्छतं हि यस्मादिंदवः
सोमरसा वा युवां उशंति कामयंते तस्मादागच्छतमिति पूर्वत्रान्वयः। हे सोमरस त्वं उपयाम ग्रहेण गृही-
तोसि। वायवे वायुदेवतार्थं इंद्रवायुभ्यां इंद्रवायुदेवतार्थं च त्वां गृह्णामीति शेषः। हे पात्र ते तव एष
स्येकं देवत्रा स्वयोनिस्तव स्थानं अतोत्र सजोषोभ्यां समानप्रीतिभ्यां इंद्रवायुभ्यां त्वां सादयामीति शे-
षः। द्विदेवत्यग्रहाणां मध्ये ऐंद्रवायवग्रहस्य प्राथम्यं वाग्वा एषा यदैंद्रवायव इत्यादि वाक्यजातेन तित्ति-
रिणा बहुधा प्रपंचितं॥ इति तृतीयोनुवाकः॥ ॥ तृतीये ऐंद्रवायवग्रह उक्तः। चतुर्थे मैत्रावरुणग्रह उ-
च्यते॥ का०सू०॥ मैत्रावरुणमयमितीति मित्रावरुणदेवतार्थे पात्रे सोमं गृह्णीयात्॥ पाठस्तु॥ अयं १७१
वां० मित्रावरुणाभ्यां त्वेति। हे ऋतावृधौ यज्ञस्य वर्द्धकौ मित्रावरुणौ वां युवयोरर्थे अयं सोमः सु-
तः यस्मादभिषुतस्तस्मादिहास्मिन्यज्ञे ममेत्। यजमानानां मध्ये ममैव हवमाह्वानं श्रुतं युवां शृणुतं
हे सोमरस त्वं मैत्रावरुणग्रहपात्रेण गृहीतोसि त्वां मित्रावरुणदेवताभ्यां गृह्णामीति शेषः॥ का०सू०॥

पृथिवी लक्ष अदन्नाद्य इतिके चित्।

१७१

= ऋतं सत्यं यज्ञं वा कामयेते इत्यृतावृता स्याभिति पाठांतरं =०

पयसा श्रीणाति एनं कुर्यात्तदूर्ध्वं परायावयमिति एवं सर्वत्र श्रपणे द्धिति। मैत्रावरुणग्रहपात्रे कुशद्वयव्यव-
धानं कृत्वा तत्रस्थं सोमरसं क्षीरेण मिश्रं कुर्यात्। एवं यस्य यत्र श्रपणानि संति तेषु सर्वेष्वेवं कुर्यादित्यर्थः।
॥ पाठस्तु॥ राया वयं० ऋतायुभ्यां त्वेति। इंद्रादयो देवाः यद्धविषा हविषाय यादूयंति गावो यवसेन घासे-
न यथा दूयंति। तथा त्वयं या यावधुनेन सस्रवांसः संतः ताः वेनसामसंतः वित्तस्य रूपं धनसंप-
न्नाः संतो मदेम हृष्टाः स्याम हे मित्रावरुणौ वां युवां नोस्मभ्यं विश्वाहा सर्वदा तां तथाभूतां धेनुं धत्तं
दत्तं कीदृशीं अनपस्फुरंतीं अपस्फायते या पुरुषान्तरं गच्छति सा अपस्फुरंती न अपस्फुरंती। तां
जनुमिस्यर्थः। ऋतायुभ्यां सत्यमिच्छुभ्यां मित्रावरुणाभ्यां त्वा स्पष्टमन्यत्। गतस्य सोमरसस्य क्षीरमेल-
नं मित्रदेवा अब्रुवन् इत्यादि वाक्यजातेन तित्तिरिणा स्पष्टीकृतं॥ इति चतुर्थोनुवाकः॥ ॥ चतुर्थे मै-
त्रावरुणग्रह उक्तः। पंचमे आश्विनग्रह उच्यते॥ ॥ का०सू०॥ यवाभिस्यात्विनीभिति गृह्णीयादिति शेषः।
॥ पाठस्तु॥ या वां कशा० माध्वीभ्यां त्वेति। हे अश्विना अश्विदेवौ वां युवयोर्या कशा कशेति वाङ्नाम यावासा हि प्रकाशय-
स्वर्थन्ति =
कूमधुमती मधु ब्राह्मणवती। मधु ब्राह्मणोपनिषत्तत्र या सा युक्ता सूनृता वती प्रियसत्यवचनोपेता तया

ज्येष्ठं। यद्वा वकज्येष्ठा स्यां तिलू ताति लोच कुंदसीति प्रत्यं सार्थे ताति ल प्रत्ययस्तद्धितः। श्रेष्ठप्रत्यसीति त्यर्थः। = ६
वाचास्मदीयं यज्ञं भिभिक्षतं सेस्कू भिक्षतं निष्पादयतमित्यर्थः। मौध्वी स्यां मधु ब्राह्मणं वयावाश्विनावधी स्त्रीलिंदेवताते नीते द्वय =
येते ताभ्यामश्विभ्यां तां सोमं सी दयाभि। द्वि वंस्पष्टं॥ ॥पंचमोनुवाकः॥ ॥पंचमे आश्विनग्रहठक्तः।
षष्ठे शुक्रग्रहउच्यते॥ का०स्या०॥ शुक्रं तं प्रत्नथेति। शुक्रग्रहं गृह्णीयात्॥ पाठस्तु॥ तं प्रत्नथा० वीरतां पा
हीति। प्रत्नथेत्यादो था प्रत्यय उपमार्थः। हे इन्द्र त्वां प्रत्नाः पुरातना ऋग्वाद्योयथोस्तुवन् तं तादृशं त्वां स्तु
मइति शेषः। पूर्वथा पित्रादयः विश्वथा अतीथा। ताः सर्वे यजमाना इव इमथा वर्त्तमाना इमे यजमाना श्व
लामस्तुवन् तथा वयं त्वां स्तुमः इत्यर्थः। कीदृशमिन्द्रं ज्येष्ठताति स्वार्थे ताति प्रत्ययः। बर्हिषदं यागे सन्नि
हितत्वेन तिष्ठं तं। स्वर्विदं यजमानाय दातव्यं स्वर्गं वेत्तीति स्वर्वित्। तं हे इन्द्र यस्त्वं प्रचीतीचीनं प्रतिगमन
मस्मत्प्रतिकूलं वृजनं वर्जनीयं आलस्याश्रद्धादिकं दोहसे रिक्तीकरोषि विनाशयसि तादृशं त्वां स्तु
मः। यथा सुक्रियासु धुनिं सदनुयहाल यान्कंपयंतं। आशुं क्षिप्रकारिणं जयंतं सम्यगनुष्ठानेन यज
मानान्तरायपतिशायानं तं एनं यजमानमनु सोमपानेन स्तुत्याव वर्द्धसे वर्द्धयसे तासु क्रियासु तमिन्द्रं स्तु
नः। हे शुक्र यः ह त्वमुपयाम गृहीतोसि शुक्रपुत्राय शंडे नामकाय त्वां गृह्णामि एष स्वर प्रदेशस्तव स्था
नं। त्वं यजमानस्य वीरतो पाहि कर्मस्रैतो प्रपत्राकलावादायाधि धानं प्रोक्षितास्या मवमार्जनमप्रोक्षि
यद्वा वजिनमितिबलनाम। तत्प्रतीचीनं स्ववीर्येण त्वामभिक्षिप्तमुखं कृत्वा दोहसे यज्ञफलं धोक्षीत्यर्थः॥ = ८
× रक्षेयपालय॥ का०सा०॥ शुक्रामंथिस्यां वचवतः शुक्रेणाध्वर्युर्मंथिना प्रतिप्रस्थाता प्रेक्षिता प्रोक्षि

१७२

तास्त्वाभिति शुक्रमंथिग्रहाभ्यां यथाक्रमेणाध्वर्युप्रतिप्रस्थातारावनुतिष्ठेतां। तत्प्रकार उच्यते। प्रोक्षि
ताभ्याद्वाभ्यां पूपत्राकलाभ्यां सह प्रोक्षणरहितौ द्वौ पूपत्राकलौ स्वीकृत्य यथाक्रमेण तयोर्ग्रहयोः
प्रोक्षिताभ्यां शकलाभ्यामशादनं कृत्वा अप्रोक्षिताभ्यां शकलाभ्यामपमार्जनं कुर्यातां। तत्र शुक्र
ग्रहस्यापामार्जनमंत्रः कात्यायनेन विनियुज्यते। अपमृष्टः शंड इत्यध्वर्युः पूर्वमुक्तेन प्रोक्षितशा
कलेनाच्छादनं कृत्वा अप्रोक्षितशकलेनापमृज्यात्। शंडनामकोऽसुरपुरोहितः शुक्रपुत्रोपमृष्टः
अपामार्जनीकृतः॥ का०स्या०॥ देवस्त्वेति निष्क्रामतो यथालिंगमिति। अध्वर्युप्रतिप्रस्थातारौ यथाक्र
मेण शुक्रमंथीत्येतत्पदद्वयवाचकमंत्रलिंगमनतिक्रम्य निर्गच्छेतां तत्र शुक्रपदवाचकमंत्रपा
ठः॥ देवास्त्वा शुक्रपाः प्रणयन्त्विति। शुक्रनामकं ग्रहस्थं सोमं पिबंतीति शुक्रपा देवाः। हे शुक्रग्रह
त्वां प्रणयंतु यजनिस्थानं प्रापयंतु॥ का०स्या०॥ अपरेणोत्तरवेदिमरत्नीसंधायोत्तरवेदिश्रोण्यो निध
नो विसृजनं। तौ दक्षिणस्यामध्वर्युरुत्तरस्यां प्रतिप्रस्थाता अनाघृष्टासीति। अध्वर्युप्रतिप्रस्थाता
वुत्तरवेदेः पश्चिमपश्चिमभागे अरत्न्याः संमेलनं कृत्वा ततस्तयोर्विसर्जनं कुर्वतो यथाक्रमेणोत्तर

वेदेर्दक्षिणोत्तरश्रोण्योरुन्नयोर्ग्रहस्थापनं कुर्यातां। अनाधृष्टा असि अनुपाहिंसितास्त्वमसि॥ कात्या०॥ सुवी
रइति दक्षिणकूपदेशं गछत्यध्वर्युरिति। अध्वर्युर्यूपस्य दक्षिणत्र देशं गछेत्॥ पाठस्तु॥ सुवीरो
वीरा० यजमानमिति। हे शुक्र ग्रह त्वं सुवीरः शोभनवीरो येषितः सन् वीरान् यजमानस्य वीरोपेता
न्नसादीन् प्रजनयन् उत्सादयन् रायस्पोषेण धनस्य पुष्ट्या यजमानमभि लक्ष्य परीहि। परितो ग
छ॥ कात्या०॥ अपरेण यूपमरत्नी संधत्तः संजग्मानाइति यथालिंगमिति। यूपस्य पश्चिमतः गत्वा
ध्वर्यु प्रतिप्रस्थातारौ तत्र ग्रहवाचकपदलिंगमनतिक्रम्यारत्न्योः संधानं कुर्यातां। तत्राध्वर्युमंत्रपा
ठः॥ संजग्मानो० शुक्र शोचिषेति। शुक्रनामको ग्रहः द्युलोकं तल्लोकास्यां संजग्मानः संगछमा
नः शुक्रशोचिषा विशुद्धदीप्त्या यूपं प्रजा वाधि न्नतीति शेषः॥ कात्या०॥ निरस्तः शंड इत्युध्वर्युरिति।
अध्वर्युरस्त्रोक्षितं यूपशाकलं निरस्येत्। शंडनामकः शुक्रपुत्रो असुरपुरोहितो निरस्तोयज्ञाद्बहि
निक्षिप्तः॥ कात्या०॥ शुक्रस्याधिष्ठानमित्यध्वर्युरिति। अध्वर्युराहवनीये प्रोक्षितं यूपशाकलं प्रक्षि
पेत्। असीति मंत्रशेषः॥ शुक्रो ग्रहस्तस्याधिष्ठानं त्वमसि॥ कात्या०॥ अछिन्नस्येति जपेतेति।
अध्वर्युः शाकलप्रक्षेपानंतरं जपेत्॥ पाठस्तु॥ अछिन्नस्य ते० स्यामेति। हे दीप्यमान सोम अ

१७३

छिन्नस्यानवखंडितस्य ते तव ददितारः स्याम। देवतासंतुष्ट्यर्थं वयो दातारो भवेम। किंभूतस्य सुवीर्यस्य
कल्याणपराक्रमवतः रायस्पोषस्य धनपुष्टिं कुर्वतः॥ कात्या०॥ उन्नयतो यूयं प्रसमुखो जुहुतः साप्रथमेति
ध्वर्युः प्रथममिति। अध्वर्युप्रतिप्रस्थातारौ यूपस्योत्तरपार्श्वयोः पश्चिमाभिमुखौ स्थित्वा जुहुयातां। त
त्राध्वर्युः प्रथमं जुहुयात्॥ पाठस्तु॥ साप्रथमा० स्वाहेति। यस्येन्द्रस्य या संस्कृतिः समीचीना कृतिर्वि
श्ववारा सर्वैः देवैर्वरणीया सा प्रथमा देवानां मध्ये मुख्या स प्रथमो मुख्यः। स इन्द्र एव वरुणमित्राग्न
यः। चिकित्वान् चेतनाविशेषवान् बृहस्पतिरपि स एंद्र इहेकृ बिजस्तस्मै ताद्दशाये इंद्राय सुतमभिषु
तं सोमं। मा शिमुखेन जुहोत स्वाहाकारेण होमं कुरुत॥ कात्या०॥ तं प्रतीति जपतीति। होमानंतरं जपेत्।
तृपं तु होतत्राम योर्यस्त्विष्टं यत्सुतं तं यत्त्वाहूतेति। मधोर्मधुरोपेतस्य सोमरसरूपं पयद्रव्यं स्विष्टं सुष्ठु
अपेक्षितं यत्सुभूतं सुष्ठु संभूतं यत्स्वाहाकृतं ताद्दशं रसरूपं द्रव्यं हव्यं होत्रा यष्टव्याः देवास्तृप्यंतु॥ तृपतं पतसौ।
इति षष्ठोनुवाकः॥ ॥ अथ चतुर्थग्रहउक्तः॥ सप्तमेनुवाके मंथिग्रहउच्यते॥ कात्या०॥ मंथिनमयं वे
नश्लीति। मंथिग्रहं गृह्णीयात्॥ पाठस्तु॥ अयं वेन० मकरयित्वेति। अयमिति द्वाभ्यां निर्दिश्यते। वेनः का
न्तो नीवृ विनिकलात् विश्वस्मात् ज्ञातोरु स्वनन्दत्वात् पृश्निरादित्यस्तस्य गर्भभूता अपस्तथा चान्यत्र

दिवांतिरर्वतिकर्मेतिनिरुक्ते ६

प्रश्नोत्तराभ्यामयमर्थः श्रूयते। केमा आपो अनिमिषं तेमदीनोयांसि सप्रतीतिप्रश्नः। आपः सूर्येस
माहिता अप्स्वाण्यापः अपर्घंतइत्सुत्तरं। अयंवेनः पृश्निगर्भा अचोदयत्। अपोवर्षतीत्यर्थः। कीदृशो
यं ज्योतिर्जरायुर्विपुलक्षणं तेजोजरायुवद्वेष्टनं यस्यासौ ज्योतिर्जरायुः कुत्रस्थितः रजसोविम
नेरजसः उदकस्यविमाने निर्माणस्थाने अंतरिक्षे अवस्थितः। अपांसूर्ये गर्भत्वावः कथंसंपन्न
इतिचेत्। अत्रोच्यते। विप्रामेधाविनऋत्विजः अपांसूर्यस्यचसंगमेनिमित्तकृतेसतिइममिंद्रं
शिशुंनशिशुमिवलालयंतेमतिभिर्मंत्रैःसंहिताभिराहुतिभिर्लिहंतियजंतीत्यर्थः। आहुतिदेव
ताभिरिमा आपोनीयंते। एतदेवाभिप्रेत्यश्रूयते। भूमिं पर्जन्याजिन्वंति। दिवंजिन्वंत्यग्नयइति।
हेसोमरसत्वं उपयामगृहीतोसि उपयमतीत्युपयामो ग्रहस्तेनगृहीतो त्वंवसि मर्कः शुक्रपुत्रोऽ
सुरपुरोहितस्तस्मैत्वांगृह्णामीतिशेषः॥ का०सा०॥ सत्कृतिः श्रीणास्येनमनोनयेषिवतीति। एनंमं
थिग्रहंयवमध्ये पिष्टैः मिश्रीकुर्यात्॥ पाठस्तु॥ मनोनयेषु० प्रजाःपाहीति। विपःविपश्चितोमे
धाविनो अध्वर्युप्रतिप्रस्थातारोयेषुहवनेषुसोमयागेषुशुक्रामथ्याकर्मणानिमित्तस्ततेनमनोनम
नवतिगमंतीक्ष्णंक्षिप्रंव्याप्नुवतः। तथाहिशुक्रमंथिनौ वज्रवंतौगत्वंतौवनुथः युष्मदीयंहोमंव्या

प्नुथः। तेषुसुहोमेषुकर्त्तव्येषुयः तुविनृम्णाः बहुधनयुक्तोबहुदक्षिणोयेतोस्ति अस्यगनस्तोहस्तेस्थि
तस्यमंथिग्रहस्यआदिसंप्रदिष्टं अश्रीणीत। श्री अयंकुर्वीतशर्यामिरंगुलीभिः हेमंथिग्रहत्वेतत्वएषप्र
देशः प्रजाःपाहियजमानसंबंधिनीः प्रजाःपालय॥ का०सा०॥ अपमृष्टोमर्क इतिप्रतिप्रस्थातेतिप्रोक्षितेन
यूपशकलेना आदनं कृत्वा अप्रोक्षितेनशकलेनापामार्जनं कुर्यात्। मर्कनामकोसुरपुरोहितोपामार्ज
नीकृतः॥ का०सा०॥ देवास्त्वेतीतिप्रतिप्रस्थातानिष्क्रामेत्॥ पाठस्तु॥ देवास्त्वामंथिपाः प्रणयंत्विति। हेमं
थिग्रहत्वांमंथिग्रहं पिबंतीतिमंथिपादेवाः प्रणयंतुयजनस्थानं प्रापयंतु। अनाधृष्टासीतिमंत्रोवि
नियोगः पुरः सरंपूर्वंव्याख्यातः॥ का०सा०॥ सुप्रजाइतिप्रतिप्रस्थातायूपस्यांतरमितिप्रतिप्रस्थाता
यूपस्यांतरंगच्छेत्। पाठस्तु॥ सुप्रजाः प्रजाः ०यजमानमिति। हेमंथिग्रहसुप्रजाः शोभनप्रजात्वं यज
मानसंबंधिनीः प्रजाः प्रजनयन्रायस्पोषेण सहयजमानमागच्छ। अरत्नीसंधानेविनियुक्तस्यप्रति
प्रस्थातृसंबंधिनोमंत्रस्य॥ पाठस्तु॥ संजग्मानोदिवा० मंथिशोचिषेति। मंथिनामकोग्रहोद्युलोकस्तलो
कााभ्यांसंजग्मानः संगच्छमानः मंथिशोचिषामंथिनः स्वदीप्त्यापयः विकिरंतीतिशेषः॥ का०सा०॥ नि
रस्तोमर्क इतिप्रतिप्रस्थातेति। प्रतिप्रस्थाता अप्रोक्षितेयूपशकलेनिरस्येत्। मर्कनामकोसुरपु

१७५

रोहितो निराकृतः॥ का॰स्या॰॥ मंथिन इति प्रतिप्रस्थातेति। प्रतिप्रस्थाता त्रोक्षितं परस्ताकल्लमाहवनी
ये प्रक्षिपेत्। पाठस्तु॥ मंथिनो धिष्ठानमसीति। मंथिग्रहस्याधिकरणमसि॥ का॰स्या॰॥ अछिन्नस्यते
जपिवेति॥ पाठस्तु॥ अछिन्नस्यते॰ स्यामेति। पूर्ववत्व्याख्येयं। का॰स्या॰॥ तमनु प्रतिप्रस्थातेति। प्रति
प्रस्थाता तं होमं कुर्वाणमध्वर्युमनुसत्य जुहुयात्॥ पाठस्तु॥ सा प्रथमा॰ स्वाहेति। पूर्ववद्व्याख्येयं।
॥ का॰स्या॰॥ तं पंक्तिरिति जपतीति॥ तं पतुहोत्रा॰ स्वाहेति। अयमपि व्याख्यातः॥ इति सप्तमोनुवा
कः॥ सप्तमेनुवाके मंथिग्रह उक्तः। अष्टमे आग्रयण उच्यते॥ का॰स्या॰॥ आग्रयणं द्वयो द्रुरियोर्येदि
वा स्फति। आराद्वयेक्षरतिस तिआग्रयणनामकं ग्रहं गृह्णीयात्॥ पाठस्तु॥ ये देवासो॰ सवनानि
पाहीति। हे देवासो देवा ये पूर्व दिवि द्युलोके महिनेति त्रिषु स्थानेषु संबध्यते। महिना महिम्ना स्व

स्वमाहात्म्येन एकादशास्थ एकादशसंख्याका भवथ। तथा पृथिव्यामधि एकादश संख्याका भवथ। १७५
तथा प्सुक्षित अंतरिक्षे निवासंत एकादशसंख्याका भवथ। ते सर्वे यूयं इमं यज्ञमानीय भिममाग्र
यणग्रहं जुषध्वं सेवध्वं। हे आग्रहण ग्रह त्वं उपयामेन पात्रेण स्वीकृतो भवसि। आग्रयणोसि आग्र
यणनामा भवसि। स्वग्रुअग्रेग्रे ग्रमं तस्य प्रापकः स्वाग्रयणस्तादृशस्त्वं यज्ञं पाहि रक्ष। यज्ञपतिं यज
अन्विसंतरिक्षनाम=

स्व
मानं चर रक्ष। विष्णुर्यज्ञं पाहि देव इन्द्रियेण स्वसामर्थ्येन त्वां पातु त्वमपि तादृशं विष्णुं पालय अभितः
सर्वतः प्रातरादीनि सवनानि पालय॥ का॰स्या॰॥ त्रिर्हिंकृत्य सोमः पवत इतीति। त्रिः वारत्रयं हिंकारं
कृत्वा जपेदिति शेषः॥ पाठस्तु॥ सोमः पवते॰ विश्वेभ्यस्त्वा देवेभ्य इति। सोमः पवते पावीतिगत्यर्थः।
सोमो गच्छतिसोमः पवत इति त्रिरावृत्तिरादरार्था। अस्मै ब्रह्मणे ब्राह्मणजातिप्रीत्यर्थं पवते सोमो गच्छति। स
सोमो गच्छति सोमः पवत इति त्रिरावृत्तिरादरार्था। अस्मै ब्रह्मणे ब्राह्मणजाति प्रीत्यर्थं पवते। अस्मै सुन्वते सोमाभिषवं कुर्वते यजमाना
यकर्मणि प्रवर्तत इत्यर्थः। तथा क्षत्रियजातिप्रीत्यर्थं पवते। अस्मै सुन्वते सोमाभिषवं कुर्वते यजमाना
य कर्म प्राप्त्यर्थं पवते इषे अन्नाय ऊर्जे रसाय च पवते अद्भ्यो च प्रत्यर्थं ओषधीभ्यः व्रीहियवादिसिद्ध्यर्थं
च पवते द्यावापृथिवीभ्यां द्युलोकभूलोकप्रीणनार्थं पवते किं चात्र बहुना केनस्तुतायसर्वेषां सापुन
र्नाय पवते ब्रह्मवर्चसाय ब्राह्मणानां विशिष्टवर्चसिनि द्व्यर्थं पवते। हे आग्रयणग्रह त्वां सर्वदेवताप्री
त्यर्थं गृह्णामीति शेषः। एवं खरस्त्वं देवास्तव स्थानं। सर्वेभ्यो देवेभ्यस्त्वा मा सादयामीति शेषः॥ इत्य
ष्टमोनुवाकः॥ अष्टमेनुवाके आग्रयणग्रह उक्तः। नवमे उक्थ्यग्रह उच्यते॥ का॰स्या॰॥ उक्थ्यमुपयाम
गृहीतइतीति। उक्थ्यग्रहं गृह्णीयात्॥ पाठस्तु॥ उपयामगृहीतोसीन्द्राय त्वा बृहद्वते॰ विष्णुभ्यां त्वा
देवायुवं गृह्णामि। यज्ञस्यायुषे रेति। हे सोम त्वं उपयामेन पात्रेण गृहीतो भवसि। हे उक्थ्यग्रह उक्थायु

वं उक्थं इन्द्रः कामयत इत्युक्थयुः अंशुं दसो दीर्घः। तादृशं त्वामिन्द्राय गृह्णामि स्वीकरोमि। कीदृशायेंद्राय बृहद्वते बृहत्सामवते बृहत्साम प्रियायेत्यर्थः। वयस्वते वयः सोमरूपमन्नं तद्वते। हे हे इन्द्र यत्ते बृहद्वयोमहदन्नं सोमरूपमस्ति। तस्मै तत्सोमपानार्थं त्वां प्रार्थये इति शेषः। हे सोम विष्णुदेवतार्थं त्वां गृह्णामि। एषरवरथ्रदेशस्ते अवस्थानं उक्थेभ्यस्त्वां सादयामि। देवेभ्यो देवताप्रीत्यर्थं। देवायुवं देवान्कामयमानं त्वां गृह्णामि। किमर्थं यज्ञस्यायुषे यज्ञस्य संपूर्णतया समाप्तिरायुर्यस्य फलपर्यंतं तया ऽवस्थानंन आयुर्यस्य तस्मै त्वां गृह्णामीत्यर्थः। मित्रादि देवतार्थं देवायुवं त्वां गृह्णामि। शिष्टं स्पष्टं॥ इति नवमोनुवाकः॥ ॥ नवमे उक्थ्यग्रह उक्तः। दशमे ध्रुवग्रह उच्यते॥ कात्या०॥ ध्रुवं मूर्द्धानं दिव इति। ध्रुवनामकं ग्रहं गृह्णीयात्॥ पाठस्तु॥ मूर्द्धानं दिवो० वैश्वानरायत्वेति। वयं वैश्वानरनामकमग्निं स्तुमः इतिशेषः॥ कीदृशमग्निं दिवो मूर्द्धानं शिरोवदुन्नतप्रदेशे सूर्यरूपेणावस्थानाद्युलोकस्य शासकं। अरतिं पृथिव्याः रतिरूपरतिस्तद्रहितं नहि पृथिव्यां अयाउपरि कदाचिदप्यग्निरूपरमते किंतु। ऋतेन प्रकारेण सर्वानन्नं गृह्णन् सर्वदा वर्त्तते। ऋते यज्ञनिमित्ते आजातं अग्निं मुखेनाशयोरुत्पन्नं कविं स्वतन्त्रं आनन्दयन्तं तं मन्निमित्तं सम्यक् दीप्यमानं जनानां यजमानानामतिथिं हविर्भिः स

पदच्छिन्नि त्रि आस्यं वा रत्त्यास्या आदेशो विभक्तिलोपश्च। =

म्राश्रयो ग्यमासन्नं इदानीं आस्यं अग्नेरास्ये मुखे होतुं देवाः पात्रं सोमग्रहरसरूपमाजनयंत सर्वतोरेन्द्रवायवादिस्थाने प्रसादितवंतः। हे सोम त्वमुपयामेन पात्रेण गृहीतोऽसि हे ग्रह त्वं ध्रुवनामकोऽसि कीदृशस्त्वं ध्रुवक्षितिः क्षिर्निवासगत्योः स्थिरनिवासः। आवेश्यदेवीशंसनमवस्थानात्। ध्रुवाणामादित्यस्थात्यादीनां मध्ये ध्रुवतमः अतिशयेन स्थिरः। अच्युतानां च्युतिरहितानां क्षरणरहितानामच्युतक्षितीनामपि मध्ये अच्युतक्षित्तमः। अच्युतेयज्ञे क्षियंति निवसंतीत्यच्युतक्षितः। तेषां श्रेष्ठोऽसि। एषरवरथ्रदेशस्तेऽवस्थानं। वैश्वानरायाग्नये त्वां सादयामि॥ कात्या०॥ ध्रुवं सर्वमासिंचतीति। ध्रुवपात्रस्थं सर्वसोमं होतृचमसे वसिंचेत्॥ पाठस्तु॥ ध्रुवं ध्रुवेण० करदिति। ध्रुवेणेकाग्रेण मनसा मंत्रोच्चारप्रवणया वाचा ध्रुवं ध्रुवग्रहं अवस्थिते सोमम वनयामि होतृचमसे ऽवसिंचामि। अथानंतरं इन्द्र इदिन्द्र एवनोऽस्माकं विशः प्रजा असपत्नाः सपत्नरहिताः शत्रुशून्याः समनसः स्थिरमनस्का ऐक्यकरस्तु करोतु॥ इति दशमोनुवाकः॥ ॥ दशमेनुवाके ध्रुवग्रह उक्तः। एकादशे विप्रुषां होम उच्यते॥ कात्या०॥ यस्त इति विप्रुषां होमं जुहुतोध्वर्युरिति। प्रतिप्रस्थातृ उद्गात्रादिसहितोध्वर्युः केवलो वा विप्रुषां होमं जुहुयात्॥ पाठस्तु॥ यस्ते द्रप्स०

वषट्कृतं स्वाहेति। हे सोम ते त्वदीयो योऽंशुः रसैकदेशः स्कंदति क्षरति अन्यत्र वा पतति। तेत्वदीयो योंशुर्ग्रा अगादे–
वच्युतः ग्रावाग्रास्सकाशात्पतितः यः धिषणयोरधिषवणफलकयो रुपस्थात् उत्संगात्पतितो यों शुं
रध्वर्यावित्रिपवित्राद्वा परिस्कंदति। मनसा वषट्कृतं तं तोद्दं तेन त्वदीयमंशुं स्वाहाकारेण जुहोमि॥ का
स्या०॥ वेदितृणे ध्वर्युरादन्ते प्रकृत उच्चैर्देवोगच्छन्नन्यतरतृणं बाह्यरे प्रास्यति देवानामिति। अध्वर्युर्वेदि
तर्गतं तृणद्वयं संस्कृतं बर्हिः बर्हिः पवमानार्थं प्रस्यात् स्तात्रादि सहितः प्रक्रम्य तद्दक्षुवो गत्वा न्तयो
रेकं तृणं वाचा लेप क्षिपेत्॥ पाठस्तु॥ देवानामुत्क्रमणमसीति। हे वाले यस्माद्देवास्त्वत्सकाशान्त
स्वर्गमुत्क्रामंति। तस्मात्त्वं देवानामुत्क्रमणमसि॥ इति एकादशोऽध्यायः॥ ॥ एकादशेनुवाके अंशूनां

होमउक्तः। द्वादशेऽर्कतुग्रहाउच्यंते॥ का०स्या०॥ ऋतुग्रहैः प्रचरतो द्रोणकलशादुपयामगृहीतोसि ७१
मधवे त्वेति द्वादशप्रतिमंत्रमध्वर्योः पूर्वः पूर्वो मंत्र उत्तर उत्तरः प्रतिप्रस्थातुरिति। अध्वर्युः प्रति
१०७ स्थातारौ तौ ऋतुग्रहै द्वादश भिरनुतिष्ठतः। उपयामेत्याद्यो द्वादशमंत्राः॥ तत्र द्वौ मंत्रयुग्मेषु पू
र्वः पूर्वो मंत्रोऽध्वर्योरुत्तर उत्तरः प्रतिप्रस्थातुरिति मंत्रविवेकः॥ तत्रायं प्रथमो मंत्रः॥ उपयामगृही
तोसि मधवे त्वेति। हे सोम त्वं उपयामयतीत्युपयामो ग्रहस्तेन गृहीतोऽत्र वसि। सोमधवे मधुनाम्ने

चैत्रमासाय गृह्णामीति शेषः॥ अथ द्वितीयो मंत्रः॥ उपयामगृहीतोसि माधवाय त्वेति। माधवाय एतन्ना
मकाय वैशाखमासाय त्वां गृह्णामि। अथ तृतीयो मंत्रः॥ उपयामगृहीतोसि शुक्राय त्वेति शुक्रनामकाय
ज्येष्ठाय त्वां गृह्णामि॥ चतुर्थो मंत्रः॥ उपयामगृहीतोसि शुचये त्वेति। शुचये आषाढमासाभिमानिदेवता
र्थं त्वां गृह्णामि। पंचमो मंत्रः॥ उपयामगृहीतोसि नभसे त्वेति। नभसे श्रावणमासाय त्वां गृह्णामि। अथ षष्ठो
मंत्रः॥ उपयामगृहीतोसि नभस्याय त्वेति। हे सोम नभस्याय एतन्नामकाय भाद्रपदमासाय त्वां गृह्णामि॥
अथ सप्तमो मंत्रः॥ उपयामगृहीतोसि इषे त्वेति। इषे आश्वयुजमासाय सोम त्वां गृह्णामि। अथाष्टमः॥
उपयामगृहीतोसि ऊर्जे त्वेति। ऊर्जे एतन्नामकाय कार्तिकमासाय त्वां गृह्णामि। नवमो मंत्रः॥ उपयामगृहीतो
सि सहसे त्वेति। सहसे मार्गशीर्षमासाय सोम त्वां गृह्णामि। दशमो मंत्रः॥ उपयामगृहीतोसि सहस्याय
त्वेति। सहस्यनाम्ने पुष्यमासाय सोम त्वां गृह्णामि। अथैकादशमंत्रः॥ उपयामगृहीतोसि तपसे त्वे
ति। तपः संज्ञकाय माघमासाय सोम त्वां गृह्णामि॥ द्वादशो मंत्रः॥ उपयामगृहीतोसि तपस्याय त्वेति।
तपस्याय फाल्गुनाय सोम त्वां गृह्णामि॥ अथ का०स्या०॥ त्रयोदशं गृह्णीयादिदं ह्युपयामगृहीतोस्यं
हसस्पतये त्वेति। त्रयोदशग्रहे अनुष्ठातुर्यदीच्छास्यात्तर्हि अध्वर्युस्त्रयोदशं ग्रहं गृह्णीयात्। यदि ने

छास्यात्तर्हि निगृह्णीयादित्येवंविकोविकल्पः॥ अंहसस्पतये अंहते गतिकर्मणः सुन्प्रत्यये तस्य रूपं अंह
संगतीनां पतिरंहसस्पतिस्तस्मै योदशोमासः॥ आदित्यगतिवशेन जायते तस्मै हे सोम त्वं उपयामेन
पात्रेण गृहीतोसि। तादृशं त्वां गृह्णामीतिशेषः॥ इति द्वादशोनुवाकः॥ द्वादशो ऋतुग्रह उक्तः। त्रयोदशो
नुवाके ऐंद्राग्नग्रह उच्यते॥ कास्या०॥ ऐंद्राग्नं ग्रहं गृह्णाति प्रतिप्रस्थातेंद्राग्नीकुनीति॥ प्रतिप्रस्थाता इं
द्राग्निदेवताकं ग्रहं गृह्णीयात्॥ पाठस्तु॥ इंद्राग्नी आगतं० योनिरिंद्राग्निभ्यां त्वेति। हे इंद्राग्नी युवां सु
तमभिषुतं सोमं प्रस्थापतमागच्छतं। कीदृशं सोमं गीर्भिस्तुतिरूपाभिर्वाग्भिर्युक्तमितिशेषः॥ नभो नभे
स्थिते स्वर्गनिवासिनिर्दिष्टे वै वरेण्यं प्रार्थनीयं। अस्य सोमस्य संबंधिनं स्वकीयमंशं पातं युवां पिबतं।
कीदृशौ युवां धियास्य बुध्द्येषितौ प्रार्थितौ। हे सोम उपयामेन ग्रहेण गृहीतो भवसि। हे ग्रह इंद्राग्निभ्यां

१७८

त्वां गृह्णामि। एष ते तव स्थानं। इंद्राग्निभ्यां त्वां सादयामि॥ ॥इति त्रयोदशोनुवाकः॥ ॥त्रयोदशो ऐंद्रा

१७८॥

ग्नग्रह उक्तः। चतुर्दशो स एवोच्यते॥ तत्रायं विकल्पितोमंत्र आम्नातः॥ आघा ये अग्नि० योनिरग्नींद्रा
भ्यां त्वेति। ये यजमाना अग्निं आइंधते आदीपयंते। घेति अनर्थको निपातः। ये वा आनुषग्गानुपूर्व्येण ब
र्हिस्तृणंति येषां युवा जरामहत्सुरहितइंद्रः सखा मित्रं लक्षणो भवति। हे सोम तेषां संबंधिनि यज्ञे उपयामे

न ग्रहेण स्वीकृतो भवसि। त्वामग्नींद्रदेवतार्थं गृह्णामि। एष ते तव हे अग्नींद्रा तव स्थानं त्वां सादयामीतिशेषः॥ इति
चतुर्दशोनुवाकः॥ चतुर्दशो ऐंद्राग्नग्रहस्य विकल्पितोमंत्र उक्तः। पंचदशो वैश्वदेवग्रह उच्यते॥ कास्या०॥ वै
श्वदेवं गृह्णाति शुक्रपात्रेण द्रोणकलशाद्धान्यारश्मि ओमास इति॥ अध्वर्युर्यजमानेन स्पृष्टे अस्पृष्टे
वा सति द्रोणकलशाच्छुक्रपात्रेण वैश्वदेवं सोमं गृह्णीयात्॥ पाठस्तु॥ ओमास० देवेभ्य इति।
हे विश्वेदेवासः आगत। आगच्छत। ओमासो रक्षितारः। चर्षणीधृतो मनुष्यपोषकाः। अनिष्टनिवारणं
रक्षणं इष्टप्रापणं तोषणं। सुतमभिषुतं सोमं दाशुषो दत्तवतो यजमानस्य दाश्वांसः फलं प्रदत्तवं
तः। अन्यत्स्पष्टं॥ इति पंचदशोनुवाकः॥ ॥पंचदशो वैश्वदेवग्रह उक्तः। षोडशेपि स एवोच्यते। तत्रायं वि
कल्पितोमंत्र आम्नातः। विश्वेदेवास० विश्वेभ्यस्त्वा देवेभ्य इति॥ हे विश्वेदेवास्य ये आगत अस्मद्यज्ञं प्र
त्यागच्छत आगास्मे मदीयमिमं हवमाह्वानं शृणुत श्रुत्वा च मे दीयमिदं बर्हिर्यज्ञे आनिषीदत तच्छिष्टं
स्पष्टं॥ इति षोडशोनुवाकः॥ ॥षोडशो वैश्वदेवग्रहस्य वैकल्पिको मंत्र उक्तः॥ एतावता प्रातःसवन
ग्रहाः समाप्ताः। अथ सप्तदशो माध्यंदिनसवनग्रह उच्यते॥ तत्र त्रयो मरुत्वतीयग्रहाः। तेषां माध्यंदिने

प्रयोगंनित्तिरिराह।।माध्यंदिनेसवनेमरुत्वतीयाग्रहंतद्इतिनेषुत्रयमम्माह।।कास्या०।।मरुत्वतीयमनु
पात्रेणेंद्रमरुत्वइतीमि।ऋतुपात्रेण मरुत्वतीयंगृह्णीयात्।।पाठस्तु।।इंद्रमरुत्व० मरुत्वतइति।मरुत्वो
वामदेवाअस्यसंततिर्मरुत्वान्।तस्यसंबोधनंहेमरुत्वः।मरुत्वसोरुःसंबुद्धौछंदसीतिरुत्वं।हेतादृशे
इंद्रइहास्मदीययज्ञेसोमंपाहिपिब।यथानामायातिर्नामकश्चिद्राजातस्यसंबंधिनियज्ञेसुतस्याभि
षुतस्यसोमस्यांशमपिबः।पीतवानसितद्वत्हेशूरवीरेंद्र प्रणीतीप्रणीत्याप्रणयेनानुलयासुयज्ञाः
कल्याणयज्ञाःपूर्वेकवयस्तवशर्मणिसुखेनिमित्तभूतेसतियथाआविवासंतिपरिचरंति।तद्वदय
मपियजमानइत्यर्थः।स्पष्टमन्यत्।।इतिसप्तदशोनुवाकः।।अष्टादशेमरुत्वतीयग्रहमाह।।कास्या०।।
मरुत्वतीयग्रहणंमरुत्वंतमितीति।मरुत्वतीयंग्रहंगृह्णीयात्।।पाठस्तु।।मरुत्वंतंवृषभं०मरुत्वंतइति।
इहास्मदीययज्ञेतमिंद्रंहुवेम।वयमाह्वयामः।कीदृशमिंद्रंमरुत्वंतंमरुद्गणोपेतंवृषभंजलस्यव १७९
र्षितारंवावधानंकामानांवर्द्धयितारंअकवारिंअकुत्सितारिंवृत्रादीनांशत्रूणामतिप्रबलत्वात्
१७९ दिव्येदिविनवंशासंदुष्टानांशासितारंविश्वासाहंविश्वंपालयितुंसहिष्णुंअनेनसमित्यर्थः।अवसे

रक्षणायनूतनोयोग्रंइदानीतनेस्मोयजमानंरक्षितुंतंहुवेमइत्यर्थः।सहोदांबलप्रदंशिष्टंस्प
ष्टं।।इतिअष्टादशोनुवाकः।।एकोनविंशेमरुत्वतीयग्रहमाह।।कास्या०।।ऋतुपात्रेणमरुत्वतीयग्रह
णमुपयामगृहीतोसिमरुतामोजसइत्यनेनेति।त्वेतिमंत्रशेषः।हेमरुत्वतीयग्रहमरुतांओजसेबलायत्वां
गृह्णामीतिशेषः।शिष्टंस्पष्टं।।इत्येकोनविंशोनुवाकः।।विंशेपिसएवमरुत्वतीयग्रहउच्यते।तत्रायं
विकल्पितोमंत्रः।।सजोषाइंद्र०मरुत्वतइति।।हेइंद्रत्वंसजोषाःसजोषनंसाप्रीत्यासहितःसगणोवस्वा
दिगणैरुपेतःमरुद्भिरेकोनपंचाशतामरुद्गणैःसहएवंसपरिवारःसन्सोमंपिब।अनेनसोमपानेनहे
शूरविक्रांतइन्द्रविद्वान्सर्वज्ञानन्वृत्रहावृत्रंशत्रुंहंतीतिवृत्रहात्वंविपश्चितततःशत्रूञ्जहिछिंधिमृ
धःसंग्रामाद्येहतावद्भिष्टाःशत्रवस्तानपनुदस्व।अस्मान्हत्वापलायनार्थंप्रेरयस्वप्राणदानंकु
र्वित्यर्थः।अथानंतरंनोस्माकंअभयंविश्वतःसर्वतःकृणुहिकुरुस्पष्टमन्यत्।।इतिविंशोनुवाकः।।
सप्तदशादिविंशांतेष्वनुवाकेषुमरुत्वतीयग्रहाउक्ताः।एकविंशेमाहेंद्रग्रहउच्यते।।कास्या०।।मा
हेंद्रंगृह्णातिवैश्वदेववन्माहेंद्रइतीति।यथावैश्वदेवग्रहः।शुक्रपात्रेणगृहीतःतथामाहेंद्रग्रहं

तेनैव गृह्णामीत्यर्थः॥ पाठस्तु॥ महाँ इन्द्रो नृवदा० महेन्द्राय त्वेति। अयं महान् इन्द्रो नृवत् मनुष्यवत् आ चर्षणिप्राः
चर्षणयो मनुष्यास्तान् अतीष्टभोग्यैः प्रयतीति चर्षणिप्राः॥ यथा राजा मासादिर्मनुष्यसेवकान् अभीष्ट
भोगैरापूरयति तद्वत्। उतापि वा यं द्विबर्हाः प्रकृतिविकृतिविकृतिरूपयोः सोमयागयोर्वृद्धिर्यस्येति।
द्विबर्हा अमिनः सहोभिः बलैरमितः उपमारहितः अस्मद्र्यक् अस्मत्सदृशः। वावृधे एव वृद्धिं प्राप्तः। यथाव
यमस्यानुग्रहाय वृद्धिं प्राप्तास्तथैवायमस्मदीयैर्हविर्भिर्वर्द्धताम्। एतदेव प्रपंचयते वीर्याय सामर्थ्यसिद्धये। कृतं
स्तिर्यजमानैः स्वयं सुकृतो नूनं सुष्ठु वर्द्धितो [illegible] उरुः पृथुः आसा विपुलायः पृथुर्बलेन विस्तृता। स्प
ष्टमन्यत्॥ इत्येकविंशोनुवाकः॥ ॥ एकविंशो माहेन्द्रग्रह उक्तः॥ द्वाविंशोनुवाके तस्यैव विकल्पितं मंत्रांतर
मेवाम्नायते॥ महाँ इन्द्रो य ओजसा० महेन्द्राय त्वेति॥ वृष्टिमान् वृष्टिमानी पर्जन्यो देव इव य इन्द्र ओजसा
बलेन महान् स इन्द्रो वत्सस्थानीयस्य यजमानस्य स्तोमैः स्तोत्रैर्वावृधे वर्द्धतां। हे सोम त्वं उपयामयतीत्युपया

१३१   १३०॥

मो ग्रहः। तेन गृहीतोसि त्वं। हे ग्रह त्वां महेन्द्रदेवतार्थं गृह्णामीति शेषः। एष ते योनिः प्रदेशस्ते स्थानं त्वां म
हेन्द्राय सादयामीति शेषः॥ इति द्वाविंशोनुवाकः॥ ॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्च
तुरो देयाद्विद्यातीर्थमहेश्वरः॥ ॥ इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे काण्वसंहि ताता

[..]ष्ये सप्तमोध्यायः॥ ॥ यस्य निश्वसितं०॥ ॥ सप्तमेनुवाके उपांश्वग्रयाहार्दिसवनद्वयगतमंत्रा उक्ताः॥ अ
ष्टमेध्याये तृतीयसवनगतादित्यग्रहादिमंत्रा उच्यंते। कात्या०॥ आदित्यग्रहं गृह्णाति संभस्त्रवेभ्यः कदा
चनेतीति॥ गृहीतहोमशेषाः सर्वस्रवाः। तेभ्यः सकाशादादित्यग्रहं गृह्णीयात्॥ पाठस्तु॥ कदाचन० आ
दित्येभ्यस्त्वेति। हे इंद्र त्वं कदाचन कदाचिदपि स्तरीः॥ हिंसको न भवसि। किं तर्हि दाशुषे षष्ठ्यर्थे चतुर्थी हविर्द
त्तवतो यजमानस्य हवींषि सश्चसि सेवसे। कुत्र उपोपेन्नु यजमानस्यासन्ने तत्समीप एव। हे मघवन्। धनवन्निं
द्र भूय इन्नु पुनरेव च देवस्य तव दानं देयं हविः पृच्यते संबध्यते यजमानेन हविर्दीयत इत्यर्थः। हे ग्रह त्वा   पृची संपर्के
दित्येभ्यो देवेभ्यस्त्वां गृह्णामीति शेषः। अत्रेन्द्रनामा निरुप्यादित्यरूपेण स्तूयते॥ कात्या०॥ पुनः कदाचनेतीति। गृह्णी
पूर्ववत्   यादिति शेषः॥ पाठस्तु॥ कदाचन प्रयु० आदित्येभ्यस्त्वेति। [illegible] निषेधार्थः। युछि चालुः प्रमादार्थः। हे इंद्र त्वं [illegible]या   स्वेयः =
कदाचिदपि न माद्यसि किंतु वर्तमाने तां विवस्वत्पुत्रे यजमानस्य जन्मनी निपासि नितरां पालयसि। तती
यामि सस्मिन्नर्थे वर्णव्यत्ययेन तुरीयशब्दः प्रयुक्तः। हे आदित्य तृतीयसवने तवेदीयं तस्मिन्सवने इंद्रियाणि
वृद्धिकारणममृतसमानं हविः दिवि द्युलोके समाने आतस्थौ आतिष्ठत्वेन स्थितं। स्पष्टमन्यत्॥ कात्या०॥
दध्नाश्रीणा सैनं यज्ञो देवानामितीति। एतमादित्यग्रहं दध्नाभिश्रीं कुर्यात्॥ पाठस्तु॥ यज्ञो देवानां० दादि
= तुरीये इत्येतत्सप्तम्येकवचनमविभक्तिकं। न संबोधनांतं। आद्युदात्तत्वादिति द्रष्टव्यं। =

यस्मात् वो युष्माकं तस्मात् तस्मात् ...सुवत इति धातोः

स्येत्यस्येति। यज्ञो देवानामादित्यानां सुम्नं सुखं कर्तुं प्रत्येति। आदित्यास आदित्याः यूयं मृडयंतः अस्माकं सु
निशेषः खयितारो भवत। वो युष्माकं या सुमतिः शोभना बुद्धिर्नत्वनुग्रहपरा। सा अर्वाची अस्मदभिमुखी आ
ववृत्यात्। आवर्त्ततां। पुनरपि सैव विशेष्यते। अंहोहननमूर्ती तस्य पापिनोपि विलंबेत्। या सुमतिः
वरिवोधनं तद्वित्तानि तत्रातिशयेन वेत्री लब्ध्री वा वरिवोवित्तरासत् भवेत्। सा सुमतिरस्मदभिमुखी
से० सती आवर्त्स्यादिति संबंधः। हे सोम त्वामादित्येभ्यो देवेभ्यो ध्वाभिमुखपामीति शेषः॥ का०सा०॥ उपांशु
सवनेन मिश्रयति विवस्वाँ आदित्येतीति। उपांशुग्रहार्थं येन पाषाणेन सोमोऽभिषूयते। तादृशेन पा
षाणेन एनं ग्रहं मिश्रीकुर्यात्॥ पाठस्तु॥ विवस्वाँ आदित्यैष ते सोमपीथस्तस्मिन्मत्स्वेति। हे आदित्य त्वं
तमांसि विवासयतीति। विवस्वान् विशिष्टधनवान् त्वा एष पात्रस्थस्ते तव सोमपीथः। पातव्यः सोमस्त
स्मिन्मत्स्व तृप्तिं कुरु। इत्यष्टमेऽध्याये प्रथमोऽनुवाकः॥ प्रथमेऽनुवाके आदित्यग्रह उक्तः। द्वितीये सो ॥ १२९
मविशेषवेक्षणमुच्यते॥ का०सा०॥ अदस्मेनर इत्येतमवेक्षते पत्नीति। पत्नी एव सोमविशेषं पश्येत्॥
१२९ ॥पाठस्तु॥ अदस्मे० नर इति॥ हे नरो नेतारः ऋत्विग्यजमाना यत् यस्मै आशीर्दा सुक्षोपस्थोदसः।
आशिषादातारः। ते यूयं अस्मै वचसे आशीर्वचनाय श्रद्धातन। श्रद्धां कुरुत। आस्तिक्यबुद्धिं कुरुतेत्यर्थः।

दंपती पतिपत्न्यौ पत्नीयजमानौ वामं वननीयं संभजनीयं यज्ञफलं अश्नुतः प्राप्नुतः॥ किंच इहैव पुमान्
पुंस्त्वधर्मसंपन्नः पुत्रो जायते वसु धनं विंदते लभते। अथानंतरं विश्वाहा सर्वदा अरपाः पापरहितः सन् गृहे
एधते वर्द्धते॥ इति द्वितीयोऽनुवाकः॥ द्वितीये सोमविशेषावेक्षणमुक्तं। तृतीये सावित्रग्रह उच्यते॥ का०सा०॥
उपांश्वंतर्यामपात्रयोरन्यतरेण सावित्रग्रहणं। वाममद्येतीति। उपांश्वंतर्यामग्रहयोरेकतरेण सावित्र
ग्रहं गृह्णीयात्॥ पाठस्तु॥ वाममद्य० स्यामेति। हे सवितः सर्वस्य प्रेरयितः देव अद्यास्मिन्दिने। अस्मभ्यं
वामं वननीयं कर्मफलं सावीः प्रेरय देहीत्यर्थः। श्वोऽपि समनंतरदिने वामं सावीः। दिवेदिवे तत्तदूर्ध्वदि
नेदिने वामं सावीः। हि यस्मात्कारणात्। हे देव वामस्य वननीयस्य भूरेर्विस्तीर्णस्य क्षयस्य स्वर्गनिवास
सिद्धये अयानया धिया श्रद्धायुक्तया बुद्ध्या वामभाजः स्याम। वननीयकर्मानुष्ठायिनो भवेम। तस्माद
स्मभ्यं वननीयं कर्मफलं प्रेरयेति संबंधः॥ इति तृतीयोऽनुवाकः॥ तृतीयेऽनुवाके सावित्रग्रह उक्तः।
चतुर्थेऽनुवाके तस्यैव विकल्पितो मंत्र आम्नायते॥ उपयामगृहीतोऽसि सावित्रोऽसि० सवित्रे त्वेति। हे सो
म त्वं उपयामेन ग्रहणेन गृहीतोऽसि। हे ग्रह त्वं सावित्रोऽसि सवितृदेवत्योऽसि। चन इत्यन्ननाम चनो अन्नं
धत्त इति चनोधाः। अन्नस्य धारयिता त्वमसि। चनो मयि धेहि। स्थापय। यज्ञं जिन्व प्रीणय यज्ञपतिं

यजमानं तर्पय। भगायैश्वर्यादिगुणयुक्ताय। ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः। ज्ञानवैराग्ययो
श्चैव षण्णां भग इतीर्यत इति। तादृशाय सवित्रे सर्वप्राणिनां प्रसवादिकर्त्रे देवाय त्वां गृह्णामीति शेषः। इ
ति चतुर्थोनुवाकः॥ चतुर्थेनुवाके सावित्रग्रहस्य वैकल्पिको मंत्र उक्तः। पंचमे वैश्वदेवग्रह उच्यते॥ का॰सा॰॥
महावैश्वदेवग्रहणमुपयामगृहीतोसि सुशर्मासीति वैश्वदेवग्रहं गृह्णीयात्॥ पाठस्तु॥ उपयामगृही
तोसि सुशर्मासि॰ देवेभ्य इति। हे वैश्वदेवग्रह त्वं सुशर्मासि शोभनं शर्म सुखं यस्य तादृशो त्वमसि। सुप्र
तिष्ठानं पात्रे स्थितिर्यस्य तादृशोसि बृहदुक्षाय बृहन्महांश्चासावुक्षा सेक्ता चेति बृहदुक्षः प्रजापति
र्वै बृहदुक्ष इति श्रुतेः। तादृशाय सर्वजगदुत्पादयित्रे विश्वदेवात्मकाय प्रजापतये नमः इदं सन्नाम स्तो
माख्यमन्त्रं गृह्णामीत्यर्थः। स्पष्टमन्यत्॥ इति पंचमोनुवाकः॥ ॥पंचमेनुवाके महावैश्वदेवग्रह उक्तः। ष
ष्ठे पत्नीवतग्रह उच्यते॥ का॰सा॰॥ उपयामगृहीतोसि बृहस्पतिसुतस्येति प्रतिप्रस्थाता पत्नीवतं ग्रहं गृ
ह्णातीति। प्रतिप्रस्थाता पत्नीवतस्य ग्रहमुपांश्वन्तर्यामपात्रयोरेकतरेण गृह्णीयात्॥ पाठस्तु॥ उपयामगृ
हीतोसि बृहस्पति॰ ऋध्यासमिति। हे इंदो क्लेदनरूप देव दीप्यमान सोम बृहस्पतिसुतस्य बृहतो महतो
यज्ञाख्यस्य कर्मणः पालयित्राय यजमानेनाभिषुतस्य ते तव संबंधी नेपात्रे प्रत्तनीत्यात्र विशेषा

१८२

१८२

न्ध्यासं। कीदृशान्त्र इंद्रियावंतो वीर्यवंतः पत्नीयुक्ता न शिष्टं स्पष्टं॥ का॰सा॰॥ प्रचरणीशेषेणाग्रेण सेनं नेह
परस्तादितीति। प्रचरणी प्रपात्रे अवशिष्टेनोदकेन पावितं ग्रहं मिश्रीकुर्यात्॥ पाठस्तु॥ अहं परस्ता॰ गुहा य
दिति। अत्र मंत्रद्रष्टा स्वस्य स्वर्गेत परमात्मरूपमस्ति प्रत्यय ब्रूते। अहं परमात्मरूपः सन् परस्तादुपरितनद्युलो
कादेरवधस्तादधस्तनभूलोकादेरिति च्छामीति शेषः। यदंतरिक्षे मध्यलोकवर्त्तीलोकरूपमस्ति तदुतदेव
मे देहधारिणो ममापि तात पितृवत्सा लौकिको व रूपः। अहं परमात्मरूपः सन्। उभयतु उपरिष्टादधस्ताव
स्थितावास्सूर्यं ददर्शादिष्टवानस्मि। यद्वा अस्तु देवानामिंद्रादीनां हृदये परमं गुहा अस्यं तं गोप्यमस्ति तदेवा
हमस्मि॥ का॰सा॰॥ अग्नेवाक्पत्नीसुत्तरार्धे जुहोतीति। आहवनीयस्योत्तरभागे जुहुयात्॥ पाठस्तु॥ अग्ने
वाक्पत्नि॰ स्वाहेति॥ हे वाक्। वागभिमानिनि हे पत्निपत्नीवत्यग्ने त्वष्ट्रा देवेन सह सजूः समानप्रीतिः
सन् सोमं पिब स्वाहा हुतमस्तु॥ का॰सा॰॥ उद्गातृवत्संती सदः प्रवेशप्रकारेण तत उपविष्टासूद्गाता
रं समीक्षयति प्रजापतिर्वृषासीति। एवं तु उद्गातुर्यथा सदःप्रवेशनं तथा पत्नीं सदः प्रवेशयित्वा प
श्चिमोत्तरदिग्भागे स्थितां तां उद्गात्रा सह समीक्षयेत्। पत्नी उद्गातारं पश्येदित्यर्थः॥ पाठस्तु॥ प्रजाप
तिर्वृषा॰ मनीयेति। प्रजापतिः प्रजानां पालकस्त्वं वृषासि। सेक्ता त्वमसि। रेतोधा रेतसो वीर्यस्य धा

रयितासि एवंगुणयुक्तस्त्वं रेतो वीर्यं मयि धेहि। स्थापय। तदनंतरं वृष्णः वीर्यस्य सेक्तुः रेतोधसो रेतसो
धारयितुः प्रजापतेस्त्वत्तो वा अनुग्रहात् रेतोधारेभ्यः धारयितारं प्रजोत्पादनसमर्थं पुत्रं अत्रीय प्राप्नुयां॥
इति षष्ठोनुवाकः॥ ॥षष्ठेनुवाके पत्नीवत ग्रह उक्तः। सप्तमे हारियोजन ग्रह उच्यते॥ का०॥ द्रोण
कलशे द्रो हारियोजनग्रहमुपयामगृहीतोसि हरिरसीति। द्रोणकलशस्थं सोमं हारियोजनेन ग्रहेण गृह्णीया
त्॥ पाठस्तु॥ उपयामगृहीतोसि हरिरसि हारियोजनो हरिभ्यां त्वेति। हे सोम त्वं हरिः हरितवर्णोसि।
हे ग्रह त्वं हारियोजनः। हरी इंद्राश्वौ तौ येन नयेन युज्यते इति हारियोजनः। इंद्रस्त्वं त्वं वधीनवसि।
सोम त्वां हरिभ्यां गृह्णामीति शेषः॥ का०॥ धानाश्चावपति हर्योर्धाना इतीति॥ त्र्यष्टयवान् हारि
योजनग्रहे निदध्यात्॥ पाठस्तु॥ हर्योर्धानास्थ सहसोमा इंद्रायेति। सहसोमाः सोमेन सहिता धा
ना त्र्यष्टयवा इंद्राय इंद्रस्य हर्योरश्वयोर्भवति॥ का०॥ यस्ते देव सोमाश्वसनिरिति प्राणभक्षं भक्षयि
त्वेति। प्राणधारणार्थं यो भक्षः तं भक्षयेत्॥ पाठस्तु॥ यस्ते देव सोम० भक्षयामीति। हे देव दीप्यमान
सोम ते त्वदीयो भक्षः। अश्वसनिः अश्वानां दाता यो भक्षो गवां दाता तस्य तादृशस्य ते त्वदीयं तादृशं
त्वां भक्षं उपहूतः। अनुज्ञातोहं भक्षयामि। कीदृशस्य ते इष्टयजुषः। इष्टानि यजूंषि यस्य स इष्टय

९८३

९८३

जुः तस्य स्तुतस्तोमस्य उद्गातृभिः स्तुतानि स्तोत्राणि यस्य स तथोक्तस्तस्य। होतृभिः शस्तानि उक्था
नि शस्त्राणि यस्य स शस्तोक्थः तस्य। उपहूतस्यानुज्ञातस्य॥ इति सप्तमोनुवाकः॥ सप्तमे प्राणभ
क्षग्रह उक्तः। अष्टमे षोडशिग्रह उच्यते॥ का०॥ षोडशिनं खादिरेण चतुस्रक्तिनाति कसुष्वाहि
तिवेति॥ आतिष्ठ वृत्रहन् युक्ष्वाहि केशिने स्तनयोरन्यतरं मंत्रं उच्चारयन् खादिरे वृक्षेण निर्मितेन
चतुरस्रेण पात्रेण षोडशिग्रहं गृह्णीयादिति शेषः। तयोरेकतरस्य पाठस्तु॥ युक्ष्वाहि केशिना० षो
डशिन इति। हे इन्द्र हि यस्मात्कारणात् हरी तव वर्णौ त्वदीयौ अश्वौ युक्ष्व रथेन संयोजय। कीदृशौ हरी
केशिना केशिनौ प्रलंबकेसरौ वृषणा वृषणौ सेचनसमर्थौ कक्ष्यप्रा। वक्ष्येन वकक्ष्यः अश्वसना
हरत्नु स्तत्यापूर्यते संबध्यते इति कक्ष्यप्रौ। अथानंतरं सोमपाः सोमपानं कुर्वन्नो अस्मदीयानां गिरां
ऋग्यजुःसामलक्षणानां वाचां उपश्रुतिं उपश्रवणं चर गच्छ। प्राप्नुहि। स्टुविस्पष्टः। षोडशिने षोडशिग्र
हो स्यास्तीति षोडशी तादृशाय इंद्राय हे ग्रह त्वां तादृशं गृह्णामीति शेषः॥ शिष्टं स्पष्टं॥ अथान्यतरं पा
ठस्तु॥ आतिष्ठ वृत्रहन्रथं० षोडशिन इति। हे वृत्रहन् इंद्र ते त्वदीयौ हरी अश्वौ त्रयीलक्षणेन मंत्रे
ण युक्तौ रथेन संयुक्तौ अतस्त्वं रथमातिष्ठ आरोहणं कुरु। किंच ग्रावा अयं स्तोता अभिषवपाषाणस्ते

हतध

सन्नाह

रथमारूढस्य तव मनो वग्नुना। वग्नुरिति वाङ्नाम सुपठितं। वाचां श्रवणीयेन नयेनाभिवन्नाब्देन स्तु
हि अर्वाचीनं अस्मदभिमुखं कृणोतु करोतु।। इत्यष्टमनवमेऽनुवाकयोः षोडशीग्रह उक्तः। दश
मे तस्यैव वैकल्पिको मंत्र आम्नातः।। इन्द्रमिद्धरी वहतो० षोळशिन इति। हे हरी इन्द्रस्याश्वौ युवाम
प्रतिधृष्टशवसं प्रति धर्षयितुमशक्यं प्रतिधृष्टं न प्रतिधृष्टमप्रतिधृष्टं तादृशं शवो बलं यस्य सः तमिन्द्रमि
त्। इदमेव ऋषीणां वसिष्ठादीनां च स्तुतीः उपसमीपं मानुषाणां यजमानानां च यज्ञसमीपं च वहतं प्रापतः।
।।इति दशमोऽनुवाकः।। ।।द०।। दशमे षोडशिग्रहस्यैव वैकल्पिको मंत्र उक्तः। एकादशे तस्योपस्थानमुच्यते।।
कात्या०।। उपस्थायैनं यस्मान्न जात इतीति। षोडशीग्रहमुपतिष्ठते।। पाठस्तु।। यस्मान्न जातः० स षो
डशीति। यस्मात्पुरुषादन्योऽव्यतिरिक्तः परः उत्कृष्टो देवादिर्जातः संभूतो नास्ति। यो विश्वा विश्वानि स
र्वाणि भूतजातान्याविवेश अंतर्यामिरूपेण प्रविष्टवान्। यः सर्वेषु भूतेषु तिष्ठन्निति श्रुतेः। प्रजापतिः स्वो
त्पन्नानां प्रजानां पालकः प्रजया प्रजारूपेण संरराणः सम्यग्रममाणः त्रीणि ज्योतींषि। तीव्रं विविषयस्तो
पकानि अग्निवाय्वादित्यलक्षणानि सचते सेवते। स्वतेजसा ज्योतिषां सेवनं ज्योतिषां मुख्यीवनैक
रोतीत्यर्थः। यत्सूर्यस्तपति तेजसेद्धस्तदिति श्रुतेः। य एवंरूपः स एव षोडशी षोडशकलात्मकलिंगशरीरो

परिगृहीतोऽसौ सर्वव्यवहाराश्रयः संभवतीत्येवं षोडशिग्रहस्वरूपमिति प्रस्तूयते।। इत्येकादशोऽनुवाकः।। एकादशे षोडशीग्र
हस्योपस्थानमुक्तं। द्वादशे तस्य भक्षणमुच्यते।। कात्या०।। इन्द्रश्च सम्राडिति भक्षणमिति।। पाठस्तु।। इन्द्रश्च सम्राट्०
स्वाहेति। यो वाजपेययाजी सम्राट् परमैश्वर्ययुक्त ईश्वरो जातः राजसूययाजी वरुणश्च राजा वैराजसूये
नेष्ट्वा भवति सम्राड्वाजपेयेनेति श्रुतेः।। तावेवेन्द्रावरुणौ हे षोडशीग्रह तेन दीयमेवं सोममग्ने प्रथमं भक्षि
तवन्तौ। भक्षितवन्तौ तयोरिन्द्रावरुणयोः संबंधिनं भक्षमनुपश्चादहं भक्षं भक्षयन् सोमं भक्षयामि। जुषाणाम
दीयमानं लक्षणेन सेवमाना वाग्देवी सरस्वती प्राणेन प्राणदेवतया सह सोमस्य भक्षेण तृप्यतु। तथा भवतु
स्वाहाहुतमस्तु।। इति द्वादशोऽनुवाकः।। द्वादशे षोडशिग्रहस्य भक्षणमुक्तं। त्रयोदशादिषु चतुर्ष्वनुवाकेषु
अतिग्राह्या उच्यन्ते।। कात्या०।। पृष्ठ्यः षडहस्तत्रातिग्राह्यग्रहणं यो हपूर्वेऽग्नेपवस्वोत्तिष्ठन्निदमभिसनहमेकै
कमग्नेवर्चस्विन्निति लक्षणमिति। अस्ति कश्चित्पृष्ठ्यः षडहाख्यः क्रतुः स खलु षड्
रहोभिर्निष्पाद्यः तत्र पूर्वस्मिन्नहस्त्र्यहे क्रमेणाग्नेपवस्वेत्यादिभिस्त्रिभिर्मंत्रैरतिग्राह्यानगृह्णीयात्। त
थैवाग्नेवर्चस्विन्नित्यादित्रिभिर्मंत्रैस्तत्र्यहे शेषं भक्षयेत्। तत्र योऽयं प्रथमोऽतिग्राह्यग्रहणार्थो ग्नेपवस्वे
ति मंत्रस्तेन सह विकल्पयितुमन्यः कश्चिद्ग्रहणमंत्रो लक्षणमंत्र आम्नातः।। तयोः पाठस्तु।। अग्न आयूंषि
पवस० भूयासमिति।। हे अग्ने आयूंषि पवसे गमय अस्मानतिदीर्घकालजीवनमानयेत्यर्थः।। किंच। नोऽस्मभ्यं

दुःखः श्मानइवेतिवर्णयित्वस्येनयज्ञविघातकानुसुरान्दूरतएवबाधस्वेतिकीत्न्न ॥=

दुर्नविदिग्विष्ठंक्षीरादिरूपरसंद्रुषमन्नं वा सुवेरयदेहीत्यर्थः। दुःखुनां अस्माकं दौर्गत्यं आरे अतिदूरएवबाधस्व
विनाशाय उपयामयतीत्युपयामोग्रहः हे सोम त्वं तेन गृहीतोसि। हे ग्रह त्वां वर्चसे तेजस्विने गनयेग्रह्णामी
तिशेषः। एषचरप्रदेशस्तवस्थानं तस्मिन्नग्निश्रीत्यर्थं वा त्वां सादयामीतिशेषः॥ हे वर्चस्वन्नीतिवि
दितेजःसंपन्नाग्नेत्वं देवेष्विंद्रादिषु मध्ये वर्चस्वानतिदीप्तिवामानसि। अतस्त्वत्प्रसादादहमपि मनुष्येषु
मध्ये वर्चस्वान्ब्रह्मवर्चससंपन्नो भूयासं॥ इति त्रयोदशोनुवाकः॥ ॥ त्रयोदशे प्रथमातिग्राह्यस्याग्नेय
कल्पिकग्रहणलक्षमंत्रावुक्तौ। चतुर्दशे तत्रोक्तौ ग्रहणलक्षणमंत्राउच्येते। तयोः पाठस्तु॥ अग्ने पवस्व॰
मनुष्येषु भूयासमिति। हे अग्ने स्वपाः। अपसइति कर्मनाम। शोभनकर्मा त्वं अस्मे अस्मभ्यं सुवीर्यं शोभ
नसामर्थ्योपेतं। वर्चो ब्रह्मवर्चसं पवस्व गमय किं कुर्वन्। मयि यजमाने रयिं धनं पोषं पुष्टिं च दधत्। धा
रयन् स्थापयन्नित्यर्थः। अन्यद्व्याख्यातं॥ इति चतुर्दशोनुवाकः॥ चतुर्दशोनुवाके प्रथमातिग्राह्यस्य
ग्रहणलक्षणमंत्रावुक्तौ। पंचदशे द्वितीयातिग्राह्यस्य ग्रहणलक्षणमंत्राउच्येते॥ तयोः पाठस्तु॥ उत्ति
ष्ठन्नोजसा॰ भूयासमिति॥ हे इंद्र त्वं ओजसा बलेन सह उत्तिष्ठन् चम्वौ अधिषवणचर्मणी इत्यर्थः।
सुतमभिषुतं सोमं पीत्वी पीत्वा शिप्रे हनू अवेपयः। वेपनं कंपनं कृतवानसि। हे ग्रह ओजसे बलरूपायेंद्रा
य त्वां गृह्णामि सादयामि वेतिशेषः॥ हे ओजस्वन् ओजो बलं तद्वन्निंद्र त्वं देवेषु मध्ये यथा ओजस्वा

पवनित्वत्रप्रवसर्थी तर्क्षावितण्यर्थः =

१८५

कंपितवानसि =

१८५

न्विशिष्टबलसंपन्नोसि। तथा अहमपि त्वत्प्रसादान्मनुष्येषु मध्ये ओजस्वान्भूयासं॥ इति पंचदशोनु
वाकः॥ ॥ पंचदशे द्वितीयातिग्राह्यग्रहणलक्षणमंत्रावुक्तौ षोडशोनुवाके तृतीयातिग्राह्यस्य ग्रहण
मंत्राउच्येते॥ तयोः पाठस्तु॥ अदृश्रमस्य॰ भूयासमिति। अस्य केतवः प्रज्ञालक्षणा रश्मयः किरणा सूर्यस्य र
श्मयः॥ तत्र दृष्टांतः भ्राजंतोग्नयइव। जनाननु सर्वान्प्राणिनोनुगताविअदृश्रं विशेषेण दृश्यंते। दृशिर्धातोः छांदसं रूपं। भ्राजंतो
मिति॥ हे ग्रह त्वां गृह्णामि। लं तोगम्ब गन्यायथाजनानुगा। ता अदृश्यंतत दलभ्राजे भ्राजंतइति भ्राड्जनस्मै सूर्याय हे ग्रह त्वां गृह्णामि
भ्राजे सूर्याय त्वां सादयामि वा हे भ्राजस्वन्सूर्य त्वं देवेषु मध्ये यथा भ्राजस्वान् भ्राजिष्ठोसि। तथा अहम
मनुष्येषु मध्ये भ्राजस्वान्भूयासं। अन्यत्स्पष्टं॥ इति षोडशोनुवाकः॥ ॥ षोडशोनुवाके तृतीयाति
ग्राह्यग्रहणलक्षणमंत्राउक्तौ। सप्तदशे गवामयनाख्यस्य संवत्सरसत्रस्य विषुवन्नामके मध्य
मेहनि सौर्यपशुपालं तु नाद्दूर्ध्वमतिग्राह्यग्रहणमुच्यते॥ कात्या॰॥ सौर्यउपालुभ्यउदुत्यमिति। अ
स्य ग्रहणमिति॥ पाठस्तु॥ उदुत्यं जातवेदसं॰ सूर्याय त्वा भ्राजइति। सर्वं तं प्रसिद्धं। जातवेदसं। जातानां
वेदितारं जातप्रज्ञं वा देवं देवनशीलं देवं गुणविशिष्टं महान्तं नावं सूर्यं केतवः प्रज्ञापकारश्मयः अश्वा
इवउद्वहंति उदयाचलादुन्नमयंति। किमर्थं विश्वाय च सर्वेषां च दृशे विश्वस्य सर्वस्य जगतो दृशे
दर्शनाय। प्रसिद्धमन्यत्॥ अथ लक्षणमंत्रपाठः॥ सूर्य भ्राजस्वन्॰ भूयासमिति। अतिग्राह्यो

तत्रैषि ध्रुवलक्षणमंत्रस्यास्य पदगाम्नातत्वात्तद्दशापनेन मंत्रेण लक्षणं प्राप्तं। तथापि कात्यायनेन लक्ष
सुवर्णमिति लक्षणस्य निषिद्धत्वान्मंत्रान्तरं तत्रोक्तविपर्ययपरिहाराय होमानंतरमयं मंत्रो जप्य इत्यभिप्रा
यः॥ अक्षरार्थस्तु पूर्ववज्ज्ञेयः॥ ॥इति सप्तदशोनुवाकः॥ ॥सप्तदशेपि ध्रुवस्तोत्रे यद्यत्रिग्राह्यादि
ग्रहणलक्षणमंत्र उक्तो। अष्टादशे तत्रैव विकल्पितो ग्रहणलक्षणमंत्रावाम्नातौ। तयोः पाठस्तु॥ चित्रं देवानां॰
नूयासमिति। चित्रं रक्तपीतादिविविधवर्णं देवानां द्योतमानानां रश्मीनामर्कं नीकं सैन्यसदृशं मं उल्कं उदगात्।
कीदृशं मित्रादिदेवोपलक्षितस्य कृत्स्नस्य प्राणिजातस्येंद्रियाधिष्ठातृत्वात् चक्षुस्थानीयं। तन्मंडलस्थः
सूर्यो जगतो जंगमस्य तस्थुषः स्थावरस्य च आत्मा स च लोकत्रयमाप्राः सर्वतः पूरितवान्। उपयामगृहीतो
मीत्यादि व्याख्यातं समानार्थं॥ इत्यष्टादशोनुवाकः॥ ॥अष्टादशे विषुवत्स्तोत्रे याति ग्राह्यस्य विकल्पितो ग्रह
णलक्षणमंत्र उक्तो। गवामयनस्योपांत्ये महाव्रताख्ये हनि ग्राह्य उपसर्वपक्षपालं तनाहुर्ध्वं यो ग्रहो विहितः।
तस्यैव वैकल्पिकग्रहणमंत्रा एकोनविंशत्याद्यनुवाकेषूच्यंते॥ कास्या॰॥ महाव्रतं ग्रहं गृह्णामीति विनइंद्रेति।
वाचस्पतिं विश्वकर्मन्निति चेति॥ प्रथममंत्रपाठस्तु॥ विनइंद्रमृधो॰ विमृधइति। हे इंद्र नोस्माकं मृधः शत्रु १६६
कृतान् संग्रामान् विशेषेण जहि। किंच। अस्मानपि लुंपतन्यतः सेनाभिच्छतः शत्रून् नीचान् न्यक्कृतान् यच्छ पर
तान् कुरु अन्यच्च। यो स्मान् अभिदासति उपक्षयति तं शत्रुं अधरं निकृष्टं तमो नरकं गमय प्रापय विमृधो विशि

इत्युपत्यस्यर्थोतिर्थलिः॥ =

ह संग्रामे वर्तते इंद्राय हे ग्रह त्वां गृह्णामीति शेषः॥ शिष्टं स्पष्टं॥ ॥इत्येकोनविंशोनुवाकः॥ एकोनविंशे महाव्रता
ख्ये हनि विहितस्य ग्रहस्य ग्रहणमंत्र उक्तः। विंशे तत्रैव विकल्पितो द्वितीयो ग्रहणमंत्र उच्यते॥ पाठस्तु॥ वाच
स्पतिं विश्वकर्माणं॰ विश्वकर्मणइति। वाचस्पतिं वाचां पालयितारं विश्वकर्माणं समस्तजगदुत्पत्त्यादि
कर्माणि यस्य स तथोक्तः। तं मनोजुवं जवेन गच्छंतं जवनाम। मनसो जवरिव जवः इव जवो यस्य स मनोजवस्ता
दृशमिंद्रं। वाजे महाव्रतीयलक्षणेन्नविषये अद्यास्मिन्नहनि हुतयेरक्षणाय हुवेम। आह्वयामः। इंद्र
श्च नोस्माकं विश्वानि हवनानि सर्वाण्याह्वानानि [illegible] ध्यानोपलक्षुष
तांपुष्परादाननं साधुसाध्विति से वरता। कीदृश इंद्रः। विश्वशंभूः। विश्वस्य शं सुखमस्माद् भवतीति विश्व
शंभूः। साधुकर्मा समीचीनकर्मा। शिष्टं स्पष्टं॥ इति विंशोनुवाकः॥ ॥विंशे महाव्रताख्येहनि द्वितीयो
वैकल्पिको ग्रहणमंत्र उक्तः। एकविंशे तत्रैव वैकल्पिको ग्रहणमंत्र उच्यते॥ पाठस्तु॥ विश्वकर्मन् हविषा वा
वृधानः॰ विश्वकर्मणइति। हे विश्वकर्मन्निंद्र त्वं महाव्रतीयलक्षणेन हविषा वावृधानः अतिशयेन वर्धमानः
स्वयं संपृथिवीमुत लोकं उतापि द्यां द्युलोकं यजस्व यजनं कुरुष्व। एवंविधं त्वदीयं कर्म दृष्ट्वा अन्ये। तव
सपत्नाः शत्रवोभितः सर्वतो मुह्यंतु संमोहं गच्छंतु। इहास्मिन्कर्मणि अस्माकं समग्रधनसंपन्नः स

रिः पंडितोस्तु। अन्यकृतं। इत्येकविंशोनुवाकः॥ ॥एकविंशेतृतीयोवैकल्पिकग्रहणमंत्रउक्तः। द्वाविंशेतत्रै
नान्योवैकल्पिकोग्रहणमंत्रआम्नातः॥ पाठस्तु॥ विश्वकर्मन्हविषावर्द्धनेन० विश्वकर्मणइति। हेविश्वकर्म
न् त्वं वर्द्धनेनवर्द्धमानेनहविषाइंद्रं त्रातारंजगतोरक्षकंकृतवानसि। किंच। युद्धाद्युद्धः नविद्यतेयुद्धो
यस्यसः अयुध्यः। तमिंद्रमयुध्यं अप्रतिनटमकर्षीदित्यर्थः॥ तस्मैतादृशायेंद्राय० पूर्वीः पूर्वीवशि
ष्ठाद्यो विशः सर्वाः प्रजाः समनमंत। सम्यङ्नताः अयमिंद्रउग्रः उत्कृष्टबलोविहव्यविधेषुकार्येषुआह्व
यतइतिविहव्यः तादृशोयथायेनप्रकारेणअसत्स्यात्तथातस्मैसमनंतेतिसंबंधः। अन्यकृतं॥ एको
नविंशादिषुचतुर्ष्वनुवाकेषुगवामयनस्यापर्यंतेमहाव्रताख्येऽहनिवैकल्पिकग्रहोपादानमंत्राउक्ताः।
त्रयोविंशेऽदाभ्यग्रहस्यमंत्राउच्यंते॥ कात्या०॥ अदाभ्यंगृह्णात्यासिच्यनिग्राभ्याः पात्रेतस्मिंस्त्रूष्णीं
त्रीनंशूनवधायअग्नयेत्वागायत्रछंदसमितिप्रतिमंत्रमुपयामेनः सर्वत्रादिशेषादिति। औदुंबरपा १८७
त्रेवसतीवर्यारव्याअपआनीयतासुस्त्रिस्त्रः सोमलताप्रक्षिप्यअग्नयेत्वेतित्रिभिर्मंत्रैः क्रमेणादाभ्यं
१८७ गृह्णाति। उपयामगृहीतोसीतित्रिष्वपिमंत्रेष्वादावनुषंजनीयं। सर्वत्रशेषत्वादाम्नातस्येतिसूत्रार्थप्रा
यः॥ प्रथममंत्रपाठस्तु॥ उपयामगृहीतोस्यग्नयेत्वागायत्रछंदसंगृह्णामीति। हेसोमत्वंउपयामेनग्र

×द्वितीयमंत्रपाठस्तु। इंद्रायत्वात्रिष्टुप्छंदसंगृह्णामीति। हेग्रहत्रिष्टुप्छंदसंत्वांगृह्णामि॥ २×
हेणगृहीतोसि। हेग्रहअग्नयेअग्निप्रीत्यर्थंगायत्रछंदसंगायत्रीछंदोयस्यग्रहस्यतादृशंत्वांगृह्णामि।
॥तृतीयमंत्रपाठस्तु॥ विश्वेभ्यस्त्वादेवेभ्योजगछंदसंगृह्णामीति॥ जगतीछंदोयस्यग्रहस्यसतादृशंत्वां
ग्रहंगृह्णामि॥ कात्या०॥ आधुनुध्वं पृथुमदइत्युक्त्वेति। एनंमंत्रंउच्चारयेत्। अभिगरइतिमंत्रशेषः॥ हेसोम
हस्तेतैतेतवान्वृष्टुप्छंदः अंगिरः। अंगिरस्त्वमितिद्रष्टृत्यर्थः॥ कात्या०॥ धूआधूनोसंभ्रुत्य वैश्रीणांत्वेतिगच्छन्नाहवनीय
मिति। आहवनीयस्यसमीपंगच्छन्नंशुरदाभ्यग्रहस्थान्युदकानिचालयेत्॥ पाठस्तु॥ वैश्रीणांत्वा०
नागृवित्तस्मैत्वागृह्णामीति। वैश्रीणांप्रजतोमृघस्पोदूरेशेरतइतिवैश्रयोमेघोदरस्थाआपस्तासां
कुकूननानांकुशब्दे। अस्यर्थकुर्वंसः शब्दंकुर्वाणानमंतिप्रह्वीभवंतीतिकुकूननानामेघ्याआपस्ता
सांच। नंदनानांरुदिकल्याणेसुखेचकल्याणकारिण्यः सुखकारिण्योवानंदनाआपस्तासांचामध्येन
मानांमधुवत्स्वादुतमानांएवंभूतानामपांपतनेनिमित्तेहेसोमत्वामाधूनोमि अन्नोरूपेदिवस
स्यरूपेसूर्यस्यरश्मिषुहेसोमत्वामाधूनोमि। हेसोमवषतस्यश्रेष्ठस्यतवककुहंककुमंछंदसोहकाः
रः। ककुभमितिमहन्नामसुपठितंमहद्रूपंयद्वाककुमोदिशोव्याप्यरोचतेदीप्यते। बहन्महान्सोमएव
सोमस्यपुरोगाः पुरोगामीशुक्रस्यशुद्धस्यसोमस्यतवशुक्रस्तेजस्वीआदित्यः पुरोगाः पुरोगामी यस्मा
भासमानत्वसाम्यात्

कुकुभाधार
न्यात्॥

देवं तस्माद्धे सोम ते तदीयं अदाभ्यमनुपहिंसितं आग्रविजागरणशीलं यन्नामास्ति तस्मै त्वां गृह्णामि ॥ का० सा० ॥
तस्मै तदिति जुहोतीति ॥ पाठस्तु ॥ तस्मै ते सोम सोमाय स्वाहेति । हे सोम ताद्दग्ग्राय सोमाय ते तुभ्यं हुतमस्तु ॥
का० सा० ॥ अंश्रन्सोमे निदध्यात्सुरि श्रामितीति प्रतिमंत्रमिति । मंत्रत्रयेणांश्रून् सोमे स्थापयेत् ॥ तत्रप्रथमपा
ठस्तु ॥ उशिक्त्वं देव सोमाग्नेः प्रियं पाथोपीहीति । हे दीप्यमान सोम उशिक्कामयमानस्त्वं अग्नेः प्रियं पाथो
न्नमपीहि प्राप्नुहि ॥ द्वितीयमंत्रपाठस्तु ॥ वशी त्वं देव सोमेंद्रस्य प्रियं पाथोपीहीति । हे दीप्यमान सोम वशी स
न्नमपीहि प्राप्नुहि ॥ तृतीयमंत्रपाठस्तु ॥ अस्मत्सखा त्वं देव सोम विश्वेषां देवानां प्रियं पाथोपीहीति । हे दीप्यमान सोम अस्मत्स
भिंद्रस्य प्रियमन्नं प्राप्नुहि ॥ तृतीयमंत्रपाठस्तु ॥ अस्मत्सखा त्वं देव सोम पाथोपीहीति । हे दीप्यमान सोम अस्मत्स
खा भूतस्त्वं विश्वेषां देवानामभिरुचितमन्नं प्राप्नुहि ॥ इति त्रयोविंशोनुवाकः ॥ वेदार्थस्य प्रकाशेन तमो
हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ इति सायणाचार्येण विरचिते माधवीये वे
दार्थप्रकाशे काण्वसंहिताभाष्येऽष्टमोऽध्यायः ॥ ॥ यस्य निश्वसितं० महेश्वरं ॥ १ ॥ अष्टमेऽध्याये तृतीय
सवनसंबंधिनामादित्यग्रहादीनां षोडश्यतिग्राह्यादीनां ग्रहणं स्यादनंतमंत्राउक्ताः ॥ नवमेऽपांशुंत

यर्यामादीनां पयग्रहाणमवेक्षण मंत्रा दाक्षिण होमादिमंत्रा उच्यंते ॥ ॥ का० सा० ॥ ग्रहानवेक्षेतैयतिय

यर्यामादीनां पयग्रहाणमवेक्षण मंत्रा दाक्षिण होमादिमंत्रा उच्यंते ॥ ॥ का० सा० ॥ ग्रहानवेक्षेतैयतिय
याम्हीतनवकाग्राणोंध्यय प्राणायामेऽदितिप्रतिमंत्रमुपांशुसवनं द्वितीयमाश्विनं षष्ठं शुक्रामंथिनौ युग
पदिति ॥ अयमर्थः ॥ प्रातःप्रियानन्न्रवानानवका इत्यारभ्य प्राणायामदृस्यादिमंत्रान्वान्वयन्प्रतिमंत्रं ग्रहणक्र

पत्स्येतिवा

मेण पांश्वादीन्नुदन्रयेति । उपांशुसवनाख्यग्रावा द्वितीयो भवति । बहिष्पवमानोत्तरकाले प्याश्विनः ष
ष्ठो भवति । शुक्रामंथिनौ द्वौ ग्रहौ मंत्रगतद्विवचनलिंगेन युगपदवेक्षणीयाविति उपांशुग्रहावेक्षणमं
त्रपाठः ॥ प्राणायमे वर्च्चोदा वर्च्चसे पवस्वेति । हे उपांशुग्रह यस्त्वम्मे मदीयाय प्राणाय वर्च्चोदाः । वर्चसो बल
स्य दाता भवसि । स त्वं मदीयाय वर्च्चसे ब्रह्मवर्चसार्थं पवस्व शुद्धो भव ॥ अथोपांशुसवनांतर्यामे द्वावायव
ग्रहावेक्षणमंत्रपाठः ॥ व्यानायमे वर्च्चोदा वर्चसे पवस्व । उदानायमे वर्चोदा वर्चसे पवस्व वाचे मे वर्च्चोदा
वर्चसे पवस्वेति । स्पष्टार्थः ॥ अथ मैत्रावरुणग्रहावेक्षणमंत्रपाठः ॥ क्रतूदक्षाभ्यां मे वर्च्चोदा वर्चसे पवस्वेति । हे मैत्रावरुणग्रह
स्वेति । क्रतुः संकल्पो मदीयः कामस्तस्य समृद्धिर्दक्षः दक्षिणाताभ्यां क्रतूदक्षाभ्यां हे मैत्रावरुण ग्रह
यस्त्वं बलप्रदातासि स त्वं मदीयाय ब्रह्मवर्चसार्थं पूतो भव ॥ अथाश्विनावेक्षणमंत्रपाठः ॥ श्रोत्राय मे वर्च्चो
दा वर्च्चसे पवस्वेति । स्पष्टार्थः ॥ अथ शुक्रामंथिग्रहावेक्षणमंत्रपाठः ॥ चक्षुर्भ्यां मे वर्च्चोदसौ वर्च्चसे पवेथा
मिति । हे शुक्रामंथिग्रहौ यो युवां मदीयाभ्यां चक्षुर्भ्यां दीप्तिप्रदातारौ स्थः तौ युवां मदीय ब्रह्मवर्चसार्थं
शुद्धौ भवतं ॥ अथाग्रयणोक्थ्यध्रुवग्रहावेक्षणमंत्रपाठः ॥ आत्मने मे वर्च्चोदा व० स्वा युधे मे वर्च्चोदा वर्चसे प

चस्वेति॥स्पष्टं॥का०स्या०॥एतन्नदाहवनीयोत्वविम्वास्योमद्दतीति।त्वराद्येषु०गपद्द्रव्यस्याकर्षणार्थः॥वा
वयन्नवेदैतेसनुवर्त्तते।एतस्मदाहवनीयाख्योपवमानग्रहावनेनमंत्रेणदद्रयेदित्यर्थः॥पाठस्तु॥
विम्वास्योमिप्रजास्योवर्चोदिसोवर्चसिपवेथामिति।हेएतन्नदाहवनीयोसर्वास्यःप्रजास्योवर्चोदिसोदि
मित्र६दारतारोयुवांमदीयायब्रह्मवर्चसार्थंपवेथांप्रवर्त्तेथां॥का०स्या०॥कोसीतिद्रोणकलशमभिमृशे
येदिस्यर्थःतिशेषः॥पाठस्तु॥कोसिकतमो०नातीतृपामेति॥हेद्रोणकलशत्वंकःप्रजापतिरसि।कतमो
सिअन्यातिशायेनप्रजापतितमोसि।कस्यप्रजापतेरनन्यरूतोसि।अतएवतवकःप्रजापतिरिति।ना
मासियस्यद्रोणकलशस्वरूपप्रजापतेस्तेतवनामनामधेयममन्नहि।वयंजानीमः।द्रोणक०लशायं
त्वांसोमेनातीतृपाम।तर्पितवंतः।त्वंतादृशोद्रोणकलशोसीत्यर्थः॥का०स्या०॥भूर्भुवःस्वरितिजपतीति।उपां
म्वादिग्रहावेक्षणानंतरंभूर्भुवःस्वरितिमंत्रंजपेत्॥पाठस्तु॥भूर्भुवःस्वःसुप्रजाःप्रजयाभूयासं।सु
वीरोवीरैःसुपोषःपोषैरिति॥अयंमंत्रस्तृतीयेध्यायेव्याख्यातइति॥प्रथमोनुवाकः॥प्रथमेनुवा
केउपांम्वादिग्रहावेक्षणमंत्राउक्ताः।द्वितीयेदाक्षिणहोमादिमंत्राउच्यंते॥का०स्या०॥द्रालाद्यर्थेदाक्षिणा
होमोवासःप्रबद्धंहिरण्यहवन्यामवधायचतुर्गृहीतंजुहुयामिति।वासस्त्रिप्रबद्धंसुवर्णस्रुचिचतुर्गृही

नाड्यायोप्रक्षिप्योदुत्यमित्यनेनद्रालामुखीयेग्नौदाक्षिणहोमंजुहुयात्॥पाठस्तु॥उदुत्यंजातवेदसं०सू
र्यमिति।केतवोरश्मयस्त्वांजातवेदसंतमग्निंसदृशंसूर्यमुद्वहंतिऊर्ध्वंदेशंगमयंति।किमर्थंविश्वा
यभूतस्यजगतःदृशेद्रष्टुं॥का०स्या०॥चित्रंदेवानामितिद्वितीयामितिउदुत्यमितियथाप्रथमाहुतिःद्राला
मुखीयेहुतातदपेक्षयेयाहुतिर्द्वितीयातांतस्मिन्नेवाग्नौजुहुयादितिशेषः॥पाठस्तु॥चित्रंदेवानां०
तस्थुषश्चेति।चित्रंरक्तश्वेतादिविविधवर्णदेवानांरश्मीनांअनीकंसैन्यसदृशंमंडलंउदगात्उद्गच्छत्।
कीदृशंमित्रादिदेवोपलक्षितस्यचक्षुस्तस्यप्राणिजातस्येंद्रियाधिष्ठात्वाच्चक्षुःस्थानीयंतन्मंडलस्य
सूर्योजगतोजंगमस्यतस्थुषःस्थावरस्यचात्मासन्नलोकत्रयमाप्राःसर्वतःपूरितवान्॥का
स्या०॥आग्नीध्रेग्नेनयेतीति।आग्नीध्रमंडपस्थेग्नौजुहुयादितिशेषः॥पाठस्तु॥अग्नेनयसुपथा०
विधेमेति।हेअग्नेरायेपारलौकिकधनप्राप्त्यर्थमस्मान्सुपथाशोभनेनमार्गेणनयप्रापय।देवत्वंविश्वा
निवयुनानिसर्वान्मार्गान्विद्वान्जानासि।जुहुराणंकुटिलमेनःपापमस्मत्तोयुयोधि।वियोजय।तेतुभ्यं
भूयिष्ठांनमउक्तिंनमस्कारोक्तिंविधेमकुर्याम॥का०स्या०॥अयन्नइध्मपरामश्वंयुक्तंदद्यात्।अयुक्तंवेति।
रथादोनियुक्तंकेवलंवाश्वंवायदिदक्षिणात्वेनदद्यात्अयन्नइध्मपरांद्वितीयामाहुतिमाग्नीध्रेजुहुयात्॥

॥पाठस्तु॥ अयन्नो अग्नि० स्वाहेति। अयमग्निर्नो अस्माकं वरिवोधनं धनं कृणोतु करोतु। अयमेवाग्निर्मृधः संग्रा
मान् पुरः पुरतः प्रभिंदन् वैरिणो विदारयन्नेतु गच्छतु। अयमेवाग्निः वाजान् अन्नानि शत्रुसंबंधीनि जयतु
स्ववशं कृत्वा तान्यस्मभ्यं ददात्वित्यर्थः। वाजसातौ संग्रामे अयमेवाग्निर्जर्हृषाणः अत्यंतं हृष्यन् शत्रून् ज
यतु स्वाहा हुतमस्तु॥ कात्या०॥ सहिरण्यो यजमानं आग्नीध्राद्बहिः पूर्वे तिष्ठन्नभिमंत्रयते। दक्षिणा बहिर्वे
दि तिष्ठन्नभिमंत्रयते। दक्षिणा बहिर्वेदि तिष्ठन्त्यतीति दक्षिणतो रूपेण वदतीति॥ हिरण्यं धारयन्यज
मानः प्राग्वंशस्य पुरस्तात्स्थित्वा महावेदेर्दक्षिणतोपि बहिः स्थिता दक्षिणा धेनुः अभिमंत्रयेत्॥ पाठस्तु॥
रूपेण वो० चंद्रं दक्षिणा इति॥ हे दक्षिणाः रूपेणानेनोपलक्षिता हिरण्येन सह या वेदेर्दक्षिणभागे व्यवस्थिता तां यु
ष्माकं रूपमस्यागा माभिमुख्येन प्राप्नोति। विश्वं वेत्तीति विदयतीति वा विश्ववेदाः सर्वज्ञः तुथनामको दे
वो युष्मान् ऋत्विजः ऋजतुं ऋत्विजान् यथार्हं विभागं करोतु। ऋतस्य प्रस्तुतस्य यज्ञस्य पथा मार्गेण चंद्रं द

१९०

क्षिणाः। चंद्रं हिरण्यं दक्षिणार्थं प्रियान इयं यजमानस्य हस्तगतं यासां दक्षिणानां तां सूर्यं प्रेतगच्छत॥
कात्या०॥ विस्वर्दृशीति दक्षिणात् इति सदो गच्छेति शेषः॥ पाठस्तु॥ वि स्वः पश्य व्यन्तरिक्षमिति। हे सदस्य
स्वः स्वर्गं देवयानमार्गं विशेषं पश्य। अंतरिक्षं अंतरिक्षलोकं पितृयानमार्गं विपश्य। कात्या०॥ यतस्व

१९०

यद्वा मातापितामहपितरो तौ श्रोत्रियौ विद्येते यस्यासौ पितृमान् तं तमित्यर्थः॥=

यतस्व सदस्यैरिति सदस्यानिति शेषः। तेनेति शेषः। सदसि सभायां साधुः सदस्यास्तैः सौ दक्षिणाभिः प
रितैः सह यतस्व यज्ञं प्रतिप्रयत्नं कुरु॥ कात्या०॥ ब्राह्मणमद्य स्यामग्नीध्रगमनमिति। अग्नीध्रमंडपस्थितेभ्य ऋत्विजं ग
च्छेत्॥ पाठस्तु॥ ब्राह्मणमद्य० सुधातुदक्षिणमिति। अष्टवर्षमारभ्य षोडशवर्षपर्यंतं शिशुत्वं तीमाता यस्य
स तं मातृमंतं तमित्यर्थाद्दक्षिणाहूतं। श्रोत्रियः पिता विद्यते यस्य स पितृमान् तादृशं यस्य पितामहस्त्र न तयो
विख्याताः श्रोत्रियाः सप्तेतमस्य स पावियं ऋषिं मंत्रद्रष्टारं आर्षेयं ज्ञायाप्रवरेश्च विख्यातं शोभनो धातुः स
वर्धातुस्य उत्तमं हिरण्यं दक्षिणा यस्य सोसुधातुदक्षिणस्तमेवं गुणविशिष्टं ब्राह्मणमद्यास्मिन्दिने विदेयं विद्वलाते=
लाभेय। कात्या०॥ उपविश्य हिरण्यमस्मै ददात्यस्मद्दातेतीति। यजमानः स्वयमाग्नीध्रमंडपमुपवि
श्य तत्रोपविष्टायास्मा आग्नीध्राय सदस्याय च हिरण्यं दद्यात्॥ पाठस्तु॥ अस्मद्राता० मविशेति। हे
दक्षिणे त्वमस्माद्दाता अस्मा हिरण्यदाता दत्ता सती देवत्रा देवान् ऋत्विग्रूपदेवान् व्येतु तेषां त्वभिसंपाद्य य
तफलं साधयंती प्रदातारं प्रकर्षेण दक्षिणा याः दातारं यजमानं आविश॥ कात्या०॥ अग्नये त्वेति हि
रण्यं प्रतिगृह्णीत इति। आग्नीध्र सदस्यावुभौ यजमानेन दत्तं हिरण्यमनेन प्रतिगृह्णीयातां॥ पाठस्तु॥
अग्नये त्वा मह्यं वरुणो ददातु सोमृतत्वमशीयात्। आयुर्दात्र एधि मयो मह्यं प्रतिग्रहीत्रे इति॥ हे दक्षिणे हि

हिरण्यरूपां त्वां अग्नेये अग्निरूपाय मह्यं वरुणो ददातु दद्यात् स प्रतिगृह्णन्न मृत्वं विना द्वारा हि सं अरया प्राप्नुयात् । दक्षिणायाः प्रदात्रे यजमानाय आयुः ज्ञातसंवत्सरपर्यन्तं दीर्घायुष्यमेधि । प्रतिग्रहीत्रे मह्यं मयः सुखमेधि त्वं ॥ कात्या० ॥ रुद्राय त्वेति गामिति । प्रतिगृह्णीयादिति शेषः ॥ पाठस्तु ॥ रुद्राय त्वा० प्रतिग्रहीत्र इति । हे गौः त्वां रुद्ररूपाय मह्यं वरुणो ददातु । स प्रतिगृहीता अमृतत्वं प्राप्नुयात् । दात्रे यजमानाय प्राणः प्राणरूपं एधि । तव प्रतिग्रहीत्रे मह्यं मयाः सु सुखमेधि ॥ कात्या० ॥ बृहस्पतये त्वेति वास इति । प्रतिगृह्णीयादिति शेषः ॥ पाठस्तु ॥ बृहस्पतये त्वा० प्रतिग्रहीत्र इति । हे वासः त्वां बृहस्पतिरूपाय मह्यं वरुणो ददातु । सोऽमृतत्वं अयात् । प्राप्नुयात् । त्वगिन्द्रियं यजमानाय तव प्रतिग्रहीत्रे मह्यं वयः सुखं त्वं ॥ कात्या० ॥ यमाय त्वेत्यश्वमिति प्रतिगृह्णीयात् । केचिदश्वस्थाने अन्नमिच्छन्ति ॥ पाठस्तु ॥ यमाय त्वा मह्यं० ग्रहीत्र इति । यमरूपाय मह्यं अश्वमन्नं वा त्वां वरुणेन ददातु । यो अनेन विधिना प्रतिगृह्णाति सो अमृतत्वमयात् प्राप्नुयात् । वयोऽन्नमश्वो वा दात्रे यजमानाय एधि त्वं । प्रतिग्रहीत्रे मह्यं सुखं भव ॥ कात्या० ॥ को दादिति सर्वत्र यदि द्रुतो मंत्रवचनमिति । हिरण्य गवादिव्यतिरिक्तमन्यद्रव्यं प्रतिजिघृक्षुः को दादित्यनेन मंत्रेण प्रतिगृह्णीयात् ॥ पाठस्तु ॥ को दात् कस्मा० समुद्रामहा इति । दातुर्दानाभिमानाभावाय प्रतिग्रहदोषाभावाय च दातृप्रतिग्र

१९१

१९२

हीतारौ देहेन्द्रियात्मादिसंघातं विवेचयतः । तत्र कः कस्मा इति प्रश्नद्वयं । तयोरुत्तरं । कामः कामाये ति । ना हं प्रतिग्रहीता न त्वं दाता किंतु हे दात स्तव कामः कामनाभिमानि देव एव कामाय मदीयाय कामनाभिमानि देवाये वा ह्यात् । दत्तवान् । तदेव स्पष्टयति । कामो दाते त्यादिना । यत एवमतो हे काम एतद्दीयमानं द्रव्यं ते तवैव । हे काम वयं तु तव संबंधिना सत्ता विद्यमानेन योगजातेन समुद्रामहे मुदा महि ॥ इति द्वितीयो नु वाकः ॥ द्वितीये दाक्षिणहोमादि मंत्रा उक्ताः । तृतीयेनुवाके समिष्टयजुराख्यो होमो निरूप्यते ॥ कात्या० ॥ समिद्धो अग्निरिति नव समिष्टयजूंषि प्रति मंत्रमिति । समिद्ध इत्यादिभिर्नवभिर्मंत्रैः समिष्टयजुराख्यान वाहुतीर्जुहुयात् ॥ तत्र प्रथमं मंत्रपाठः ॥ समिद्धो अग्निर्मनसा० यज्ञियाभ्यामिति । हे इन्द्र मनुष्यप्रयुक्ते न मनसा नो स्माभिः स्तुतिलक्षणाभिर्वाग्भिर्गवादिभिर्वसिंन्नेषि संनय संयोजय । हे मघवन् धियाऽग्निष्टिधनसंपन्ने ऽस्माभिः पठितेर्हव्यं मंत्रैः संयोजय स्वस्त्या क्षेमेण संयोजय ब्राह्मणा वेदेनार्थज्ञानसहितेन देवकृतं देवार्थं कर्म यदस्ति तेन संयोजय । यज्ञियानां यज्ञसंबंधिनां देवानां सुमतौ सुमत्या अनुग्रहबुद्ध्या संयोजय ॥ अथ द्वितीयः ॥ संवर्चसा पयसा० यद्विलिष्टमिति । वर्चसा ब्रह्मवर्चसेन सम गन्महि वयं संगताः स्याम । तथा पयसा क्षीरादीरसेन समगन्महि सम् अनुवर्तेति । तन्वा भिरनुष्ठान दानैः शरीरावयवैः सम

गन्महि। शिवेन सम्मीचीनेन कर्मश्रद्धायुक्तेन मनसा संगन्महि किं वसु दत्र स्त्वष्टा स्तो कन दानीय तस्त्वष्ट
नामको देवो रायो धनानि विदधातु संपादयतु। तनुः शरीरस्यास्मदीयस्य यद्विलिष्टं विच्छेदेन न्यूनमंगं
यदस्ति तदितिन्रोषः। अनुमार्ष्टु न्यूनत्वपरीहारेणानुकूलं करोतु। यथास्तु॥ अथ तृतीयः॥ धातारातिः०
दध्याद्विति। धाता सविता प्रजापतिरग्निस्त्वष्टा विष्णुश्चैते षड्देवा नोऽस्माकमिदं हविर्जुषंताम्। तांसे वे तोकी
दृशा धाता रातिर्दानस्त्रील: । कीदृशः प्रजापतिर्निधिपाः महापद्मं खर्वपद्मादिनामकानां नवानां निधीना
पालयिता। कीदृशोऽग्निर्देवो दीप्यमानः। सोऽयं देवगणो यजमानसंबंधिन्या प्रजया सह संरराणः सम्य
ग्रममाणो यजमानाय द्रविणं ददातु। प्रयच्छतु॥ अथ चतुर्थः॥ सुगा वो देवाः सदनेति। हे देवाः ये रुवंत
इदं सवनमिमं यज्ञं जुषाणाः सेवमाना आलग्नमा आगताः॥ तेषां वो युष्माकं अस्मिन्यज्ञे सुगा सुगमनी
यानि सदनानि स्थानानि अकर्म वयमकर्म। हे वसवो निवासहेतवो हविर्वाऽभिर्भरमाणो पोषि
यंतो वहमाना रथादिभिर्वहनयंतो यूयं अस्मे अस्मासु वसूनि धनानि धत्त। स्थापयत॥ अथ पंचमः॥
यां आवह उशतो० निषदतेति। हे अग्ने देव उशतः हवींषि कामयमानान्यान्देवान् आवह आहूतवान
सि। तान्देवान्स्वे स्वकीये सधस्थे सह निवासस्थाने प्रेरय। एवं कृता हे देवा यूयं जक्षिवांसः सव

१९२

१९२

नीयपुरोडाशादिकं भक्षितवंतः पपिवांसः सोमपानं कृतवंतश्च विश्वे सर्वे यूयं अनुत्यज्ञस्य समाप्त्यनंतरे असुं हि
रिण्यगर्भं प्राणलक्षणं वायुं वायुमंडलमित्यर्थः। घर्मं आदित्यमंडलं वा स्वः द्युलोकं वा आतिष्ठत आगच्छत यत्र
स्थानस्य त्रय त्रयस्त्रयो गृहाः संति तानि स्थानानि तिष्ठतेत्यर्थः॥ अथ षष्ठः॥ वयं हि त्वा प्रयति० विद्वानिति। हे अग्ने
हि यस्मात्कारणात् वयं हि अस्मिन्दिने अस्मिन्यज्ञे प्रयति प्रवर्त्तमाने सति होतारं देवानामाह्वातारं होमनिष्पा
दकं वा त्वां वयमवृणीमहि वृतवंतः तस्मात्कारणात् यथैवं समृद्धय ध्यानवति तथा अयाः अयाड् इष्टवानसि।
यष्टं कारितवानसीत्यर्थः। उतापि च ऋत्यकं समृद्धं प्रजानन्न वैरावृत्त यज्ञमिष्टाः। विघ्नशांतिमकार्षीः अ
तस्त्वं विद्वान् यज्ञं उपयाहि॥ अथ सप्तमः॥ देवा गातुविदो० धाइति। कैगैरैशब्दे इति धातुः। गीयते ना
नाविधैर्वैदिकशब्दैः प्रतिपाद्यत इति गातुर्यज्ञस्तं विदंति जानंतीति गातुविदस्तादृशा हे देवा गातुमित्वा सम
द्वीयो यज्ञः प्रवृत्त इति विदित्वा। एति धातोर्गत्यर्थस्य ज्ञानार्थत्वमुपवर्ण्यते। गातुमित यज्ञं गच्छत। यद्वा गातु
रितिको मार्गः अस्मदीयेन यज्ञेन तुष्टाः संतः स्वकीयं मार्गं गच्छत। हे मनसस्पते यच्छुं अस्मदीयस्य मनसः
प्रेरणेन पालक परमेश्वर इमं मनुष्ठितं यज्ञं स्वाहा त्वद्धस्ते ददामि त्वं च वाते वायुरूपे देवे धाः धेहि स्थापय।
॥ अथाष्टम॥ यज्ञ यज्ञं गच्छ० स्वाहेति। हे यज्ञ स्वप्रतिष्ठार्थं यज्ञनामकं विष्णुं गच्छ। फलप्रदानार्थं यजमानं

ऋभुवन्नेवेति कथिता=

चिकीर्षन्=

तिं यजमानं गच्छ स्वनिष्पत्त्यर्थं स्वां योनिं स्वकारणभूतां वायोः क्रियाः गच्छ । स्वाहा हुतमस्तु ॥ अथ नवमः ॥
खतेयज्ञो यज्ञपते० स्वाहेति । हे यजमान एषो नुष्ठीयमानस्तत्सदीयो यज्ञः सूक्तवाकस्तोत्रैः सहितः सर्व
वीरः सोमपशुसवनीयचरुपुरोडाशादी राड्युक्तो यंते । तादृशाः सर्ववीरा यस्य स तथोक्तः । एवंविधं तं
त्वं यज्ञं जुषस्व सेवस्व स्वाहा सुहुतमस्तु ॥ इति नवमोनुवाकः ॥ ॥ दशमेनुवाके समिष्टयजुर्होमो
भिहितः । चतुर्थे विनियोगो वर्ण्यते ॥ का० सू० ॥ कृष्णविषाणमेखले चात्वाले प्रास्यति माहिर्भूरितीति ।
यजमानहस्ते बद्धो कृष्णविषाणा या च मध्ये बद्धा शरमयी मेखला ते विस्रस्य चात्वाले प्रक्षिपेत् ॥
पाठस्तु ॥ मा हिर्भूर्मा पृदाकुरिति । अहिः सर्पो मा भूर्मा भूयाः पृदाकुः अजगरः सर्पविशेषः सोपि मा
भूयाः ॥ का० सू० ॥ उरुं हीति वाचयतीति । अवभृथार्थं जलं गमिष्युरध्वर्युर्यजमानं वाचयेत् ॥ पाठ ११३
स्तु ॥ उरुं हि राजा वरुण० विद्धि दिति । उरुं ब्द्वे च यारिणे वरुण एव राजा सूर्याय सूर्यस्य न्वेत
वे अनुक्रमेण गंतुम् अपदे निरालंबे तरिक्षे उरुं पंथां विस्तीर्णं मार्गं हि यस्माच्चकार तस्मादस्माक
११२ मपि पादाप्रतिधातवे पादं प्रक्षेप्तुं मार्गं स्वकः करोतु । उलापि च यः शत्रुरपवक्ता निंदकः यश्च हृद
याविधो हृदयोपमानं लक्षितं शरीरं ताडयति । चिदर्थः समुच्चये सोपि प्रतिबंधमस्त्रमार्गं करो
अन्वकृ गमनायेति शाखांतरं =

त्विस्यर्थः ॥ का० सू० ॥ नमो वरुणायेति वाचयत्यपोवक्रामयन्निति । अवभृथस्नानार्थाः अपः प्रवेशयन्
यजमानं वाचयेत् ॥ पाठस्तु ॥ नमो वरुणायाभिष्ठितो वरुणस्य पाश इति । वरुणस्य पाशः अभिष्ठित आ
क्रांतस्तस्मै वरुणाय च नमस्कारोस्त्विति शेषः ॥ का० सू० ॥ प्रास्य समिधं चतुर्गृहीतेनाज्येनाग्नेरनीकमि
तीति । अप्सु काचित्समिधं प्रक्षिप्य चतुर्गृहीतेनाज्येन तामभिजुहुयात् ॥ पाठस्तु ॥ अग्नेरनीक० स्वाहे
ति ॥ अग्नेरनीकं मुखं अपः उदकान्या विवेश मुखेन विवेश । हे अपान्नपात् एतन्नामकाग्ने दमे दमे तव — दमे दमे इति गृहनाम =
[illegible] हे असुर्यं असुरैः कृतं यज्ञविघ्नं प्रतिरक्षन् प्रतिनिवर्तयन् यज्ञं पालयन् समिधं समिधं साध
नं समित्काष्ठं यक्षि संगतं कुरु । ते तव जिह्वा घृतात्रु । घृतं प्रति उच्चरण्यत् [illegible] स्वाहा सुहुतमस्तु ॥
का० सू० ॥ समुद्रे ते ऋजीषकुंभं प्लावयतीति । गतसारं सोमऋजीषं तेन पूर्णं कुंभमप्सु प्रक्षिपेत् ॥ पाठस्तु ॥
समुद्रे ते हृदयं० स्वाहेति ॥ हे सोम ते तव हृदयं समुद्रे समुद्रसमानास्वप्सु अंतर्यामि प्रतितिष्ठत्विति
शेषः । ओषधीराप ओषधयस्त्वां सम्यग्विशंतु । उतापि चापो विशंतु । हे यज्ञपते यज्ञस्य पालक यज्ञस्य य
जनीयं त्वां सूक्तोक्तो नमोवचनोच्चारणे नमोवाके नमस्कारवचनेन विधेम स्थापयामः ॥ य
स्मादेवं तस्मात्स्वाहा सुहुतमस्तु ॥ का० सू० ॥ देवीराप इति विसृज्योपतिष्ठत इति । ऋजीषं विसृज्योप

१९४

स्थानं कुर्यात् ॥ पाठस्तु ॥ देवीरापएष वोगर्भस्तं० ग्रं चवक्षीति। देवीः हे आपो देव्यः वः युष्माकं एष सोमो गर्भस्था-
नीयस्तेतादग्रंसोमं सुप्रीतं प्रोत्र न प्रीति युक्तं सुभृतं सुपुष्टं बिभृत धारयत। लेदीयमानसोमतेतवएखो
वस्यलोकं स्थानं तत्रावस्थितस्त्वं परिसमंतात् ग्रं सुखं वक्षि अस्मान्प्रति वह प्रापय अस्मत्तः सर्वान्सु
खं प्रापय चशब्द इतरेतरसमुच्चयार्थः ॥ कात्या० ॥ अवभृथेति मज्जयतीति। यजमानं स्नापयेत् ॥ पाठस्तु ॥
अवभृथ निचुंपुण० देवरिषस्याहीति। अवाचीनानि पात्राणि जलमध्ये क्षिप्यंते यस्मिन्यविशेषे सोयम
वभृथः हे अवभृथत्वं निचुंपुण नितरां मन्दं गच्छ। चुपिमंदायां गता विति धातुः निचेरुरसि नितरां चरण
शीलोसि तथाच अनिचुंपुण नितरां मंदं गच्छ। किं प्रयोजनं निमित्तं तदुच्यते। देवैर्द्योतनात्मकैरस्मदीयैरिं
द्रियैर्देवकृतं हविस्वामिषु देवेषु कृतमेनः पापं यदस्ति तदवायासिषम स्मिन्जले हे मवनीति वा न
स्मि तथा मर्त्यैर्मनुष्यैरस्मत्सहायभूतैः ऋत्विग्भिर्मर्त्यकृतं मर्त्येषु मनुष्येषु यज्ञदर्शनार्थमागतेषु कृ
तमवज्ञारूपं यदेनोस्ति तदप्यहमवायासिषमित्यनुवर्तते। इदमस्मात् परिहृत्य कर्मेणोयथावान

१९४

दशमास्यः दशमासकालं वर्धितस्तदवयं गर्भः। =१

नमाप्नोति। तथाहे यज्ञ मं दंगच्छेत्यभिप्रायः। हे देव वरुण धारय यजस्तं पुरावाणः। रादानइति धातुः। बहुविध विरुद्ध
फलदायिनो रिषाः वधा साहि पालय। रिषतिर्हिंसार्थः। विरुद्धफलदायी वधस्त्वत्प्रसादादस्माकं मा भूदित्य
र्थः। ॥ कात्या० ॥ आहवनीयसमिदाधानं देवानां च समिदसीति। स्नानानंतरमाहवनीयसमीपं गत्वा तस्मिन
र्थे ॥ ... ॥ आहवनीयसमिदाधानं देवानां समिदसीति।

न्समिधमादध्यात्। देवानां संबंधिनी समिदिंधनमसि ॥ ॥ इति चतुर्थोनुवाकः ॥ चतुर्थेव भृथो निरूपि
तः। अनुबंध्याय दि गर्भिणी स्यात् तत्रप्रायश्चित्तिः पंचमेनुवाके निरूप्यते ॥ कात्या० ॥ निरूह्यमाणं गर्भ
मभिमंत्रयेत एजतु दशमास्य इत्यनीति। यद्यनुबंध्या वशा गर्भिणी तदा विशसनकाले मातुः सकाशात्स
थ क्रियमाणं गर्भमभिमंत्रयेत ॥ पाठस्तु ॥ एजतु दशमास्यो० जरायुणा सहेति। जरायुर्गर्भवेष्टनं तेन
सह रतलु कंपनं चलनं करोतु। एज कंपन इति धातुः। यथायेन प्रकारेणायं वायुरेजति चलति यथा समु
द्र एजति एवमयं दशमास्यः संपूर्णावयवो गर्भो जरायुणा सह अस्त्वदनिर्गच्छतु ॥ कात्या० ॥ अवदाना
न्यनुजुहोति यस्यास्त इति। वशावदानानि प्रथमं हुत्वा पश्चात् गर्भं जुहुयात् ॥ पाठस्तु ॥ यस्यास्ते यज्ञियो० स्वाहे
ति। यस्या वशाया अनुबंध्याया गर्भो यज्ञियो यज्ञार्हः यस्यास्तवयोनिर्हिरण्मयी हिरण्मयी। तादृशी त्वां

तेनासंगमयामीति शेषः। अस्याः गर्भस्यांगानि अकृतानि अहुतानि अवर्द्धितानि तं गर्भं मात्रा अनुबंध्यात्
क्षणया जनन्या समंगीगमं संगमयामि स्वाहेति होमार्थः॥ कात्या०॥ प्रतिप्रस्थाता प्रचरण्यां सर्वमेव
चतिस्विष्टकृतमनुजुहोति पुरुदस्म इतीति। प्रचरण्यां स्रुचि प्रतिप्रस्थाता गर्भरसं सर्वमेव दाप्येऽ
ध्वर्युणा स्विष्टकृद्धोमे कृते सति जुहुयात्॥ पाठस्तु॥ पुरुदस्मो विषुरूप० स्वाहेति। इंदुः क्लेदनरूपः
सोमस्य द्रोण ने मे महिमानं महत्त्वमानं अव्यक्ती करोतु। कीदृशः पुरुदस्मो बहुदानयुक्तः विषुरूपो बहुरूपः अं
तरुदरे वस्थितः धीरो मेधावी इत्थं रूपं महिमानं मानं ने स्यर्थः। भुवनानि भूतजातान्यनुप्रथं तां वक्त्रा
या वगर्भं प्रतं कुर्वतु। इयं वशा चतुष्पदी सती कथमेकपद्यादिर्निरूप्यते उच्यते। यदा वशा संबंधिन्यां व

अंगहोमस्त्व
दा=

पायां जुहुयात्। तदा एकपदी यदा द्विपदी। पदोय होमः कृतस्तदा त्रिपदी यदा पत्नीसंयाजे जुहुयात्। तदा
चतुष्पदी चतुर्भिः पदैर्युक्तावा। एवं स्वपादे गर्भसंबंधिनिस्वपादे रष्टापदी। एवं कृतां वशां गणयित्वा

अनुत्रधतामिति स्वाहा संबंधः स्वाहा स्वाहा हुतमस्तु॥ कात्या०॥ समिष्टयजुरंते तदा शामित्रएव जुहुयात्
निष्कमरुतः स्वाहा कृसेति। यदि यजमानेः शामिद्धि जीयात्। तदा समिष्टयजुर्होमानंतरं शामित्रे

ग्नावेव गर्भं जुहुयात्। मंत्रांते स्वाहा। कारोपिनकर्त्तव्य इति॥ पाठस्तु॥ मरुतो यस्य० जनइति। हे देवादि

वो विमहसः द्युलोकस्य संबंधिना विशिष्टेन महसा तेजसा युक्ता हे मरुतो यंयस्य यजमानस्य क्षयेयस्य गृ
हे। पाथपानं कुरुथ। पापानइति स्यछांदसं रूपं हि यस्मादेवं तस्मात्सयजमानो रक्षो भवेन। सुगोपातमः
सुगुप्ततमो भवति। युष्मत्कृतानां नक्षय मस्ती सर्थः॥ कात्या०॥ मही द्यौरिति अंगारैरभ्यूहतीति। शामित्रे प्र
क्षिप्तं गर्भमंगारैः प्रच्छादयेत्॥ पाठस्तु॥ मही द्यौः पृथिवी० भरीमभिरिति। मही महती द्यौर्द्युलोकः पृथिवी
भूलोकश्च नोस्मदीयमिमं यज्ञं मिमिक्षतां सिंचेतां। भरीमभिर्भरणैर्हिरण्यधान्यादिभिः स्वैः स्वैरंगैर्नो
स्मदीयं गृहं पिपृतां संपूरयतु॥ इति पंचमोनुवाकः॥ ॥ पंचमेऽनुबंध्यपशोर्गर्भे सति प्रायश्चित्तमंत्रा
उक्ताः। षष्ठे त्वहर्गणसंबंधिनो मंत्रा उच्यंते॥ कात्या०॥ द्रोणकलशमेनामा घ्रापयस्वाजिघ्रेतीति। गर्गत्रिरा
त्रे गोसहस्रं दक्षिणा तत्र सहस्रसंख्यापूरणी रोहिणी धेनुस्तां द्रोणकलशमाघ्रापयेत्॥ पाठस्तु॥ आ
जिघ्रकलशं० रयिरिति। महीतिगो नाम। हे महि हे धेनो त्वं कलशं द्रोणकलशं स्वंपात्रं आजिघ्र आ

घ्रति=

मुखेन घ्राणं कुरु। किं च हे धेनो त्वां इंदवः सोमा आविशंतु। ऊर्जा विशिष्टरसेन पयो रूपेते नास्मान्पुनर्निव
र्तस्व। मयेत्वयालं स्तुतासाहं नोस्माकं सहस्रं सहस्रसंख्याकं धनं धुक्ष्व दुहिदेहीस्यर्थः। किं चात्त स्वत्स

सादुरुधारा बहुपयोयुक्ता पयस्वती धेनुर्मां पुनरावित्रतात् ॥ आग छत्वित्यर्थः । तथा रयिइं नमपि मामाविव्रता
तात् ॥ का स्या० ॥ हव्ये काम्य इति दक्षिणेस्याः कर्णे जयजमानो जपतीति । पूर्वोक्ताया धेनोर्दक्षिणकर्णे यजमानो
जपेत् ॥ पाठस्तु ॥ हव्ये काम्ये० ब्रूतादिति । सर्वैरा हूयत इति हव्या सर्वैः काम्यत इति काम्या स्तूयत इती डारमय
तीति । रेतिः । आह्लादयतीति चंद्रा । ज्वलति प्रकाशयतीति ज्योता । अदितिरनवखंडिना । सरस्वतीति
सरः क्षीरं तद्वती सरस्वती मही महती विश्रूयत इति विश्रुतिः अहं तव्येस्य ध्याएवं न्नूते हे घनोतेत्वदीया
न्येतान्येतानि नामान्येव मतिश्रायपुक्तानि । एवं क्रूते नो मञ्जिरञ्जिहितासती देवेषु देवेभ्यः सुष्टु कर्म करोति
ति सुकृत् । तादृशं मामां ब्रूतात् ब्रूहि ॥ का स्या० ॥ शाला द्वार्ये न्वारब्धेषि हरतीति रीतिं जुहोतीति तत्रोत्थानं स
र्वेषु यजमानेषु परस्परं स्पष्टेषु सत्सु इदानीं ततगार्हपत्ये जुहुयात् ॥ पाठस्तु ॥ इहरतिरिहरमध्वमिह धृ
तिरिह स्वधृति स्वाहेति । हे गावः युष्मदीया रतिः रमणमिह यजमानेषु स्यात् । अस्मिन्हेव धृ स्वयं रमध्वं ।
युष्माकमिह यजमानेषु धृतिः स्यात् स्वकीया नामपि धृतिरिहैव स्यात् । स्वाहा हुतमस्तु ॥ का स्या० ॥
उपरासुपसृजन्नितीति । तत्रैव तां द्वितीयामाहुतिं जुहुयात् ॥ पाठस्तु ॥ उपसृजन्धरुणं० स्वाहेति । ध

१९६

रुणो धारयिता ग्निर्मात्रे धरूणं मातुः पृथिव्या धारयितारं उपसृजन्नस्मीपं प्रापयन्मातरं पृथिवीं धयन्
स्वयं पिबन् तत्रोसन्नं हविर्नक्षयन्नित्यर्थः । अस्मासु रायस्पोषं पत्नुधनादि पुष्टिं दीधरत् । अस्मि तं धारय
तु । हेति होमार्थः ॥ का स्या० ॥ यजमान आत्मानं स्तुवीताग न्मज्योतिरितीति ॥ पाठस्तु ॥ अगन्म ज्योति० स्वर्यो
ति । यजमाना वयं ज्योतिरादित्यलक्षणं अगन्म प्राप्ताः । ततो अमृता अमरणधर्माणि अभूमः पृथिव्याः स
काशाद्दिवं द्युलोकमध्यारुहाम । देवानिंद्रादीन् अविदाम पश्यामः ज्योतिः स्वरूपं स्वः स्वर्गं पश्याम ॥ का स्या० ॥
युवं तमिति दक्षिणस्यां घोक्षमिति यंती स्यनुवर्तते । सर्वे यजमाना अक्षस्याध्यो ज्ञां प्रतिग ऐषुः ॥ पाठस्तु ॥
युवं तमिंद्रापर्वत० विश्वत इति । हे पुरो युधौ शत्रूणां पुरतो युद्धस्य कर्तारौ इंद्रापर्वता इंद्रपर्वतौ युवं युवां यः श
त्रुर्नोस्मान्पृतन्यात् संग्राम यत् युद्धं कारयेत् तं तं शत्रुं अपहतं युवांविनाशयतं । किंच । तं तमित् तं तं स्त्रुना
नमेव सर्वमपि शत्रुं विनाशयतं । तत्रापि विशेषते । वज्रा रथेनायुधेन तं तमेव हन्तुं विनाशयतं हे स्वरं इ
त्वदीयो वज्रः । सः गहनं असंतग भीरे वनं प्रवेष्टाया भूमीति यथदा दूरे च तानि यद्दूरे दाग लायरा चेव छन्नमतिगं तिकर्मो =
दर्षदतिः कामनार्थः कामयते त ह्येन क्षत्तं शत्रुं व्याप्नुयात् । ततो दर्मदारणशीलो वज्रः अस्माक
म स्मदीयान्विश्वतः सर्वतः अगलान्विश्वतः सर्वान्शत्रून्परिदशीष्ट परितो विदार्य दर्शयति स्म ॥ का

स्वा० । वाग्विसर्जनं भूर्भुवः स्वरितीति । वाचो विसर्जनं कुर्यादित्यर्थः ॥ पाठस्तु ॥ भूर्भुवः स्वः सुप्रजाः० पोषैरि
ति० व्याख्यातो मंत्रः ॥ इति षष्ठोनुवाकः ॥ ॥ षष्ठे अहर्गणसंबंधिनो मंत्रा उक्ताः ॥ सप्तमे तु सोमसंबंधिनो
नैमित्तिका मंत्रा उच्यंते ॥ का० स्या० ॥ परमेष्ठ्यादीन्यनुसृत्य शतं जुहोतीति । यदा सोमो यजमानेनाभिध्यातः
संकल्पितो भवति । तदा परमेष्ठ्यादीन्यनुसृत्य शतं जुहुयात् ॥ तत्र प्रथममंत्रपाठस्तु ॥ परमेष्ठ्यभिध्यात इति ।
यदा सोमो यजमानेनाभिध्यातः । तदा परमेष्ठीति नाम्नाभिधीयते । अथ द्वितीयः ॥ प्रजापतिर्वाचि व्याहृ
तायामिति । सोमेन यक्ष्य इति वचस्युच्चारिते सति सोमः प्रजापतिनामको भवति । अथ तृतीयः ॥ अन्धो
अच्छेत इति । यदा सोमम् अच्छ आभिमुख्येन इतः प्राप्तस्तदा अन्धो भवति ॥ अथ चतुर्थः ॥ सविता सन्या
मिति । सन्यां सोमस्य संभक्तौ सत्यां सोमः सवितृनामको भवति ॥ अथ पंचमः ॥ विश्वकर्मा दीक्षायामि
ति । दीक्षायां सत्यां विश्वकर्मेत्युच्यते ॥ अथ षष्ठः ॥ पूषा सोमक्रयण्यामिति । सोमक्रये सति पूषेत्य
भिधीयते । अथ सप्तमः ॥ इंद्रश्च क्रयायोपोत्थित इति । यदा यजमानः सोमक्रयार्थमुत्तिष्ठेत् । तदा सोम
इंद्रनामको मरुन्नामकश्च भवति ॥ अथाष्टमः ॥ असुरः पण्यमान इति । यदा सोमो यजमानेन पण्यते तदा
असुरनाम्नाभिधीयते । अथ नवमः ॥ मित्रः क्रीत इति । यदा सोमो यजमानेन क्रीयते तदासौ मित्रो भवति ।

॥१९०

मरुतश्च

१९

विष्णुः शिपिविष्टः

शिपिविष्टो

॥ अथ दशमः ॥ विष्णुः शिपिविष्ट इति । शिपिर्यज्ञस्तत्र यदा सोमः प्रविष्टस्तदा विष्णुर्भवति । अथैकादशः ॥
ऊरावासन्नो विष्णुर्नरंधिष इति । यदा ऊरौ उत्संगे आसन्न उत्संगं प्राप्तः सोमो विष्णुर्नरंधिषो भवति । अ
थ द्वादशः ॥ प्रोह्यमाणः सोम आगत इति । यदा आगतः सोमः प्रोह्यते तदा सोमनामा भवति ॥ अथ त्रयोदशः ॥
वरुण आसंद्यामासन्न इति । यदा सोम आसंद्यामासन्नस्तदा वरुणो भवति ॥ अथ चतुर्दशः ॥ अग्नि
रग्नीध्र इति । सोमो यदाग्नीध्रे वर्तते तदाग्निरित्यभिधीयते ॥ अथ पंचदशः ॥ इंद्रो हविर्धान इति । ह
विर्धाने वर्तमानः सोम इंद्रो भवति । अथ षोडशः ॥ अथर्वोपावह्रियमाण इति । यदा सोम उपावह्रियते त
दाथर्वा भवति ॥ अथ सप्तदशः ॥ विश्वे देवा अंशुषु न्युप्यमानेष्विति । अंशुषु न्युप्यमानेषु सत्सु विश्वे देवा
एतन्नामको भवति ॥ अथाष्टादशः ॥ विष्णुराप्रीतपा इति । आप्रीतपाः सोमो विष्णुर्भवति । अथैकोन
विंशः ॥ आप्याय्यमानो यम इति । आप्याय्यमानः सोमो यमो भवति ॥ अथ विंशः ॥ सूयमानो विष्णुः
संभ्रियमाण इति । यदा सोमो निष्पूयते संभ्रियते च तदा विष्णुर्भवति ॥ अथैकविंशः ॥ वायुः पूयमा
न इति । पूयमानः सोमो वायुर्भवति ॥ अथ द्वाविंशः ॥ शुक्रः पूत इति । पूतः सोमः शुक्रो भवति ॥ अथ
त्रयोविंशः ॥ शुक्रः क्षीरश्रीरिति । क्षीरेण संमिश्रितः सोमः शुक्रो भवति ॥ अथ चतुर्विंशः ॥ मंथी सक्तु

श्रीरिति। सक्तुभिः संमिश्रितः सोमो मंथी भवति॥ अथ पंचविंशः॥ विश्वे देवा मसेश्रन्नीत इति। वै
मसेश्रन्नीतः सोमो विश्वे देवा भवति॥ अथ षड्विंशः॥ असुर्हीमायोद्यत इति। भूमा पमुद्यतः सोमः
असुर्भवति॥ अथ सप्तविंशः॥ रुद्रो हूयमान इति। यदा सोमो हूयते तदा रुद्रो भवति॥ अथाष्टविंशः॥
वातोऽभ्यावृत्त इति। यजमानेनाभ्यावृत्तः सोमो वातनामा भवति॥ अथैकोनत्रिंशः॥ नृचक्षाः प्रतिख्यात
इति। प्रख्यातः सोमो नृचक्षा नामा भवति॥ अथ त्रिंशः॥ भक्षः पीत इति। पीतः सोमो भक्षो भवति॥ अथै
कत्रिंशः॥ पितरो नाराशंसाः साद्यमान इति। यदा सोमः साद्यते तदा पितरो नाराशंसा भवति॥ अ
थ द्वात्रिंशः॥ सिंधुरवभृथायोद्यत इति। अवभृथार्थं यदा सोम उद्यतस्तदा सिंधुर्भवति॥ अथ त्रयस्त्रिंशः॥
समुद्रोऽभ्यवह्रियमाण इति। यदा सोमोऽभ्यवह्रियते तदा समुद्रो भवति॥ अथ चतुस्त्रिंशः॥ सलिलः प्र
प्लुत इति। यदा सोमः प्रप्लुतोऽप्सु निमग्नस्तदा सलिलो भवति॥ काण्वा॥०॥ स्कन्नमभिमृशति ययोरोज
सेति॥ पाठस्तु॥ ययोरोजसा० पूर्वहूताविति॥ ययोः विष्णुवरुणयोरोजसा बलेन रजांसि लोकाः स्कभि
तानि स्तंभितानि। किंच वीर्येभिर्वीर्यैर्वीरतमा अत्यंत वीरौ शविष्ठा बलवंतौ यायौ
विष्णुवरुणा पत्येते परमसैन्येषु पततः सहोभिर्बलैरप्रतीता अप्रतिगमनावनन्यसाध्यौ विष्णुवरुणा

१९६

१९८

क्षमीनृतो = वेद्युत्कर्षावस्मदीयो यज्ञः पूर्वहूतौ पूर्वस्मिन्काले अगन्। अगच्छत्। तत्रैव विकल्पितो द्वितीयो मंत्र आम्नायते।
देवान्दिवमगन्० तद्रमस्त्विति। अयं यज्ञो देवानतिकवाहिकान्स्वादीन्प्राप्य दिवं द्युलोकमगन् अगच्छत्।
ततस्तत्र स्थिताद्यज्ञात्। मामां द्रविणं विशिष्टरोगसाधनरूपं धनमष्टु व्याप्नोतु। अनेन सुकृतिनामारो
हक्रममभिधायेदानीमवरोहक्रममाह। ततो द्युलोकादवरोहणकाले अंतरिक्षलोकमागत्य मनुष्यानयं यज्ञो
मनुष्यलोकमगच्छत्तत्र स्थिताद्यज्ञान्मां द्रविणं व्याप्नोतु। दक्षिणायने गमनागमनमाह॥ अयं यज्ञो धूमा
दिमार्गेण पितॄन्प्राप्य पृथिवीमगच्छत्। तत्र स्थिताद्यज्ञान्मां द्रविणं व्याप्नोतु। यं कमपि लोकमयं यज्ञोऽग
च्छत्। ततस्तस्माद्यज्ञान्मम भद्रं कल्याणमभूत् भूयादिति यजमानो नाशास्यते॥ इति नवमोऽनुवाकः॥
वेदार्थस्य प्रकाशेन०॥९॥ इति सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे काण्वसंहितायां न
वमोऽध्यायः॥ ॥ यस्य निःश्वसितं०॥ महेश्वरं॥ चतुर्थाध्यायमारभ्य नवमांतेषु षट्स्वध्यायेषु सोमयाग
मंत्रास्तदीयप्रासंगिकमंत्राश्च निरूपिता दशमाध्याये वाजपेयिकमंत्रा निरूप्यंते। तत्र प्रथमेऽनु
वाके सवितृप्रेरणार्था मंत्रा उच्यंते॥ काण्वा॥०॥ देव सवितरिति जुहोतीति। वाजपेयसंबंधिकर्म प्र
वर्तमानः प्रथममनेन जुहुयात्॥ पाठस्तु॥ देव सवितः० स्वदत्विति। हे सवितर्देव सर्वस्य प्रेरक त्वया

भिन्यज्ञं वाजपेयलक्षणं यागं प्रसुव प्रवर्त्तय। इमं यजमानो नं तं गायत्रमनीयायामनुष्ठानफलरूपायै स्वर्याय प्रसुव प्रेरय किंच त्वत्प्रसादाद्दिव्यो दिविजातो गंधर्वो गवां रश्मीनां धारयिता केतपाः। केतशब्देनात्रान्नमुच्यते। अन्नस्य पालयिता सूर्यमंडलरूपी देवो नोस्माकं केतमन्नं पुनातु। शोधयतु। वाचस्पतिः प्रजापतिरपि त्वत्प्रसादादद्यास्मिन्दिने नोस्मदीयं वाजं हविर्लक्षणमन्नं स्वदतु स्वादयतु॥ का॰स्या॰॥ पंचैंद्रान्ध्रुवसदमिति प्रतिमंत्रमिति। इन्द्रदेवताकान्पंच ग्रहान्ध्रुवसदमित्यादिभिः पंचभिर्मन्त्रैः क्रमेण गृह्णीयादिति शेषः॥ तत्र प्रथममंत्रपाठस्तु॥ ध्रुवसदं त्वा॰ जुष्टतममिति। हे सोम त्वमुपयामगृहीतोसि उपयामो ग्रहस्तेन गृहीतोसि। इंद्राय जुष्टं प्रियं यथा गृह्णामि कीदृशं त्वां ध्रुवसदं। ध्रुवे स्थिरलक्षणे ग्रहे सीदतीति ध्रुवसदं। नृषु मनुष्येषु सीदतीति नृषदं। मनसि सीदतीति मनःसदं। तादृशं। एष तव सादनमंत्रः। हे ग्रह एष स्वरप्रदेशस्तव स्थानं इंद्राय प्रियं यत्त्वां सादयामीति शेषः॥ अथ द्वितीयः॥ अप्सुषदं त्वा॰ जुष्टतममिति। तदुदकघृतौ तन्तरिक्षेषु सीदंतं त्वां गृह्णामि। शेषो व्याख्यातसमानार्थः॥ अथ तृतीयः॥ पृथिविसदं त्वा॰ जुष्टतममिति॥ स्पष्टार्थः॥ अथ चतुर्थः॥ अपां रसमुद्वयसं॰ जुष्टतममिति। हे चतुर्थग्रह अपां रसस्य उदकस्य सारभूतः सोमवल्लीरूपेण परिणतो यो रसोस्ति तस्यापि रसस्य यो रसः सारस्त्वं ता

दृशं उत्तमं उत्कृष्टतमं रसं वो युष्मदर्थं गृह्णामि वदति अत्रार्थे बहुवचनं। अपां रसं उदकस्य सारं उद्वयसं उद्गतं वयोन्नं यस्यास्ते सूर्ये संतं सम्यग्गाहितं रश्मिषु स्पष्टं। अथ पंचमः॥ ग्रहा ऊर्जाहुतये॰ जुष्टतममिति। हे ग्रहा ऊर्जोन्नं येनाहूयंते ते ऊर्जाहुतयो ये ग्रहा यं विप्राय मेधाविने मतिं विदुषे बुद्धिं व्यंतः॥ विविसस्यकर्मणो धातोः शास्त्रे तस्य व्यंतरतिस्यर्थं। व्यंत वा गच्छतानुजानं तदस्यर्थः। विविधप्रियाणां विविधानि शिप्राणि हनूस्थानीयानि पात्राणि तत्सर्वं ता विविधप्रियास्तादृशानां तेषां वो युष्माकं संबंधिनं। इषमन्नमूर्जं रसं अहं समग्रतें। समग्रहं सम्यग्गृह्णामि। उपयामगृहीत इति व्याख्यातं॥ का॰स्या॰॥ उपर्यक्षमध्वर्युर्योरस्य स्पष्टो नेष्टा संपृचस्थेतीति। अध्वर्युरुपर्यक्षं सोमग्रहं धारयेत्। नेष्टा अधोक्षं सुराग्रहं धारयेत्॥ पाठस्तु॥ संपृचस्थ॰ पापेन पृक्तेति। हे ग्रहा यूयं संपृचस्थ। संपृक्ताः। संसृष्टा भवथ। यत एव मतो मां भद्रेण नंदनीयेन कल्याणेन। संपृक्त। संसृष्टं तयतो भयूयं विपृचस्थ वियुक्ता न्यसन्मार्गाद्भवथ। अतो मां मां पापेन विपृक्त वियोजत॥ इति प्रथमोनुवाकः॥ प्रथमे सवितृप्रेरणार्था मंत्रा उक्ताः॥ द्वितीयोनुवाके रथारोहणादिमंत्रा उच्यंते॥ का॰स्या॰॥ इंद्रस्य वज्र इति रथापहरणमिति। रथमाहरेत्॥ पाठस्तु॥ इंद्रस्य वज्रो

सिवाज सा स्त्वयायं वाजं सेद्दिति। हेरथ त्विमानि देवत्व मिंद्रस्य वज्र सनोत्वमसि। वज्र स्तेन त्वया पेयज
मानो वाजमन्नं सेत्। सनुयात्। समतजत्। अतस्त्वं वाजसान्नस्य दाता त्वमसि॥ कात्या०॥ दक्षिणेन चात्वाल
मानावर्त्तयति वाजस्येति धूर्गृहीतमिति। चात्वालस्य दक्षिणभागे धूर्गृहीतं रथमावर्त्तयेत्॥ पाठस्तु॥ वा
जस्यनुप्रसवे० सा विर्षद्दिति। वाजस्यान्नस्य प्रसवेनुज्ञायां मे वर्त्तमाना वयं मातरं जगतां निर्मात्रीम
हीं महतीं नामदितिमदीनाम खंडितां वाचम्भिं नाम प्रसिद्धं यथा तथा वदितं धावच्छ स्तामंत्रेण करामहे। करा
वामहे स्तु मद्रस्यर्थः। यस्यां त्वमा विदं विश्वं सर्वं भुवनं जातमा विवेश तस्यां त्वमा वेव नो स्माकं धर्मघा
णमवस्थानं सविता देवः सावित्रीत्। षू प्रसव इति धातोर्निष्पन्नमेतद्रूपं प्रसवमनुज्ञां करोतु।
॥ कात्या०॥ अश्वान्प्रोक्षत्य पावनीय मानान्स्नात जोतगतान श्वं तरिति देवीराप इति वाससुर्वापो
वेति। स्नानार्थमपउद्दिश्य नीयमानान्स्नातानाग तानश्वान श्वं तरम तमिति मंत्रेण वादीवीराप इति
मंत्रेण वाश्वं तरमश्वं यन वाप्रोक्षयेत्। तत्र देवी राप इत्यस्य मंत्रस्य पाठः॥ हे वीरापो अपान०॥ वाजं सेद्दिता
हेत्रापो देव्यो वो युष्माकं यो मधुमान्मधुरसोर्मिः कल्लोल अपान पात् अश्व यामपत्यं गर्भे भूत इत्यर्थः। कीदृशः। अनुन्मि
त्र कर्षणान्न रणा त्रो लः। ककुद्यवृषेन त्वमश्व स्थ उन्नत प्रदेशा उच्यते। अत्र कल्लोल स्ते सामाद्युदकनिचयैः सं

भा
मुक्त बहल्लोकृतोदकसंघातवान्ककुद्मानित्युच्यते। वाजसा अन्नस्य दाता एवं विशिष्टेन तेन अपो विशिष्ट रूपेण
यमश्वः प्रोक्षित स्त्वा जमन्नं सेत्। सेन्नतेत्॥ अथ द्वितीयः॥ अथ द्वितीयः प्रोक्षण मंत्रः। अप्स्वंतरम्
तं०वाजिनद्दति। अस्मदकेषु अंतर्मध्ये अमृतं सारभूतमापो स्वरूपं यदस्ति तेनापां सार भूता संस्कृता अश्वो
स्वानां तेषज मारोग्यकरं पुष्टिकरं च वौषधं यदस्ति तदश्वेव प्रतिष्ठितमिति शेषः। उतापिच अपामुदकानां
प्रशस्तिभिः प्रशंसनैः स्तोत्रैर्वाजिनो त्वं वेगवंतो वाश्वा यूयमेवं स्तुतास्त्व॥ कात्या०॥ दक्षिणं युनक्ति वा
तो वावेतीति। दक्षिणप्रदेशे प्रथमस्वं योजयेत्॥ पाठस्तु॥ वातो वा वा मनो वा० दधुरिति। अत्र वा शब्दः समु
च्चयार्थः। वातो वायुर्गंधर्वाः सप्तविंशतिः। सप्तविंशतिसंख्या युक्तानि नक्षत्राणि च तेषते वातप्रवे
तयः। सर्वे अग्रे पूर्वं वयं युष्मान् बहुवचनं पूजार्थं अश्वं त्वां अयुंजन् रथे योजितवंतः। ते च पुनरस्मिन्नश्वे
लपिजवमतिवेगयुक्तं बलमादधुः स्थापितवंतः॥ कात्या०॥ उत्तरं वातरंहाइतीति। वामभागे द्वितीय
मश्वं योजयेत्॥ पाठस्तु॥ वातरंहा भव० जवेदत्यापिति। हे वाजिन्वेगवन्नश्व युज्यमानादुत्तरभागे नि
युज्यमानस्त्वं वातरंहा वायुवद्वेगयुक्तो भव। दक्षिणभागे स्थितोश्व मिंद्रस्यास्वइवश्रिया शोभयायु

कोऽधिरुव। विश्ववेदसः सर्वज्ञामरुतस्त्वा त्वां युंजंतु नियुंजंतु। किंच त्वष्टा त्वष्टृनामको देवः हे अश्व ते तव
पत्सु पादेषु जवं वेगमादधातु स्थापयतु॥ का०स्या०॥ दक्षिणाप्रष्टिर्जवो यस्त इति व्यवहितयोरीषयोर्म
ध्ये प्रष्टिनामकं तृतीयमश्वं योजयेत्॥ पाठस्तु॥ जवो यस्ते० विष्णुरिति। हे वाजिन्नश्व ते तव गुहा गुह
यां हृदयप्रदेशे यो जवो वेगो निहितो वस्थापितः श्येने श्येननाख्यपक्षिणि यो जवः परीतः परितः प्राप्तः
वाते वायौ यो जव अचरन्। हे वाजिंस्तेन बलेन बलेन त्वं सर्वपोऽस्माकं वाजजिन् वाजस्यान्नस्य जेता भव।
अन्नस्य दाता भवेत्यर्थः। समने संग्रामे च पारयिष्णुः पारंगमनशीलो भव॥ का०स्या०॥ बार्हस्पत्यमे
नानां घ्रापयति वाजिन इतीति। एनानश्वान्बृहस्पतिदेवताकं चरुमाघ्रापयेत्॥ पाठस्तु॥ वाजिनो वा

गामिष्यंतः जजिता० जिघ्रतेति। वाजजितोऽन्नस्य जेतारो वाजमन्नं सरिष्यंतो वाजिनोऽश्वा यूयं बृहस्पतेर्भागं

त्वं चरुमवजिघ्रत। आघ्राणं कुरुत॥ इति द्वितीयोऽनुवाकः॥ ॥द्वितीयेऽर्थवाह रथारोहणादिमंत्राः उच्यंते॥ त्वती

२०१

येऽनुवाके रथचक्रादिरोहणमंत्रा उच्यंते॥ का०स्या०॥ देवस्य वयमिति ब्रह्मा रथचक्रमारोहयन्मुक

२०१

रे नाभिमात्रे स्थाणौ स्थितमिति। उत्करप्रदेशे निखातस्य नाभिप्रमाणस्य काष्ठस्याग्रे स्थिरं रथच

६=×परीत इत्यस्य निःप्रत्यासमाह वर्यादवस्थानार्थत्वं। प्रकृतिप्रत्ययविभागस्तु। परिपूर्वादिणो धातोः क्तप्रत्यये धाते हिरिति हिरादेशः स्यच्छांदसत्वेन लोपे परदी
र्घरूपसिद्धिः। परीत इति पाठे तु इधातो रकारलोपे परे दीर्घसंधिरूपमिति ज्ञेयं। अत एव प्रातिशाख्ये परीतो वत्रानां सुविनीय समीप्सिरिति सूत्रे धातोरत्र देके देशा
स्य वा लोपे ग्रात्र वग्रहः इत्युक्तं कात्यायनेन =×६

सकुप्यार्थेच कारादेशोदात्तः =

कं ब्रह्मा क्रत्विगारोहेत्॥ पाठस्तु॥ देवस्य वयं० रुहेमेति। सत्यसवसः सत्यप्रसवस्य सत्याज्ञस्य तु सापनस्य
सवितुः सर्वप्रेरकस्य देवस्य सवे अभ्यनुज्ञायां वर्तमाना वयं बृहस्पतेः संबंधिउत्तमं श्रेष्ठं नाकं स्व
र्गं रुहेम स्वर्गारोहणं करवाम। तथेंद्रस्योत्तमं स्वमरुहेम॥ का०स्या०॥ देवस्य वयमिति यजुर्मंत्रयुक्तमारोह
ति याजमान इति। मंत्रयुक्तं रथं यजमानमारोहेत्॥ पाठस्तु॥ देवस्य वयं० नाकमरुहामेति। सत्याज्ञस्य
स्य सवितुर्देवस्य प्रसवे वर्तमाना वयं बृहस्पतेरिंद्रस्य संबंधिउत्तमं स्वर्गमरुहाम आरुहेम॥ का०स्या०॥ बृह

सु५

स्पते वाजमित्येकं दुंदुभिमाहंतीति। सप्तदशौ दुंदुभिषु मध्ये प्रथमं मुख्यं दुंदुभिमाहन्यात्॥ पाठस्तु॥ बृह
स्पते वाजं जय० इंद्र वाजं जापयतेति। हे बृहस्पते देव त्वं वाजमन्नं जय हे दुंदुभयो यूयं बृहस्पतिं वाजम
न्नं यया वाचा अजीजयत जेष्यामीत्युद्वादितवंतः। वो युष्मदीयास्ताः वासमीचीना कू सत्यायथार्थवादिन्यस्त
तत्। हे वनस्पतयो यूयं विकारा यूयं यस्मादन्नं जेष्यामीति वदंतः। बृहस्पतिमजीजयत। वाजजितं कृतवं
त ततस्माद्वाजं विकृत्य ध्वं वाग्विमोचनं कुरु॥ का०स्या०॥ ब्रह्मारोहतिवेदेवस्य वयमितीति। रथचक्रात्स
कात्राद यरोहेत्॥ पाठस्तु॥ देवस्य वयं० वाजं जेष्मेति। सत्यसवसः सत्यप्रसवस्य सवितुर्देवस्य सवे

५×बृहस्पत्यर्थं अन्नं बजयेति वाचं वदत। किंच बृहस्पतेर्वा अन्नं च जेष्याम इति जापयत उद्वादयत। जपजल्पव्यक्तायां वाचीति धातोर्यन्त
स्य रूपं। हे इंद्र वाजं जय। हे दुंदुभयः इंद्रं वाजं च जेष्याम इतींद्रार्थं जापयत॥ का०स्या०॥ दुंदुभिमवहरस्येषा वइति। पाठस्तु॥ एषा वः सा० विमुच्य ध्वमिति।
हे दुंदुभयः यूयं ×=५

अस्यनुज्ञापां वर्त्तमानादयं वा। जजिनो वाजमन्नं जयतीति वाजजित् तस्य बृहस्पतेः संबंधि वाजमन्नं
जेष्मवयं जितवंतः॥ का०स्या०॥ वाजिन इति वाचयति। यजमानं वाचयेत्। पाठस्तु॥ वाजिनो वाजं जयत०
गाछतेति। हे वाजिनः शीघ्रगामिनोऽश्वाः यूयं वाजमन्नं जयत। कवलीकुरुत। किंच अध्वनो मार्गान् स्क
भ्नंतः स्तभ्नुयंतः पीडयंतो योजना योजनानि मिमानाः परिच्छिंदंतः शीघ्रगत्याल्यानीवकुर्वंतो यूयं
काष्ठां अध्वसमाप्तिं लक्ष्यस्थानं गच्छत प्राप्नुत॥ का०स्या०॥ एष स्य इति प्रसर्वं जुहोत्यनुमंत्रयते तिवेति।
एषस्यवाजी उतस्मास्य इति मंत्रद्वयेन जुहुयादनुमंत्रणं वा कुर्यात्। तत्राद्यमंत्रपाठः॥ एष स्य वाजी० पनी
फणदिति। ग्रीवायां कक्षे आस्ये वतन्न दुर्ध्यं चित्तरं जुविंशे षे बद्ध एष स्य वाजी सोऽनश्वः क्षिपणिं तुरं य
ण्यति करोत्वरयति। बहु धावित्वा तु थं तं जपि तुरं तस्त तः नगच्छति कजुगापास्त्वरयात्री ग्रं ... या नु
वती स्पर्धः॥ दधिक्राः धारकान्मार्गविरोधकान्पाषाणादीनप्यतिक्रामन्। क्रतुं सादिनो नित्रायं अ
नुसंतवीत्। सम्यगनुसंधाद धानः पथां मार्गाणामंकांसि लक्षणानि कुटिलानि निम्नोन्नतानि वा अ २०२
२०२ न्वापनीफणत्। अनुक्रमेण ऋजुत्वं समत्वं वा पाँ दधत्स्तुरण्यतीति पूर्वत्रान्वयः॥ द्वितीयमंत्रपाठ
स्तु॥ उतस्मास्य द्रवत० तरित्रतद्रुति। उतस्म अपि च द्रवतो गच्छतस्तुरण्यतस्त्वरयतः ऋगर्द्धिनः अ

अतिशीघ्रतया क्षिप्रं प्राप्नोत्। अन्वाह पूर्वस्य फणते गर्तस्य धस्य यद्धु किरूपमिति ताष्यांतरं २ —

सनेमिच्छित्रं सनेमेति चिह्न नाम। युच्छ प्रमाद इति धातुः। =६

बधिंप्रामुंकांक्षतोऽस्यास्वस्यांक संस्थं गारचिह्नं वस्त्र चामरादिकं परि सर्वस्मिन्नपि देहे वर्त्तमानमनुवातिग
च्छंतं अध्वनन्तु उत्क्षिप्तत्वेन दृश्यमानं गच्छति कस्य किमिव वेः पक्षिणः पर्णं न पक्ष इव यथा त्वरया गच्छतः
पक्षिमात्रस्य पर्णमंकसंदृष्टांतत्वेनाभिहितं नूनी घ्र धावने ऽस्य ऐन दृष्टांतमुच्यते। ध्रजतो गच्छतोनूयेनस्येव
स्वचामरादिकं। दधिक्रा० वाणः धारकपर्वतासूति क्रामिणः कुर्जो सह अत्यंतबलेन सह। तरित्रतो ... तरतो
स्त्वस्येति योज्यं। उत्तरेण वत्तवेनाश्वान् स्तौतीति॥ तत्रेयं प्रथमा॥ शन्नो भवन्तु० अमीवा इति। वाजिनो
अश्वा नोऽस्माकं शं सुखरा भवंतु। हवेषु आह्वानेषु सत्सु देवतातादेवता तौ यज्ञे मितद्रवः मितं परिमितं
द्रवंति गच्छंतीति मितद्रवोऽश्वाः स्वर्काः सुरुचः स्वं च ना वा अहिं सर्पं वृकं अरण्यश्वानं रक्षांसि अस्मत्
स्त्रांश्वजंतयंतः क्षोभयंतोऽस्मदस्मत्तः अमीवा रोगान् यूयवन् पृथक् कुर्वन् ... जितवंतस्ताद्दृशाः शं नो भवं त्वि
ति संबंधः॥ अथ द्वितीयः॥ ते नो अर्वंतो० जन्त्रिर इति। अर्वंतो गतिकुशलाः हवनश्रुतः आह्वानं शृण्वंतो
वाजिनो बलवंतो मितद्रवो यजमानचित्तानुकूलतया परिमितगामिनो विश्वे सर्वेऽपि ते अश्वाः नोऽस्म
दीयं हवमाह्वानं शृण्वंतु सहस्रसाः सहस्रस्य महतो लाभस्य सनितारो दातारो ये अश्वा मेधसाता इव
मेधो यज्ञः स यत्र सीयते सेव्यत इति मेधसातिर्यज्ञस्तत्र ... तस्यां तस्यामिव समिथेषु संग्रामेषु भ

पितरामातराइकंदसीतिविस्तृपेकइोषोनिपात्यते = ६

हो महद्धनं त्मना आत्मना स्वकीयबलेन जज्ञिरे अह्निरे आहृतवंतः ते अस्याः अस्मदीयमाह्वानं शृण्वं
त्वितिसंबंधः॥ अथ तृतीयः॥ वाजेवाजेवत०देवयानैरिति। वाजेवाजे सर्वस्मिन्नन्ने उपस्थिते सति
धनेषु वोपस्थितेषु सति हे वाजिनो अश्वानो स्मानव नपालयत। विप्रामेधाविनः परिदृष्टकारिणः अमृता अमरधर्मा
णः ऋतज्ञाः सत्यज्ञा अश्वा निमाभिनो देवाः यूयम स्य मध्वः इदं धावनास्वैपश्चादेव घ्रायमाणं मधु समानं नैः
वारं चरुं पिबत पीत्वा च मादयध्वं तृप्ता भवत। तृप्ताः संतो देवयानैर्देवाधिष्ठितैः पथिभिर्मार्गैर्यात गच्छत॥ का
सा०॥ नैवारमाल्लृप्तते तीर्थे स्थितमामावाजस्येनीति। तीर्थप्रदेशो स्थापितं नैवारसंबंधिनं चरुं स्पृशेत्॥ पाठस्तु॥
आमावाजस्य०गम्यादिति। वाजस्यान्नस्य प्रसवः उत्पत्तिर्मां आगम्यात् आगच्छतु। विश्वरूपे विश्वरूपाभिम
के इमे द्यावापृथिवी द्यावापृथिव्यावागच्छेतां। पितरामातरा अस्मदीयः पितामातावृषुवे पुवांचिरं सुखि
त्वाम्मां प्रत्यागंतां। किं च सोमश्च अमृतत्वाय मम देवत्वजन्मने मां प्रत्यागम्यादागच्छतु॥ कासा०॥ यजुर्युक्ता २०२
२०२ नाघ्रापयति वाजिनं इतीतिमंत्रेण योजितानश्वान्नैवारं चरुमाघ्रापयेत्॥ पाठस्तु॥ वाजिनो वाजजि
तो०निमृजानाइति। हे वाजिनो अश्वा वाजजितो वाजस्यान्नस्य जेतारो वाजमन्नं जेतुं संसृत्य वा धंसः स्वत्तवं
तो गच्छंतो निमृजानाः शुद्धिं कुर्वाणा यूयं बृहस्पतेः संबंधिनं भागं चरुं अवजिघ्रत। आघ्राणं कुरुत॥ इति

अन्ने अहरविमानिदेयाय = ६

तृतीयोनुवाकः॥३॥ तृतीयेनुवाके रथारोहणादिमंत्रा उक्ताः। चतुर्थे स्रुवाहुत्यादिमंत्रा निरूप्यंते॥ कात्या०॥
द्वादश स्रुवाहुतीर्जुहोत्याप्यये स्वाहेति प्रतिमंत्रमिति। आपये स्वाहेत्यादि निर्दिष्टैर्द्वादशभिर्मंत्रैः प्रत्येकं स्रुवेण द्वा
दशसंख्याका आहुतीर्जुहुयात्॥ तन्मंत्रपाठस्तु॥ आपये स्वाहा० अधिपतये स्वाहेति। अत्र संवत्सरात्मिमा
नीदिवस्तस्यते आप्नोतीत्यापिस्तस्मै स्वाहा सुहुतमस्तु॥ सुष्ठु अन्नमाप्नोतीति स्वापिस्तस्मै सुहुतमस्तु। पुनःपुन
र्जायत इत्यपिजस्तस्मै स्वाहा क्रतुः संकल्पो भोगादिविषयो यस्यास्ति तस्मै। वसवे निवासहेतवे अन्नो वास
रणांपतिरहर्पतिः तस्मै मुह्वे विश्वे मोहयति मुह्यतीति वा मुग्धस्तस्मै मुग्धाय वैनंशिनाय विनाश
संयुक्तेषु वसतीति वैनंशिनस्तस्मै विनंशिने विनाशयुक्ताय अंते अयनेन भवः आंत्यायनस्तस्मै अंसेत्र
वस्वांसस्तस्मै आंत्याय भुवने वभवो भौवनस्तस्य पतये जगतः पालयित्रे अधिपतये सर्वेषां लोकानां स्वा
मिने स्वाहा सुहुतमस्तु॥ कात्या०॥ वाचयति पूर्वाभिरिति। पूर्वोक्तमंत्रेभ्य उपरितनानामायुर्यज्ञेनेत्या
दीनां षण्णां मंत्राणां पृथक् यजमानं वाचयेदिति शेषः॥ तेषां पाठस्तु॥ आयुर्यज्ञेन कल्पतां इत्यलो
कल्प्यंतां। कृसेनवतु। पंचवृत्तिकः प्राणोप
यज्ञेन कल्पतामिति। मदीयमायुर्वाजपेयाख्येन यज्ञेन कल्पतां।

समर्थसंयुक्तं =

येनेन यज्ञेन क्लृप्तोऽनवलु चक्षुरिंद्रियं यज्ञेन क्लृप्तं भवतु। श्रोत्रेंद्रियं यज्ञेन क्लृप्तं भवतु। पृष्ठं बृहदथं तरादिकं
क्लृप्तं भवतु। शरीरस्य वा पृष्ठं कल्पतां यज्ञेन मदीयेन वाजपेयाख्येन यज्ञात्मको विष्णुः कल्पतां क्लृप्तो भव
तु॥ का॰सा॰॥ निःश्रेणीरूपे स्तयोन्तरां दक्षिणां वारोहन् जायामामंत्रयते। जाय एहि स्वो रोहावेति। यूप
स्य दक्षिणोत्तर भागयो निःश्रेणी द्वयमुच्छ्रयेत्। तयोरेकतरस्यामारोहणं कुर्वन्यजमानो जायामामं
त्रयेत्। हे जाये एहि। आगच्छ स्वः स्वर्गं रोहाव आवामारोहणं करवाव॥ का॰सा॰॥ प्रजापतेः प्रजा अभू
त इति। पत्नी यजमानौ वारोहणं कुर्याताम्। पाठस्तु॥ प्रजापतेः प्रजा अभूमेति। वयं प्रजापतेः स
बंधिन्यः प्रजाः संभूताः स्म॥ का॰सा॰॥ स्वरिति गोधूममालं नतइति गोधूमनिर्मितं चषालं स्पृष्ट्वा
न्त॥ पाठस्तु॥ स्वर्देवा अगन्मेति। हे देवा वयं स्वः स्वर्गमगन्म प्राप्ताः॥ का॰सा॰॥ शिरसा यूपमुज्जीहीते अमृता
इतीति मूर्ध्ना यूपमुन्नमयेत्। अमृता अभूमेति मंत्रशेषः। वयममृताः मरणरहिताः अभूम संजाताः॥
का॰सा॰॥ अस्मे व इति दिक्षु वीक्षत इति॥ पाठस्तु॥ अस्मे वो अस्त्विंद्रियं संजुवदिति। हे दिग्देवताः अस्मे
अस्मासु वो युष्मत्संबंधि इंद्रियं सामर्थ्यमस्तु भवतु। नृम्णं युष्मत्संबंधि धनं अस्मे अस्मासु अस्तु। उतापि वर्चः
रस्मदीदीयो यो युष्मदर्थास्तु वो युष्मत्संबंधी निवर्चोऽसि अस्मे अस्मासु सन्तु॥ का॰सा॰॥ नमो मात्र इति

अस्तु २ तेजोऽसि

इयं ते राज्यमभिषिक्त इति श्रुतेः॥ २ =

भूमिं अवेक्षते पृथिव्या इति मंत्रशेषः। मात्रे मातृरूपायै पृथिव्यै नमो नमस्कारोस्तु॥ का॰सा॰॥ उत्तरवेदिमप
रेणोदुंबरी मासंदी स्थूल चर्मणास्तृणाती यं ते इतीति। उत्तरवेदेः पश्चाद्भागे स्थितामुदुंबरनिर्मितामासंदी
मजा संबंधिना चर्मणास्तृणुयात्। राडिति मंत्रशेषः॥ तत इयं राट् राज्यं॥ का॰सा॰॥ सुन्वंतमस्यामुपवे
शयति यंता सीति॥ पाठस्तु॥ यंतासि यमनः॰ पोषायेति। त्वं यंतासि सर्वस्य नियंतासि यमनः स्वयंय
मनकर्तासि भवसि। ध्रुवस्थिरोऽसि। धरुणो धारको भवसि। कृष्यै सकलकृष्यर्थं रय्ये पोषाय धनपुष्ट्यर्थं
लोऽप्रवेशयामीति शेषः॥ इति चतुर्थोऽनुवाकः॥ चतुर्थे स्रुवाहुत्यादि मंत्रा निरूपिताः। पंचमेनुवाके त्व
होमा उच्यंते॥ का॰सा॰॥ स्रुवेण संस्ततान्जुहोति वाजस्येममिति। प्रसोदुंबरपात्रे संपादितान्सप्तदश ममा =
न्नविशेषान्॥ पाठस्तु॥ वाजस्येमम्प्रसवः॰ पुरोहिता इति। वाजस्यान्नस्य प्रसव उत्पादकः प्रजापतिर
ग्रे सृष्ट्यादौ या सु ओषधीषु प्रसुवसं तमिमं सोमवल्लीरास्पं राजानं दीप्तिमंतं पदार्थं सुषुवे उत्पादया
मास। ता ओषधयोऽस्मा अपस्वासु स्यमस्मदर्थं मधुमतीर्माधुर्योपेता भवंतु। वयमप्यस्मिन्राष्ट्रे पुरोहिता
यागानुष्ठाना दौ पुरोगामिनो जागृयाम जागरूका भूयास्म॥ अथ द्वितीयः॥ वाजस्येदं॰ अस्मे इति। वा
जस्य प्रसवः प्रजापतिरिदमनुष्ठीयमानं कर्म आबभूव। आदितानो नु सोत्पादितवान्। किं च इमामि

सर्वाणि भुवनानि सर्वतउत्पादितवान्स प्रजापतिः सैनेमिश्चिवरं ततो राजादीन्तः सनेविद्वान्नचाधिकारं आ
नंत्तस्मे अस्माकं रयिं धनं पुष्टिं प्रजादिपुष्टिं वर्द्धयमानेभिवृद्धिं गमयन्नूपरितः सर्वतोयातिस्वेच्छयागच्छ
ति ॥ अथ तृतीयः ॥ वाजस्येमां० नियच्छतिति । वाजस्यान्नस्य प्रसवं ईश्वर इमां पृथिवीं दिवं द्युलोकं च
इमानि विश्वानि च सर्वाण्यन्यानि च भुवनानि निश्चिक्रिये आश्रितवान् । सरव सम्राड् सर्वेषां भुवनानां
राजा सखा अदित्सन्तं हविर्दातुमनिच्छन्तं मां प्रजानन् अवगच्छन्नस्मदीय बुद्धिप्रेरणेन हविर्दापयतितततो
नोस्मभ्यं सर्ववीरं सर्वैर्वीरैः पुत्रभृत्यादिर्युक्तं रयिं धनं नियच्छतु नियमेन ददातु ॥ अथ चतुर्थः ॥ अ
ग्नेअच्छा० धनदा असीति । हे अग्ने इहास्मिन्कर्मणि नोस्माकं अच्छाव दाग्नि मुखेन वदहितं ब्रूहि नोस्मा
न्प्रति सुमनाः करुणार्द्रवित्तोन्नयहे सहसहस्रजित्सहस्त्राणां जेतः हि यस्मात्त्वं स्वभावतो धनदा असि ।
अतश्च नोस्मभ्यं धनं प्रयच्छदेहि ॥ अथ पंचमः ॥ सोमं राजानमवसे० बृहस्पतिमिति । अवसे रक्षणा
र्थं सोमं राजानमग्निं चान्वारभामहे । यजमाना धर्मन्वारंभणं करवामहे । किंच आदित्यमरवं दिनान्तेरा
विष्णुं तं विष्णुं सर्वव्यापिनं सूर्यं सर्वप्रेरकं ब्रह्माणं बृहस्पतिं बृहतां मंत्राणां पालकमित्येतान्देवानप्यसे
कमन्वारभामहे इति संबंधः ॥ अथ षष्ठः ॥ प्रनोयच्छ० ददातु न इति । अर्यमा एतन्नामकः सूर्योस्मदभि
लषितमर्थं प्रयच्छतु पूषा प्रयच्छतु ददातु सरस्वती [illegible] नो पेतारतन्नामिका देवी नोस्मदभिप
लषितं धनं प्रयच्छतु । वागग्निमार्गाणीं देवी च प्रददातु ॥ अथ सप्तमः ॥ अर्यमणं बृहस्पतिं० वाजिनमिति ।
हे ईश्वर त्वं अर्यमादीन्देवान्दानाय धनप्रदानार्थं चोदय प्रेरय सवितारं सर्वस्य प्रसवकर्तारं च वाजिनं अ
न्नवंतं देवतात्म्वं वा ॥ कात्या० ॥ स्रुवेणाभिषिंचतिय० जमानं देवस्य त्वेतीति । होमानंतरम् औदुंबरपात्रस्थेनास
मदग्नान्नपयोभिश्रोदकेन स्रुवेण मैत्रजनानन मभिषिंचेत् ॥ पाठस्तु ॥ देवस्य त्वा सवितुः० साम्राज्येनाभि
षिंचामीति । देवस्य त्वेत्यादि गतं । सरस्वत्यै सरस्वत्याः वाग्देवतायाः वाचो यन्तुः नियंतुः [illegible] प्रकारेणाका
भिस्तोत्ररूपाणि वचांसि गदन्त्या स्तुवन्त्युवन्ति हंतुर्य तुर्यं दीर्घ्यमिये वर्णानि व्यक्तिरूपे वच सि तुर्यं अ
ग्नि व्यक्तिवर्णात्मकं परादि विवक्षया चतुर्थं स्तुतिरूपं वचो दधामि स्थापयामि हे अभिषिच्यमान यजमा
नत्वां बृहस्पतेर्देवस्य साम्राज्येन सद्भावेनाभिषिंचामि । एवमुत्तरवाक्येपि योज्यं । इंद्रस्येति तत्रैव
[illegible] ॥ इतिदिनो [illegible] नुवाकः ॥ ॥ पंचमेनुवाके होमा उक्ताः ॥ षष्ठेनुवाके उज्जितिमंत्रा उच्यंते ॥ का
त्या० ॥ अग्निरेकाक्षरेण स्वनुवाकमिति । वाचयतीति श्रोषः ॥ पाठस्तु ॥ अग्निरेकाक्षरेण० प्रजा
पतिः सप्तदशाक्षरेण सप्तदशं स्तोममुदजयत्तमुज्जेषमिति ॥ ओमग्रे वय्ये त्यादिस सप्तदशाक्षरा
=नावारताः पंचव्याहृत ओम्श्रावयेति स्तु श्रौषड्यजयेय जामहे वौषडिति ता सांपेचानो व्याहृती नाप्तं सप्तदशाक्षराणि
संपद्यंते इति ज्ञातपथे = ~

२०५

२०५

स्यैकप्रजापतिरसंसृष्टद्रव्याक्षरेणाधिदैवमधियज्ञं च समानत्वात्तान्यामुज्जीयते। अग्निरेकाक्षरेण छंदसा
छंदसा पंचवृत्तिकं प्राणमुदजयत् तदुत्कृष्टं जयं लब्धवान्। तथाहमपि तादृशं तं प्राणमुज्जेषमुत्कृष्टं तं
यजयं प्राप्नुयाम् कुर्यामित्यर्थः। अश्विनौ देवौ द्व्यक्षरेण अक्षरद्वयात्मकेन छंदसा द्विपदः पादद्वयोपे
तान्मनुष्यानुदजयतामुत्कृष्टं जयं लब्धवंतौ। तथाहमपि तेनैव द्व्यक्षरेण छंदसा तादृशान्मनुष्यानु
त्कृष्टं जयं लप्सेय। विष्णुस्त्र्यक्षरेणाक्षरत्रयात्मकेन छंदसा पृथिव्यादीनिमांस्त्रीन्लोकानुदजयत्
अहमपि तादृशांल्लोकानुज्जेषं। सोमश्चतुरक्षरेण चतुष्टयात्मकेन छंदसा पादचतुष्टयोपेतान्पशूनुत्कृ
ष्टजयं लब्धवान्। अहमपि तथा तेनैव चतुरक्षरेण तादृशान्पशूनुत्कृष्टं जयं लप्सेय। पूषा देवः
पंचाक्षरात्मकेन छंदसा पंचसंख्याकान्दिश उदजयत्। तादृशान् दिशोऽहमप्युज्जेषं। सविता सर्वस्य
प्रेरको देवः षडक्षरेण षट्संख्याकानृतून् लब्धवान्। तथा ऋतूनहं लप्सेय। मरुतो देवाः सप्ताक्षरेण
छंदसा सप्तसंख्याकान्ग्राम्यान्पशूनुदजयन्। तादृशान्सप्तग्राम्यानहं जयेयं। बृहस्पतिरष्टाक्ष
रात्मकेन छंदसा गायत्रीमुत्कृष्टं जयं लब्धवान्। तादृशान्सप्तग्राम्यानहं जयेयं। बृहस्पतिरष्टा
क्षरात्मकेन छंदसा गायत्रीमुत्कृष्टं जयं लब्धवान्। तथा तादृशीं गायत्रीमहं लप्सेय। मित्रो देवो

२०६

नवाक्षरेण छंदसा त्रिवृतं स्तोममुदजयत्। तादृशं स्तोममहमुज्जेषं। वरुणो देवो दशाक्षरेण छंदसा विरा
जं दशाक्षरा विराडिति श्रुतेः सिद्धं तदभिमानिनीं देवतामुदजयत्तथा तेनैव छंदसा तादृशीं विरा
जमहमप्युज्जेषं। इंद्र एकादशाक्षरेण छंदसा त्रिष्टुबभिमानिनीं देवतामुदजयत्तथा तेनैव छंद
सा तामुज्जेषं। विश्वेदेवा द्वादशाक्षरेण छंदसा जगत्यभिमानिनीं देवतामुत्कृष्टं जयं लब्धवंतो। अहम
पि तादृशीं जगतीमुत्कृष्टं जयं लप्सेय। वसवो देवास्त्रयोदशाक्षरेण छंदसा त्रयोदशं स्तोमं लब्धवंत
स्तादृशं स्तोममहमुज्जेषं। रुद्राश्चतुर्दशाक्षरेण छंदसा चतुर्दशं स्तोममुदजयंस्तादृशं स्तोममहमु
ज्जेषं। आदित्या देवाः पंचदशाक्षरेण छंदसा पंचदशं स्तोममुदजयंस्तादृशं स्तोममहमुज्जेषं। अदि
तिर्देवमाता षोडशाक्षरेण छंदसा षोडशं स्तोममुदजयत्तथा तेनैव षोडशाक्षरं स्तोममुज्जेषं। प्रजा
पतिर्देवः सप्तदशाक्षरेण छंदसा सप्तदशाख्यं स्तोममुत्कृष्टं जयं लब्धवान्। तथा तेनैव सप्तदशा
क्षरेण तं तादृशं सप्तदशं स्तोममहमुज्जेषं॥ ॥इति षष्ठोऽनुवाकः॥ ॥वेदार्थस्य प्रकाशेन०॥ ॥इ
ति श्रीसायणाचार्यविरचिते वेदार्थप्रकाशे काण्वसंहितायां दशमोऽध्यायः॥ १०॥ ॥यस्य निःश्व
सितं वेदा०॥ दशमाध्याये वाजपेयिका मंत्रा निरूपिताः॥ एकादशे राजसूयसंबंधिमंत्रा निरूप्यंते।

अनेकेद्विपञ्चसोमसमुदाया अत्मको राजसूयः। तत्र च = २

तत्रत्र कथमोनुवाकेनैर्ऋते ध्यादिगतामंत्रा निरूप्यंते॥ कात्या०॥ अष्टाकपालो नुमसेन्द्राम्यायाः पश्चा
द्वविष्यमन्तं स्रुवे हूत्वा दक्षिणाग्नेरुल्मुकमादाय दक्षिणांगत्वा स्वयंप्रदीर्णइरिणे वाग्नोजुहो सेष
ते निर्ऋतइती ति॥ अस्यायमर्थः॥ पौर्णमास्यग्निमादिदेवताकादिंचिदनुमतिरिष्यते। तस्यैपुरोडाशो
ष्टाकपालः कर्तव्यस्तदर्थं तंडुलाः क्षिप्यंते। तदानीं पेषणसाधनस्य पाषाणस्याधस्तात्संश्वा प्रागेन्द्राम्यामित्रिधाः
काष्ठविशेष आधारत्वेन स्थापनीयः। पेषणकाले तस्याः शम्यायाः पश्चात्सिष्यमाणं हविर्यत्बिस्रति तं
तावत्स्रुवे संगृह्य दक्षिणाग्नेः सकाशाद्हुउल्मुकमादाय दक्षिणस्यां दिशि गत्वा स्वयमेव निष्पन्ने मे
छिद्रउल्लूखलप्रदेशे वा स्थिते स्थापिते वा तस्मिन्नुल्मुकेग्नौ तं हविर्भागमेषत इति मंत्रेण जुहु
यादिति॥ पाठस्तु॥ एष ते निर्ऋते भागस्तं जुषस्व स्वाहेति। हे निर्ऋते देव एष ... रूपो भागस्ते खेदी

यादिति॥ पाठस्तु॥ एष ते निर्ऋते भागस्तं जुषस्व स्वाहेति। हे निर्ऋते देवएषष्ठी ... स्वरूपो भागस्ते खेदी
यो तस्त्वं तं भागं जुषस्व सेवस्व स्वाहा सुहुतमस्तु। अनंतरं चातुर्मास्यगतानि चत्वारि पर्वाणि अनुष्ठे
यानि। तत्र पश्चात्सरण्यायनामकं कर्मानुष्ठातव्यं। तत्रवि मंत्रविनियोगमाह॥ कात्या०॥ आहवनीयं प्रतिदिशं
व्यूहन मध्ये पंचस्वग्निषु जुहोति अग्निनेत्रेभ्य इति प्रतिमंत्रमिति। पूर्वादिषु चतसृषु दिक्षुमध्ये भागे
चाहवनीयं पंचधा विभज्य तादृशेषु पंचस्वग्निषु अग्निनेत्रेभ्य इत्यादीनामेकैकेन मंत्रेण स्रुवेण
स्र

दुवः शब्देन हविरभिधीयते। तद्धविर्विद्यते येषां ते दुवस्वंतस्तेभ्य इति ताभ्यां तरं५ =

जुहुयात्। तेषां पाठस्तु॥ अग्निनेत्रेभ्यो देवेभ्यः पुरःसद्भ्यः० दुवःस्वद्भ्यः स्वाहेति। अग्निनेत्रेभ्यः अग्निर्नेता
येषां ते अग्निनेत्रास्तेभ्यः पुरस्तात्पूर्वस्यां दिशि सीदंतीति पुरःसदस्तेभ्यो देवेभ्यः स्वाहा सुहुतमस्तु। यमनेत्र
ता येषां तेभ्यो दक्षिणभागे वस्थितेभ्यो देवेभ्यः स्वाहा सुहुतमस्तु। विश्वेदेवा नेतारो येषां ते स्यः पश्चिमभा
गे वस्थितेभ्यो देवेभ्यः स्वाहा सुहुतमस्तु। मित्रावरुणौ नेतारौ येषां ते मित्रावरुणनेत्रास्तेभ्यो वा मरुन्नेत्रेभ्यो
वाउत्तरभागे वस्थितेभ्यो देवेभ्यः सुहुतमस्तु॥ सोमः नेता येषां तेभ्यो दुवः स्वद्भ्यः परिचर्यावद्भ्यः उपरि
सद्भ्यो देवेभ्यः सुहुतमस्तु॥ कात्या०॥ समस्य ये देवा इति प्रतिमंत्रमिति। पंचधा विभक्तमाहवनीयमे
कीकृत्य ये देवा इत्यादि पंचमंत्राणां मध्ये एकैकमंत्रेण जुहुयादिति शेषः। तेषां पाठस्तु॥ ये देवा अग्निनेत्राः०
दुवस्वंतस्तेभ्यः स्वाहेति। व्याख्यातसमानार्थः॥ कात्या०॥ अग्ने सहस्वेत्युल्मुकादानमिति। अपामार्ग
होमार्थमुल्मुकमादधीत॥ पाठस्तु॥ अग्ने सहस्व० यज्ञवाहसीति। हे अग्ने त्वं पृतनाः शत्रुसंबंधि
नीः सेनाः सहस्व अभिभव। तथा रातिमातीः अभिमानिनः कर्मविघ्नकारिणः शत्रूनपास्य अपनुदं द्विं
सदुष्टरोन केनापि तत्तुं शक्यस्त्वमरातीः शत्रूनुस्तरन्नतिरस्कुर्वन्यज्ञवाहसि यज्ञनिर्वाहके यजमान
असुनिसने। सपत्नो पाप्मा अभिमा
तिरितिश्रुतेः = २

निभिर्नेवर्च्चोदधाः अन्नं ब्रह्मवर्चसं धेहि ॥ का०सा० ॥ देवस्य त्वेति जुहोतीति । अपामार्गहोमलक्षणं हविरुच्यते । पाठस्तु ॥ देवस्य त्वा० रक्षः स्वाहेति । देवस्य त्वेत्यादि व्याख्यातः उपांशुर्नाम प्रथमो ग्रहस्तस्य वीर्येण सामर्थ्येनाहं जुहोमि । अनन्तरं रक्षो राक्षसमातिर्हतं निहतं तेन नष्टं स्वाहा सुहुतमस्तु ॥ का०सा० ॥ रक्षसां त्वेति स्रुवमस्यति तां दिशं यस्यां जुहोतीति । यस्यां दिशि होमं कुर्यात्तां दिशं प्रति स्रुवं प्रक्षिपेत् । वधायेति मंत्रशेषः । रक्षसां त्वा वधाय । सैरक्षसां राक्षसानां वधार्थं त्वां प्रास्यामीति शेषः ॥ का०सा० ॥ अवधिष्म रक्षो ... इत्यायंतीति होमानंतरमिमं मंत्रमुच्चार्य प्रत्यागच्छेयुः ॥ पाठस्तु ॥ अवधिष्म रक्षो ... अवधिष्म इत्यायंतीति होमानंतरमिमं मंत्रमुच्चार्य प्रत्यागच्छेयुः ॥ पाठस्तु ॥ अवधिष्म रक्षो मुष्यत्वा वधायामुमवधिष्मेति । रक्षो राक्षसानवधिष्म हतवंतः । किंवर क्षसां वधं कृतवंतो वयममुमुष्य त्वा वधायामुमवधिष्मेति । ... शत्रोर्वधाय वधार्थममुमिति शत्रुनामग्रहणार्थममुकनामकं शत्रुमवधिष्म ॥ का०सा० ॥ चतुर्गृहीतं जुषाणो ध्वाज्यस्य वेत्विति । आरण्यहविषां मध्ये रुद्रदेवसंगावेधुकं चरुं हुत्वा ततश्चतुर्गृहीतं जुषाणो ध्वाज्यस्य वेत्विति मंत्रेण जुहुयादिति । स्वाहेति मंत्रशेषः । अध्वेति विभक्तिव्यत्ययः । अध्वानं मार्गं जुषाणः सेवमानः देवः आज्यस्य आज्यं वेत्तु पिबतु स्वाहेति होमार्थः ॥ इति प्रथमोऽनुवाकः ॥ ॥ प्रथमेऽनुवाके नैर्ऋतेन

२०८

२०८

हिमं मांसि वीच्यः गर्तविष्टनोदकं =२ आवनेदिकं

पूर्वापराकुर्मीस्यंदमानाः प्रतिलोमाः अपयंतीर्नदीपतिदस्तैस्योः कासंवोद्भूतोदं निवेष्या स्यंदमानानादेस्थावराः प्रसोपतां तरिल्ला
त्रिनिगपौतपवष्याः सरस्याः कूप्याः प्रुष्वा मधु गोरुल्व्यौ पयोघ तः २ =
मादिका तां मंत्रा उक्ताः । द्वितीये अभिषेकार्थजलविषया मंत्रा उच्यंते । अभिषेचनीयस्य सोमयागस्यानुष्ठानं कृत्वा तदभिषेकार्थानि सारस्वतादीनि नानाविधान्युदकान्यानीय तेषां मध्ये प्रथमं सारस्वतजलग्रहणे विनियोगमाह ॥ का०सा० ॥ सारस्वतीर्गृह्णात्यपो देवा इतीति ॥ पाठस्तु ॥ अपो देवा मधुमतीरगृभ्णन्निति । देवा मधुमतीः मधुरसोपेता ऊर्जस्वती विशिष्टान्नरसवतीः राजानं स्रुवते जनयंतीरित्यस्वः चितानादेवकत्वेन चेतमानाः । नायाअपोगृह्णानुगृहीतवंतः । पुनस्ताएव विशिनष्टि याभिरङ्गिर्मित्रावरुणावभ्यषिंचन् मित्रावरुणयोरभिषेकं कृतवंतः । याभिरङ्गिरिंद्रं देवा राजमरातीः शत्रूनत्यानयन्तानीतवंतस्ता आपो गृह्णामीति शेषः ॥ का०सा० ॥ जुहोत्युत्तरासु चतुर्गृहीतानि वृष्णाकुर्म्यादिभिः स्वाहाकारांतैः पूर्वैः पूर्वैः प्रतिमंत्रमुत्तरेरुत्तरैर्गृह्णातीति । स्वाहाकारांतैर्वृष्णाकुर्मिरसीति प्रभृतिभिः पूर्वैः पूर्वैर्मंत्रभागैः क्रमेण चतुर्वारं गृहीतानि कुर्म्यादिभिः स्वाहाकारांतैः पूर्वैराज्यानि ग्राह्यमाणानि स्वक्षु जुहुयात् । हुत्वा च ता आपो उत्तरैः स्वाहाकाररहितैर्मंत्रभागैः क्रमेण गृह्णीयात् । तेषां मध्ये प्रथमम् ऊर्मि हूयोदकसंबंधिहोमग्रहणमंत्राणां पाठः ॥ वृष्णाकुर्मिरसि०

२२

× स्यदमानाग्रहणस्यर्थेतइति। प्रतिग्रहणसो ओजस्वती रिति। अपयंतीर्ग्रहणत्यापइति। नदीपतिंग्रहणत्त्यपांपतिरिति। निवेष्याग्रहणस्यपांगर्भे सीति। आतपवर्ष्याग्रहणतिसूर्यवर्चसइति। स्यंदमानानां स्थावराग्रहणतिसूर्यत्वचइति। कूप्याग्रहणतिव्रजक्षितइति। प्रुष्वाग्रहणतिवोशा इति। सरस्या ग्रहणतिमांदा स्थेति। गोउल्बाग्रहणतिशक्वरीरितिपयोग्रहणतिजनभृतइति। घृतंग्रहणतिविश्वभृतइति। मधुग्रहणतिओजस्थेति ×= स्वनावतएवंवरा

मनुष्मैदेहीति। वृष्णः सेचनसमर्थस्योदकस्यसंबंधीऊर्मिस्तरंगस्त्वंराष्ट्रदाअसि। स्वनावतएवराष्ट्रप्रदो भवसि। अतोमेमह्यंराष्ट्रंराज्यंदेहि स्वाहेति होमार्थः। तादृशस्त्वंअमुष्मैअमुकनाम्नेयजमा नायराष्ट्रंदेहि। कुल्यारूपेणबहुविधसस्योपकारित्वाद्यपांराष्ट्रप्रदत्वमस्तीत्युच्यते। तदुर्मे वृषसे नः सेचनसमर्थः सेनाजलराशिरूपस्यस्य तादृशस्त्वंस्वनावतएवराष्ट्रप्रदो भवसि। अतोमह्यं राष्ट्रंदेहि स्वाहा हविर्दत्तमस्तु। तादृशस्त्वममुष्मैयजमानायराष्ट्रंदेहि॥ एवमुपरितनाअपिमंत्रा व्याख्येयाः॥ पाठस्तु॥ अर्थेतस्थ० राष्ट्रदास्थराष्ट्रंदाराष्ट्रममुष्मैदत्तेति। हे आपो अर्थंप्रयोजनमुद्दि श्यगच्छंतीतिअर्थेतः सकारान्तः अर्थंगच्छंतीत्यर्थेतस्ताथाविधाः यूयंराष्ट्रदास्थस्वनावतोराष्ट्रप्रदास्थ। अतोमेमह्यंराष्ट्रंदत्त तादृश्योयूयममुकनाम्नेयजमानायराष्ट्रंदत्त एवंसर्वत्रमंत्रेषु पूर्ववत् भागाहोमार्थाः। २०९

प्रतिलोमगमन समर्थेन = १

ऊनरस्त्वाग्रहणार्थः ओजस्वती॥ ओजसौबलेनयुक्ताओजस्वत्यआपः। परिवाहिणीः परितः सर्वं आवर्ते तोवहंतीतिपरिवाहिण्यआपः। अपांपतिः समुद्रः। अपांगर्भस्त्वं तस्त्वंवराष्ट्रदाः स्वनावतोसि अतोमह्यं राष्ट्रंदेहि। सूर्यस्यवर्चोदीप्तिर्यासांताः सूर्यवर्चसः। सूर्यस्यत्वग्दीप्तिर्यासांताः सूर्यत्वचः = व्रजक्षित

२०९

पयोघृतात्मकाआपः =
आतपवर्ष्यस्थावराणां तेजः संबंधित्वात् =

पयोघृतात्मकाआपः ४ शक्नुवंतिहिगावोजगद्भर्तुंमतः शक्वर्य =

२

मेघनाम। अत्रतूदकधारणसाम्यात्कूपोभिधीयते। व्रजेक्षियंतिनिवसंतीतिव्रजक्षितः कूपस्था आपः। वाशावश्याः नीहारगता आपोनीहारोदवाहः नदीप्रवाहवन्मनुष्यादिगतिंनप्रतिबध्नाति

सरस्याः = ततोवश्यत्वं। मांदाः गम्भस्रवान्मदरूपाः स्थावराआपः शाक्करीः शक्वर्यः शक्ताआपः जनान्पांति द्वि पे तीतिजनभृतः विश्वंबिभ्रतीतिविश्वभृतः शैष्ठाः शविष्ठाबलिष्ठामध्वायएवंभूता आपो यूयंस्वभा तोराज्यप्रदास्थ। अतोमुष्मैराज्यंयच्छध॥ कात्या०॥ आपः स्वाराजीरितिमरीचीर्ग्रहीत्वाअंजलि नासर्वासु संसृजति। किरणयुक्ताआतपवृष्टीरंजलिनाआदायपूर्वगृहीतासुवाक्यपुसंयोजयेत्॥ पाठस्तु॥ आपः स्वाराजीः स्थराष्ट्रदाराष्ट्रममुष्मैदत्तेति। स्वाराजीः स्वराज्यसंबंधिन्यः स्वराज्यहेआपो

३

यूयंराष्ट्रप्रदास्थ अतोमुष्मैराष्ट्रंदत्त॥ कात्या०॥ औदुंबरेपात्रेसमासिंचसेनाः संमधुमतीरिति। उदुंबरवृक्षेण निर्मितपात्रेपूर्वसंगृहीताआपआसिंचेत्॥ पाठस्तु॥ संमधुमतीर्मधुमतीभिः० वन्वा नाइति। मधुमतीर्मधुरसोपेताआपोमधुमतीभिर्मधुरोपेताभिरद्भिः संपृच्यंतांसंसृज्यंताम् हेइयो महिमहत्। क्षत्रंक्षतत्राणंबलंक्षत्रियायराज्ञेवन्वाना संभजमानाः॥ कात्या०॥ मैत्रावरुणधिष्ण्य

बलेन =

स्य पुरस्तात्त्विदध्या स्पनाधृष्टाः सीदतेति। पूर्वोक्ता आपो मैत्रावरुणास्य धिष्ण्यस्य पूर्वभागे स्था
पयतु॥ पाठस्तु॥ अनाधृष्टाः सीदत ०दधतीरिति। हे आपः अनाधृष्टाः केनाप्यतिरस्कृता यूयमोज
साकैरेण क्षत्रियायराज्ञेमहि महत्क्षत्रं बलविशेषं दधतीः दधत्यः सीदत उपविशत॥ इति द्विती
यानुवाकः॥ ॥द्वितीये त्रिषेकार्थोदके विषया मंत्रा उक्ताः। तृतीयेनुवाके देवसुवां संबंधि हविषा
मंगभूता मंत्रा उच्यंते॥ कात्या०॥ सविता त्वेत्याह यजमान बाहुं दक्षिणं गृहीत्वेति। यजमानस्य
दक्षिणं बाहुं गृहीत्वा सविता त्वेत्यनुवाकं पठेत्॥ पाठस्तु॥ सविता त्वा प्रसवानां० ब्राह्मणानां
राजेत्यंतोनुवाकः॥ सविता। सर्वस्य प्रेरको देवः प्रसवानामभ्यनुज्ञानामाधिपत्ये इति शेषः। त्वां य
जमानं सुवितामभ्यनुजानातु सर्वप्राणिनामाज्ञातारं करोत्वित्यर्थः। गृहपतीनां गृहोपलक्षिताग्नि
साध्य सर्वकर्माधिपतीनामाधिपत्ये स्वयं गृहपतिर्गृहाभिमानी अग्निस्त्वां यजमानं सुवतां अद् २९०
ष्टपुष्पाः एव फलवंतो वनस्पतयस्तेषामधिपत्ये वनस्पतीनामधिपतिः सोमस्त्वां यजमानमभ्यनुज्ञा
२९०
नातु। वक्तुर्विधाया वाचोधिपत्ये वाचस्पतिर्बृहस्पतिस्त्वां यजमानं सुवतां इंद्रो ज्यैष्ठ्याय ज्ये मां बा

माधिपत्ये =

यत्वां सुवतां रुद्रो देवः पशूनामैश्वर्याय त्वां सुवतां मित्रो देवः सत्याधर्मत्वां यजमानमभ्यनुजानातु। ध
र्मपतीनां धर्मपरिपालकानां माधिपत्ये धर्मपरिपालको वरुणस्त्वां यजमानमभ्यनुजानातु। हे देवाः
सवित्रादयो यूयमिमं यजमानमसपत्नं सुवध्वं। निःसपत्नो यथा दिस्य अनुजानीत। किमर्थं महते प्रभु
ताय क्षत्राय क्षत्रियधर्माय महते ज्यैष्ठ्याय ज्येष्ठत्वाय यत इतः पूर्वं पश्चाद्वैतत्समो नास्ति। सैतदर्थ
त्वामिमं यजमानं सुवध्वं। अमुष्यामुष्याः इसेत सदृशे न यजमानस्य माता पितरौ बुध्येते। तयोरेतद्य
जमानं मातापित्रोरिमं यजमानं पुत्रं यथा सुवध्वं। तथा अमुष्य यजमानस्यैतद्यजमानद्वारं पुत्र
मभ्यनुजानीत। किमर्थं अस्यै विशे। आसां सर्वासां प्रजानां परिपालनार्थमित्यर्थः। हे कुरवः वो यु
ष्माकमेष यजमानो राजास्तु। हे पांचालाः वो युष्माकमेष राजास्तु। ब्राह्मणानामस्माकं सोमो राजा
स्तु॥ इति तृतीयोनुवाकः॥ ॥ तृतीयेनुवाके देवसुवां संबंधि हविषामंगभूता मंत्रा उक्ताः। चतु
र्थे राजाभिषेकार्थं व्याघ्रचर्मास्तरणादिमंत्रा उच्यंते॥ कात्या०॥ व्याघ्रचर्म आस्तृणाति सोमस्य
त्विषिरसीति। आस्तरणं कुर्यात्॥ असीति मंत्रशेषः। हे व्याघ्रसंबंधिनी त्वक् त्वं सोमस्य त्विषिर्दी

यत्रैयस्तोम इंद्रमत्स्यपवतसयत्ततः शार्दूलः समभवत् । तेनसोमस्यत्विषिरितिश्रुतेः । = १

मिरसि ॥ का स्या० ॥ अग्नयेस्वाहेतिषड्जुहोति प्रतिमंत्रमिंद्राय स्वाहेतिषड्जुहोति प्रतिमंत्रम
ति अभिषेकात्पूर्वसमयेग्नयेस्वाहेत्यादिभिः षड्भिर्मंत्रैः क्रमेणजुहुयात् । अभिषेकस्यपश्चादिंद्राय
स्वाहेत्यादिभिः षड्भिर्मंत्रैः क्रमेणजुहुयात् । तेषांपाठस्तु ॥ अग्नयेस्वाहा० स्वाहार्यम्णेस्वाहेति । स्व
र्थः ॥ कात्या० ॥ ताभ्यामुत्पुनात्यपः सवितुर्वइतीति । हिरण्येनसंस्कृताभ्यांपवित्राभ्यांद्वाभ्यां
पांउत्पवनंकुर्यात् । पाठस्तु ॥ सवितुर्वः प्रसवउत्पुना० राजस्वइति । सवितुः सूर्यस्यप्रेरकस्यपरमे
श्वरस्यप्रसवेभ्यनुज्ञायांस्थितोहं हेआपः वोयुष्मानच्छिद्रेणछिद्ररहितेनसमीचीनेनपवित्रेणास्र
र्यस्यकिरणैउत्पुनामिउत्पवनंकरोमि । हेउदकत्वमनिभृष्टंकेनाप्यनाधृष्टमसि । किंचसोमस्याग्रस्नोपाकेम
त्विषककालेदात्रंदत्तमसि । हेआपः तर्पौः संतापवतोग्नेर्जाताःपयं वा चोबुंधुर्वो वां बंधुभूतात्नवर्षा
राजानंसुवतेजनयंतीतिराजस्वस्ताराजजनकाग्ययंस्वाहाकारेणकृताः स्थ ॥ कात्या० ॥ आनीयेव
नीयचेनाआसिंचतिसधमादइनीति । अभिषेकार्थमानीतेषुसारस्वतादिषु दकेषुएनाउस्कृता

यावद्वैप्राणेषापोत्नवंति तावद्वाचावदतीतिश्रुतेः = २

२९९

स्थयोस्तुंदसीतिस्तनोगणस्यत्रसहत्रष्टस्यसधादेशः ॥ = ३

अपः आसिंचेत् ॥ पाठस्तु ॥ सधमादोद्युम्निनी० स्वंतरिति । सधमादः सहमादनशीलाद्युम्निनीः द्युम्नि एकपात्रगतसाद
न्यस्तेजोवसरमायाआपः संति । कीदृश्यः अनाधृष्टाः केनाप्यनभिभूताः अपस्यः कर्मयोग्याः
वसानाआच्छादयंत्यो मातृस्थानीयानामपांरिनुः पुत्रस्थानीयोवरुणः पस्त्यासुगृहस्थानीयावस्तिमितिगृहनाम
सुमातृतमासुअतिशयेनजगन्निर्मात्रीषुतास्वंतर्मध्येसधस्थंचक्रेसहस्थितिंकृतवान् । सिंधेमादि
॥ कात्या० ॥ तार्यंप्रत्नतीभिक्षत्रस्येतिप्रतिमंत्रमिति । तार्यंघृतातक्तंवस्त्रंतत्प्रत्नतीनिक्रमेणपरिधाप
येदितिद्रोषः ॥ पाठस्तु ॥ क्षत्रस्योल्बमसि० योनिरसीति । हेतार्यत्वंक्षत्रस्यजैरोस्थानीयस्ययजमान
स्यगर्भत्वेनोपचर्यमाणस्यउल्बंआवरणभूतोसि उल्बावृतोगर्भइतिश्रुतेरिति । हेजरायुगर्भवे कांडूतं
ष्टनेतादृग्भूतोसि । नाभ्यासंनद्धेगर्भेजायतइत्युक्तोभूतोनाभिस्तूतोसियोनिर्गर्भसंवेष्टा
नंतादृगसि ॥ कात्या० ॥ इंद्रस्यवार्त्रघ्नमितिधनुरातनोतीति । आजन्यादसीतिमंत्रशेषः । हेधनु
स्त्वमिंद्रस्यसंबंधिवृत्रोयेनहन्यतइतिवृत्रघ्नंतद्धनुरसि ॥ कात्या० ॥ धनुः प्रयच्छनित्वयायमिति
ति । आततस्मैधनुःप्रदद्यात् ॥ पाठस्तु ॥ त्वयायंवृत्रंवध्यादिति । हेधनुस्त्वयायंयजमानः वृत्रं

× अनेनमंत्रेणाधीबंसंहृत्यपुरस्तादवगूहेत । अधिवासंप्रतिमुचन्निक्षत्रस्ययोनिरसीति × = ४

शत्रुं वध्यात् हन्यात् ॥ का० सू० ॥ मित्रस्य वरुणस्येत्यस्य बाहू विमार्ष्टीति । मित्रस्य वरुणस्येति मंत्रद्वये
न यजमानस्य दक्षिणोत्तरबाहुविमार्जनं कुर्यात् ॥ पाठस्तु ॥ मित्रस्यासि वरुणस्यासीति । हे दक्षिण
बाहो त्वं मित्रस्य संबंधी भवसि । हे वामबाहो त्वं वरुणस्य संबंधी भवसि ॥ का० सू० ॥ रुज्यासीति प्रतिमं
त्रमादाय तिस्र इषूः प्रयच्छतीति । रुज्यासीत्यादिभिर्मंत्रैस्त्रीन् दर्भानादाय यजमानाय प्रयच्छे
त् । तेषां पाठस्तु ॥ रुज्यासि दृबासि क्षुपासीति । हे इषो त्वं रुज्यासि रुजो भंग इति धातुः । शत्रूणां भं
गकरो भवसि । दृबासि दृ विदारण इति धातुः । दृणातीति दृबा विदारको भवसि । क्षुपासीति क्षुपा
शत्रुकंपनकारिणी इषुरसि । क्षुप विधूनन इति धातुः ॥ का० सू० ॥ पातैनं मित्रस्याग्निमिति यजमा
नमभिस्पृशेत् ॥ पाठस्तु ॥ पातैनं प्रांचं० दिग्भ्यः पातेति । हे इषवः प्रांचं पूर्वभागे व्यवस्थितमेनं यजमा
नं पात पालयत । प्रत्यंचं पश्चिमदिग्व्यवस्थितमेनं पात तिर्यंचं तिर्यग्गतमेनं यजमानं पालयत । दिग्भ्यो ऽन्याभ्यो दिग्भ्यः पात । =
॥ का० सू० ॥ आविर्मर्या इति वाचयतीति ॥ पाठस्तु ॥ आविर्मर्या० उरुशर्मेति । हे मर्या मनुष्या ऋत्विजो य
जमानाविरभूत । सम्यगनुतिष्ठत । युष्मदनुष्ठितेन कर्मणा अग्निर्गृहपतिर्भूत्वा आवित्त उपल
ब्धः । इंद्रो वृद्धश्रवाः वृद्धकीर्तिर्भूत्वा आवित्त उपलब्धः । पूषा देवः विश्ववेदाः सर्वज्ञो भूत्वा

२१२

हे मर्या अयं यजमान आविरस्तु प्रकटो भवेत् यस्मादग्निर्गृहपतिरग्निरावेदितस्तस्मिं
श्चाद्योपात्तवेदितादिति पाठान्तरं । =

अत्राविदि धातुः लाभार्थः ... व्याख्यातः । तथा ॥ आविर्मर्या इत्यनिरुक्तं प्रजापतिर्वा अनिरुक्त इत्यादि =

आवित्तः । मित्रावरुणौ देवौ धृतव्रतौ धारितकर्माणौ भूत्वा आवित्तौ तथा द्यावापृथिवी द्यावापृथि
व्यौ विश्वस्य संसुखभाव्यौ भवतीति विश्वशंभुवौ । तथाविधे भूत्वा आवित्ते अदितिरदीना
देवमाता उरुशर्मा उरु महत् शर्म गृहं यस्याः सुखं वा यस्याः सा तथाविधा भूत्वा आवित्ता उपलब्धा ॥ इति
चतुर्थोऽनुवाकः ॥ ॥ चतुर्थेऽनुवाके राजाभिषेकार्थं व्याघ्रचर्मास्तरणादिमंत्रा उक्ताः ॥ पंचमेऽधि
गाक्रमणस्य मंत्रा उच्यंते ॥ का० सू० ॥ अवेष्टा इति लोहायसमाविध्यति केशवापाय सदोन्त उपविष्टायेति ।
सदोंतस्थिताय केशसंस्कारिणे पुरुषाय अयोमयं लोहं निरस्येत् ॥ पाठस्तु ॥ अवेष्टा दंदशूका इति । दंद
शूकाः सर्पसदृशा यज्ञविघ्नकारिणो राक्षसादयः । अवेष्टा विनाशिताः अवयजतिर्नाशार्थः ॥ का० सू० ॥ सु
न्वंतमाक्रमयत्यनुदिशं दिशः प्राचीमारोहेति वाचयति प्रतिदिशं मंत्रं प्रतिदिशं यथालिंगमिति । यजमानं दिशा
माक्रमणं कारयन्नध्वर्युरेकैकेन मंत्रेण तत्तद्दिगाक्रमणं तत्तद्दिग्वाचकलिंगमनतिक्रम्य तमेव यज
मानं वाचयेत् । तत्र प्रथममंत्रपाठस्तु ॥ प्राचीमारोह० ब्रह्मद्रविणमिति । हे यजमान त्वं प्राचीं दिशमा
रोह । आक्रमस्व । तथाविधं त्वां छंदसां मध्ये गायत्री छंदः अवतु रक्षतु । साम्नां मध्ये अभि त्वामूरनो

नुमहइसस्यामध्युसन्नं रथंतराख्यं साम त्वां रक्षतु। स्तोमानां मध्ये त्रिवृत्स्तोमः पालयतु। ऋतूनां मध्ये
वसंतर्तुः पालयतु। ब्रह्म ब्राह्मणजाति स्त्वदीयं द्रविणं धनं रक्षतु। त्रिवृत्स्तोमस्य स्वरूपं सोमब्रा
ह्मणे समाम्नातं। तिसृभ्यो हिंकरोति स प्रथमया तिसृभ्यो हिंकरोति स मध्यमया तिसृभ्यो हिंकरोति
स उत्तमया उद्यती त्रिवृतो विष्टुतिरिति। अस्यायमर्थः। उपास्मै गायते त्यादीनि तृचात्मकानि त्रीणि
सूक्तानि संति तेषु त्रिसृभ्यः ऋग्भ्यो हिंकरोति गायेत्। काभिस्तिसृभिः प्रथमया त्रिष्वपि सूक्तेषु
या या प्रथमा तया सह उक्ताना गायेत्। तथा सति तिसृभिर्ऋग्भी तत्र भवति सोयं प्रथमपर्यायः। द्वितीये
पर्याये सूक्तत्रयगतया मध्यमया गायेत्। तृतीये पर्याये सूक्तत्रयगतयोत्तमया गायेत्। अनेन
प्रकारेण त्रिवृत्स्तोमसंबंधिनी त्रिवृत्स्तुतिः संपद्यते। सेयं स्तुतिरुद्यतीति नाम्नाभिधीयते॥ द्वि
तीयमंत्रपाठस्तु॥ दक्षिणामारोह ० क्षत्रं द्रविणमिति। पूर्वन्यायेन योजनीयं। त्वामिंद्र इह वामह इद्से २१२
२१३ तस्यामध्युसन्नं बृहत्साम पंचदशस्तोमस्त्वेवमाम्नातः। पंचभ्यो हिंकरोति स तिसृभिः स एकया पं
चभ्यो हिंकरोति। स एकया स तिसृभिः स एकया पंचभ्यो हिंकरोति पंचपंचिनी पंचदशस्य विष्टु

तिरिति पूर्वोक्ते त्रिवृत्स्तोम एक एव सूक्तत्रयनिष्पाद्यः अन्ये तु स्तोमा एकैकेनैव तृचात्मकेन सूक्तेन निष्पाद्यं
ते। तत्रायं क्रमः॥ प्रथमपर्याये आद्याभिः पंचभिर्ऋग्भिर्गायेत। इतरे द्वे सकृत्सकृत् गायेत्। द्वितीयपर्याये प्रथ
मां सकृत् गायेत्। तृतीयपर्याये मध्यमां सकृत्गायेत्। सेयमेकविंशस्तोमसंबंधिनी विष्टुतिः सप्तसप्तती
सृभिर्धीयते। पंचदशस्तोमस्त्वामवतु। क्षत्रं क्षत्रियजातिस्त्वामवतु। द्रविणं धनं च त्वामवतु। एवं तृतीय
चतुर्थौ मंत्रौ व्याख्येयौ॥ प्रतीचीमारोह ० त्वां जगती नाम छंदः अवतु। वैरूपं साम त्वामवतु। सप्तदशस्तो
मस्त्वामवतु। वर्षाख्य ऋतुस्त्वामवतु। विट् वैश्यजातिस्त्वां त्वदीयद्रविणमवतु। एवमुदीचीमारोह। उ
दीचीमारोहं त्वां अनुष्टुप् अवतु। वैराजं छंदस्त्वामवतु। एकविंशस्तोमस्त्वामवतु। शरन्नाम ऋतु
स्त्वामवतु। सर्वस्य च फलस्वरूपं द्रविणं च त्वामवतु। पंचममंत्रपाठस्तु॥ ऊर्ध्वामारोह ० द्रविणमिति। वृ
र्धस्ते जो निमानी देवोऽस्य धनं रक्षतु। प्राधदस्मै पुरारथं इत्येतस्यामध्युसन्नं सामन्त्राक्रशीरं रेवतीर्णः
सध्यमाद इत्येतस्यामध्युसन्नं साम रैवतं। त्रिणवत्रयस्त्रिंशस्तोम एवमाम्नातः। नवभ्यो हिंकरोति स तिसृ
भिः स पंचभिः स एकया नवभ्यो हिंकरोति स एकया स तिसृभिः स पंचभिः नवभ्यो हिंकरोति स पंच

त्रिः सएकया सतिस्टत्निर्वं अत्रो वैरिणद्वतीति। प्रथमपर्याये प्रथमां त्रिर्गायेत्। मध्यमां पंचकृत्वो गायेत्। उ
त्तमां सकृद्गायेत्। द्वितीयपर्याये प्रथमां सकृद्गायेत्। मध्यमां त्रिर्गायेत्। तृतीयपर्याये उत्तमां पंचमां
कृत्वो मध्यमां सकृद्गायेत्। उत्तमां त्रिर्गायेत्। सोयं त्रिरावृत्तो नवसंख्योपेतत्वात्त्रिणवनाम कोवृत्त्रस
मानः। त्रयस्त्रिंशः स्तोमएव माम्नातः। एकादशभ्यो हिंकरोति स सप्तभिः स सप्तभिः सएकया एकादश
भ्यो हिंकरोति सएकया सतिस्टत्निः सप्तभिः एकादशभ्यो हिंकरोति सप्तभिः सएकया सतिस्टत्निरं तो वै त्रय
स्त्रिंशः इति प्रथमपर्याये प्रथमां त्रिर्गायेत्। मध्यमां सप्तकृत्वो मध्यमां सप्तकृत्वो उत्तमां त्रिः सप्तकृत्व उत्तमां सकृ
त्। द्वितीयपर्याये प्रथमां सकृत् मध्यमां त्रिरुत्तमां सप्तकृत्वस्तृतीयपर्याये प्रथमां सप्तकृत्वो मध्यमां
सकृदुत्तमां त्रिः सोयं त्रयस्त्रिंशः सर्वेषां स्तोमानामंतः॥ कात्या०॥ पादेन सीसं निरस्य तिप्रसत्नामि
ति। नमुचेः शिरइति मंत्रशेषः। नमुचेरसुरस्य शिरः अस्यस्तं प्रतिगच्छ क्षिप्तं॥ का सा०॥ व्याघ्रचर्मा
रोहयतिसोमस्यत्विषिरिति। अभिषेकार्थं राजानं व्याघ्रचर्मण्यवस्थापयेत्। पाठस्तु॥ सोमस्य
त्विषिरसि तवेव मे त्विषिर्भूयादिति। हे व्याघ्रचर्मत्वं सोमस्य त्विषिरसि। दीप्तिरसि। तवेव तव यथा

दीप्तिर्वर्त्तते तथा मेममापि दीप्तिर्भूयात्॥ का सा०॥ रुक्ममधस्पदं कुरुते मृत्योः पाहीति। पादतले हिरण्यं कु
र्यात्। पाहीति मंत्रशेषः। हे सुवर्णत्वं मृत्योः सकाशात् मां पाहि पालय॥ का सा०॥ शिरसि नवतं रुक्मं ओ
जोसीतीति। नवसंख्यायुक्तनिष्कपरिमितं वा सुवर्णं यजमानस्य शिरसि कुर्यादिति शेषः॥ पाठस्तु॥ ओजो
सि सहोस्यमृतमसीति हि हिरण्यत्वमोजस्तेजोयुक्तमसि। अमृतमविनाशितमसि। कात्यायनः॥ बाहू उद्गृह्णाति
हिरण्यरूपाइति मंत्रेण मित्रोसीत्यनेन वा बाहुद्वयमुत्तानं कुर्यात्। तत्र प्रथममंत्रपाठस्तु॥ हिरण्यरूपा उष
सो० मदितिं दितिं चेति हे वरुण शत्रुनिवारक दक्षिणहस्तौ हिरण्यरूपौ सुवर्णरखचितकवचौ अतिशयेन भासमा
नौ इंद्रौ समर्थौ उग्रौ युवां गर्त्तं रथस्योपरिभागं गर्त्तसदृशमारोहतं पर कीयमारणेभ्यो रक्षितुं। चर्मकवचादि
भिराच्छादितौ सति रथस्योपरि भागो गर्त्तसदृशो भवति। आरोहणं कदा कर्त्तव्यमित्यपेक्षायते उषस उसः काल
विरोके किरणैः विशिष्टदीप्तिभिः सूर्यश्च उदितउदयंप्राप्तस्त। दा आरोहतमित्यर्थः। ततो रथारोहणादूर्ध्वं अदि
तिमखंडितां खसेनां दितिं खंडितां परसेनां चक्षाथ्यां क्रमेणानुग्रहनिग्रहदृष्ट्या समीक्षेथां मित्रोसि वरुणेण

*विरोके अवसान काल इति अर्थात् विरोकशब्दस्य सप्तम्यंतत्वादिदं साधु ८२

*सहोसि बलरूपमसि = ४

हे मित्र। प्रियरूप वामहस्त युवां = ५

यजमानश्चात्रा
दिः = २

सीति वैकल्पिक द्वितीयमंत्रो व्याख्यातः॥ इत्येकादशोऽध्याये पंचमोऽनुवाकः॥ पंचमे दिगादिक्रमणादिमंत्रा उक्ताः।
षष्ठेऽनुवाकेऽभिषेकादिमंत्रा उच्यंते॥ कात्यायनः॥ स्थितं आंचमिति षिंचतीतरो धाऽर्कपर्णपुरस्तात्पालाशेन प्रथमं
पश्चादितरो द्वितीयेन स्वैस्तृतीयेन मित्रो राजन्यो वैश्यश्च तुर्थेन सोमस्य त्वा द्युम्नेनेति प्रतिमंत्र मभिषिंचामीति
सर्वत्र सा कांक्षत्वात् क्षत्राणां क्षत्रपतिरेधीति वेमम मुष्य पुत्रमुष्यै विशेति। तत्कर्म सहिते व्याघ्र चर्मणि अवस्थितं आ
सुरंवं राजानं पुरोहितादयः पुरस्तादवस्थाय अभिषिंचेयुः। अभिषेक जलपात्राणि चतुर्विधानि। पालाशो
दुंबर न्यग्रोधाश्वत्थानि। तत्र पालाश पात्रेण पुरोहितो ध्वर्युर्वान्यतरः प्रथममभिषिंचेत्। उदुंबर पात्रेणाध्व
र्युर्व्यतिरिक्तः कश्चिदभिषिंचेयुः। ततो न्यग्रोध पात्रेण स्वकीयो बंधुः कश्चिदभिषिंचेत्। तत आश्वत्थपात्रे
णामित्रभूतः कश्चित्क्षत्रियो वैश्यस्याभिषिंचेत्। चतुर्विधानामेतेषामभिषेक्तॄणां क्रमेणसोमस्याग्नेः सूर्य
स्येंद्रस्येत्येते चत्वारोमंत्राद्रष्टव्याः। मरुतामोजसेत्ययं चतुर्थमंत्रशेषः। अभिषिंचामीति पदमुपरितने
षु त्रिषु मंत्रेष्वनुवर्तते। क्षत्राणामिति चत्वारोऽपि मंत्रशेषाः प्रतिमंत्रमावर्तनीयाः॥ एतेषां पाठस्तु॥ सोमस्य त्वा

यद्वा आदित्यः पर्वतनाद्युच्यते। तथा चाय मर्थः। वर्षितृरादित्यस्य दृष्ट्या द्विधा नाद्याः नाव आपः प्रचरंति सर्वतो गच्छंति स्यंदंते त्रय्याः =
ता आपः प्रावृट्काले अधस्तादावर्तनं आवर्तंते। ग्रीष्मकाले तु पूर्वं अर्हं कुध्नं अंतरिक्षस्थ मेघमनु लक्ष्मीकृत सरी प्रमाणा गच्छंतः =
नावा एवयनुष्यत इष्टका इत्युपक्रम्य षष्ठिश्च ह वै त्रीणि च शतान्यादित्यं नाव्या अभि क्षरंतीति हि श्रुतिः। यद्वा अत्र वत्सस्य मवद्धिं =

द्युम्नेः आलप्पाना धूंशजेति हे यजमान त्वां सोमस्यैं दोर्द्युम्नेन द्योतनेन तेजसाभिषिंचामि। अग्नेर्भ्राजसादीप्या
त्वामभिषिंचामि। सूर्यस्य वर्चसा त्रोचिषा त्वामभिषिंचामि। इंद्रस्येंद्रियेण वीर्येण त्वामभिषिंचामि। मरुता
मोजसा बलेन त्वामभिषिंचामि। एवं सर्वैरभिषिक्तः सन् क्षत्राणां क्षत्रपतिरेधि सर्वेषां क्षत्रियाणामधि
पतिर्भव। अतिदिद्यून् दोनरवंऽनस्मा तोस्तुपं अवरवंऽनसा मर्थनि रिप्रयुक्तानानिषादीनसतीसाऽति
क्रम्या। प्रसार्यैनं यजमानं हे सोमादिदेवसंघ त्वं पाहि पालय। एवं वो वैदिद्यवदेति श्रुतेः। यद्वा राज्ञ प्रयुक्तो
नू सर्वान्बाणादीन प्रसार्य हे यजमान त्वं सर्वान्नुवं पालय। महते प्रभूताय जानराज्याय जनानां संबंधिरा
ज्यमानराज्यं तदर्थं हे देवाः इमं यजमानं असपत्नं सुव ध्वं। शिष्टं पूर्ववद्व्याख्येयं॥ कात्या०। अभिषेके
ण प्रलिंपते प्रपर्वतस्येति। अभिषेक संबंध्युदकशेषेण प्रलेपनं कुर्यात्॥ पाठस्तु॥ प्र० पर्वतस्य० री
यमाणा इति। वृषभस्य वर्षणसमर्थस्य पर्वतस्य दत्रास्य मेघस्य पृष्ठादुपरिभागान्नावः नौया गम्या वह
ला आपः प्रचरंति गच्छंति। कीदृश्यः स्वसिचः। स्वमात्मीयं यजमानक्षेत्रं सिंचंतीति स्वसिचः। इयाना
गच्छंत्यो बाहुल्येन सर्वत्र प्रवहंत्यः। न हीयते इत्यसिह ऊर्ध्वं मार्गं बुध्नस्य पादस्याग्र भागे बुध्न्यः शिरः प्रभृति
नावः नैयंते स्तुतं तैस्त्र स्तोत्र होमंत्रैरिति नाव आपः शुश्रुत्वाद्वितियालुरिति ग्राह्यांतरं। = २

आदेः पर्वतस्य स्थानान्निर्गच्छेसोनावातार्ग्यायामहानदीस्त्या आपः प्रचरंतिस्वयंसेकुः॥ तारवराजस्य यज्ञिनो यथ्यावर्तते स्वमानाअ
तिजकेपावेषु। अहिमहंतारंभ्रारूणा युभूराव्ये मरुत्ववनः तत्रनवंकुर्यं प्रधानक्रतं यजमानमनुल्कद्वीहस्यरीयमाणा रुविहितर
त्रिषिव्यमानाः इतिताष्यांतरं॥ रुर्वच्छ्रुत्र ॥=९९
पादाग्रपर्यन्तमनुक्रमेणरीयमाणागच्छेसस्ता आपः अधरागच्छोता आवर्त्तन्तु पुनःपुनरावर्त्तस्थितास्ता
स्ताद्वत्य आपउदगूर्ध्वगता आवर्त्तन्तु॥ कात्या०॥ चर्मणित्रिर्विक्रमयतिविष्णोरितिप्रतिमंत्रमिति। वि
ष्णोरितिमंत्रत्रयेण आस्तीर्णे व्याघ्रचर्मणि त्रिवारं पादप्रक्षेपणं कुर्यात्॥ तेषां पाठस्तु॥ विष्णोर्विक्रमणमसि
विष्णोर्विक्रान्तमसि विष्णोः क्रांतमसीति। यजमानस्य मम प्रथमप्रक्रमत्वं विष्णोर्व्यापनशीलस्य जग
दीश्वरस्य त्रिविक्रमावतारस्य विक्रमणं प्रक्रमणमसि प्रथमपादप्रक्षेपेण जितो भूर्लोकोसि हे द्विती
यप्रक्रमत्वं विक्रांतमसि विष्णोः द्वितीयपादप्रक्षेपेण जितमंतरिक्षमसि हे तृतीयप्रक्रमण त्वं क्रांतं वि
ष्णोः पराक्रमेण जितं त्रिविष्टपमसि। इमं मंत्रत्रयं लोकत्रयविजयेतेत्तिरीयाअपामनंति। विष्णुक्र
मानक्रमते विष्णुरेवभूत्वेमांल्लोकान्विजयतीति॥ कात्या०॥ शालाद्वार्ये जुहोति पुत्रेन्वारब्धे प्रजाप
तइतीति। पूर्वतनाहवनीयमिदानीतेन गार्हपत्यसंज्ञः शालाद्वार्यं तस्मिन्नजुहुयात्॥ पाठस्तु॥ प्रजापतेन०
रयीणामिति। हे प्रजापते त्वदन्यः कोपि पुरुषस्त्वत्तः तानि विश्वाविश्वानि सर्वाणि रूपाणि न परिबभू
व परिग्रहितुं समर्थो नाभूत्। परिग्रहः सृष्टेरप्युपलक्षणं। सृष्टिसंहारयोः अशक्त इत्यर्थः। अ
तस्ते वयं यत्कामा जुहुमः। नोस्माकं तत्कामं ददातु। किंच वयं रयीणां पतयः स्याम स्वामिनो भवेम॥ का

त्या०॥ आग्नीध्रीये पालाशेन शेषान्जुहोति रुद्रयत्तइतीति। पालाशपात्रेणाभिषेकशेषरूपान्युदकान्याग्नीध्र
संबंधिधिष्ण्ये जुहुयात्॥ पाठस्तु॥ रुद्र यत्ते० स्वाहेति। हे रुद्र ते तव क्रिविहिंसाकरणयोजनगद्विरोधिनां हिंसाक
र्तकं सज्ञानानां तु सर्वपुरुषार्थस्य करणकृतं यं नामास्ति तस्मै नाम्ने हुतमस्तु। अभिषेकशेषरूपं पात्रस्थ
मुदकं हुतमस्तु। तन्नामिष्टमसि अमाइत्यव्ययं गृहवाची मदीये गृहे दत्तमस्तु। स्वाहेति होमार्थः॥ इति षष्ठोनु
वाकः॥ ॥षष्ठेनुवाके अभिषेकादिमंत्रा उक्ताः॥ सप्तमे रथावहरणादिमंत्रा उच्यंते॥ कात्या०॥ वाजपेयव
दुप्यमवहरसेति। वाजपेयेयथा रथावहरणं कृतं तद्वदत्रापि रथमवहरेत्॥ पाठस्तु॥ इंद्रस्य वज्रोसीति। हे
रथत्वं इंद्रस्य वज्रसदृशो भवसि॥ कात्या०॥ युनक्ति पूर्ववन्मित्रावरुणयोरितीति। वाजपेयेयथाश्व
संयोजनं कृतं तद्वदत्रापि रथेश्वान्संयोजयेत्॥ पाठस्तु॥ मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषायुन
ज्मीति। प्रशास्त्रोः शास्तार्पयितारौ मित्रावरुणयोः प्रशिषा प्रशासनेन यज्ञसंबंधिनि रथेत्वा
मश्वं युनज्मि युञ्ज्यां॥ कात्या०॥ अव्यथायैत्वेति सुवर्णं तमारोहतीति संयोजितरथे यजमान आति
ष्ठेत्॥ पाठस्तु॥ अव्यथायैत्वा स्वधायैत्वारिष्टः फल्गुन इति। अरिष्टः अनुपहिंसितः फल्गुनोर्जुनः इन्द्र

अथत्तय चलनयोरिति धातुः =

इत्यर्थः। अर्जुनो ह वै नामेंद्र इति श्रुतेः। एवंभूत इंद्र हे रथलाघवा अव्यथायै भयरहिताय चलनरहिताय वा आरोहयचेति शेषः। स्वधायै अन्नरसाय त्वामारोहयतु। कात्या०। मरुतामिति दक्षिणधुर्यं प्रयोजयतीति। युगस्य दक्षिणभागवाहकमश्वं प्रयोजयेत्। पाठस्तु। मरुतां प्रसवेन जयेति। मरुतां संबंधिन्या प्रसवेनानुज्ञया वर्तमानोश्वस्त्वं अत्र मरुं जय। कात्या०। गवां मध्ये स्थापयत्याप्रामिति। प्रगल्भं प्रगच्छं तमश्वं गोसमूहे वस्थापयेत्। मनस इति मंत्रशेषः। वयं मनसा सह आपाम प्राप्ताः एवंतः। कात्या०। आप्लव्यानो धनुर्यात्योपस्थानमिति गां यजमानः सभिंद्रियेणेतीति। यजमानो धनुष्को धागामुपस्थानेोत्। व यमिंद्रियेण वीर्येण संगताः स्म। कात्या०। पूर्वेण्यूपं परीत्यांतः पासदे तोस्थापयति। मातरिंद्र इति। पाठस्तु। मातरिंद्रते० स्वस्वानिति। तूर्णसहते शत्रून् जिन्वतीति तुराषाडू त स्यसैं बोधनं हे तुराषाडिंद्र ते तव स्वभूतास्ते वेदधीनत्वेन प्रसिद्धा वयं अयुक्तासः त्वया असंयुक्ताः संतः अब्रह्मता पवृढ्त्वं कर्म तद्रहिता त्वामविदसौ विविधमुपक्षीणा न नवामः किंतु तव यष्टारो न वामः हे वज्रहस्तेंद्र देवरथमीनवबंधनप्रग्रहान् स्वस्वान् योक्तनानि क्लानुसारिणो श्वानूय यस्मिन्रथे आ युवसे सर्व

२७

दसु उपक्षये इति धातुः =

अब्रह्मता याः सुपां सुलुगिति पंचम्या लुक्

२७

= × परब्रह्मणि स्थायिनी श्रुतिर्छंदा श्रुतिजगती। रश्मिस्तुतिः। हंसः ध्यानं पापं वा हंसो भगवानादित्यमंडलस्थः। स च शुचिषु स्वदीप्ति =
= षु सीदतीति शुचिषत्। पवित्रपदार्थेषु विशिष्टसन्निधानाच्छुचिषत्। वसुर्वासयिता पुरुषरूपेण। अंतरिक्षसदायुरूपेण। =
= सर्वप्राणिहृदयाकाशगतो वा। होता यागादिकर्तृप्रेरकत्वेन। वेदिषदग्निरूपेण। अतिथिः पूज्यत्वेन दुरोणसत्प्रतिगृहे

तो भिः श्रयसितं रथमधितिष्ठ आश्रय अस्मदागमनार्थमारो हेत्यर्थः। कात्या०। अग्नये गृहपतय इति चतस्र पथिमोचनीयानि जुहोति प्रतिमंत्रमिति। रथविमोचनार्हानि चतुःसंख्याकानाहुति विशेषाने कैके न मंत्रेण जुहुयात्। तेषां पाठस्तु। अग्नये गृहपतये स्वाहा० मे ओजसे स्वाहेति। गृहाधिपतयेग्नये स्वाहा हविर्नमं अस्तु। वनस्पतिरूपिणे सोमाय हविर्दत्तमस्तु। इंद्र संबंधिने इंद्रियाय वीर्याधायस्वाहा सुहुतमस्तु। मरुतामोजसे मरुतां संबंधिने ओजसे बलाय स्वाहा सुहुतमस्तु। कात्या०। भूमिमवेक्षते पृथिविमातरितीति। पाठस्तु। पृथिविमात० त्वामिति। हे मातर्जगन्निर्मात्रि हे पृथिवि त्वं मा मा हिंसीः हिंसां माकार्षीः अहमपि त्वां पृथिवीं माहिंसिषं। कात्या०। अवरोहति हंसः शुचिषदितीति। रथात्सकाशादवरोहणं कुर्यात्। पाठस्तु। हंसः शुचिषत्० बृहदिति। हंसः पृथिवीमिति हंसो रथः शुचो देवयजनेर थवाहने वसी दसीलीति। शुचिषत्स्व स्योपरि यजमानं वासयतीति वसुः अंतरिक्ष्वाघनवरुद्धं तरिक्षे सीदतीसंतरिक्षसत् होता होत्रसमानस्तदेवकथमिस्तुच्यते। वेद्यां सीदतीति वेदिषत् अतिथिरा व वाक्यस्थ तदपि केथमिस्तुच्यते। दुरोणे षु सीदतीति दुरोणसत्। यथा यस्तमारो हुं नयति तस्य तस्य गृहे सीदतीति दुरोण
= × वर्तमानः दुरोणमिति गृहनाम। नृषु सीदतीति प्राणभावेनेति नृषत्। वरेषु श्रेष्ठेषु ज्ञानरूपेणासीदतीति वरसत्। ऋते सत्ये सीदतीति ऋ =
= तसत्। स्वर्गादिसत्त्वो के व्युषिषमानत्वा छोमसत्। मत्स्यादिरूपेण अप्सु जायत इत्यब्जाः। गोषु वेदेषु निमित्तभूतेषु हव्यवाहनादिजात =
= गोजाः। सत्यं पालयितुमवतरतीति ऋतजाः। अद्रिषु जाततया अद्रिजाः। ऋतं ज्ञानरूपं बृहत् बृहदिति = २

सत्तून्रेषु मनुष्येषूपकारं कर्तुं सीदतीति नृषत्। वरेष्वेष्ठे राजगृहे सीदतीति वरसत्। ऋते यज्ञे वाजपेयादौ सीदती
ति वरसत्। सूर्यवेद्धं व्योम न्नाकाद्री सीदतीति व्योमसत्। अप्सु योनिर्वा अश्व इति श्रुतेः। अब्जो जातेरश्वेरूपे
तत्वादब्जाः। गोशब्दवाच्याद्भूम्याज्जायत इति गोजाः। रथस्य वज्ररूपत्वं तैत्तिरीयैः समाम्नातं इन्द्रो वृत्रा
य वज्रं प्राहरत् स त्रेधा व्यभवत् स्फ्यस्तृतीयं रथस्तृतीयमिति अश्ववाहि रूपत्वेन ऋतं यज्ञमुद्दिश्य जात
त्वादृतजाः। अद्रिजाः पाषाणसदृशो यो दृढकाष्ठे यो जातत्वादद्रिजाः। ईदृशो रथो बृहद्धतं प्रौढं राज
सूययज्ञं संपादयत्विति शेषः॥ कात्यायनः॥ उपविशति शतमानाविपदसीतीति। शतसंख्यानिष्क
परिमितो रुक्मविशेषा पुंपस्पृशेत्॥ पाठस्तु॥ इयदस्यायुर्वे मे मिदेहीति। हे रुक्मविशेषत्वमियद
सि एतावत्परिमाणोसि। अत्र तत्परिमाणं हस्तेनाभिनीयते परिमितत्वादेवायुःस्वरूपोसि तस्मादायु
र्मे प्रयच्छ। युङ्ङसि धारयितुं योग्योसि धारिते सति वर्चोसि तेजस्वी त्वमसि अतो मे कांतिं प्रयच्छ॥ का

२१८

त्या०॥ उदुंबर्यसीति शाखामुपस्पृशतीति। औदुंबरी शाखामुपस्पृशेत्॥ पाठस्तु॥ ऊर्गस्यूर्जं मयि धेही
ति। हे औदुंबरि शाखे त्वं ऊर्गसि अन्नरूपा त्वमसि। तत ऊर्जमन्नं मयि धेहि स्थापय॥ का०त्या०॥ इंद्रस्य

मि सवहरेत बाहू इति॥ पूर्वं हिरण्यरूपाउपधृतमंत्रेण यजमानस्य बाहू उन्नीतौ तयोरिदानीमधस्ता
दुपावहरणमुच्यते॥ पाठस्तु॥ इंद्रस्य वो बाहू वीर्यकृतावुपावहरामीति। वीर्यकृतौ वीर्यकरणे समर्थस्य
इंद्रस्य परमैश्वर्ययुक्तस्य यजमानस्य संबंधिनौ वां युवां बाहू उपावहरामि॥ इत्येकादशोध्याये सप्तमोनु
वाकः॥ सप्तमेनुवाके रथावरणादिमंत्रा उक्ताः। अष्टमे आसंदीस्थापनादिमंत्रा उच्यंते॥ का०त्या०॥ खादि
रीमासंदीं [illegible] सी व्याघ्रचर्मणि [illegible] निदधाति स्योनासीति। रज्जुसंबंधिनीं खादिरवृक्षनिर्मितामा
संदीं व्याघ्रचर्मप्रदेशे निदध्यात्। सुषदासीति मंत्रशेषः। हे आसंदि त्वं स्योनासि सुखकरी त्वमसि। सुष
दासि सुखेनोपवेष्टुं योग्यासि॥ का०त्या०॥ अधिवासमस्यामास्तृणाति क्षत्रस्य योनिरसीतीति। अस्यामा
संद्यामुपवर्यादकं वस्त्रमास्तृणीयात्। असीति मंत्रशेषः। हे अधिवास त्वं क्षत्रस्य क्षत्रियस्य योनिः
मातृवद्धारकत्वेन कारणमसि॥ का०त्या०॥ स्योनामित्यस्यामुपवेशयति स्योनामासीदेति। यजमानमासं
द्यामुपवेशयेत्॥ पाठस्तु॥ स्योनामासीद० योनिमासीदेति। हे यजमानशरीरस्य स्योनां सुखकारि

उपा

णीमेतामासंदीं [illegible] मासीद उपविश। सुषदां सुखेनोपवेष्टुं योग्यामासंदीमासीद क्षत्रस्य कारण॰

कृतामुपविशति॥ कात्या०॥ निषसादेत्युपविशत्यस्यामासन्द्यामिति। अस्य यजमानस्योपरि आसंद्यां संस्पृशन्नो
त॥ पाठस्तु॥ निषसाद० सुक्रतुरिति। असौ यजमानो धृतव्रतः स्वीकृतव्रतो वरुणो निष्टु निवारको ऽस्तु साम्रा
ज्याय अस्यामासंद्यामुपवेशाय पस्त्यासु बहुषु वैरिगृहेष्वागत्य तत्र साम्राज्यं कर्तुं सुक्रतुः शोभनसंक
ल्पो भवतु॥ कात्या०॥ अभिभूरसि स्पेपंचाक्षान्पाणावाधायेति पंचसंख्याकान् द्यूतसाधनभूताक्ष
पर्दकादीन् यजमानस्य हस्ते निदध्यात्॥ पाठस्तु॥ अभिभूरस्य० कल्पंतामिति। हे अक्ष देव त्वं तेषामन्या
नां गत्युपलक्षितसत्कर्मणो अभिभूरसि अभिभविता भवसि एताः प्राच्यादयो दिशस्ते तवदर्थं कल्पंतां स्व
स्य प्रयोजनसमर्था भवंतु॥ कात्या०॥ ब्रह्मन्नित्यामंत्रयते पंचकृत्वः प्रत्याह त्वं ब्रह्मासि सविता वरुण इं
द्रो रुद्र इति त्वं ब्रह्मासीत्यादिभिरादिनेवां संप्रियकरेति च हृत्य सेवं नामानमिति। आसंद्यामुपवि
ष्टो यजमानो राजा स्वस्मै वाध्वर्युमादुपादिष्टानध्वर्युप्रभृतीश्चतुरऋत्विजः क्रमेण ब्रह्मन्नित्यनेन सं
बोधनप्रथमैकवचनांतरूपेण पदेनामंत्रयेत्। तांश्चऋत्विजः पशुरपंचमं पुरोहितमभासं पुरुषं प्रियं
करेत्सनेन नाम्नासंबोधयेत्। एवं पंचकृत्वः संबोधनं भवति। तेप्यृत्विजो मंत्रेण प्रत्युत्तरं ब्रूयुः। तेषां प्रत्युत्त
राणां चतुर्णां मंत्राणामंते त्वं ब्रह्मासीत्येवं रूपं प्रयोगो भागुत्तरभागश्चतुर्णां चतुर्विधः। सविता सि।

एवं चतुर्णामृत्विजामामंत्रणरूपमंत्रं इदानीं प्रथमामंत्रितस्य ऋत्विज उत्तरं ब्रूते हे राजन् त्वमेव ब्रह्मासि ८७

सत्यप्रसव इति प्रथमस्य मंत्रस्योपरितनो भागः द्वितीयो वरुणोसि सत्यौजा इति। तृतीयस्येंद्रस्य विशौ
जा इति। चतुर्थस्य रुद्रोसि सुशेव इति। व्यस्तासमस्तस्यायमर्थः। एवं संबोध्यतेन प्रत्युत्तरे दत्ते पश्चाद्द्विती
यं संबोधयेत्। एवमुत्तरत्रापि तथासति संबोधनप्रत्युत्तरयोर्मंतस्य व्यस्तस्यानुष्ठानं भवति। आदिने
वेत्यस्यायमर्थः। प्रथमे प्रत्युत्तरमंत्रः। त्वं ब्रह्मासीति प्रथमभागं पठित्वा सवितेत्यादिकमुत्तरभागस्तथाप
ठितः। एवमुत्तरमंत्रेष्वपि त्वं ब्रह्मासीत्येवमेव प्रथमभागं पठित्वा तदुत्तरभागान्पठेदिति। तेषां मंत्रे पाठस्तु॥
ब्रह्मन्० त्वं० ऋपस्करेति। हे ब्रह्मन्नध्वर्युरूप ब्राह्मण ब्रह्मन् त्वं ब्रह्मासि ब्राह्मणो भवसि। न त्वहं कुतः। य
तस्त्वमेव सविता सि ब्राह्मणधर्मान्पालयन्नस्माक मनुष्ठानायानुज्ञाता सि त्वमेव सत्यप्रसवः अमोघा
नुज्ञः अतो ब्राह्मवर्णाश्रमधर्माणां त्वदधीनत्वात्त्वमेव ब्रह्मासि द्वितीयामंत्रितस्य ऋत्विक् उत्तरं मंत्रस्या
परभागं ब्रूते। हे राजन् त्वं वरुणः अनिष्टनिवारकोसि। सत्यौजाः अमोघवीर्योसि। तृतीयामंत्रितस्य
ऋत्विज उत्तरं मंत्रस्योत्तरभागं ब्रूते। हे राजंस्त्वमेव इंद्रोसि परमैश्वर्यवानसि। विशौजा इति छांदसं
रूपं विशु प्रजासु ओजो बलं यस्य सर्वविशो जास्तादृशोसि। चतुर्थामंत्रितस्य ऋत्विज आह। हे राजंस्त्व

शेव इति सुखनाम =

मेवरुडोसि। सुशेवैः सुष्ठु सुखवर्द्धनस्त्वमसि। पंचमं पुरोहितमाह प्रियंकरोतीति प्रियंकरः तस्य संबोधनं
हे प्रियंकर श्रेयस्करोतीति श्रेयस्करस्तस्य संबोधनं हे श्रेयस्कर भूयो बहुतरं करोतीति भूयस्करः एवं
भूतकल्याणनाम्ना तमाह्वयेत्॥ कात्या०॥ स्फ्यमस्मै प्रयच्छति पुरोहितो ध्वर्युर्वेद्रस्य वज्र इतीति।
अध्वर्युपुरोहितयोरन्यतरः अस्मै यजमाना स्फ्यं प्रयच्छेत्। पाठस्तु॥ इंद्रस्य वज्रोसि तेन मे रध्ये
ति। हे स्फ्य त्वं इंद्रस्य संबंधी वज्रोसि वज्रो वै स्फ्य इति श्रुतेर्यस्मादेवं तत्तस्मात्तेन कारणेन मे मदर्थं
रध्य आघृतस्थानपरिलेखनरूपं कार्यं साधय॥ कात्या०॥ घृतप्रदेशे हिरण्यं निधायाभिजुहोति चतुर्गृ
हीतेनाग्निः पृथुरितीति। घृतप्रदेशे हिरण्यं स्थापयित्वा तस्मिंश्चतुर्वारं गृहीतेनाज्येन जुहु
यात्॥ पाठस्तु॥ अग्निः पृथुः० स्वाहेति। अग्निः आज्यस्य हविषः हवीरूपमाज्यं वेतु पिबतु स्वाहे २२०
ति शेषार्थः। कीदृशो ग्निः पृथुः देवानां प्रथमत्वात्पृथुः अग्निर्वै देवानामवम इति श्रुत्यंतरात्।
धर्मणस्पतिर्जगतो धारकस्य धर्मस्य स्वामी जुषाणः हूयमानं हविः सेवमानः। अग्निः पृथुर्धर्मणस्प
ति पुनः पाठ आदरार्थः॥ कात्या०॥ अध्वान्धिवपति स्वाहाकृताइतीति। घृतसाधनं कृत्वा तत्स्थाने स्था
पयेत्॥ पाठस्तु॥ स्वाहाकृताः सूर्यस्य० मध्यमे स्थायेति। हे अध्वाः स्वाहाकृताः। स्वाहाकारपूर्विकया

आहुत्या तर्पिताः संतः सजातास्सजातीयानां मध्यमे स्थाय मध्यप्रदेशे यजमानावस्थानाय सूर्यस्य रश्मि
भिर्यतध्वं स्पर्द्धां कुरुत॥ इत्यष्टमोनुवाकः॥ ॥ अष्टमे आसंदीस्थापनादिमंत्रा उक्ताः। नवमेनुवाके स्
पृस्यापाहविषामंगस्य ताम्त्रा उच्यंते॥ कात्या०॥ सोमपानां पृसंख्याय सर्पणं सवित्रेत्यवानुवाकमुक्त्वे
ति॥ अनुवाकपाठस्तु॥ सवित्रा प्रसवित्रा० विष्णुमान्नवानीति। प्रसवित्रा प्रसवकारिणा सवित्रा देवे
न सह सर्पामीति शेषः। वाचा वाग्रूपया सरस्वत्या सह सर्पामि रूपे रूपलक्षितेन त्वष्ट्रा सह पशुभिरूप
लक्षितेन पूष्णा देवेन सह सर्पामि अस्मे अनेनेंद्रेण सह प्रसर्पामि। ब्रह्मणा ब्रह्मत्वात्मानिना बृहस्पति
ना सह सर्पामि बलवता वरुणेन सह प्रसर्पामि तेजस्विनाग्निना सह प्रसर्पामि राजमानेन सोमेन
सह प्रसर्पामि दशम्या दशाक्षरया पूरिकया विष्णुनामिकया देवतया सह प्रसर्पामि। इमे प्रथ
त्वे न पुरोवर्तिनं यज्ञात्मकं विष्णुमाभवानि प्राप्नुयां॥ इति नवमोनुवाकः॥ ॥ नवमे स पृस्पाहवि
षामंगस्य ता मंत्रा उक्ताः॥ दशमेनुवाके राजसूयगतसौत्रामणीमंत्रा उच्यंते॥ कात्या०॥ पक्वौदनं वित्वा रूक्मां
णां स्वरूपी कृत्वा श्विस्पांपस्यस्वेति संस्रजतीति। विशेषेण प्रवृद्धान् व्रीहीन् वृद्धनस्य कृत्तानि सर्पः॥

नाम्नवर्णयित्वा सम्यक्पच्यमाने न्नोसं स्यात्। पाठस्तु॥ अश्विभ्यां पच्यस्व० सुत्राम्णे पच्यस्वेति। अश्वि
भ्याम श्विनोरर्थाय पच्यस्व पाकं कुरु। सरस्वत्यै देव्यै पच्यस्व। सुत्राम्णे सुत्रात त्रायते इंद्राय पच्यस्व॥ का
त्या०॥ कुवेः परिस्रुतं पुनाति वायोः पूत इतीति॥ पाठस्तु॥ वायोः पूतः० सखेति। पवित्रेण कुशमयेन
पूतः शोधितः सोमः प्रसङ्ङ् अधोमुखः सन् अतिस्रुतः अतिक्रम्य तं गतः क्षीरदुः सोम इंद्रस्य युज्यः यो
ग्यार्हः सखा सखिवत्स्थितः॥ का०॥ ग्रहं गृह्णातीति कुविदंगेति॥ पाठस्तु॥ कुविदंग० मघवन्निभिर्णाति।

कुविदितिबहुनाम

अंगहे सोम यथा केचिज्जनाः यवमंतो बहुयवसंपन्नाः संतः कुविद् बहुलं यवं विरलं यवमयं सस्यं अ
नुपूर्वं आनुपूर्व्येण वियूय पृथक्कृत्य दांति लुनंति। तथा ये यजमाना बर्हिषो बर्हिष्मंतो यज्ञस्य नमउक्ति

दाति लवन इति धातुः॥

नमस्कारवचनं हविर्लक्षणान्नवचनं वा आदाय नमग्मुः प्राप्नुवंति। एषां यजमानानां संबंधीनि भोजन
नानि संभोग्यानि धनानि इहेह अस्मिन्यजमाने च कृणुहि कुरु। अतो श्विसरस्वत्यादिदेवतार्थं त्वं

२२१

सोम उपयामेन पात्रेण गृहीतो भवसि। अश्व्यादिदेवतार्थं त्वां सादयामीति शेषः॥ हे अश्विनौ अश्विनौ

२२१

युवं युवां नमुचौ आसुरे स्थितं सुरामं सुष्ठु रमणीयं सोमं सचाहधिपिपाना विविधं पिबंतौ शुभ
=४ग्रवेति हा समाचक्षते नमुचिर्नामाऽऽसुरस्तु चेंद्रस्य सखा स्तत्र यासा सचेंद्रस्य विश्वस्तस्य सुरयासमं वीर्यं पपौ। ततः स इंद्रः अश्विनौ सरस्व=
=तीं चोपाधावत् नमुचिनाहं पीतवीर्य इति ते चापां फेनं वज्रमसिंचन्। तेन चेंद्रो नमुचेः शिरश्चिच्छेद। तत्र लोहितमिश्रः सुरासोमोतिष्ठत्। तदेतदुच्यते=२

पुरुषच्यस्मयः॥

स्पती शुशुभ्रान्स्य कर्मणः पालको कर्मस्नुनिमित्तभूतेषु इंद्रमवतां रक्षतां पुत्रमिव पितरौ। यथा मातापितरौ पुत्रं पा
लयतः। तथा उताउत्नाव पश्विनौ हे इंद्र त्वा त्वां आवथुः आवतुः। पालितवंतौ काव्यैः कवीनां मंत्रैः दृष्टैः

दंस इति कर्मनाम=

संबंधिभिर्मंत्रैः दंसनाभिः कर्मभिः। अश्विनाविंद्रस्य रक्षणं कृतवंताविति कथमवगम्यते। तदुच्यते। यद्य
स्मात्कारणात् हे इंद्र त्वं शचीभिः कर्मभिः नमुचिवधादिकर्माणि कृत्सेवे सम्यर्थः। सुरामं सुष्ठु रमणीयं सोमं
व्यपिबः विशेषेण पानं कृतवानसि। हे मघवन् त्वा त्वां सरस्वती देवी अभिष्णक् भिषक् भूतवती तस्मादं
श्विनौ सामावतुरिति संबंधः॥ ॥इति दशमोनुवाकः॥ वेदार्थस्य प्रकाशेन०॥ ॥इतिश्री० सायणाचा
र्यविरचिते वेदार्थप्रकाशे काण्वसंहितायां एकादशोध्यायः॥ ॥यस्य निःश्वसितं०॥ एकादशोध्याये रा
जसूयमंत्रा निरूपिताः। अथ द्वादशाध्याय प्रभृति षट्कोनविंशतिषट्स्वध्यायेष्वग्निचयनांगभूता
मंत्रा निरूप्यंते। तत्र द्वादशोध्याये उखासंभरणादिमंत्रा वर्ण्यंते। तत्र प्रथमे नुवाके सावित्रहोमाभ्यां
दानमंत्रा उच्यंते॥ का०॥ अष्टगृहीतं जुहोति सकृज्जन्युंजान इतीति। स्रुक्समष्टवारं गृहीतमाज्यं
अजस्रधारायां तं यथा भवति तथा हस्तमुन्नतं कुर्वन् जुहुयात्। अत्रेदं चिंतनीयं॥ युंजान इत्यादीनां मं

न्यो क्रमेणैकैकं मंत्रमुच्चार्य जुहुयात्। आहोस्वित् सर्वान्मंत्रानुच्चार्येति तत्राह। यो पादे यो उक्तो पक्षो क्रमेतैते तैत्तिरी
ये ब्राह्मणे पठ्यते। यं कामयेत पापीयान्स्यादित्येकैकं तस्य जुहुयादाहुत्यैवैनमभिक्रमयति वसीयादाहुतीभि
र्वैनं गच्छति पापीयान्भवति। नव सधर्योपायन्तस्यैवैषाति क्रांतिरिति। अस्यायमर्थः। पापीयानंतीन्द्र रिं
दुरस्यार्थः। एकैकमंत्रमुच्चार्य होमे तत्र संश्लेषाभावात् परस्परमपरस्परमाहुतिभिरेनं यजमानमपगच्छ
ति धनादपेतं करोति ततो दरिद्रो भवति। वसीयान् वसुमत्तरः सर्वाण्युच्चार्य होमे तु मंत्राणां परस्परसंश्ले
षादेकयैवाहुत्या यजमानमभिक्रमयति अभिव्याप्तिं करोति ततो धनिको भवति अपि च ये अतिक्रमण
हेतुरेकाहुतिरेषा यत्तस्यैवाग्निचयनरूपस्याभिक्रांतिः स्वाधीनता भवति। तत्र प्रथममंत्रपाठस्तु॥ युं
जानः प्रथमं० अध्यायान्तरं दृष्टि। सविता सर्वस्य प्रेरकः परमेश्वरः। प्रथमं अग्निचयनविषये मनो युंजा २२२
नः समादधानः समादधानो धियः इष्टकादिविषयाणि ज्ञानानि तत्त्वाय तनित्वा विस्तार्य अग्नेर्ज्योतिर्निचा
२२२
य्य निचीयमानस्याग्नेः संबंधि तेजः सफलानां कर्मणां साधनभूतं निश्चित्य पृथिव्या अध्याभरत्। भू
मिरूपर्यानीतवानग्नि॥ अथ द्वितीयः॥ युक्तेन मनसा० ग्रात्म्येति। सवितुर्देवस्य सवे प्रसवे वर्त्तमाना वयं
प्रजापतिर्वै युंजान इति श्रुतेः। सवितृशब्दवाच्यः प्रजापतिरित्यवधेयः॥ १
इष्टकोपरि अग्नेश्चितवानित्यर्थः॥ २

एकाग्रेण

युक्तेन इंद्रियेभ्यो नियमितेन मनसा स्वर्ग्याय स्वर्गे लोके गीयमानस्याग्नेः संपादनाय शक्त्या यथासामर्थ्ये
न प्रयत्नं कुर्म इति शेषः॥ अथ तृतीयः॥ युक्त्वाय सविता० नानिति। सविता तानिंद्रियविशेषान् स्वकर्मणि सुवा
ति। किं कृत्वा देवान्मनसा युक्त्वाय। क्रीडोपरत्वेन चलत्वं पल्लाभिंद्रियविशेषान् मनसा विषयेभ्यो युक्त्वाय।
नियम्य कीदृशानिंद्रियविशेषान् स्वर्यतः स्वर्गछतः स्वर्गप्राप्त्यर्थं उद्यतानित्यर्थः। बृहज्ज्योतिः प्रौढं धीय
मानस्याग्नेस्तेजो धियादिवं करिष्यतः॥ तान्विषयेभ्यो दिष्टकादिविषयया प्रज्ञया द्योतमानं कर्तुं सुवतात्।
॥ अथ चतुर्थः॥ युंजते मन० परिष्टुतिरिति। विप्रस्य ब्राह्मणस्य यजमानस्य संबंधिनो विप्रा ऋत्विजो मनो
युंजते प्रथमं स्वकीयं मनो विषयेभ्यो निवर्त्य समाहितं कुर्वंति। उत अपि च धियः इष्टकादिविषया
णि ज्ञानानि युंजते संपादयंति। कीदृशस्य विप्रस्य बृहतः प्रवृत्ताग्निचयनयोगानामभिवृद्धस्य वि
पश्चितो विदुषः प्रयोगाभिज्ञस्य कीदृशा विप्रा होत्रा होमं क्रीलाः कर्मण्यालस्यरहिता इत्यर्थः एक इद्वसवि
ता विद्धे सर्वं कृतवान्। कीदृशः सविता। वयुनवित्। दीर्घस्याद् सः ऋत्विग्यजमानानभिप्रायाभिज्ञः। कथ
मेकएव सर्वं विद्धे कृतवानिति न विस्मेतव्यं। यतः सवितुर्देवस्य परिष्टुतिर्महीपरितः सर्वेषु देवेषु

क्रियमाणास्तुतिर्महती॥ अथ पंचमः॥ युंजे वां० नमस्युरिति। यजमानः पत्नीं प्रत्याह हे दंपती वां युवयोर्थे पूर्व्यं पुरातनैर्महर्षिभिरनुष्ठितं ब्रह्म परिवृढं महदग्निचयनाख्यं कर्म नमोभिर्नमस्कारपूर्वकैरिष्टको पधानादिभिर्युंजे संपादयामि। तस्मिन्संपादिते सति सूरेः पंडितस्य यजमानस्य श्लोकः कीर्तिर्व्येतु श्लो कहयं प्राप्नोतु। तत्र दृष्टांतः पथ्येव पथः अनपेता पथ्या यज्ञस्य मार्गास्त्र यत्ना आहुतिर्यथा लोकद्वयं व्या प्नोति तद्वदस्य तस्य मरणरहितस्य प्रजापतेः पुत्रा ये देवा दिवि भवानि दिव्यानि धामानि स्थानानि आ तस्थुरधितिष्ठितवंतः। ते विश्वे सर्वे देवा अस्य यजमानस्य श्लोकं शृण्वंत्विति संबंधः॥ अथ षष्ठः॥ यस्य प्रयाणं० महित्वनेति। यस्य सवितुः प्रजापतेः प्रयाणं प्रयांतमन्ये सर्वे देवा अनुययुरित्यन्वयः ओजसा बलेन अनुययुः यः सविता पार्थिवानि पृथिवी सम्बंधीनि रजांसि परमाणून्विममे विशेषेण गणयित्वा निश्चितवान् स सविता प्रजापतिर्देवो महित्व महत्वं च ओजसा बलेन अनुययुः य: सविता पार्थिवानि पृथिवी गतानि रजांसि परमाणून्विममे विशेषेण गणयित्वा निश्चितवान् स सविता प्रजापतिर्देवो महित्व नामहत्त्वेन एतत्सर्वं व्याप्तवानित्यर्थः। त्रिगुणतीत्सेतत्राः॥ अथ सप्तमः॥ देव सवितः० स्वदत्विति। हे सवि तः देव प्रसुव प्रकर्षेण यज्ञं अग्निचितं प्रेरय यज्ञपतिं यजमानं च प्रसुव किमर्थं भगाय सौभाग्याय दि व्यः दिवि स्वर्गे भवः केश्चित्कं धर्वः केतपूः केतं परपरकीयचित्ते वर्तमानं ज्ञानं पुनातिशोधयतीति केतपूः

223

स न अस्माकं केतं चित्तवर्ति ज्ञानं पुनातु भ्रांतिपरिहारेण शोधयतु। वाचस्पतिर्नोस्मदीयां वाचं स्वदतु स्वाद यतु॥ अथाष्टमः॥ इमं नो देव० स्वाहेति। हे सवितर्देव नोस्माकमिमं यज्ञं प्रणय प्रापय। कीदृशं देवाव्यं। दे वानवनार्हं देवाव्यस्तं सखिविदं सखायं स्वनिष्पादकं यजमानं वेत्तीति सखिवित्तं सखिविदं। सत्राजितं धना नजयंतीति सत्राजित्तं सत्राजितं। तानि हि चीयमानामग्निमपेसंते। धनंजय दृष्टाहादीनिजयतिवशीकरोतीति सत्राजित्तं तं सत्राजितं। ता नि हि चीयमानाग्निमपेसंते। धनंजय ति फलरूपेण संपादयतीति अधत न जित्तं धनजितं स्वः स्वर्गं जयति फलत्वेन संपादयतीति स्वर्जित्तं गायत्रेण साम्नाः सह रथंतरं साम ऋद्ध्य गायत्रं सामैव वर्त्मनी मार्गो यस्य बृहतः साम्नस्तत्त्वात्पथा गायत्रवर्त्मनिगा यत्र साम सहितं बृहत्साम समृद्ध्य। स्वाहेति होमः॥ का सा०॥ देवस्य त्वेत्यभ्रिमादत्ते इति। अत्राभ्रि शब्देन उभयतस्तीक्ष्णीकृतोरत्निप्रमाणको वेणवो दंड उच्यते। तां गृह्णीयादित्यर्थः। पाठस्तु॥ देवस्य त्वा० सधस्थ अंगिरस्वदिति। सवितुर्देवस्य प्रसवे प्रेरणे सति अश्विनोः संबंधिभ्यां बाहुभ्यां पूष्णो हस्ताभ्यां सा धनभूताभ्यां सहाय भूतेन गायत्रेण छंदसा युक्तः सन्नादद्दे स्वीकरोमि। तत्र दृष्टांतः अंगिरस्वत्। अं गिरस ऋषयः पूर्वं यथा त्वां स्वीकृतवंतः तद्वत् हे अभ्रे त्वं पृथिव्याः सधस्थात् उत्संगात् पुरीष्यमग्निमा भर। आह
अंगिरसानुष्ठितवर्त्मना इत्यंगिरस्वत्

रपुरीषशब्देन पांसुसहिता मृदुच्यते। तदर्हतीति पुरीष्योऽग्निः मृदमादायोखायां कृत्वा तस्यामग्निः
स्थाप्यते। अतो मृद्दग्न्यो रत्न्रेदोपचारेण मृदाहरणमेवाग्न्याहरणमिति विवक्षित्वा पुरीष्यमग्निमाहरे-
त्युच्यते। अयं चोपचारोऽग्निचयनप्रकरणे सर्वत्रानुवर्तिष्यते। अंगिरस्वत् पूर्ववत्। तं धात्रैष्टुभेन छंदसा मृ-
द्माहरेति अंगिरस्वदिति दृष्टांतः। पूर्ववत्। अभ्रिरसि उखां निर्मातुं मृत्खननीया तस्याः खननहेतुः
काष्ठविशेषोऽसि। नार्यसि स्त्रीरूपा वासि यद्वा न विद्यते अरिर्यस्याः सा त्वमसि येन नारीति छंदसे रूपं खन-
नकाले पाषाणादिना तव नास्ति कुंठीभाव इत्यर्थः॥ किं च त्वया युक्ता वयं सधस्थे पृथिव्या उत्संगे आसमंता-
दग्निं पुरीष्यं खनितुं आगतेन छंदसा वयं शकेम। शक्ता भवेम। अंगिरस्वदिति पूर्ववत्॥ कासा०॥ हस्त आ- २२४
धायैतेनाभिमंत्रयत इति। पाठस्तु॥ हस्त आधाय० गिरस्वदिति। सविता प्रेरकः परमेश्वरो हस्ते हिरण्य-
यी सुवर्णमयी अभ्रिं आधाय स्थापयित्वा बिभ्रत् धारयन् अग्नेः संबंधि ज्योतिर्निचाय्य निश्चित्य पृथिव्या
अधि भूमेः सकाशादानुष्टुभेन छंदसा आभरत् आहृतवान्॥ इति प्रथमोनुवाकः॥ ॥प्रथमेनुवा-
२२४ के सावित्रहोमाभ्यादानमंत्रा उक्ताः। द्वितीये तु मृदाक्रमणमंत्रा उच्यंते॥ कासा०॥ अभ्यप्रस्तौ च प्रस्व

संपूर्वस्य वनषणसंभक्तौ इति धातोः क्विबंतस्येदं रूपं=

वं प्रतूर्त्तं युंजाथां योगायोगइतीति। चत्राब्दादनुमंत्रयत इत्यनुवर्तते। त्रीनश्वगर्दभाजान् प्रतूर्तमित्या-
दीनां मध्ये क्रमेणैकैकयर्चा अभिमंत्रयते॥ प्रथमायामृचः पाठस्तु॥ प्रतूर्तं वाजिन्० योनिरिद्दिति॥ सं-
वन्यते संभज्यते मृद्ग्रहणार्थं सेव्यत इति खननयोग्या भूमिः संवत्सा च पाषाणाद्यभावेनातिप्रशस्त-
त्वादूरिष्ठ उच्यते हे वाजिन् शीघ्रगामिन् अश्व वरिष्ठां संवतमनु लक्ष्य प्रतूर्त्तं माद्रव शीघ्रमागच्छ ते तवा-
स्य दिवि द्युलोके परममुत्कृष्टं जन्म रोहितादिदेवस्वरूपेण द्युलोके जन्म प्रसिद्धं रोहितेन त्वाग्निर्देवता गा-
मयति स्याहे तवे देवाश्वाइति हि श्रुत्यंतरेणाम्नातत्। तथा तव नाभिरंतरिक्षे वर्त्तते नियुन्नामकाः हिवा-
यो रश्वास्तदीयं रथं वहंतोंतरिक्षे संचरंति तद्रूपेणांतरिक्षे वर्तित्वं नाभिशब्देन केवलं शरीरमुपलक्ष्य-
ते। इदमपि वपृथिव्या अधि योनिर्मेरुपरितव निवासस्थानं तनुप्रसक्तमेव दृश्यते एवं महिमानं त्वं शी-
घ्रमागच्छेति पूर्वत्रान्वयः॥ अथ द्वितीयः॥ युंजाथां रासभं० युवमिति। हे वृषण्वसू यागनिष्पाद-
नद्वारा फलाभिवर्षण निमित्तभूतं वसु धनं ययोस्तौ तत्संबोधनं एवं भूतौ हे दंपती युवं युवां अस्मिन्या-
मे यामो मृद्ग्रहणरूपो नियमविशेषः तस्मिन्निमित्तभूते सति रासभं गर्दभं युंजाथां बध्नीतं कीदृशं रासभं

नवइतिवल्लनामसुपठितं =

अग्निस्तरं तं अग्निरहे तुभ्यं दं वोढुं समर्थः। अस्मयुमस्मानात्मन इच्छंतं अस्मद्धितैषिणमित्यर्थः।।अथतृतीयः।।
योगेयोगे तव॰ स्तरमइति। युज्यते ऽनुष्ठीयत इत्यति योगः कर्म योगेयोगे तत्तत्कर्मणि तैर्वस्तरं बलवत्तरं
अजमिंद्रं इंद्रियप्रदं तु तयोरक्षणाय वाजेवाजे तत्तदन्नप्राप्तिनिमित्तं। सखायः परस्परसख्यं प्राप्ता ऋत्वि
ग्यजमानावयंहवामहे आह्वयामः।।का०सू०।।अनुपस्पृशन्नुत्क्रमयत्येनान्प्राचः प्रतिमंत्रं प्रतूर्वन्नुर्वं तरि
क्षं पृथिव्यास्सधस्थादितीति। अश्वादीनां स्पर्शनमकुर्वन्नध्वर्युः प्रतूर्वन्निति सैतेषां क्रमेणैकैकेन मंत्रे
ण एतानश्वादीन्प्रागभिमुखान्स्पृदाक्रमणार्थं निर्गमयेत्।। तत्र प्रथममंत्रपाठस्तु।।प्रतूर्वन्नेह्यवक्रामन्नशस्ती रुद्रस्य गाणपत्यं मयोभूरेहीति। हे अश्व त्वमेत्यागच्छ किं कुर्वन्प्रतूर्वन्विरोधिनः शत्रून्हिंसन्नशस्तीरवक्रामन्नात्मवैः क्रि

यमाणा अपकीर्त्तीर्निवारयन्रुद्रस्य क्रूरदेवस्य यद्गाणपत्यं पशुसमूहपतित्वं तस्माद्गाणपत्यादागत्य
मयोभूरस्माकं सुखं भावयन्नेह्यागच्छ।।अथद्वितीयः।।उर्वंतरिक्षं वीहि स्वस्तिगव्यूतिरभयानि कृण्वन्पूष्णा सयुजा सहेति। स्वस्ती सविनाशि
नाम विनाशरहिता गव्यूतिः क्रोशद्वयोपलक्षितो मार्गो यस्य सः स्वस्तिगव्यूतिः हे गर्दभ तादृशस्त्वं
सयुजा सहाय भूतो वर्त्ततेयस्य सः सयुक् तादृशेन पूष्णा पोषकेण सहाभयानि कृण्वन्नाभ्रादि

मयइतिसुखनामसुपठितं =

तरपत्निवा =

२२५

२२५

भ्यो भयपरिहारं कुर्वन्नुरु विस्तीर्णमंतरिक्षं वीहि विशेषेण प्राप्नुहि।।अथतृतीयः।।पृथिव्याः सधस्था
दग्निं पुरीष्यमंगिरस्वदाभरामेति। हे अजा त्वं पृथिव्याः सधस्थात्सहस्थानत्वन्निर्नुयोग्यात्स्थलात्पिलम्नि
कायोग्यं यद्वा पुरीष्यं पशव्यं पशुभ्यो हितं पशवो वै पुरीषमिति श्रुतेः। तादृशमग्निमग्न्यवस्थानहेतु
भूतां मृदं आभराहर। तत्र दृष्टांतः अंगिरस्वत् यथापूर्वमंगिरसः ऋषय अग्निमाहृतवंतस्तद्वत्।
।।का०सू०।।अग्निं पश्यंत्सु पिंडं गच्छंस्यग्निं पुरीष्यमित्यतीति। अग्निंप्रज्वलितेषु सत्सु उखार्थं वतुर
स्रेष्वेवावस्थितं मन्मयं पिंडं प्रसध्वर्याद्योगच्छेयुः।।पाठस्तु।।अग्निं पुरीष्यमंगिरस्वदच्छेमइतीति।
पुरीष्यं पुरीषाहमग्निं अंगिरस्वत् अच्छेमः आभिगच्छेमः।।का०सू०।।पुरुषमीक्षते अग्निं पुरीष्यमि
तीति। यं कंचित्पुरुषं पश्येत्।।पाठस्तु।।अग्निं पुरीष्यमंगिरस्वद्भरिष्यामइतीति। भरिष्यामः संपादया
मः।शेषं पूर्ववत्।।का०सू०।।वल्मीकवपामादाय छिद्रेण पिंडमीक्षते न्वग्निरितीति। वल्मीकस्य यो
वपः तत्र सेनाक्षिवद्छिद्रः सैयं वपा तां छिद्रसहितां वपां स्वीकृत्य तस्याश्छिद्रेण मन्मयं पिंडं पश्येत्।
।।पाठस्तु।।अन्वग्निरुषसा०आततंथेति। अयमग्निरुषसामुषःकालानामग्रमुषकालमन्वख्यदनुक्रमं द

गर्भे =

आदित्यरूपः =

बभ्रूयाततंथेतिनिपातितः।=

मेण प्रकाशितवान्। जातं वेत्ति वेदयतीति वा जातवेदाः अयमग्निः प्रथमो मुख्यः सन् हान्यप्यन्वख्यत्।
किंच सूर्यस्य पुरुत्रा पुरून् बहून् रश्मीन् अन्वख्यत्। किंच द्यावापृथिव्यावुभे अप्यनुक्रमेण तंथा अ
ततान सर्वतो व्याप्तवान्॥ कास्या०॥ आगत्येत्यभिमंत्रयेताश्वमिति। पाठस्तु॥ आगत्य वाज्यध्वान॰ नि
चिकीषत इति। वाजी वेगवान् अयमश्वः अध्वानं मार्गं आगत्य प्राप्य सर्वा मृधः मार्गश्रमादीन्सर्वान्बाध
कान्विधूनुते। विविधं कंपयति विनाशयतीत्यर्थः। यत्र पांसवः सहावतिष्ठंते तत्स्थानं सधस्थं महति
विस्तीर्णे सधस्थे अयमश्वश्चक्षुषा दृष्ट्वा अग्निमग्निहेतुं मृदं निचिकीषते नितरां चेतुं संपादयितुमि
च्छति॥ कास्या०॥ आक्रम्येत्येतेन पिंडमधिष्ठापयतीति। आक्रम्येत्यनेन मंत्रेण पिंडस्योपरि अश्वस्य
कारयेत्= पादप्रक्षेपणं कुर्यात्॥ पाठस्तु॥ आक्रम्य वाजिन्॰ इत्यमिति। हे वाजिन् अश्व त्वं पृथिवीं भूमिमाक्रम्य पा २२६
दस्पर्शेन परीक्ष्य रुचा स्वकीयेन तेजसा मानसज्ञानेनेत्यर्थः। अग्निमिच्छ अग्निहेतुं मृदं निश्चिनु। किंच
रुर्विंदीमो भूमेर्भूमिं वल्यावरणं कृत्वा दृष्ट्वेत्यर्थः। नोऽस्माकं ब्रूहि। अयं प्रदेशोऽग्निहेतुर्मृद्योग्य इति कथय। य
तो यस्मात्प्रदेशात् तादृशी मृल्लभ्यते तं प्रदेशं वयं खनेम खननमवदारणं करवाम॥ कास्या०॥ द्यौस्त

२२६

इति पृष्ठस्योपरि पाणिं धारयतीति। अश्वस्य पृष्ठभागे संमाननार्थं हस्तमवस्थापयेत्॥ पाठस्तु॥ द्यौ
स्ते पृष्ठं पृथिवी॰ पृतन्यत इति। हे अश्व द्यौर्द्युलोकस्ते तव पृष्ठं पृथिवी भूलोकस्तव सधस्थं अग्निना
सहावस्थानमंतरिक्षलोकस्तव मध्यशरीरवर्ती जीवात्मा समुद्रस्तव योनिर्जन्मकारणं। अप्सुयो
निर्वा अश्व इति श्रुतेः। एवं स्तूयमानस्त्वं चक्षुषा विख्याय उखायोग्यां मृदं विलोक्य पृतन्यतः संग्रा
मं कर्त्तुमिच्छतः। शत्रून् राक्षसादींस्तस्यां मृदि गूढरूपेणावस्थितान् अभितिष्ठ पादेनाक्रम्य विनाश
य॥ कास्या०॥ अनुपश्यन्नुत्क्रामेत्युत्क्रमयतीति अश्वस्य गमनं कुर्वीत तस्मात्स्थानात्तमश्वं निर्ग
मयेत्॥ पाठस्तु॥ उत्क्राम महते॰ अस्या इति। हे वाजिन् अश्व द्रविणोदाः धनप्रदस्त्वं महते सौभगा
यास्माद्भाग्याभिवृद्ध्यर्थमस्मादास्थानात् खननप्रदेशात् उत्क्राम ऊर्ध्वगतो भव। वयं तु पृथिव्याः
सुमतावनुग्रहे चित्ते स्याम तिष्ठेम। कीदृशा वयं अस्या उपस्थे पृथिव्या उपरिभागे। अग्निहेतुं मृ
दं खनंतः खनितुमुद्योगं कुर्वंतः॥ कास्या०॥ उदक्रमीदित्यभिमंत्रयत इति। उत्क्रान्तमश्वमभि
मंत्रयेत्॥ पाठस्तु॥ उदक्रमीद्द्रविणोदा॰ मन्त्रमभिति। द्रविणोदा यागकरणे धनप्रदः वाजी तथैवा

घृतस्नुणदीप्त्योरिति धातुः =

नप्रदः अर्वाग्गमनकुशलं इत्यर्थः। तादृशोयमश्वः अस्मात्स्थानादुदक्रमीत् उदगच्छत्। स उत्क्रान्तोश्वः
सुकृतं आक्रमणेन विरूढुरात्तसानपहस सुकृतं सुलोकं शोभनलोकं खननप्रदेशं पृथिव्यां
आश्रकः अकरोत्। ततस्तस्मात्प्रदेशात् दृग्नियोग्यां मृदं वयं खनेम। कीदृशमग्निं सुप्रतीकं सुमु
खं खनितारो वयं कीदृशाः स्वः स्वर्गमधिरूहाणा आरोहणं कुर्वन्तः। कीदृशं स्वर्गं नाकं कं सुखं अ
कं दुःखं तद्रहितं उत्तमं उत्कृष्टं॥ कात्या०॥ मृदमभिजुहोत्यात्वा जिघर्मीति व्यतिषक्ता श्याम्मृद्याभि
ति। संश्लिष्टाभ्यां आत्वा जिघर्मीति द्वाभ्यामृग्भ्यां पूर्वोक्तां मृदमभिलक्ष्य जुहुयात्॥ प्रथमाया ऋचः पा
ठस्तु॥ आत्वा जिघर्मि० दृशानमिति। हे अग्ने त्वामहं मनसा ध्यायन् घृतेनाज्येन जिघर्मि आक्षारयामि। २२७
दीपयामि वा। कीदृशं त्वां विश्वा भुवनानि प्रतिक्षियं तं सर्वेषु लोकेषु प्रत्येकमेव संतं। तिरश्चा पृथुं ति
र्यक्प्रमाणेन विस्तृतं वयसा बृहंतं वयउपलक्षितेन कालेन प्रौढं पृथुमित्यनेन बहुदेशव्याप्तिः। धूमेन काष्ठेन वा =
अनेन तु बहुकालव्याप्तिः। व्यचिष्ठं अतिशयेन विविधमंचनं गमनं यस्य तादृशं अन्नैः अद्यानि
क्षिप्तैर्घृतादिभिर्हविर्भिः रभसं शीघ्रमेव दृशानं पुनः वर्द्धमानतया दर्शनीयं॥ अथ द्वितीया॥

२२७

सुपां सुलुगिति सोः शेआदेशः॥ =

आ विश्वतः प्रत्यञ्चं० जर्भुराण इति। अहं विश्वतः सर्वतः प्रत्यंचं जिघर्मि प्रत्यगात्मतया प्रतीयमानमग्निमा
जिघर्मि च तेन हविषा आक्षारयामि सोप्यग्निररक्षसा मनसा क्रोधरहितेन चित्तेन तत् घृतं जुषेत
सेवतां अयमग्निः मर्यश्रीः मर्यैर्मनुष्यैर्यजमानैराश्रीयत इति मर्यश्रीर्मनुष्यप्रियश्रीर्वा स्पृहयद्वर्णः य
जमानैः स्पृहणीयरूपः नाभिमृशे अभिमर्शनं कर्तुं न शक्यः कीदृशः तन्वा शरीरेण जर्भुराणः ज्वलितगात्र
विनामे इतस्ततश्च गच्छन् ईदृशमग्निं आजिघर्मीति योजना॥ कात्या०॥ अश्यापिंडं त्रिः परिलिखति प
रि वाजपतिरिति बहिर्बहिरुत्तरयोत्तरयेति। खननसाधनस्फ्यं तमाः श्यामृत्पिंडस्य परितो रेखात्रयं
कुर्यात्। तत्प्रकार उच्यते परि वाजपतिरित्येतयर्चा प्रथमा रेखा ततो बहिस्तस्या उत्तरया परि त्वाग्न
इत्यनयर्चा द्वितीया रेखा ततोपि बहिस्तस्या अपुनः त्वमग्न इत्यनयर्चा तृतीया रेखेति॥ तत्र प्रथ
मायाः पाठः॥ परि वाजपतिः० दाशुष इति। अयमग्निर्हव्यानि परितः अक्रमीत् स्वीकृतवान् कीदृशो
ग्निर्वाजपतिर्वाजस्यान्नस्य पालयिता कविः क्रांतदर्शी किं कुर्वन् दाशुषे हविर्दत्तवते यजमानाय
रत्नानि रमणीयानि धनादीनि दधत्। प्रयच्छत्॥ अथ द्वितीया॥ परि त्वाग्ने० पुरावतामिति। हे

परितो ध्यायाम इति वा

आयुरनुवादस्या क्षिणो नि हिनस्तीति विग्रहः ॥ ८

सहस्य बलेन मथ्यमानो ऽग्निः सहस्यः हे तादृशाग्ने वयं त्वां परि धीमहि परितः स्वीकुर्मः कीदृशं त्वां पुरुं अपेक्षितफलानां पूरयितारं विप्रं ब्राह्मणजातिमानिनं देवं घृषद्वर्णं घृषन्वैरिणां घर्षयिता वर्णः स्वरूपं यस्य असौ घृषद्वर्णः दिवे दिवे प्रतिदिनं भंगुरावतां भेत्तारं भंजनीयं भंगुरं तद्वेषामस्तीति भंगुरवंतः विघातकारिणो राक्षसादयास्तेषां भेत्तारं विनाशयितारं ॥ अथ तृतीया ॥ त्वमग्ने द्युभिः शुचिरिति हे अग्ने त्वं द्युभिः स्वर्गनिमित्तभूतैस्तेजोभिरुपलक्षितो मथ्यमानः तत्र तत्र यागभूमौ सुजायते। किंच त्वं आशुशुक्षणिः आशुं भूमिं शुचीघ्रमेव शोषयिता जायसे त्वमद्भ्यो वर्षधाराभ्यो विद्युद्रूपेण जायसे। त्वं ओषधीभ्यः अश्मनस्परि पाषाणस्योपरि पाषाणांतरसंघट्टनेन जायसे त्वं वने दावाग्निरूपेण जायसे नृणां नृपते सर्वेभ्यः ओषधिकार्येभ्यो ऽन्येषजेभ्यस्त्वं जायसे। यद्वा एवं शाद्भूयसं घर्षणादिभ्यो जायसे नृणां नृपते सर्वेषामपि मनुष्याणां पालक त्वं हे मह्हे शुचिः शुद्धिहेतुः सन् जायसे। पुनर्द्वहि नमन्मर्येभिस्यादिभ्युत्नैः ॥ इति द्वितीयोनुवाकः ॥ ॥ द्वितीयेनुवाके मद्राक्रमणमंत्रा उक्ताः। तृतीये तु मन्थनमनन मंत्रा उच्यंते ॥ कासा ॥ अभ्यादिं रवनतिदेवस्य ते तीति। पाठस्तु। देवस्यत्वा० रवनाम इति देव

स्य त्वेत्यादिर्व्याख्यात समानार्थः। हे अग्ने पृथिव्याः सधस्थात् उपरिप्रदेशात् पुरीष्यं पशुयोग्य मग्निं त्वा अंगिरस्वत् इत्यर्थः नामिअंगिरसइव अंगिरस्वनामः। कीदृशं त्वां ज्योतिष्मंतं ज्वालायुक्तं सुप्रतीकं सुमुखं अजस्रेण भानुना निरंतरं वर्तमानेन रश्मिना दीप्यतं प्रकाशमानं प्रजाभ्यः प्रजोपकारार्थं शिवं शांतं अत एवाहि धर्षंतं हिंसामकुर्वंतं ॥ कासा ॥ तस्मिन्पुष्करपर्णमपां पृष्ठमिति द्विमाश्रेः तस्मिन् कृष्णाजिने पद्मपत्रं निधाय दिव इत्येनेन तदेवं देवत्रयं नद्दिवइ तीति। अपां पृष्ठमसी सतेनास्तीर्णे कृष्णाजिने पद्मपत्रं निधाय दिवइत्यनेन तदेव त्र्यृचेन ॥ तत्पाठस्तु ॥ अपां पृष्ठमसि० प्रथस्वेति। हे पुष्करपर्ण त्वमपां पृष्ठमसि। पृष्ठवदुपरि भागे वर्तमानमसि तथा अग्नेर्योनिरसि अग्निहेतोर्मर्दः कारणमसि। तथा समुद्रमभितः पिन्वमानं समुद्रमसि पुष्करे उदके ओमानस्य तटाकजलस्य परितः प्रीतिकरं किंच वर्द्धमानो महानिति लिंगव्यत्ययः। पुष्करे उदके आसमंतान्महत्त्वस्ततं सद्वर्द्धमानं वृद्धियुक्तमसि। एवं भूतस्त्वं वरिम्णा वरिष्ठ्यादि बोमात्रया आकाशस्य परिमाणेन प्रथस्व विस्तृतं भव ॥ कासा ॥ आलभंते उमेशर्मचर्स्थ इतीति। उभे कृष्णाजिन पुष्क

रपर्णे संस्पन्दोत्ल ॥ पाठस्तु ॥ शर्मं च स्थो वर्म० मजस्रमिद्दिति । हे कृष्णाजिनपुष्करपर्णे उभे युवां चर्म च स्थः अग्नेः सुखकारिणी अपिच्छिन्नवधः तथा वर्म च स्थः कवचवद्रक्षके अच्छिन्नवधः । कीदृशो अच्छिद्रे छिद्ररहिते बहुले विस्तीर्णे बहुकेशयुक्ते अवयववती आच्छादनप्रकारवती पुटिकादिसदृशे इत्यर्थः । तथाविधे युवां संवसाथां सम्यङ् इदं माच्छादयतं । ततः पुरीष्यमग्निं स्थतं धारयतं किं च युवां मनास्वयमेव परिनिरपेक्षे सती उरसा उरः सदृशेन रूपदायस्वरूपेण संवसाथां सम्यगाच्छादयतं कीदृशो युवां स्वर्विदा स्वर्गाधिदा स्वर्गस्य साधने इत्यर्थः । समीचीमदं धनायानुकूले अजस्रमित् अजिरं तरमेव ज्योतिष्मंतं तेजस्विनमग्निं अंतः स्वोदरे भरिष्यंती धारयिष्यंती ॥ कास्या० ॥ पिंडं पुरीष्योसीति पाणिभ्यां परिगृह्णातीति । उखानिर्माणयोग्यं मन्मयं पिंडं हस्ताभ्यां गृह्णीयात् ॥ पाठस्तु ॥ पुरीष्योसि विश्वभरा अथर्वा त्वा प्रथमो निरमंथदग्न इति । हे मत्पिंड त्वं पुरीष्योसि पुरीषस्य पशुहितस्य पोषणे योग्योसि । अत एव विश्वभराः विश्वं समस्तं मुखारूपं बिभर्तीति विश्वभराः । हे अग्ने अथर्वानाम ऋषिः प्रथमे स्वः इत्यर्थः पूर्वं त्वां त्वा निरमंथत् निःशेषेण मथितवान् । अत्राथर्वणः प्रथमनिर्मंथनं नाम प्रथमस्य असुरस्य यंतः =

मनेस्यस्पधिरो वर्णवा =

२२९

दर्शनमिति अभिप्रायं तैत्तिरीयो दर्शयति । अग्निर्देवेभ्यो निलीयत तमथर्वान्वपश्यदथर्वा त्वा प्रथमो निरमंथदग्न इत्याह य एवेन मन्वपश्यत् तेनैवैनं समंतरतीति ॥ का० ॥ त्वामग्न इति षड्भिः सर्वस पृढङ् पुष्करपर्णे निदधातीति । त्वामग्न इत्यादिमंत्रषट्केन मन्मयं पिंडं निःशेषमेकेवारम पहृत्य पद्मपत्रे निदध्यात् । तत्र प्रथममंत्र पाठस्तु ॥ त्वामग्ने पुष्करा० वाघत इति । हे अग्ने अथर्वा वरन्न ऋषिः पुष्करादधि पद्मपत्रस्योपरि त्वां निरमंथत निःशेषमथितवान् अतएव तैत्तिरीयैः समाम्नातं । पुष्करपर्णे खेन मुपश्यिन्नमविदन्निति । कीदृशात् पुष्करात् मूर्ध्नः उत्तमांगवत् प्रशस्तात् विश्वस्य वाघतः सर्वस्य जगतो वाहकात् इह पुष्करपर्णे अग्निमन्थनादियज्ञनिष्पादनाद्वारेण सर्वं जगन्निर्वहति ॥ अथ द्वितीयः ॥ तमुत्वा दध्यङ्ङृषिः० पुरन्दरमिति । हे अग्ने अथर्वणः पुत्रो दध्यङ्नामक ऋषिः तमु त्वा ईधे तमेव त्वां प्रज्वालितवान् । कीदृशं त्वां वृत्रहणं मघनाशिनं पुरंदरं रुद्ररूपेणासुराणां बंधिनां त्रयाणां पुराणां विदारयितारं ॥ अथ तृतीयः ॥ तमु त्वा पाथ्यो० रण इति । हे अग्ने पाथ्यमानो कः कश्चिद् ऋषिस्तमु त्वा समीधे तमेव त्वां प्रज्वालितवान् । कीदृशाः पाथ्यः वृषा श्रेष्ठः कीदृशं त्वां दस्युहन्तमं तस्कराणामतिशयेन हंतारं रणेरणे धनंजयं तेषु तेषु संग्रामेषु धनस्य जेतारं । अथ चतुर्थः ॥

इंधीदीमो

नचिकेतपर्यंचितं=

सीद होतः० वयो धा इति। हे होतः होमनिष्पादकाग्ने चिकित्वान् विद्वांस्त्वं स्व उ लोके स्वकीये उत्तरवे दिरूपे सीद। उपविश्य यज्ञं च मे सुकृतस्य योनौ पुण्यकर्मणो योग्यस्थाने सादय स्थापय। देवान् अति कामयत इति देवावीर्देवप्रियः। तादृशस्त्वं देवान् हविषा यजासि। कि च हे अग्ने त्वं यजमाने दीर्घमायुः धाः स्था पय॥ अथ पंचमः॥ नि होता होतृ० अग्निरिति। होतृषदने होमनिष्पादकस्य योग्यस्थाने उत्तरवेदिरूपे अ ग्निर्नितरामसदत् समीचे स्थितवान्। कीदृशोऽग्निः होता देवानामाकूता विदानः स्थाना विदितः त्वष्टा दी ग्निमानुदीदिवान् देवेभ्यो हविषा दाता सुदक्षः कुशलः। अदब्धव्रतप्रमतिः। अहिंसितकर्मणि प्रकृष्ट मतिर्यस्य तथाविधः वसिष्ठोऽतिशयेन वासयिता सहस्रसंख्याकानि हवींषि पोषयतीति सहस्रंभरः 230 शुचिः शुद्धो होमयोग्या जिह्वा ज्वालाया स्यासो शुचिजिह्वः॥ अथ षष्ठः॥ सं सीदस्व० दर्शतमिति। हे अग्ने त्वमस्मिन् पुष्करपर्णे संसीदस्व सम्यगुपविश। त्वमनेकक्रतुहेतुत्वात् महानसि देवान् एतिगच्छती ति देवावीः अतिशयेन देववीः इति देववीतमः स्तादृशस्त्वं शोचस्व दीप्यस्व। हे मियेध्य मेधार्हप्रशास्त्रो मेध्येति प्राप्तेऽक्षरं दृश्यो विप्रकर्षः= तृष्टा अग्ने दर्शतं दर्शनीयं अरुषमारोषणमसुयं धूमं विसृजेण सृज॥ इति तृतीयोऽनुवाकः॥ ॥ तृती

वयति वर्द्धते गच्छतीति वा मातरिश्वा। दुक्ष श्विगतिवृद्ध्योरिति धातुः॥=

येऽनुवाके अस्य खननमंत्रा उक्ताः। चतुर्थे उदाहरणमुच्यते॥ कात्या०॥ अपः स्वपत्त्रे वनयस्यपो देवीरितीति। अ अग्नेरुगवनं= वटे उदकान्यासिंचेत्॥ पाठस्तु॥ अपो देवीरुपसृज० सुपिप्पला इति। हे अध्वर्यो त्वं देवीर्दिव्या नवृत्तीला अपठ उपसृ ज अस्मिन्वटप्रदेशे आसिंच कीदृशीरपः मधुमतीः मधुरसोपेताः। किमर्थं अयक्ष्मायप्रजास्यः प्रजानामा रोग्याय तासां सिक्तानामपामास्थानोत्कुक्षेत्ररूपादस्मात्खननप्रदेशात् सुपिप्पलाः शोभनफलाओष धयउत्पद्यन्ताम्॥ का०॥ संतशइति जलमवक्षिपतीति॥ पाठस्तु॥ संते वायु० तुभ्यमिति। हे पृ थिवि उत्तानायाः ऊर्ध्वाभिमुखत्वेनावस्थितायास्ते तव यल्लहृदयं हृदयस्थानं खननस्थानं विकृतं। अ वटरूपेण विकसितं। तत्स्थानं वायुः संदधातु पूर्वोक्तेन जलप्रक्षेपेण तृणादिपूरणेन च वायुर्यथा पूर्वं तथा सम्यक् करोतु। कीदृशो वायुर्मातरिश्वा मातर्यंतरिक्षे सर्वप्राणिनां नियंतरि परिछेदकारिणि शेते ति श्वेतिति मातरिश्वा। हे देव द्योतनादिगुणयुक्तवाप्योय स्त्वं देवानामग्न्यादीनां प्राणथेन प्राणत्वेन चरः चकारोत्तावप्रस ङ्गार्थकः= सि प्रवरः सि तस्मै प्रजापतिरूपाय तुभ्यं वसडस्तु। वषट्कृतं तत्त्व तु॥ का०॥ पुरस्तात्सव्यादक्षिण उत्तरस्था स्तीर्णयोरंतानुक्ततिसृजात इति। पूर्वादिचतुर्दिक्षु प्रसारितकृष्णाजिनपुष्करपर्णयोरंतान् ऊर्ध्वानि

मुखं सम्यक् हे अग्ने ॥ पाठस्तु ॥ सुजातो ज्योतिषा० दस्स्वरिति । सुजातः सुष्ठु प्रसन्नोऽग्निर्ज्योतिषा स्वकीयेन तेजसा सह
हृ शर्म सुखं यथा भवति तथा स्वः स्वर्गसदृशं चतुर्थ कृष्णाजिननिर्मितं वरूथं गृहं आसदत् । आसीदतु ॥
॥ का० ॥ त्रिवृता मुंजमयोक्त्रेणोपनह्यति वासो अग्न इति । त्रिगुणेन मुंजनिर्मितेन दाम्ना बध्नीयात् ॥ पाठस्तु ।
वासो अग्ने० विभावसो इति । हे विभावसो विभादीप्तिर्वसु धनं यस्यासौ विभावसुस्तत्संबुद्धौ हे अग्ने विश्व
रूपं बहुप्रकाररूपं वासः कृष्णाजिनरूपं वस्त्रं संव्ययस्व सम्यक् परिधानं कुरु ॥ का० ॥ उत्तिष्ठतीति पिंड
मादायोदुत्तिष्ठेतीति । स्वस्थिंडं स्वीकृत्य सो तिष्ठेत् ॥ पाठस्तु ॥ उदु तिष्ठ स्वध्वरा० सुत्रास्ति भिरिति । हे स्वध्व
रसुष्ठु याग विधारकाग्ने उदु तिष्ठ उत्तिष्ठेव उत्थायेत्यर्थः नोऽस्मान्देव्या देवनस्वभावया धिया परया बुध्या
अवपालय हे अग्ने बृहता तासा प्रौढेन तेजसा सुष्ठु दीप्ति० शुक्र सुशुभ्रवो रश्मीनां वनिर्वनिता संभक्ता
यः सोऽयं सुष्ठु दीप्ति० तादृक्त्वः सन् सुत्रास्ति भिः शोभनकीर्तिभिः सह दृश्यो सर्वैः प्राणिभिर्दृश्यमायाहि

२३१

आगच्छ ॥ का० ॥ ऊर्ध्वबाहुः प्रांचं प्रगृह्यास्य ऊर्ध्व ऊ षु ण इतीति । बाहुद्वयमूर्ध्वाभिमुखं कृत्वा मृत्पिंडं प्रांगं

२३१

वनं स्वीकुर्यात् ॥ पाठस्तु ॥ ऊर्ध्व ऊ षु ण० विहूयामहे इति । हे अग्ने नोऽस्माकं ऊतये रक्षणाय ऊर्ध्व ऊ षु ति

पुरोडाशः स्रुचाः सु होतव्यविषयासु निमित्तस्य ततः सु विहितो विहर
नकारउपमार्थः = णविषयं प्रापितः । पद्य = ६

ष्ठ ऊर्ध्वस्सन्नवस्थितो भव । क इव देवो न सविता यथा सविदेव ऊर्ध्वः सन्नस्मान् रक्षतीति तद्वद्रक्षस्व मूर्ध्वः
सन्वाजस्य सनिता अन्नस्य दाता भव यस्मात्कारणादंजिभिर्मंत्राभिव्यंजकैर्वाघद्भिर्हव्यवाहकैर्ऋत्विग्भिर्वि
ह्वयामहे । वयं एवं विधं त्वामाह्वयामः । तस्मादूर्ध्व एव तिष्ठेति पूर्वत्रान्वयः ॥ का० ॥ अस्य प्रकृतीनाभिमंत्रयते
सजात इतिमंत्रत्रयेण त्रीन्स्वरा सजाता क्रमेण अभिमंत्रयेत् । तत्र प्रथ
ममंत्रपाठस्तु ॥ सजातो गर्भो० कनिक्रदद्भूदिति । हे अग्ने स त्वं रोदस्योर्द्यावापृथिव्योर्गर्भः गर्भरूपः सन्
इदानीं जातोऽसि कीदृशस्त्वं चारुः रमणीयः ओषधीषु विस्तृतः अज्यमानास्त्वोषधीषु दग्धाग्निरूपः सन्
विशेषेण पोषितश्चित्रो नानावर्णाभिर्ज्वालाभिर्विविधरूप इदानीमुत्पन्नता शिशुः । अक्तूनिति लिंगव्यत्य
सजातस्थिरो जबद्रिवासभवतीति ।

अक्तुशब्दो रात्रियः । अक्तून्रात्रीः परित्यक्तः अति तमांसि परिपरिहरन् तादृशस्त्वं मातृस्थ ओषध्यर्थं अधिक निक्रदत् । परित्यक्तुर्जनार्थः
अधिक्रंदन् प्रगाः प्रकर्षेण गच्छ । यथा लोके शिशुर्मातृसमुद्दिश्य क्रंदनादरेण गच्छति तद्वदित्यर्थः ॥ अथ

वचनः =

द्वितीयः ॥ स्थिरो भव० पुरीषवाहण इति । अग्ने हे तुरुमतं पुरीषसंयोगं कर्दनो वहति । तादृक्त्वं हे गर्दभ इयन्ति
गच्छति सर्वत्र गमन कुशलस्त्वं स्थिरः स्खलनरहितः वीड्वंगो दृढकायः भव आशुर्वेगवान् वाज्यन्नहेतुभूत
पृथुर्विस्तीर्णपृष्ठः सुषदोऽग्नेः सुखासस्च भव । पुरीषशब्देन पांसुरूपाम्दुच्यते तां हि वेतीति पुरीष
प्रयाहीति मूषदतिनायां तरं = ८ = अक्तूनात्रिसंबंधीनि तमांसि वर्जयन्मातृस्यजोषधिवनस्पतिस्य सकाशादाक्रंदमाना

ग। स्नादद्राश्वस्त्व॥ अथ तृतीयः॥ शिवो भव० वनस्पतीनिति। अंगिरोभिरंगिरस्वद्भिः पूर्वं संपादितत्वादंगसो
ष्ठवत्त्वादृष्टाद्यवायामग्निरंगिराः। हे अंगिरः मे त्वं मानुषेभ्यो मनोःसंबंधिनीभ्यः प्रजाभ्यः शिवः शान्तो भ
व। किंच। त्वं द्यावापृथिव्यावभिलक्ष्य मा हिंसीः शोकसंतापं माकार्षीः तथांतरिक्षं माभिहिंसीः तथा वनस्प
तीन्माभिहिंसीः॥ का०॥ धारयत्येषामुपरि पिंडमनुपस्पृशन्प्रैतु वाजीति वृषाग्निमित्यश्वखरखेष्विति।
अश्वानदीनां त्रयाणामुपरि त्वागेम्य पिंडस्पर्शनमकुर्वन्नध्वर्युर्धारयेत्तत्राश्वगर्दभयोरुपरि प्रैतु
वाजी वृषाग्निमित्येतन्मंत्रद्वयेन धारयेत्। तत्र प्रथममंत्रपाठस्तु॥ प्रैतु वाजी० पुरीति। अयं वाजी तुरगः प्रै
तु प्रकर्षेण गच्छतु किं कुर्वन्नकनिक्रदत् अत्यंतं हेषितं कुर्वन्नारासभस्य प्रैतु नानदत् गर्दभरटितेन सर्वा दिशो
नुनादयन् पत्वा पतन्नरीलः पुरीष्यमग्निं दाहकं तर धारयन्नपि। आ कर्मसमाप्तेः स्वकीयादायुषः पुरा
मा पादि अपमृत्युना न तो मा भूत्॥ अथ द्वितीयः॥ वृषाग्निं वृषणं० समुद्रियमिति। वृषा वर्षणे सेचने सम २३२
र्थो गर्दभः वृषाणां फलानि वर्षणसमर्थमग्निं तरन्वहन्नाके ति शेषः। कीदृशमग्निं अपां गर्भं मेघस्थानां
जलानां मध्ये विद्युद्रूपं समुद्रियं समुद्रे वडवाग्निरूपेणोत्पन्नं॥ का०सा०॥ अग्न आयाहीत्याहृत्य खरवरादि
२३२
ति। गर्दभात्सिकताभ्यो पिंडमाहरेत् वीतये इति मंत्रशेषः॥ हे अग्ने त्वं वीतये भक्षणाय यज्ञनाय च आयाहि आगच्छ॥

का०॥ छागस्य ऋतं सत्यमित्यभिधायान्दृष्टीति। अजस्योपरि खराद्धृतं पिंडं धारयन्प्रागाकारपर्यंतं ग
च्छेत्॥ पाठस्तु॥ ऋतं सत्यमृतं सत्यमिति। अत्र ऋतसत्यशब्दाभ्यामादित्याग्नी विवक्षितौ। तादृशं रूप
रूपमध्याहरामीति शेषः। ऋतं सत्यमिति पुनर्वचनमादरार्थं॥ का०॥ पुरीष्यवत्स्विति पूर्ववद्भिन्ने पुरीष्यमि
तीति। अंगिरस्वद्भरामीति मंत्रशेषः। पूर्ववद्व्याख्येयं॥ का०सा०॥ उत्तरत आहवनीयस्याद्भिरवोक्षितसिकतो
पकीर्णे परिश्रिते प्राग्द्वारे पिंडं निदध्यात्सोषधय इति। आहवनीयोत्तरभागे यस्मिन्देशे मृत्पिंडो निधीयते तत्
तस्योपरि तनतृणाद्युपेतमजागस्यापसारणं कर्तव्यं तदेतदुद्धननं कृत्वोदके
स्मिन्देशे उद्धृतादिशां कोणे। तस्योपरितनतृणाद्युपेतं ... प्रसार्य तस्य देशस्य परितः प्रावरणं कृत्वा प्राग्द्वारं कुर्यात्। तस्मिन्द्वारे ओषधय इति द्वाभ्यां मंत्रा
भ्यां देशे सिकतां प्रसार्य तस्य देशस्य परितः प्रावरणं कृत्वा प्राग्द्वारं कुर्यात्। तस्मिन्द्वारे ओषधय इति द्वाभ्यां मंत्रा
नावेक्ष्य सिकतां प्रसार्य ... अत्रात्रा
भ्यां पिंडं निदध्यात्। तत्र प्रथममंत्रपाठस्तु॥ ओषधयः प्रतिमोदध्वं० जहीति। हे ओषधयः अत्रात्रा
स्मिन्देशे युष्मान्प्रति मुखी भूत्वा आयंतमागच्छंतं शिवं शान्तमेतं प्रतीयमानं अग्निं प्रतिमोदध्वं। हे अग्ने
त्वं निषीद अस्मिन्प्रदेशे निविसमानः त्वं विश्वाः सर्वाः न विद्यते दूरा अन्तं यासां ता अनिरा अनावश्यकाः ष्याद्य
स्नाय्य स्वनिरस्यन् अमीवाः व्याधीश्च निरस्यन् नोऽस्माकं दुर्मतिं प्रमादालस्यादियुक्तां बुद्धिमपजहि। अ
पनय॥ अथ द्वितीयः॥ ओषधयः प्रतिगृह्णीत० मासदद्इति। पुष्पवतीः प्रशस्तपुष्पोपेताः सुपिप्प

लाः स्रोतसनफलोता हे ओषध्योऽनमग्निं प्रतिगृह्णीत स्वीकुरुत अयमग्निर्वो युष्माकं ऋत्वियः ऋतुका
लीनो गर्भोसरत्वाम् अलंकुरालनं सधस्थं स्वर्गयोग्यं स्थानं आसदत् प्राप्तवान्॥ का०॥ विपाजसेति प्रमुख्येन
मिति। एनं मुंजयोक्रेण बद्धं मृत्पिंडं विस्रंसेत्॥ पाठस्तु॥ विपाजसा पृथुना० प्रणीतावितिति। हे अग्ने पृथुना
विस्तृतेन पाजसा बलेन शुशुचानो संतं दीप्यमानस्त्वं द्विषः राक्षसान् रक्षसो राक्षसान मीवाः रोगांश्च विशे
षबाधस्व। अहं सुशर्मणः शोभनसुखस्य बृहतः प्रौढस्य सुहवस्य सुखेनाह्वातुं शक्यस्याग्नेः प्रणीतौ
परिचर्यायां क्रियमाणायां सत्यां तस्मिन्सुखे स्यां सर्वदावतिष्ठेयेति॥ इति चतुर्थोऽनुवाकः॥ ॥ चतुर्थे
नुवाके मृदाहरणमुक्तं। पंचमे तूखानिर्माणमुच्यते॥ का०॥ आपोहिष्ठेति पर्णकषायपक्वमुदकमासिंच
तिपिंडइति। पलाशैरसंज्ञं कषायं तैलपक्वमुदकं आपोहिष्ठेति तृचेन मृन्मयपिंडे आसिंचेत्। तत्र प्रथमा
याः पाठस्तु॥ आपोहिष्ठा० चक्षसइति। हि शब्द एवकारार्थः प्रसिद्धार्थो वा। हे आपो यस्मात् यूयमेव मयोभुवः स्थ।
सुखस्य भावयित्र्यो भवथ। अन्नपानादिहेतुत्वेन सुखोत्पादकत्वं प्रसिद्धं। तास्तादृश्यो यूयं नोऽस्मानूर्जे
रसाय अन्नादीय रसानुभवार्थं दधातन स्थापयत। किंच महे महते रणाय रमणीयाय चक्षसे दर्शनाय यद
धातन अस्मान्परब्रह्मसाक्षात्कारयोग्यान्कुरुतेत्यर्थः॥ अथ द्वितीया॥ यो वः शिव० जनयथाइति। वो युष्माकं शिव

सहस्त्वं =

पालाशत्वग्भिः क्वथितमुदकं =

मयइति सुखनाम =

२३३

२३३

अलं प्राप्ते लकारे स्थाने रेफादित्वाः हे आपः। तस्मै षष्ठ्यर्थे चतुर्थी। तस्य रसस्य धस्तनमेत्रया चितस्य वो युष्मा। त्वं वे चिनः अलं पर्याप्तिं = ३

तमः सुखे वेक हेतुर्यो रसोस्ति सद् हास्मिन्कर्मणि नोऽस्मान् तस्मात्साजयत। तं रसं प्रापयत। तत्र दृष्टांतः। उ
शतीरिव मातरः कामयमानाः प्रीतियुक्ता मातरो यथा स्वकीयस्तन्यरसं पाययंति तद्वत्॥ अथ तृतीया॥
तस्मा अरं० जनथइति। तस्मा अरं गमाम इति ब्रांत्तुमः। क्षयायेति षष्ठ्यर्थे चतुर्थी। यस्येति सामानाधिकरण्यात्
यस्याकृति पदिणाम तस्य क्षयस्य निवासस्य एकदेशेन यूयं जिन्वथ तर्पयथ। किंच हे आपो यूयं नो
स्मान् जनयथ प्रकृजोत्पादनं कुरुथ॥ का०॥ अजलोमभिः संसृजति मित्रः संसृज्येति॥ पाठस्तु॥
मित्रः संसृज्य० प्रजाभ्यइतीति। मित्र आदित्यो देवः पृथिवीं विस्तृतां घुलोकं भूमिं च ज्योतिषा ज्यो
तिषा ज्वलनात्मकेन तेजसा सह संसृज्य एकीकृत्य महान्तं अध्वर्यवे प्रयच्छतु इति शेषः। अहमपि सुजा
तं जातवेदसं अजलोमात्मकमग्निं तां प्रजाभ्यः प्रजानां अयक्ष्माय रोगराहित्याय संसृजामि॥ का०॥
शर्करायोरसाश्मचूर्णै रुद्राः संसृजंतीति। पाषाणसहिता मृत्तिका शर्करा तया अयःसारेण अ
श्मचूर्णैः संसृजेत्॥ पाठस्तु॥ रुद्राः संसृज्य० रोचतइति। रुद्रनामका देवाः पृथिवीमुख्यानि व्यादकांस्ते शर्क
राश्मचूर्णैः संसृज्य बृहज्ज्योतिः प्रौढमग्निं समीधिरे सम्यक् दीपितवंतः। तेषां रुद्राणां चायन
राया रसाश्मचूर्णैः

× अलंकृतां =

ज्योतिषा: ज्वलो
त्मा। आग्नेयोऽज
इति श्रुतेः ज्योतिः
शब्देनाजलोमत्वं तस्य
ति साधनांतरं =

जिन्वतिः प्रीणि
मा =

अक्ष्य पृथिवीं
द्यौ घुलोकवचे
नः भूमि शब्द
संनिध्यात

ग्निरर्त्तकृर्त्तसिमानः। अजस्रइन्निरंतरस्य वह्निरक्रोदग्निर्युक्तो देवेषु रोचते रोचते॥ का०॥ संसृष्टामिति
संयौति॥ संसृष्टामिति मंत्रत्रयस्य प्रतीकमिदं पूर्वोक्तामजलोमशर्करादियुक्तां मृदमुखाकर
णाय मृदं यथा भवति तथा हस्ताभ्यां संयवनं कुर्यात्॥ अथ प्रथममंत्रपाठस्तु॥ संसृष्टां वसुभिः० ता
मिति। पूर्वमंत्रे रुद्रादिभिर्वसवोऽप्युपलक्षिताः। अतो धीरैर्बुद्धिमद्भिर्वसुभी रुद्रैश्च संसृष्टां शर्करारत्रसपोमलधी य=
दिभिः संयोजितां कर्मण्यां सुखां कर्मयोग्यां मृदं कृत्वा सिनीवाली इंदुकलायुक्ता अमावास्याभि
मानिनी देवता स्वहस्ताभ्यां तां मृदं मृदुरूपां कृत्वा कृणोतु उखां करोतु॥ अथ द्वितीयः॥ सि
नीवाली सुकपर्दा० हस्तयोरिति। या सिनीवाली वा सुकपर्दा कपर्द इति स्त्रीणामुचितः केशबंधवि
शेषः शोभनः कपर्दो यस्याः सा सुकपर्दा सुकुरीरा शोभनस्त्रीभिः शृंगारार्थं शिरसि धार्यमाणं का २३४
लंकमुच्यते। शोभनं कुरीरं यस्याः सा सुकुरीरा। सु उपशेते। सम्यक्रूपायनं कुरुते यैरवयवविशे
षैस्ते सर्वेऽप्युपशास्तेषां सम्यक् ओपशाः शोभन ओपशो यस्याः सा स्वौपशा। हे महि प्रौढे अदिते
अखंडनीये अदितिरदीना देवमातेति यास्कवचनात्। तादृशी हे महि सा सिनीवाली तुभ्यं तवरुस्त
यः उखामादधातु स्थापयतु॥ अथ तृतीयः॥ उखां कृण्वती तु० गर्भमिति। इयमदितिर्धिया बुद्धिको

मुकुट इति ख्यातरं =

२३४

शालेन बाहुभ्यां हस्तकौशलेन चेमामुखां कृणोतु यथा लोके माता स्वकीयं पुत्रं उपस्थे उत्संगे बिभर्ति त
थेयमदितिर्गर्भमुत्संगे आगतमग्निमाकर्मसमाप्तेर्बिभर्तु धारयतु॥ का०॥ यजमान उखां करोति मृ
दमादाय मखस्य शिर इतीति। यजमानोऽध्वर्युणा दत्तां मृदं गृहीत्वा उखां कुर्यात्। असीति मंत्रशेषः। हे
मृत्पिंड त्वं मखस्य यज्ञस्य शिरःस्थानमसि॥ का०॥ वसवस्त्वेति प्रथयतीति। वसवस्त्वेत्यादिभिश्चतुर्भि
र्मंत्रैः प्रथितामुखां कुर्यात्॥ उखानिर्माणे तेषामवांतरविनियोगस्तु कात्यायनसूत्रे द्रष्टव्यः॥ प्रथम
मंत्रपाठस्तु॥ वसवस्त्वा कृण्वंतु० यजमानायेति। हे उखे त्वां वस्वाख्या देवाः सहकारिणा गायत्रेण
छंदसा सह अंगिरस्वत् अंगिरस इव कृण्वंतु निष्पादयंतु। अतस्त्वं ध्रुवासि। दृढा भवसि। पृथिवी
रूपा चासि। किंच उखा कर्त्री मयि प्रजां पुत्रादिकां धारय स्थापय तथा रायस्पोषं धनस्य पुष्टिं च धा
रय। गोपत्यं गवां पतित्वं च मयि स्थापय। तथा सुवीराणां कर्मसु वीर्यं तच्च मयि स्थापय। सजातान् समानो
दरे जातान् भ्रातॄन् यजमानाय मह्यं मम धारय॥ अथ द्वितीयः॥ रुद्रास्त्वा कृण्वंतु० यजमानायेति पू
र्ववद्व्याख्येयं। अथ तृतीयः॥ आदित्यास्त्वा० यजमानाय० पूर्ववद्व्याख्येयं॥ अथ चतुर्थः॥ विश्वे त्वा० य
जमानायेति। विश्वेषां नराणां संबंधिनो वैश्वानरास्ते एते विश्वेदेवा हे उखे त्वां कृण्वंतु। अन्यत्समानं।

॥का०॥ वर्त्रिं धूसर्वतः कुरोसादिस्यैरस्नेतीति। रस्नानास्रदृशी आंदुस्यगत्वतः रेखावर्तिस्तांउखायांउ
त्तरभागेसर्वतः कुर्यात्। असीतिमंत्रशेषः। हेरक्नौलिं अदित्यै भूमिरूपायाउखायारास्नासिक्रां
चीगुणस्थानीयं रस्नानामवसि॥का०॥ बिलं गृह्णा सदितिस्थइतीति। उखाया अंतश्छिद्रं कुर्यात्॥
पाठस्तु॥ अदितिष्टे बिलं गृह्णात्विति। हे उखे तेतव बिलमंतश्छिद्रमदितिर्भूमिर्गृह्णातु करोतु
दधातु॥का०॥ कृत्वायेतिनिदधातीति। निष्पन्नामुखां स्थापयेत्॥ पाठस्तु॥ कृत्वाय सा० अपयानि
तीति। सेयमदितिः मन्ममयीं महत्कार्यां योनिं अग्नेः कारणभूतामुखां कृत्वाय निष्पाद्य पुत्रेभ्यः स्वपु
त्रसदृशेभ्यः श्रणकरिभ्यः प्रायच्छत्। प्रदत्तात्। किं ब्रुवंतीति तदुच्यते। अपयानिति अपयंतु। भवंत
इति ब्रुवंती॥का०॥ सप्तभिरश्वशकृद्भिरुखां धूपयति दक्षिणादी निमेरकैकेन वसवस्त्वेति प्रति
मंत्रमिति। वसवस्त्वेत्यादिभिः मंत्रैः क्रमेणैकैकेन मंत्रेण दक्षिणोग्नौ प्रज्वलितैरश्वसंबंधिभिः
शकृद्भिरुखां संधूपयेत्॥ तेषां पाठस्तु॥ वसवस्त्वा धूपयंतु० विष्णुस्त्वा धूपयत्विति। हे उखे
त्वामष्टौ वसवः सहकारि०णा गायत्रेण छंदसा सहांगिरस इव धूपयंतु अश्वशकृज्जन्येन धू
मेन धूपयंतु संस्कुर्वंतु एवमुत्तरेष्वपि षड्योज्यं॥ इति पंचमोनुवाकः॥ ॥पंचमे उखानिर्माणमुक्तं।

२३५

षष्ठेनुवाके तु तत्संस्कार उच्यते॥का०॥ अग्ध्या श्वाम्वस्त्रं वतु स्त्रं खनसदितिष्ठ्वतीति। खननसाधने
नकाष्ठविशेषणा स्त्रि चतुष्टयोपेतमवटं खनेत्॥ पाठस्तु॥ अदितिष्ट्वा देवी० त्ववटेति। विश्वेषु देवेषु सा
धवो विश्वदेव्यः तेस्यां संतीति विश्वदेव्यावती तादृशीयमदितिर्देवी पृथिव्याः सधस्थे स्थाने भूम्याउप
रिहे अवट त्वा तां अंगिरस्वत् अंगिरा इव खनतु अनेन मंत्रेण अदितिरेव खननकर्तृत्वमिति ते
शिरीयेपिश्रूयते। अदितिस्त्वेत्याह इयं वा अदितिः रदित्या स्या अक्रूरकारायण हिंस्त्रः स होहिन
स्तीति॥ अस्यायमर्थः॥ इयं भूमिरेवादितिशब्देन विवक्षिता अवटखननमपि भूम्या मेव तते
दितेः खननकर्तृत्वे सति भूमेर्हिंसा न भवति। नहि लोके कश्चिदपि स्वयं स्वात्मानं हिनस्ति तस्मादे
खननलक्षणक्रूरकार्यकरणाभावाद्येयमदितिः कर्तृत्वं संपद्यतइति॥का०॥ अर्पणमास्तीर्य
यथाकृतमवदध्याति देवानां त्वेतीति॥ पाठस्तु॥ देवानां त्वा पत्नी० भूखइति। विश्वदेव्यावतीः वि
श्वेषां देवानां योग्याः उप... विश्वेषु देवेषु साधवो विश्वदेव्यः तैः सहिता विश्वदेव्यावत्य एवं
भूता देवानां पत्न्यो देव्यः पृथिव्याः सधस्थे उपरि अंगिरस इव हे उखे त्वां दधातु स्थापयतु॥का०॥
सुपांसुलुक्पूर्वसवर्णः =

उखांस्तु श्रोंश्रपणेनावराघ्य दक्षिणाग्न्यग्निनादीपयति धिषणास्त्वेतीति। अवाचीनामुखांश्रपणस्था
पनेन तृणादिना प्रराघ्य दक्षिणाग्नेरानीतेन वह्निना दीपयेत्॥ पाठस्तु॥ धिषणास्त्वा देवी॰ मुखे॥
धिषाग्निमानिन्यो देवताः धिषणास्ता देव्यः हे उखे त्वां अग्नौ धत्तां। इंधीदीमा॥ का०॥ वरूत्रेष्ट्वेती स्त्र
माणो ज्ञपतीति॥ पाठस्तु॥ वरूत्रीष्ट्वा॰ श्रपयन्तूखे। हे उखे त्वं एवं तीति वरूत्रयो होरात्राणि अहोरा
त्राभिमानिन्यो देवताः अहोरात्राणि च। वरूत्रयो होरात्रं (?) हीदं सर्वं वृतमिति श्रुतेः। एवं स्तुता वरू
त्रयः हे उखे त्वां श्रपयंतु॥ का०॥ पचतिग्नाउजनयः इति द्वाभ्यामिति॥ पाठस्तु॥ ग्नास्त्वा॰। ग्नाश्छं
दोभिमानिन्यो देवताः छंदांसि वै ग्नाः छंदोभिर्हि स्वर्गं लोकं गच्छंतीति श्रुतेः॥ द्वितीयमंत्रः॥ जनय
स्त्वा॰ पचंतूखे। जनयो नक्षत्राणि अच्छिन्नपत्राः अनवच्छिन्नपतनाः नक्षत्राणि जनय इति श्रु
तेः॥ का०॥ आचरति मित्रस्येतीति। आचरणमुपचरणं तत्कुर्यात्॥ पाठस्तु॥ मित्रस्य चर्षणीधृतो॰
वस्तममिति। मित्रस्य देवस्य सानसि सनातनं पुराणं द्युम्नं यशः वयं स्तुमइति शेषः। कीदृशं
यशः। अवीरलक्षणं। चित्रश्रवस्तमं अतिशयेन श्रवणीयं। कथंभूतस्य मित्रस्य चर्षणीधृतो

२३६

उखाकृतानां करोत्यव्यथमानेतीति च। २

मनुष्याणां धारयितुः। यद्वा अवीयशश्च यजमाने स्थापयतु॥ का०॥ उद्वपति श्रपणं देवस्त्वेति पचा
नि श्रपणानि उद्वासयेत्॥ पाठस्तु॥ देवस्त्वा सविता॰ आपृणेति। हे उखे सविता देवः स्वकीयया
स्तात्तया त्वां उद्वपतु आच्छिदिता श्रपणात् प्रकीर्णां करोतु। उत समुच्चये। किंभूतः सविता सुपाणिः शोभनहस्तः
स्वंगुरिः शोभनांगुलिः रेफस्य लत्वादेशः। सुबाहुः सन्नुखामुत्तानां करोतु। हे उखे त्वं अव्यथ
मानासती पृथिव्यां स्थिता आशा दिशः विदिशाश्चापृण पूरयाहुतिरसेन॥ का०॥ उपर्वेति उपर्यायति।
अवटाद्बहिरूखामानयेत्॥ पाठस्तु॥ उत्थाय बृहती॰ त्वमिति। हे उखे त्वं उदुत्तिष्ठ। अवटाद्बहिरागत्य स्थि
रा भव उत्थाय बृहती प्रौढा भव। इदं तिष्ठ ध्रुवा स्थिरा भव। उकारः पादपूरणः॥ का०॥ पात्रे करोति मि
त्रैतामितीति। अवटादूर्ध्वमानीतामुखां पात्रे स्थापयेत्॥ पाठस्तु॥ मित्रैतां त॰ मा भेदि। हे मित्र एतां
मुखां तव परिददामि किमर्थं अभित्त्यै अभेदनाय। एषा उखा गृहीता सती मा भेदि मा भिद्यतां॥ का०॥
अजापयसावसिंचति वसवस्त्वेति प्रतिमंत्रमिति। वसवस्त्वेत्यादिभिश्चतुर्भिर्मंत्रैः पृथक् पृथग्
आछीरेणोखामासिंचेत्॥ तेषां पाठस्तु॥ वसवस्त्वाछृन्दंतु॰ आनुष्टुभेन छंदसांगिरस्वदिति। हे

प्रथमक प्रापुवर्ती=

उखेवसुनामका देवा आंगिरसइवत्वां आछृंदंतु। आसिंचतु। एवमुत्तरत्रयोज्यं॥ इति षष्ठोनुवाकः॥ ॥
षष्ठेनुवाके उखासंस्कार उक्तः। सप्तमे त्वाहुतिमंत्राः समिदाधानमंत्राश्च व्याख्यायंते॥ का०॥ प्राकृतान्याहु
तीर्नाभिहुत्वासप्ताग्निकान्याकूतिमिति प्रतिप्रतिमंत्रमिति। दीक्षाकाले सोमयागकर्तव्यान्याकूत्यै
प्रयुजेऽग्नये स्वाहेत्याहुतीर्नाभिहुत्वापश्चादग्निचयनसंबंधीनि आकूतिमग्निं प्रयुजं स्वाहेत्यादी
नि सप्ताहुतीर्नाभिप्रत्येकं जुहुयात्॥ पाठस्तु॥ आकूतिमग्निं० पुष्पसे स्वाहेति। आकूतिरस्मदीयः
संकल्पोनुष्ठानविषयः तं प्रतिप्रयुजं प्रेरकमग्निमुद्दिश्य स्वाहा सुहुतमस्तु। अनुष्ठेयस्मरणसाधनं
मनः। स्मर्तयोर्मंत्रयोर्धारिणी शक्तिर्या मेधा तद्रूपं प्रतियोजकमग्निमुद्दिश्य सुहुतमिदमस्तु।
अविज्ञातस्यानुष्ठानस्य ज्ञानसाधनं यच्चित्तं यदर्पितेन चित्तेन ज्ञातमनुष्ठानं तद्रूपं प्रतिप्रेरक
मग्निमुद्दिश्य सुहुतमस्तु॥ वाचो मंत्रपाठरूपाया विधृतिं विधारणं प्रतिप्रेरकमग्निमुद्दिश्य सु
हुतमस्तु। मनवे च मनुष्याणां जनकाय प्रजापतये सुहुतमस्तु। विश्वेषां नराणां अनुग्राहकत्वेन वै
श्वानराग्नये हुतमस्तु। विश्वः मर्त्तः नेतुः फलप्रापकस्य देवस्य दानादिगुणयुक्तस्य सख्यं सखि

सर्वो मनुष्यः =

२३७

त्वं वृणीत। पुष्यते प्रार्थयते। किंच विश्वः सर्वो जनः राये धनाय इषुध्यति प्रार्थयते। नेतुः कर्मस्वयं धातुः
पठितः किंच पुष्यसे पोषणाय द्युम्नं यशोन्नं वा यास्कनोक्तत्वात्। वृणीत सर्वो जनः प्रार्थयते। स्वाहा त
स्मै प्रेरकाय देवाय सुहुतमस्तु॥ का०॥ अध्वर्युयजमानयोरन्यतर उखामाहवनीये धिश्रयति। मासु भि
त्था इतीति। मासुभित्था इति मंत्रद्वयस्य प्रतीकग्रहणमिदं अनेन मंत्रेण दृंहस्वेत्युत्तरेणाध्वर्यु
यजमानयोरन्यतर उखामाहवनीयस्थापयेत्॥ तत्र मंत्रपाठस्तु॥ मासुभित्था० कृरिष्यथ इति। हे उ
खे त्वं मा भित्थाः भिन्ना मा भव। तदिदमग्निन्नत्वं सुष्ठु कर्तव्यं तथा मा रिषः स्फुटनेनापि हिंसिता मा
भव। तद् तदस्फुटनं सुष्ठु कर्तव्यं सर्वात्मना दैवी त्वां वा अदः। लेशस्य पक्षास्तावः स्फुटनं तद्रूपं
तव मा स्रक्षिस्य घः। हे धृष्णु धर्षणयुक्ते हे अंब हे मातः उखे त्वं वीरयस्व त्वं नमग्निरे धो णाल भ्र
णां वीरकर्म कुरुष्व किंचाग्निश्चत्वं च मिलित्वेदमस्मदीयं कर्म करिष्यथः॥ अथ द्वितीयः॥ दृंहस्व
देवि० यज्ञे अस्मिन्। हे पृथिवि देवि भ्रत्कार्यत्वात् पृथिवी रूपत्वं मंत्रे निष्पादितत्वाद्देवतात्वं। तथा वि
धे हे उखे स्वस्तये यजमानस्य क्षेमार्थं दृंहस्व दृढा भव। आसुरी माया शंबराद्यसुरनिर्मितमाया एव स्व

धयावृतासि। कव्यप्रधानया स्वधया निर्मितासि स्वधाशब्देनान्नमत्रमुपलक्ष्यते अन्नेन निमित्तभूतेन तद्धेतुयागसिद्ध्यर्थं निष्पादितासि। आकूतीमायामहृदयिं सरखनारूपाभित्रं वसुस्तु सहसा कृत्वा प्रतिज्ञातित हृत्समपि द्विस्तनत्वादिरखनया युक्तानिष्पन्नासी त्यर्थः। त्वन्मुखाग्निपतत्समाना भिदं हव्यं जुष्टं प्रियमस्तु। त्वमपरिष्टकेनापाहिंसिता सती अस्मिन्यज्ञे कुदिहिकृतानव॥का०॥

त्रयोदशाग्रास्यां प्रादेशमात्रीः समिध आदधातिपठिताक्तां कार्मुकी इन्नइतीति॥ अस्यां तप्यमाना यामुखाम्यां प्रादेशप्रमिता स्त्रयोदशसंख्याकाः समिध आदध्यात्। तत्र प्रथमं कार्मुक संबधिनीं घृतेनाक्तां समिधं इन्न इत्येतेनादध्यात्॥ पाठस्तु॥ इन्नस्सर्पिरासुतिः॰ अद्भुत इति। अत्रोत्सृज्यमानोग्निरेतैर्विशेषणैः प्रशस्यते। इशब्देन वृक्षाउच्यन्ते इण्द्रमिस्याहवनस्पतीछोनामेवैतेन स्यन्तइतिश्रुत्यंतरात्। इवो वृक्षाखादिनं यस्मात्सोइन्नः सर्पिरेवाहारत्वेन स्यते प्रक्षिप्यते यस्मिन्निति सर्पिरासुतिः प्रत्नः पुरातनः होतादेवानामाह्वातावरेण्यो वरणीयोसहसो बलस्य वा योः पुत्रः प्रथमहेतुना बलेनोत्साद्यत्वादद्भुत आश्चर्यरूपः एवं भूत उखायां तिष्ठमानोग्निः कार्मुकीं समिधं तत्र्यजतयतिति शेषः॥का०॥ वैकंकती परस्या इति। वैकंकतवृक्षसंबंधिनीं समिधं

उद्धकेदन

२३८

२३८

मस्याः परावतः अतिदूरात्परावच्छब्दोदूरनामसु पठितः। छांदसीसर्वनामसंज्ञा परस्या इत्यनेनादध्यात्॥ पाठस्तु॥ परस्या अधि॰ अवेति। हेवैकंकतिसमिल्लसम्यग्वनुते देवा न्यजते यस्यां क्रियायां सा क्रिया संवत् तस्याः संवतः। परस्याः संवतोपि उत्कृष्टाया इष्टेरधिष्ठानायास्व मवरान्निकृष्टान्यस्मानस्यानित। अभिमुख्येनागत्य दुःखानि तारय। यत्र येषु बंधुषु हमस्मिता नेपि वंधनवरक्ष॥का०॥ औदुंबरी परमस्या इतीति। उदुंबरवृक्षसंबंधिनी समिधमध्यात्॥ पाठः॥ परमस्याः॰ त्र्य इति। हे अग्ने परे इहागहि। आगच्छ। कीदृशस्त्वं रोहिदश्वः। लोहितवर्णाश्वो यस्य। सोरोहिदश्वः। इतएवान्यत्राम्नायते रोहितेनत्वाग्निर्देवानागच्छतीति। पुरीषमुखाहेतुभूतंपांशुं वहतीति पुरीष्यः पुरूणां बहूनां यजमानानां प्रियः पुरुप्रियस्ताद्दशस्त्वं मृधस्तरशत्रून्निति लंघय॥का०॥ यदग्नेकानियदग्नइतीति। परशुनाछिन्नां समिधमादध्यात्॥ पाठस्तु॥ यदग्नेनुषस्त्वयवि ष्ठ्यईती ति। हे अग्ने त्वदर्थं यष्टकानि कानि काभिविद्धास्त्णिदारूणि दारुशब्देनात्र कुठारच्छेदरहितमवदारितं काष्ठमुच्यते। तादृशानि कानि कान्यप्यरण्यपतितानि काष्ठान्यानीय दध्मसि धारयामः। तत्सर्वं काष्ठजातं ते त्वदर्थं घृतवत्प्रियमस्तु। हे यविष्ठ युवतम तद्दारुजातं जुषस्व सेवस्व॥का०॥ अधः शायां यदत्तीति। स्वयमेव भूमौ पतितां समिधमादध्यात्॥ पाठस्तु॥ यदत्युप॰ यविष्ठ्य इतीति। प्रोदशः प्रधाना ज्वाला जिह्वास्त्तस्य

मी पर्वर्तिनी क्षुद्रज्वालोपजिह्विका अस्माभिरानीतेषु दारुषु मध्ये यद्दारु महारण्ये दावाग्नेरुपजिह्विका
सत्यज्वाला अग्निर्न क्षयति ईषद्दहती त्यर्थः ॥ वम्रः उद्देहिः पिपीलिका सदृशी क्षुद्रजीव मन्विष्टे । सवयकाष्ठ
मतिसर्पति अतिशयेन प्राप्नोति काष्ठावयवेषु तत्र तत्र सारं न क्षयतीत्यर्थः ॥ तत्सर्वं ते घृतमस्त्वित्यादि
पूर्ववत् ॥ का० ॥ पात्ला द्वी: प्रस्य च महरहरित्युपोत्तमां क्षत्रियस्येष्टमनुत्तमां पुरोहितस्यान्यस्यान्ते स्वा
हाकारः स्ववोर्स्विति । त्रयोदशसंख्यासु समित्सु मध्ये द्वे नवस्यादिके मंत्रे: काम्यस्यादी त्यंच समि
द्विशेषाः संघाय इत उत्तरे रहरहरस्य स्वादिके मंत्रे: क्रमेण पलाशास बिंधिनी: समिध आदध्यात् ।
यदि क्षत्रियो यजमानः स्यात्तत्र उपोत्तमामादध्यात् । यदि पुरोहितः स्यात्तत्रोत्तिमामादध्यात् । यदि क्ष
त्रियपुरोहिताभ्यामुताभ्यां व्यतिरिक्तः स्यात्तत्रेपोत्तमामं तिमे उत्तरे समिधावादध्यात् । सर्वास्व
न्तु स्वाहाकारः प्रयोक्तव्यः । त्रयोदशसंख्यापक्षेहरहरित्स्यं षष्ठो मंत्रः ॥ अहरहरप्रयावं भरिष्यामिति ।
हे अग्ने ते तव प्रतिवेशा: अस्मा सन्तो वयं मारिषाम हिंसनं मा प्राप्नुमः ॥ किं कुर्वतः । रायस्पोषेण धे
नपुष्पाइधान्नेन च मदंतः हर्षं कुर्वतः तथा अहरहरप्रयावं प्रतिदिनं पृथक् ज्ञावमभूत्वा एकमपि दिन
मवर्जयित्वेत्यर्थः । अस्मा अग्नये घासं समिद्रूपं तक्ष्यं करंतः संपादयंतः तत्र दृष्टांतः तिष्ठतेश्वायेव
युमिष्य तोरस्यस्य नु पर्वस्य तद्मुत्तं तस्य रूपं =

इण् गतो अस्मादिण् नशजीति क्वरप् प्रकृत्यस्य पितीति तुक् ट्वित्वा ङीप् =

॥ अथ
वाजिनः तायोबघ्वास्यापिता यत्रोछायाभ्यायस्कमपिदिनमवर्जयित्वाय घासं प्रयच्छतिन तद्वत् ॥ अथ
सप्तमः ॥ नाम्नाः पृथिव्याः सासहिमिति । नाम्ना पृथिव्याः पृथिवीरूपाया उरवाया नाभौ मध्ये समिधाते स
म्यग्दीप्यमाने ग्नाएतावदग्निमान्निनमग्निं देवं हवामहे आह्वयामः ॥ किमर्थं बृहते प्रौढाय रायस्पोषाय
धनस्य पोषाय कीदृशमग्निं इरंमदं इरया अन्नेन माद्यतीरंमदः तथा विश्वं । बृहति प्रौढान्युक्थानि प्र
शंसनानि यस्यासौ बृहदुक्थः ॥ ताद्दशं यजत्रं यागहेतुं जेतारं राक्षसादिविषये जयशीलं पृतनासु
संग्रामेष्वस्मच्छत्रूणामतिशयेन सोढारं ॥ अथाष्टमः ॥ याः सेना अभीत्वरी० व्याख्यास्यदृति । याः काश्चित्स
रकीयसेना अभीत्वरीः अस्मदभिमुखेनागमनशीला: आव्याधिनी: सर्वतोस्मान्विध्यन्त्यः उगणाउ
तस्कराणापेता बहुस्तोमाइत्यर्थः ॥ एवंविधाः याः सेनाः संति उत अपि च ये स्तेना गुप्तचौरा ये च तस्करा
स्तान् सर्वान् हे अग्ने ते तवास्यमुखे अपिदधामि प्रक्षिपामि ॥ अथ नवमः ॥ दंष्ट्राभ्यां० सुखादितानि
ति । गुप्ताः प्रकटाश्चयेद्विविधाश्चौराः प्रकटा अपि पुनर्द्विविधाः । अरण्येषु मार्गमध्ये प्रलपन्त
स्तेहमेव पलायमानाः प्रकटाः ततोप्यति प्रकटा निर्भयाग्रामेषु बागत्स वंदीकाराः तेप्यत्रमतिम्लु

पृषोदरादित्वात्तकारलोपः =

दह्यसुच्यंते। मत्तं पापाधिक्यमेषामस्तीति मलिनः तथाविधा यस्त्वामलायंति चौर्यं कुर्वंतीति मलिम्लवः। इतयं किम ध्येयास्या आक्षांतीक्ष्णदंता व्याघ्रमुकादिफलं याच्यते ते दंष्ट्रे। ततः पुरोवर्त्तिनो दश्यमानादंतान्जंभ्या अंतर्लीनेन हनू तत्र मलिम्लून्दंष्ट्रा स्यापी उयित्वा जं त्वैस्तस्कराना पिपी उयित्वा हनुभ्यो स्तेनान्पी उयित्वा हे भगवः पूजनीय अग्ने तान्सर्वान्सुसुखादितान्पुनर्जीवनरहितान्यथा भवंति तथा खंखादत्त खाय॥ अथ द्वादशः॥ ये जनेषु० अंजयोरिति। ग्रामवर्तिषु जनेषु वने गच्छत्सु वयेत्रिविधाः पूर्वाक्ता श्वौराः संति या वा न्ये व्याघ्रादयः कक्षेषु कुंजेषु स्थित्वा अघायवो भवंति अघं पापं हिंसनमिछंतीस घायवस्ता सर्वा स्ते तव जंभयो र्दंष्ट्रा मिस्थापयामि॥ अथैकादशः॥ यो अस्मभ्यं० कुर्विति। एवं चौरा भेदा दर्शिताः। इदानीं शत्रुभेदा उच्यंते ते च त्रिविधाः। अरातयो द्विषाणो निंदकाश्चेति। तत्र दात व्यं तेन प्राप्तं धनं यो न ददाति सोयमरातिः। कार्यविघातं यः करोति स द्वेषी वाक्दोषं निमात्रं यः करोति स निंदकः। हे तुकामस्य तुर्यः। तत्र योस्मभ्यं मर्त्यो यस्मभ्यमतीयात् अरातित्वमिच्छति। यश्च जनः नोस्मान्द्वेषते कार्यनाशेन बाधते ऽन्यः निन्दात् निंदति यश्चापरोस्मान् धिप्सात् दंभेः सनं तस्यास्यास सर्वोपः दंभितुं हिंसितुमिच्छति। यश्च नोस्मान्द्वेषते कार्यनाशेन बाधते। तं सर्वं ज

२४०

२४०

अरातिरिवाचरेत्

य

दा॰ स्यांतः॥

नम्मस्मसाकुरु चूर्णेन जन्मस्य यावदस्यानुकरणं भस्मसादिति चूर्णी कुर्विस्यर्थः॥ अथ द्वादशः॥ सं शितं मे० पुरोहितः इति। मे मदीयं ब्राह्मण्यं संशितं सम्यकृतीक्ष्णीकृतं शास्त्रीय मार्गविनिर्वृतमित्यर्थः। तथा वीर्यं शक्तिः बलं शरीरशक्तिः स्तदुभयं संशितं तं स्वकार्यक्षमं कृतं तथा यस्य क्षत्रियस्याहं पुरोहितोस्मि। मे मदीयं तत्क्षत्रं जिष्णु जयनशीलं यथा भवति तथा संशितं॥ अथ त्रयोदशः॥ उदेषां बाहू० स्वां अहमिति। एषां स्वकीयानां राज ब्राह्मणादीनां मध्ये एकैकस्य बाहू उदितिरं उत्कर्षेण वर्द्धिं० तवानस्मि। लोकिकोक्तिरियं लोके हि यस्मात् दुर्बलं ष्टो भवति तं जनाएवमाहुः स्वकीयं हस्तं उपरितनं भूतवानिति। वर्चः कांतिः तामप्युदतिरं अथो अपि च बलं शारीरशक्तिमप्युदतिरं ब्रह्मणा मंत्रसामर्थ्येन अमित्राणशत्रून्क्षिणोमि क्षीणान्करोमि। स्वान्स्वकीयान्पुरुषानहमुन्नयामि उत्कर्षं प्रापयामि॥ एवं त्रयोदशमंत्रानुक्त्वा तथोत्तमौ द्वौ वैकल्पिकमंत्रा उच्यते। तत्र प्रथमः॥ अन्नपतेन्नस्य० स्वाहेति। हे अन्नपते अग्ने अनमीवस्य रोगरहितस्य शुष्मिणो बलहेतोरन्नस्य प्राप्तिं धेहि। प्रदातारं प्रकर्षेण हविषो दातारं यजमानं प्रातरिषः प्रकर्षेण दुरितानि तारय नोस्माकं द्विपदे मनुष्याय चतुष्पदे पशवे च ऊर्जं बलं अन्नं वा धेहि संपादय। विश्वकर्मणि समस्तजगत्स्थितिस्थित्यादिकर्मकर्त्रे तुभ्यं स्वा

हा सुहुतमस्तु॥ अथ द्वितीयः॥ पुनस्त्वा० स्वाहेति। हे अग्ने त्वामादित्या रुद्रा वसवश्च पुनः समिंधतां उप
शांतं पुनः संदीपयंतु हे वसुनीथ वसूनां धनानां नेतः प्रापयितः ब्रह्माणो ब्राह्मणो ब्राह्मणा ऋत्विजो
यज्ञे निमित्ते ऋते स्त्वां पुनः समिंधतां त्वं च घृतेन तुष्टः सन् तन्वमात्मीयं शरीरं वर्द्धयस्व। ततस्त्व
मिद्धे सति यजमानस्य कामाः सत्याः संतु स्वाहेति होमार्थः॥ इति सप्तमोऽनुवाकः॥ वेदार्थस्य०
॥ इति सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे काण्वसंहितायां द्वादशोऽध्यायः॥
॥ ॥ यस्य निश्वसितं वेदा० ॥ ॥ द्वादशेऽध्याये उखासंभरणादिमंत्रा उक्ताः। त्रयोदशेऽनुरुक्म
धारणादिमंत्रा उच्यंते॥ तत्र प्रथमेऽनुवाके आसंद्यामुख्याग्निस्थापनं प्रतिपाद्यते॥ का०॥ यज
मानः कंठे रुक्मं प्रति मुंचते दृशानो रुक्म इतीति। सुवर्णनिर्मितः फलकाकार आभरणविशेषो रुक्म
२४९ स्तं कंठे बध्नीयात्॥ पाठस्तु॥ दृशानो रुक्म० सुरेताः इति। दृशानो दर्शनीयरूपः रुक्मः आभरणविशे २४९
षः उर्व्या महत्या दीप्त्या व्यद्यौत् विद्योतते किं कुर्वन् दुर्मर्षं केनाप्यतिरस्कार्यमायुर्जीवनं श्रियै श्रयितुं रु
रोचमानः= चानो इव न तथाग्निर्वयोऽतिरन्नलक्षणेन हविर्भिरमृतोऽभवत् यस्मादेनमग्निं द्यौर्द्युलोकवासी दे
वगणः सुरेताः सन् अजनयत्। तस्माद्रुक्मतत्त्वं युक्तं॥ का०॥ परिमंडलां स्यामिंदूलां स्यामुखां परिगृह्णा

धेटूपाने। पायते सायंप्रातरग्निहोत्रादिकर्म निर्माता पितरौ बालमिव =४

तीति नक्तोषासेतीति। वर्तुलां स्यामुखां धारणसामर्थ्येन सहितां स्यामिंदूलां मुखां गृह्णीयात्॥ पाठस्तु॥
नक्तोषासा समनसा० समीचीरिति। नक्तं चोषाश्च नक्तोषसौ रात्रिदिवसौ विरूपे धर्मः। समनसा परस्पर
मेकमनस्युक्ते विरूपे रात्रिः दिवसः कृष्णा शुक्ल इत्येवं विलक्षणरूपे समीची समीच्याऽवत्सरूपे शि
शुमेकं शिशुं अग्निरूपं धापयेते यजमानकर्तृकमग्निधारणं संपादयेतः। का०॥ हरन्नयति घा
वाक्षामेतीति। परिगृह्य तामुखां माहवनीयदेशस्य प्राचीनदेशं प्रत्याहरेत्॥ पाठस्तु॥ द्यावा क्षामा०
रुक्मो अंतर्विभातीति। द्यावा द्युलोके क्षामा क्षितौ भूलोके अंतस्त दुभयमध्ये वर्तिन्यंतरिक्षे रुक्मोरोच
मानोऽग्निर्विभाति विशेषेण प्रकाशते॥ का०॥ आहवनीयस्य पुरस्तादुदुहात्रासंवदीं कदाचिच्चतु
रस्रां यांत्रिकाक्यवस्यां निदधाति देवा अग्निमितीति। आहवनीयस्य प्राग्देशे उदक्त्रासंदीं चतुरस्रा
युक्तां यासंदी स्थिता तस्या उपरि स्थिते त्रिक्ये आहृतां मुखां स्थापयेत्॥ पाठस्तु॥ देवा अग्निं धा
रयन् द्रविणोदा इति। दीव्यंति व्यवहरंतीति देवाः प्राणास्ते च द्रविणोदाः यागद्वारेण द्रविणं धनस्व
पं फलं प्रयच्छंतीति ते तादृशा यजमानस्य प्राणा अग्निमेतं धारयन् अधारयन्। अत्र देवशब्दस्य

प्राणस्तैत्तिरीया आमनंति। देवा अग्निं धारयन्द्रविणोदा इत्याह प्राणो वै देवा द्रविणोदा इति॥ का०॥ शिक्यपाशं प्रतिमुंचते षडुद्यामं विश्वारूपाणीति षडूर्ध्वानि मुखानि रज्जवो यस्मिन्तत्षडुद्यामं शिक्यपाशं बध्नीयात्॥ पाठस्तु॥ विश्वारूपाणि॰ विराजतीति। कविर्विद्वान्वरेण्यः श्रेष्ठः सविता देवः विश्वारूपाणि समस्तानि जगद्रूपाणि प्रतिमुंचते स्वस्मिन्स्वीकरोति प्रकाशयतीत्यर्थः। द्विपदे चतुष्पदे मनुष्याणां पशूनां च भद्रं स्वस्वव्यवहारप्रकाशनरूपं श्रेयः प्रासावीदुत्पादितवान्। नाकं स्वर्गं विशेषेण व्यख्यत् प्रकाशितवान्। उषसः प्रयाणमनु उषःकालेऽतीते सवितृविराजते स्वयं विशेषेण प्रकाशते॥ का०॥ सुपर्णोसीत्यभिमंत्रयेदिति॥ पाठस्तु॥ सुपर्णोसि गरुत्मान्॰ स्वः पतेति। हे अग्ने त्वं सुपर्णः पक्षिरूपोसि पक्ष्याकारेणैव चेष्यमाणत्वात् अत एव तैत्तिरीयैराम्नायते। वयसां वा एष प्रतिमया चीयते यदग्निरिति। तत्र दृष्टांतः गरुत्मान्यथा पक्षिराजस्तद्वत्पक्ष्याकारस्यावयवाः संपद्यंते। त्रिवृत्ते शिरः बहिष्पवमानस्तोत्रे योयं त्रिवृत्स्तोमः स एव त्वच्छिरस्थानीयः प्रजापतिमुखं जन्वेनोत्तमं यत्गायत्राख्यं साम तत् चक्षुः ये बृहद्रथंतरारव्ये सामनी ते तव पक्षस्थानीये यः पंचदश स्तोमः स तवात्मा तत्करणं यानि गायत्र्यादीनि छंदांसि तानि तव हृदयाद्यंगस्थानीयानि

यजूंषि तानि तव नामस्थानीयानि यद्वामदेव्याख्यं साम तत्तनुः शरीरस्थानीयं यज्ञायज्ञियाख्यं साम तत्तव पुच्छस्थानीयं ये सौमिकवेद्यां होत्रादिधिष्ण्यास्ते तव शफस्थानीयाः। हे अग्ने एवं सति त्वं यतो गरुत्मान् गरुड इव सुपर्णः पक्षिरूपोसि अतो दिवमाकाशं प्रतिगच्छ तत्रापि स्वः पत स्वर्गलोकं प्राप्नुहि॥ का०॥ विष्णुक्रमान्क्रमान्क्रमते विष्णोः क्रम इति प्रतिमंत्रं चतुर्थे दिशो दीक्षितः दिशोनुविक्रमस्वेतीति। विष्णोः क्रमोसीत्यादिभिश्चतुर्भिर्मंत्रैः क्रमेण चतुरः पादविन्यासान्कुर्यात्। तत्र चतुर्थे गतैर्मंत्रे नर्दिशोनु विक्रमस्वेति मंत्रशेषेण दिशो बलोकयेत्॥ तेषां पाठस्तु॥ विष्णोः क्रमोसि सपत्नहा॰ दिशोनुविक्रमस्वेति। यज्ञप्रयोगं कृत्स्नं व्याप्नोतीति विष्णुर्यजमानः यद्वा विष्णुना परमेश्वरेण हे दोपदिशोनुविक्रमस्वेति। यज्ञप्रयोगं कृत्स्नं ... चारं कृत्वा विष्णुरित्युच्यते। हे प्रथमपादविन्यास त्वं सपत्नहा शत्रुघाती विष्णोः क्रमोसि। तादृशस्त्वं गायत्रं छंदः आरोह अनुग्राहकत्वेन स्वीकुरु। ततः पृथिवीमनुविक्रमस्व तद्देवतारूपभिमं प्रदेशं गायत्रं छंद आरोह अनुग्राहकत्वेन स्वीकुरु। ततः पृथिवीमनुविक्रमस्व ... वर्णं व्याप्नुहि। एवमुत्तरेष्वपि योज्यं। अभिमातिहा पापघाती पाप्मा वा अभिमातिरिति श्रुतेः अरातिर्दानव्यस्य दाना ... वस्तमाभिम न्यतीत्यराती यत्। तस्य हंता विनाशकः। प्रहारेहं

अत्राग्निः पर्जन्यरूपत्वेन स्तूयते ।४

त्वं सं नदि द्युतीति शत्रूयत् । तस्यर्षिः तापिनाङ्गाकः । अत्र सर्वत्र यजमानात्मानं विष्णुत्वेन भावयेत् चतुर्णां प्रक्रममाणां प्रदेशा पृथिव्यादि लोकरूपत्वेन भावयेत् । गायत्र्यादिछंदांसि मानि देवतास्तेषां प्रक्रममाणामनुग्राहिकाः ॥ का० ॥ त्राणुदंवं प्रगच्छास्य क्रंदद् अग्निरिति ॥ पाठस्तु ॥ अक्रंदद् अग्नि० स्तनयन्निव द्यौः । अयमग्निरक्रंदत् । अस्मद् द्विष्टनिवारणार्थं गर्जतु किमिव स्तनयन्निव द्यौर्यथा द्युलोकस्थो मेघो गर्जनेन सस्य शोषणभीतिं निवारयति तद्वत् । किं कुर्वन् क्षाम दाहकमस्माद्विरुद्धं रेरिहत् लेलिहानः वीरुधः समंजन् पुष्पलतावदस्मदनुकूलानि सम्यगभिव्यंजयन् । हियस्मात् जज्ञानः उत्पद्यमानः सद्यः इदानीमेव इद्धो दीप्तो व्यख्यत् विविधं जगत् प्रकाशयति रोदसी द्यावापृथिव्यौ रंतेः भानुनारश्मिना स्वयमाभाति समंतात् प्रकाशते ॥ का० ॥ अवहरत्येन स्यावर्तिन्निनीति । अग्ने स्यावर्तिन्नित्यादिभिश्चतुर्भिर्मंत्रैः उरव्यमग्निमवहरेत् ॥ तत्र प्रथममंत्रपाठस्तु ॥ अग्नेस्यावर्तिन्नभिमा० पोषेणेति । आभिमुख्ये नाभिवर्तितुं शीलमस्यास्तीत्यभ्यावर्ती तादृशा हे अग्ने आयुरादिभिः सह मामभिलक्ष्य निनिवर्तस्व । आयुरपमृत्युरहितं जीवनं वर्चः कांतिर्बलं वा प्रजा पुत्रादि धनं रत्नसुवर्णादि । सनिर्भक्ष्यादिस्य संपादितस्य दानं । मेधा श्रुतार्थधारणशक्तिः रयिः पश्वादि पोषः पश्वादेः पुष्टिः एतैः सर्वैरायुरादिभिः समं अग्नीध्रमागच्छस्वार्थः ॥ अथ द्वितीयः ॥ अग्ने अंगिरः० कृणीति । हे अंगिरः अंगसोष्ठव युक्ताग्ने ते तव आवृतः शतं सं तु । आवृतः शाक्तयः शतसंख्याका भवं तु । तथा ते तव उपावृतः उपशक्तयः शतसंख्या भवं तु । स्वस्यैवावर्त्तनमावृत् । समीपवर्तिनां पुरुषाणां द्रव्य विशेषाणां वावर्त्तनमुपावृत् । अस्मास्वमासु स्नेहातिशयेन त्वमपि पुनः पुनरावर्त्तस्व त्वदीयाः पुरुषाः त्वदीयानि च द्रव्याणि पुनः पुनरावर्त्तंतामित्यर्थः । अथापि त्वं शतसहस्त्रसंख्यानामावृत्सु पावृत्तिशक्ती नाथः पोषः समृद्धिस्तस्यापि पोषस्यान्यः पोषो युतलक्षादिसंख्याका वृद्धिस्ताद्दशेन पोषेण नोस्मदीयं नष्टं धनं पुनर्भयो व्याप्नुधि आवर्त्तकरूपुनर्भयोपि नोस्मदीयं रयिं पूर्वमसंपादितं धनं आप्नुधि सर्वतः संपादितं कुरु ॥ अथ तृतीयः ॥ पुनरूर्जानि० हसइति । हे अग्ने त्वं ऊर्जा क्षीरादिरसेन सह पुनर्निवर्त्तस्वात्रागच्छ । इषा अन्नेनायुषे जीवनेन च सह पुनरागच्छ आगत्य नः अस्मान् पुनः पातात् अंहसः पापात् सादित्ररक्ष ॥ अथ चतुर्थः ॥ सह रय्या० परीति । हे अग्ने रय्या धनेन सह निवर्त्तस्व । प्सान्नक्षण इति धातुः ॥ विश्वैः सायतेत्न स्पतेपीयतइति विश्वप्स्न्यी तादृश्या वृष्टि

इत्थमन्नर्थक मन्वयं=

२४३

२४३

अन्नानिवा। अन्नंवैविराडितिश्रुतेः=४ पिन्वतिः सेचनार्थः=

धारयाविश्वतस्परि सर्वेषां त्वणाधान्यस्तातापादृष्पा नाभुपरिपिन्वस्वसिंचस्व॥ का०॥ उपरिनाभिधारय धारयाविश्वतस्परि सर्वेषां

नाव्याहार्षमितिसमिमंत्रयतइति। उखम्यमग्निं नाभेरूर्ध्वं धारयन्नभिमंत्रणंकुर्यात्॥ पाठस्तु॥ आहा

र्षमंतर०भवेत्यादिति। हे अग्ने त्वामाहार्षं आहृतवानस्मि। त्वं चोखायामंतरन्तः अवस्थितोसि अविचा

लिः। असंतंचलनरहितो ध्रुवस्तिष्ठ। सर्वा विशः प्रजास्त्वां वांछंतु। त्वन्निदंराष्ट्रमधिभ्रशत्तन्यमापर

पादि। त्वमस्मिन्राष्ट्रे स्थितोसर्वाः प्रजाः पाहीत्यर्थः॥ का०॥ पाशाद्दुन्मुच्योदुत्तममितीति। शिक्यपाशे

षि सेसलू॥ पाठस्तु॥ उदुत्तमं० स्यामेति। हे वरुण उदुत्तमं उच्चमांगेशिरसि स्थापितं त्वदीयं पाशंश्लथ

य। उत्कृष्य अधाय विनाशय। अधममधमांगे पादप्रदेशे स्थापितं पाशमवकृष्य विनाशय मध्यमं मध्य

प्रदेशे स्थापितं पाशं विश्लेषय। अथ पाशात्प्रविनाशनानंतरं हे आदित्य अदितिपुत्र वरुण वयम

नागसः पापरहिताः संतस्तव व्रते त्वदीयकर्मणि अदितये अखंडिताय स्याम योग्या भवेम॥ का०॥ प्र

त्यञ्चाग्रे बृहन्निति इति॥ पाठस्तु॥ अग्रे बृहन्नु० न्यधादिति। अयमग्निर्बृहन्महानुषसामग्रे उषसां पु

रस्तादूर्ध्वो अस्थात्। अग्निहोत्रादौ बोध्यमानउपतिष्ठति। ज्योतिषा स्वकीयेन तेजसा तमसो निर्जगन्वान्

अत्र दिग्भ्यः आत्मना गन्तस्तु तिरिति ज्ञेयं=

निर्गतः सन्नागात्। इहागतः कीदृशोग्निः रुशता तमो हिंसता भानुना रश्मिना स्वंगः शोभनांगः किं

च जातएव सन्नमात्र एव विश्वा सद्मानि सर्वाणि स्थानानि आप्राः स्वकीयेन तेजसा सर्वत्र पूरितवान्॥ का०॥ अ

थ हंसः शुचिषदिति संख्यां करोति बृहदिति इति। हंसः शुचिषदिसनेनमंत्रेण उखामवहृत्य बृहत

नहरति हंसः शुचिषदित्यासंख्यां करोति बृहदिति इति। हंसः शुचिषद्० बृहदिति। अयंमंत्रः पूर्वमेवाद

दितितस्यांतमेन पदेन आसंख्यां स्थापयेत्॥ पाठस्तु॥ हंसः शुचिषद्० बृहदिति। अयं मंत्रः पूर्वमेवादि

ध्याये व्याख्यातः॥ का०॥ उपतिष्ठते सीदत्वमितीति। सीदत्वमित्यादिभिस्त्रिभिर्मंत्रैरुपस्थानं कुर्यात्

॥ तत्र प्रथममंत्रपाठस्तु॥ सीदत्वं मातु० विराहीति। हे अग्ने त्वं मा हस मानायाः अस्याः उखायाः उपस्थे उ

त्संगे सीद उपविश किंच त्वं विश्वानि वयुनानि सर्वाणि ज्ञानोपायान् विद्वान् जानन् एनामुखां तप

संतापेन मा भिशोचीः असंतेमादीपय। अर्चिषा ज्वालया च मा भिशोचीः तपः कार्यं अर्चिः कारणं कार्यं

एण भयां स्तापो भवति। कारणेन नदीपय। तदुभयं मा कुर्वित्यर्थः। अस्या मुखायां अंतः शुक्रज्योतिर्नि

र्मलप्रकाशः सन् विभाहि विशेषेण दीपयस्व॥ अथ द्वितीयः॥ अंतरग्नेरुचा० भवेति। हे अग्ने त्वं उखा

या अंतर्मध्ये स्वे सदने स्वकीये स्थाने रुचा दीप्त्या युक्तः सन् सीदेति शेषः। हे जातवेदस्त्वं तस्याः उ

अत्राग्निपर तंद्रष्टव्यं=

आहरणे=

२४४

२४४

२४५

स्वात्मा विभावसुः सुखप्रदो भव॥ किं कुर्वन् हरसा तेजसा तपन् प्रज्वलन्॥ अथ तृतीयः॥ शिवो भूत्वा० सद
इति। हे अग्ने मह्यं मदर्थं शिवः शांतो भूत्वा अथो अनंतरं त्वं शिवः सीद सर्वान्प्रति शांतः सन्नुपविश। स
र्वा दिशः। शिवाः शांताः कृत्वा इह अस्यामुखायां स्वां योनिं स्वकीयस्थाने आसदः आगत्योपविश॥ ॥
इति प्रथमोनुवाकः॥ प्रथमेनुवाके बहूनां संघास्थापनं कुर्यादित्युक्तं। द्वितीये तस्याग्नेरुपस्थानमु
च्यते॥ का०॥ वात्सप्रेण च दिवस्परीत्येकादशभिरनुवाकेनैक इति। अत्र चशब्देनोपतिष्ठत इत्य
नुवर्तते। वत्सप्रऋषेः संबंधी वात्सप्रो दिवस्परीत्ययमनुवाकः॥ तत्र केचिदेकादशभिर्मंत्रैरासं
द्यामुपरि स्थितं उखाग्निमुपतिष्ठेतेति वदंति। अन्ये तु वात्सप्रेण सर्वेणानुवाकेनोपस्थानं कु
र्यादिति वदंति। तत्र प्रथममंत्रपाठस्तु॥ दिवस्परि प्रथमं० स्वाधीरिति। अग्निः प्रथमं दिवस्परि
द्युलोकस्योपरि प्रथमं जज्ञे सूर्यरूपेणोत्पन्नः। अस्मत्परि अस्मदीयमनुष्यलोकस्योपरि जा
तवेदा द्वितीयं जज्ञे प्रसिद्धवह्निरूपेण द्वितीयं जन्म जातवान्। अप्सु समुद्रे तृतीयं जज्ञे वडवानल २४५
रूपेणोत्पन्नः॥ अजस्रं त्रिष्वपि जन्मसु नृमणाः नृषु यजमानेषु मनोनुग्रहबुद्धिर्यस्यासौ नृमणाः

एनमीदृशमग्निमिंधानः पुरोडाशादिना दीपयन् स्वाधीः स्वायत्तचित्तोऽजरस्ते जीर्यति जरापर्यंतं परिचरती
त्यर्थः॥ अथ द्वितीयः॥ विद्मा ते अग्ने० त्रेधेति। हे अग्ने यानि पूर्वस्मिन्मंत्रे दिवस्परीत्यादिना त्रेधा त्रय
रूपाण्युक्तानि आदित्याग्निवडवानलरूपाणि तानि त्रिसंख्याकानि ते तव संबंधीनि रूपाणि वयं विद्म जानी
मः॥ किंच ते तव संबंधीनि विभृता बहुषु प्रदेशेषु गार्हपत्याहवनीयान्वाहार्यपचनरूपाणि त्राग्नीध्रीयस्थे
षु बहुधा हितानि पुरुत्रा पुरुरूपाणि धाम धामानि स्थानान्यपि विद्म। किंच ते तव परममुत्कृष्टं गुहा गुह्यं गोप्यं
देवेद्धो मन्विद्ध इत्यादिमंत्रप्रतिपाद्यं नाम यदस्ति तदपि विद्म देवादीनां नाम त्वं मंत्रांतरे संबोधनं ब
हुलादवगम्यते अग्ने देवेद्ध मन्विद्ध मंद्रजिह्वेति मंत्रांतरं। किंच यत उत्सात् ऊहरूपात् प्रस्रवणादाजगंथ वैद्यु
तरूपेण त्वमागतोसि। तमप्युत्सं जलरूपं विद्म॥ अथ तृतीयः॥ समुद्रे त्वा नृमणा० ऊधन्निति। हे
अग्ने त्वामीधे यजमानोहं दीपयामि। कीदृशो यजमानः नृमणाः नृषु मनुष्येषु कर्मानुष्ठानपरेषु ऋत्वि
क्षु मनोनुसंधानकारणं चित्तं यस्यासौ नृमणाः। नृचक्षाः नृषु पुरुषेषु वेदपारंगतेषु मध्ये च
ष्टे मंत्रान्विस्पष्टं कथयतीति नृचक्षाः। कीदृशं त्वां तस्थिवांसं वडवानलरूपेणावस्थितं तथा अ
प्सु वृष्टिरूपास्वंतर्वैद्युतरूपेणावस्थितं। तथा दिवो द्युलोकस्य ऊधन् ऊधस्थानीये तृतीये समु

द्वाता। उदारो दातृ महतोऽस्याभिधानात्।

द्रव्यस्यापेक्षया तृतीयस्थाने रजसि रंजनात्मके तेजोमंडले सूर्यरूपेण तस्थिवांसं महिषां महांतो यजमाना अपामुपस्थे उत्संगे अवर्द्धन् अवर्द्धयन् ॥ अथ चतुर्थः ॥ अक्रंदद् अग्नि॰ स्तनयन्निति। पूर्वानुवाक्येयं मंत्रो व्याख्यातः ॥ अथ पंचमः ॥ श्रीणामुदारो॰ भिधान इति। श्रीणां गवाश्वादीनां संपदां उदार उत्कर्षेण प्रापयिता रयीणां धनानां धरुणो धारयिता मनीषाणां अपेक्षितानां स्वर्गादिफलानां प्रार्पणः प्रार्पयिता सोमगोपाः यजमानेनानुष्ठेयस्य सोमयागस्य रक्षिता वसुः सर्वस्य निवासहेतुः सहसः सूनुः मंथने वेगरूपस्य बलस्य पुत्रः ॥ अप्सु दीक्षिरूपासु राजा वै घृतरूपेण उद्दीप्यमानः उषसामग्रे प्रातःकाले इध्यान अग्निहोत्रे दीप्यमानो ग्निर्विभाति विशेषेण भासते ॥ अथ षष्ठः ॥ विश्वस्य केतुः॰ पं चेति। विश्वस्य केतुः सर्वस्य जगतो ज्ञापकः भुवनस्य लोकस्य गर्भो गर्भवदंतर्वर्तिस्यतः ॥ जायमानो जायमान एव रोदसी द्यावापृथिव्यौ आपृणात्। सर्वतः स्वतेजसा पूरयति। पंच यजमानसंहिताः ॥ ऋद्धिग्रूपाः पं चसंख्याका जना अग्निमयजंत तदानीं परायन् आहुतिरूपेण दिव्य समीपं गच्छन्तीत्यर्थः। छिन्न मेव अद्रिं पर्वतसमानं मेघं अग्निना विदारितवान् ॥ अथ सप्तमः ॥ उशिक् पावकः ॥ न तुन्निति। अरतिर्यागरहितेषु प्रीतिरहितः। द्योतनामेघासेकं वकाभिप्राय धारणशक्तिर्यस्या सो सुमेधाः

अमर्त्यो मर्त्येषु निहितः तस्मात् अग्निर्मर्त्येषु मनुष्येषु यजमानेषु निधायि निहितः ॥ अरुषमरो अरुषमुपस्थं गृहं हितं धूमं भरिभ्रत् अतिशयेन धारयन् शुक्रेण शोचिषा निर्मलेन तेजसा प्रकाशरूपेण द्यामाकाशं इन्वन् व्याप्नुवन् उदियर्ति ऊर्ध्वं प्रसारयति ॥ अथाष्टमः ॥ दृशानो रुक्मः॰ सुरेत्ता इति पूर्ववद्व्याख्येयं ॥ अथ नवमः ॥ यस्ते अद्य॰ यविष्ठेति हे अग्ने रोचक कल्याणदीप्ते अग्ने देव ते तव अद्यास्मिन् दिने घृतवंतं घृतसंपन्नं उपस्तरणाभिघारणोपेतं पुरोडाशं यो यजमानः कृणवत् करोति। हे यविष्ठ युवतम देव अक्तं देवेषु भक्तियुक्तं तं पुरोडाशकारिणं यजमानं अभिप्र अभिमतं सुखं प्राप्तुं प्रकर्षेण नय प्रेरय कीदृशं सुम्नं प्रतरं प्रकृष्टतरं वस्यो अतिशयेन निवासकारणं ॥ अथ दशमः ॥ आतं भज॰ भजीति। हे अग्ने वं सौश्रवसेषु कीर्तिः सुश्रवसस्तस्य संबंधीनि तत्कारणानि कर्माणि सौश्रवसानि तेषु कर्मसु उक्थ्यस्य उक्थे निष्केवल्य प्रउगादिरूपे तत्र उक्थे शस्यमाने सति तं देवभक्तं यजमानं आतं भज सर्वतः सेवय। निरंतरं केवल्य भजेति द्विरुक्तेर्वाक्यद्वयमिदं कर्त्तव्यं। कर्मसु प्रेरय कस्येकं वाक्यं तत्र केवलपुरोडाशादिसंपादनं कुर्वित्यर्थः। आतं भजेति द्विरुक्तेर्वाक्यद्वयमिदं कर्तव्यं। कर्मसु प्रेरयेति द्वितीयं। अयं यजमानः सूर्ये प्रियो भवाति भवतु। अग्नौ वरुणौ वरुणावपि प्रियो भवतु। तथा जातेन उत्पन्नेन पुत्रेण पौत्रेण जिनदत्त उद्भेदं वृद्धिं प्राप्नोतु। तथा जनिष्यमाणैः पौत्रादिभि

अक्रन्दद्

ऋवठङ्क्तिनदन्तु॥ अथैकादशः॥ त्वामग्ने यजमाना० विश्ववृरिति। हे अग्ने यजमानाः सर्वे घृतं प्रति
दिनं त्वामनु त्वामेवानुगं छंतो वार्याणि वरणीयानि विश्वा विश्वानि सर्वाणि वसु वस्तूनि धनानि द
धिरे धृतवंतः। त्वया सहावस्थितास्ते यजमानाः द्रविणमिच्छमानाः पुनरप्यधिकं द्रव्यं कांक्षंतः उ
शिजो धनसाध्यानि कर्माणि कामयमानाः गोमंतं गोभिर्बहुभिर्युक्तं व्रजं गोनिवासस्थानं विवव्रुः
विवृतं रक्षणेन कृतवंतः॥ अथ द्वादशः॥ अस्ताव्यग्नि० सुवीरमिति। अग्निः ऋत्विग्भिर्नरैर्ऋत्विग्य
जमानैर्नरस्ताविस्तुतोभूत्। कीदृशोग्निः। नराणां नराणां मनुष्याणां सुशेवः शोभनं सुखं यस्य तथा विश्वा
नरः विश्वनरसंबंधी सोमगोपाः सोमस्य रक्षिता अद्वेषे द्वेषरहिते द्यावापृथिवी हुवेम वयमा
ह्वयामः। हे देवाः यूयं सुवीरं शोभनपुत्रोपेतं रयिं धनं अस्मे अस्मासु धत्त स्थापयत॥ इति द्वि
तीयोनुवाकः॥ ॥द्वितीयेनुवाके वह्नेरुख्यस्योपस्थानमुक्तं। अथ तृतीये चयनार्थस्य देवयजने २४७
स्य परिग्रहो भिधीयते॥ का०॥ उख्यस्योत्तरतः समिदाधानं० समिधाग्निमिति। प्राग्देवय
२४७ शकटावस्थापनानंतरमुख्याग्नेरुत्तरतः समिधाग्निमित्यनेन मंत्रेण समिधमादध्यात्॥
पाठस्तु समिधाग्निं० जुहोतनेति। हे ऋत्विग्यजमानाः एनमग्निं समिधा दुवस्यत परिचरत। घृतै

१त्रं त्रदित

रूवरकरूब्दार्थक्रिते। भवदीयस्तुतिकारिणोर्द्वयोर्यजमानयोर्मध्ये एकस्तोता वह्नमधिकं वक्ति उ
चितोक्तिमल्पं धनिंदास्तुपाणशि प्रशंसास्तेणवायक्तिं चिदुक्तिनः एकस्तोता अनुगृणाति। अनु
कूलमुचितमेव वक्ति अतोस्मदभिप्रायं बुध्यस्वेति प्रार्थ्यते। वृंदारुरभिवादनपरो हे तेत्वदीयं
वंद्यारीरं वंदे॥ अथ द्वितीयः॥ स बोधि० वसीति। हे वसुपते धन धनपते वहे वसुदावन्त्व
न धनप्रदेति वा हे अग्ने सूरिः यजमानास हि दानपंडितः मघवा धनवान् तादृशस्त्वं द्वेषांसि। श
अप्रियाणि वा त्रुभिः कृतान्द्वेषान् अस्मद्युयोधि अस्मत्तः पृथक्कुरु॥ का०॥ आज्यं विश्वकर्मण इति जुहोतीति।
स्वाहेति मंत्रशेषः। विश्वकर्मणे समस्तजगदुत्पत्तिस्थित्यादिकर्मकर्त्रे तुभ्यं स्वाहा सुहुतमस्तु॥ का०॥
उख्यायां दधाति समिधं पुनस्त्वेति॥ पाठस्तु॥ पुनस्त्वादित्या० स्वाहेति। हे अग्ने त्वां रुद्रा आदित्या
रुद्रा वसवश्च पुनः समिंधतां। पुनः संपयंतु। हे वसुनीथ वसूनां धनानां नेतः। ब्रह्माणः ब्राह्मणा
ऋत्विजः यज्ञैर्निमित्तभूतैस्त्वां पुनः समिंधतां। घृतेन तुष्टः सन् तन्वं शरीरं वर्द्धयस्व ततस्त्वयि तुष्टे
अमोघाः सति यजमानस्य कामाः सत्याः संतु॥ इति तृतीयोनुवाकः॥ तृतीयेनुवाके वह्नेरुख्यस्य चयनदे
शप्रतिनयनमुक्तं। अथ चतुर्थे गार्हपत्यचयनमुच्यते॥ का०॥ पालाशान्नाख्याया गार्हपत्यसंव्यूह

आक्रोशाती सर्थः वः अन्य

स्यपेतवीतेतीति। पं०। लाङ्गारवया गार्हपत्यस्थानव्यूहनं संमार्जनं कुर्यात्॥ पाठस्तु॥ अपेतवीत० लो॥ हे सर्पाः इति क्वा
कमस्मादिति। यमस्य सर्वलोकाधिपत्वात्तत्संस्थाः पृथिव्यां सर्वत्र वर्त्तते हे यमदूताः अत्र देवयजन ध्यांतरं=
स्थाने पुरातना ये चास्य स्थले नूतना ये च यत्र स्थिते सर्वे ऽप्यपेत अस्मात् स्थानादपगच्छत वीत असंतवि
दूरं गच्छत विसर्पत च अतोऽस्मात् स्थानादपेत्य संघातं परित्यज्य विविधं गच्छत यमः पृथिव्याः इदमव
सानं स्थानमस्मै प्रयमदात्। पितरश्चास्मै यजमानाय इमं लोकं अकरन् तद्वयनस्थानं दत्तवन्तः॥
का०॥ ऊषौ निवपति संज्ञानमितीति। ऊषरप्रदेशस्थान् पांसून् गार्हपत्यस्थाने वपेत्॥ पाठस्तु॥
संज्ञानमसि० त्वयादिति। हे ऊष त्वं स्वरूपत्वं संज्ञानं पशुसंबंधि सम्यक् ज्ञानमसि। पशवो ह्यप्रा
गेन सम्यग्जानाति भ्रूषरप्रदेशं लिहंति तथा कामधारणमसि यदमनुष्याय ह्यीयमासीत्तदस्या
मदधात् ऊषवाञ्चनवन्निति श्रुसंतरेयं हियांत्र खेनोक्तत्वाद्यद्द्वारा कामानां धारकमसि अतस्ते
तवयत्कामधरणसामर्थ्यं तन्मयि स्यात्॥ का०॥ सिकताश्चाग्नेर्भस्मेतीति॥ पाठस्तु॥ अग्नेर्भस्मा २५०
स्यग्नेः पुरीषमसीति। हे सिकताः स्वरूपसमग्नेर्भस्म। तासकमसि सिकता धारीषधिनिरतिती
२५० क्ष्णोत्र वतितथात्वमग्नेरवस्थामायपुरीषमसि पांशुरूपमसि॥ का०॥ परिश्रिद्भिः परिश्रयति वि

मध्येऽष्टकतीश्च तस्रो दक्षिणोत्तराः प्राचीरुपदधाति दक्षिणतउदञ्चयं सो अग्निरिति प्रस्तं चमितीति। गार्हपत्यस्य मध्यदेशे
दक्षिणमारभ्योत्तरापवर्गाः प्राग्ग्राश्च तस्र इष्टकाः दक्षिणतस्थित्वोदङ्मुखः सन्नयं सइत्यादिचतसृभिर्ऋग्भिः क्रमेणोपदध्यात्
तत्र प्रथमा।
तस्येतीति। परिश्रयणसाधनाभिः शार्कराभिः प्रसारयेत्॥ पाठस्तु॥ चितस्थ परिचित ऊर्ध्वचितश्रय
ध्वमिति। चीयं तेऽस्मौ प्रक्षिप्यं त इति चितिः हे शार्कराः यूयं चितिस्थ तस्मौ प्रक्षिप्तास्त्वथ। परिचितिः परितः प्रक्षि
सार्थ
प्ताः ऊर्द्ध्वचितिः सिकतानामूर्ध्वं प्रक्षिप्ताः तादृशा यूयं श्रयध्वं इदं गार्हपत्यायतनं सेवध्वं॥ का०॥ चत
स्रोदक्षिणोत्तरोः प्राचीरुपदधाति दक्षिणतउदयं सो अग्निरिति प्रस्तं चमिति। गार्हपत्यस्य मध्यप्रदे
श्रोदक्षिणमारभ्य उत्तरापवर्गाः प्राग्ग्राश्च तस्र इष्टकाद्दक्षिणतः स्थित्वाउदङ्मुखः सन्नयं सो
अग्निरित्यादिभिश्चतसृभिर्ऋग्भिः क्रमेणोपदध्यात्॥ तत्र प्रथमा॥ ॐ अयं सो अग्नि० जातवेद इति।
यस्मिन् गार्हपत्ये वतिरूपेऽग्नौ सतिवावकृतान. काम्यमान इंद्रः सुतमभिषुतं सोमं जठरे दधे स्वोदरे धार
यतिसताहूश्रायमग्निरिदानीमिष्टकाभिश्चीयत इति शेषः। हे जातवेदोऽग्ने त्वं अ संततसर्पि सततमन
कुशलमश्वमिवसहस्रियं सहस्रसंख्याकेन धनेन संमितं वाजमन्नं स सवान् दत्तवान् त्वयजमानेस्त
ध यसे॥ ॐ द्वितीया॥ अग्नेयत्ते दिवि० त्वक्षा इति। यत्तत्र यज्ञनिष्पादके ष्टकारूपाग्ने ते तव यद्वर्चस्तेजो
दिवि द्युलोके सूर्यरूपेण वर्त्तते पृथिव्यां वन्हिज्वालारूपेण वर्त्तते तथा यत्तेज ओषधीषु परिपाकत्वा
कारेण वर्त्तते अप्सु वडवानलरूपेण वर्त्तते। येन त्वदीयवर्चसा विद्युद्रूपेणोरु विस्तीर्णमन्तरिक्षमात

तं यसर्वा। तो विस्तारितवानसि प्रकाशितवानसीत्यर्थः। त्वं बोधी मीमांसत्व दीप्यवर्चः समर्हो ऽनुकुर्ना

सकः अर्णवः समुद्र इव विस्तीर्णः त्वं चक्षा मनुष्यान्प्रख्यापयिता तथाविधं तेजोरूपामिष्टकामुप

दधामीतिशेषः॥ अथ तृतीया॥ अग्ने दिवो अर्ण॰ आपइति। हे इष्टकारूपाग्ने दिवः सकाशादर्ण

उदकं त्वमभिमुख्येन जिगासि प्राप्नोषि यागद्वारेण वृष्टिं संपादयसीत्यर्थः। ये देवा धिष्ण्या धा

रास्तान्देवानच्छाभिमुख्येन जुचिषे हविः स्वीकुरुते तद्रूपे त्वय्यग्नौ या हुता या आहूतास्ते देवा भाग

स्य हविः स्वीकरिष्यंतीत्यर्थः। सूर्यस्य देवस्य रोचने दीप्तिरूपे मंडले सन्ति या आपः परस्तादूर्ध्वदे

शउपतिष्ठंते वर्त्तते याश्चावस्तादधोभागे वर्त्तंते ताः सर्वास्त्वय्युपहिता याभिर्हृगामेध्यंतीतिशेषः।

॥अथ चतुर्थी॥ पुरीष्यासो॰ महीति। एते अग्नयः इष्टकारूपा अस्मदीयमिमं यज्ञं जुषंतां सेवं

तां कीदृशा अग्नयः पुरीष्यासः पुरीषेभूरूपा समृद्धे ... प्रावणेभिः प्रकर्षेण संभजननशीलैः

मनोभिः सजोषसः परस्परं समानप्रीतयः अद्रुहो हिंसारहिताः अनमीवा रोगरहिताः इषो

नीष्टप्राप्तिहेतवः महीः प्रौढाः तथाविधाग्निरूपा इष्टका उपदधामीतिशेषः॥ का॰॥ इडामग्न इ

ति पश्चिमे प्रतिमंत्रमुत्तरत इति। स्वयमुत्तरतः स्थिता गार्हपत्यस्य पश्चिमभागे इडामग्न इत्यंते

२५१   २५१

पयोधस्तादिकमिति ताध्यांतरं =

बहुकर्मसाधनीस्त्वं वा

योनिरिसेताभ्यां द्वाभ्यां त्र्यग्र्यां द्वे इष्टके उपदध्यादितिशेषः॥ तत्र प्रथमायाः पाठस्तु॥ इडामग्ने॰ त्वस्मे

इति। हे अग्ने हवमानाय संस्थेहि तुं भव त्वामयजमानाय गोः सनिं गवां प्रदइडां दातारं धोसोसंचादय।

कीदृशां दातारं इडां सर्वैरीड्यं प्रश्नसनीं यं पुरुदंसं त्रयांसनीयं पुरुदंसं बहुधादइति। यं इत्यं तनमसं

त ममथिबदे नवर्त्तमानं किंच तत्प्रसादान्नोस्माकं सूनुः स्यात्पुत्रो भवतु। कीदृशः तनयः औरस इत्यर्थः। पुत्रसा

मान्यस्य सूनुशब्देनोक्तत्वाद्दत्तपुत्रादिव्यावृत्तये विशेषविवक्षया तनयशब्दः प्रयुज्यते विजावा विधि

चानां प्रजानां जनयिता हे अग्ने ते तव सा सुमतिः तथाविधा अनुग्रहबुद्धिः अस्मे भूतु अस्मासु भवतु॥

अथ द्वितीयायाः पाठः॥ अयं ते योनि॰ रयिमिति। हे अग्ने अयं मिष्टकारूपः पदार्थः ते तव योनिरूसन्ति

हि ऋत्वियः ऋतुकालीनस्त्रीपुरुषसंगमइव यतो यो न जातउत्पन्नस्त्वं अरोचथाः दीप्यमानोसि।

तं तथाविधं योनिं जानन्नवगच्छन्नाहरोह आरोह। अथानंतरं नोस्माकं रयिं धनं वर्द्धय॥ का॰॥ चि

दसीति पूर्वे दक्षिणः प्रतिमंत्रमिति। दक्षिणतस्थिता पूर्वभागे चिदसीति मंत्रद्वयेन इष्टके उपदध्या

त्॥ तत्र प्रथममंत्रपाठस्तु॥ चिदसि॰ सीदेति। तोगंभ्चिनोति संपादयतीति चित्। हे इष्टके त्वं चिदसि या

देवता त्वामभिमन्यते तया देवतयानुगृहीता सती त्वं ध्रुवा स्थिरा सती त्वासीदेति तत्र दृष्टांतः अंगिरस्व
तु अंगिरसो ऽग्निरूपं कृत्वा इष्टकायथा ध्रुवा भवति तद्वत्॥ अथ द्वितीयः॥ परिचिदसि० सीदेति। पञ्चितानी
गांश्चित्रेत्रो तिसः पादयती ति परिचितः॥ कात्यायनः॥ तिसः पुत्रो कं पृणसुमं ओदशासुवेति। अत्र मंत्र इत्येत लोकं
पृणसंज्ञका अस्य इत्येत मंत्र द्वयस्य प्रतीके। लोकं पृणसंज्ञका इष्टका दश इष्टका॥ तासामुपधानकाले एतन्मंत्रद्वयं
प्रयोक्तव्यं॥ तत्रायं प्रथमः॥ लोकं पृण छिद्रं पृ० असीषदग्निमिति हे इष्टके लोकं गार्हपत्यचयनार्थमदेशे पूर्वेषां अभि
रिष्टकाभिरनाक्रांतमविशिष्टं स्थानं पृण पूरय। तथा छिद्रं पृण केचिदपि छिद्रं यथा न दृश्यते तथा पूरय प्र
संतं संश्लिष्टं भवेत्यर्थः। अथो अपि च धर्मनीदद्द्वा सती सीदा वति इंद्र इंद्राग्नी बृहस्पतिश्चैते देवा अस्मिन्या
नौ स्थाने त्वामसीषदन्सादितवंतः॥ अथ द्वितीयः॥ ता अस्य सूददो० रोचने दिव इति। दिवो रोचने स्वर्गस्य
प्रकाशके अस्य यजमानस्य जन्मनि जन्मनि निमित्तभूते सति देवानां संबंधिन्यो विशः प्रजारूपाः पृश्नयो ऽल्प
गोसदृशाः सूददोहसो ऽत्र स्य रोहयि अस्या इष्टका त्रिषु प्रातःसवनादिषु सवनेषु आसमंतात् सोमं श्रीणंति
पक्वं कुर्वंति॥ कात्यायनः॥ त्वा सा ऽ दे शास्तु रीषं निवपनी इतिश्चादत्ती ति। त्वात्वाले देशात् शुष्कं पांशु मादाय
स्मिन्गार्हपत्यचयने निवपेत्॥ पाठस्तु॥ इंद्रं विश्वा० सात्पतिमिति। विश्वाः सर्वा गिरो ऽस्मदीयाः स्तुतय इंद्र
मवीवृधन्वर्धितवंतः कीदृशमिंद्रं समुद्रव्यचसं समुद्रवद्यापनवंतं रथीनां रथयुक्तानां योद्धॄणां मध्ये रथी
तममतिशयेन रथयुक्तं वाजानामन्नानां पतिं स्वामिनं सत्पतिं सन्मार्गवर्तिनां पालकं॥ का०॥ उख्यं नि
वपति समितमितीति। समितमित्यादि मिश्चत स्र्चिनेकिस्तस्मिन्गार्हपत्यचयने उख्याग्निं निवपे
त्॥ तत्र प्रथमायाः पाठस्तु॥ समितं ॥ सं कल्पेथां० संवसाथामिति। यदिदं गार्हपत्यं चयनमग्निहितं
तस्मिन्नुख्याग्निनिवपनवेलायां द्वावग्नी संपद्येते पूर्वसिद्धो ऽग्निरेकः उख्यो ऽग्निरपरस्ताबुभौ संबोध्ये
दमुच्यते। हे अग्नी युवां मुतौ समितं संगतौ भवतं संगत्य च संकल्पेथां सम्यग्यज्ञस्य कल्पनं निष्पादनं
कुरुतं कीदृशौ युवां संप्रियौ सम्यक्परस्परं प्रीतियुक्तौ रोचिष्णू दीप्यमानौ सुमनस्यमानौ परस्परं सौ
मनस्यं प्राप्तौ इषमन्नमूर्जं रसं चाभि संवसानौ अभितः सम्यक्संपादयंतौ॥ अथ द्वितीया०॥ सं वां म
नांसि सं० धेहीति। हे पूर्वोक्तावग्नी वां युवयोर्मनांसि मनो जन्यान्संकल्पान्समाकरं सर्वतः संगतानि क रिष्या
मि। तथा व्रतानि कर्माणि समाकरं अध्याचितानि कर्मविषयज्ञानानि समाकरं सम्यक्संगतानि करिष्या
मि। हे पुरीष्य पांशुयुक्ताग्ने ... मिलितौ तयस्वरूपेना अस्माकमधिपाऽव अधिकं पालयिता भवताद्

न्तास्त्वं यजमानाय इषमन्नमूर्जं सैरेव धेहि देहि ।। अथ तृतीया० ।। अग्ने त्वं पुरीष्यो० सद इति । हे अग्ने ह्यात्म
कत्वं पुरीष्यः पुरीषार्हः पांशुयुक्तः रयिमान् धनवान् पुष्टिमान् असि सर्वा दिशः शिवाः शांताः कृत्वा इह अस्मिं
श्चयने स्वं योनिं स्वकीयं स्थानमासदः प्राप्नुहि ।। अथ चतुर्थी ।। भवतन्नः० मघन इति । योग्निः पुरातनो य
श्चोख्यस्तौ युवां नो अस्मदर्थं समनसौ मनसा सहितौ सचेतसौ परस्परं समानचित्तयुक्तौ अन्योन्यविषये म
नः पृष्ठस्य अस्मदनुग्रहाभिमुखत्वं समनस्त्वं तस्मिन्ननुग्रहे परस्परप्रतिपत्तिराहित्यं सचेतस्त्वं
अरेपसौ पापरहितौ अस्मद्विषये प्रमादिकेनापराधेनापि कोपाभावः पापराहित्यं भवतं यथोक्तगुणयुक्तौ यु
वां इति वतं पापराहित्यमेव स्पष्टीक्रियते मा यज्ञं मा हिंसिष्टं अस्मदीयं कर्म मा विनाशयतं हे जातवेदसौ
युवां अग्नी युवां अद्य अस्मिन्ननुष्ठानदिने नो अस्मदर्थं शिवौ शंतौ भवतं ।। का स्या० ।। मातेव पुत्रमिति । इष्का स्वा
द्वे मुच्येति । उख्या अभिसनुवर्त्तते ।। पाठस्तु ।। मातेव पुत्रं० विमुंचत्विति । यथा लोके माता पुत्रं बिभर्ति तथा पृ २५३ ।।
थिवी स्वेयं उख्या स्वे योनौ स्वकीयगर्भस्थाने पुरीष्यमेतमग्निं अजाः अजार्षीत् धारितवती इत्यर्थः प्र
२५३ म पुरुषस्य स्वरूपं बिभर्ति तामुख्यां प्रजापतिर्विमुंचतु शिक्यपाशान्मुक्तां करोतु । कीदृशः प्रजापतिः वि
श्वेदेवैः ऋतुभिः संविदानः ऐकमत्यं गतः विश्वसृष्टिरूपं कर्म यस्यासौ विश्वाकर्मा ।। इति चतुर्थोनुवाकः ।।

चतुर्थेनुवाके गार्हपत्यचयनमुक्तं । अथ पंचम आहवनीयचयनार्थं भुवः कर्षणमुच्यते ।। का० ।। अनुपस्पृश्य पूर्वसत्रशेषः =
असुन्वंतमिति प्रसव्यमिति । तुषाग्निना प्रदग्धाः कृष्णवर्णा निर्ऋतिदेवका स्तिस्र इष्टका नैर्ऋत्यदेशे अ
सुन्वंतमिति त्वं चेनोपदध्यात् ।। तत्र प्रथमायाः पाठः ।। असुन्वंतं० तुभ्यमस्त्विति । हे निर्ऋते देवि यः सो
मयागं न करोति यश्च हविर्यज्ञान् करोति तं तादृशं असुन्वंतं अयजमानं च इच्छ इच्छ किंच यः स्तेनः प्रसृ
तचोरः यश्च तस्करः प्रकटचोरः तयोरित्यां गतिं अन्विहि अनुगच्छ एषा ते गतिः तावपि गृहाण इत्यर्थः । स
र्वथा सोमं सुन्वत्स्यो हविर्यज्ञेष्वयष्टृभ्यो अस्मदन्यमिच्छ न त्वस्मानिच्छ सा ते दुष्टशिक्षा तव इत्यागतिः श्रया
एवं कृतायास्ते तुभ्यं नमोस्तु ।। अथ द्वितीया० ।। नमः सु ते० हये न भिंत्ति । हे निर्ऋते दक्षिणपश्चिमभय्यम
स्थितावांतरदिगभिमानिदेवि ते तिग्मं तीक्ष्णं तेजो यस्याः सा तिग्मतेजाः तस्याः संबोधनं हे तिग्म
तेजः ते तुभ्यं सु सुष्ठु नमोस्तु । अयस्मयं अयो निर्मितं बंधं खलां विचृत एतं बंधं स्वर्गप्राप्ति प्रति बंधकं भि
चतीछेदने = मं पाप्मानं विचृत्य तं विनाशय । ततः स्त्वं यमेन ... यम्या च पृथिव्या च संविदाने कमत्यं गता सती एनं य
जमानं उत्तमे नाके सर्वसुखोपेते दुःखमात्ररहिते स्वर्गे अधिरोहय स्थापय ।। अथ तृतीया० ।। यस्यास्ते०

विश्वतइति। हे घोरे क्रूररूपे निर्ऋति देवि यस्यास्ते तव आसन् आसनि आस्ये मुखे जुहोमि। आहुतिं वदि
ष्टकामुपधाभिः किमर्थं बंधानां यजमानस्य परलोकप्राप्तिबंधकानामेषां पाप्मनामेव सर्जनाय विनाशा
र्थं यो लोकजनो जंतुमात्ररूपः शास्त्रसंस्काररहितो भूमिरिति प्रमंदते स्तौति त्वाभिर्निर्ऋति देवीति। अहं तु
शास्त्राभिज्ञस्तया तादृशीं त्वां विश्वतः सर्वथापि निर्ऋतिमेव परिवेद सम्यग्जानामि। तत्र तावन्निर्ऋति
रित्येतद्देवताया नामधेयं अवयवार्थश्चैवं व्युत्पादनीयः। सर्वदेवसाधारणाद्देवयजनान्निरूष्यस्व
तंत्रे देशे निर्ऋतिः प्राप्तिर्यस्याः सा निर्ऋतिस्तदिदं प्रकारद्वयमभिप्रेत्य विश्वत इत्युक्तं॥ का०॥ अश्रि स्वरू
वमपात्रो द्वासंदीः परेणास्यातियं तदितीति शिक्यादीन्यक्षिपेत्॥ पाठस्तु॥ यं ते देवी० प्रस्तुतइति। हे य
जमानने तव ग्रीवासु ग्रीवायाः संबंधिषु प्रदेशविशेषेषु यं पाशं निर्ऋतिर्देवी आबबंध आसमंताद्ब
द्धवती कीदृशं पाशं अविच्छसंधिनाशयितुमशक्यं दृढमित्यर्थः। तत्त्वदीयं ग्रीवास्थं तं पाशं विष्यामि वि
मोचयामि तद्वद्विमोचनं त्वदीयस्यायुषो मध्यादारभ्य न तु वति किं तु अस्ते प्यायुषि अथ पाशविमोका
नांतरं प्रस्तुतोऽस्यनुज्ञातस्त्वं एतं पितुं एतदन्नमद्धि मक्षय॥ का०॥ उत्तिष्ठति नमो भूत्या इतीति। उत्थानं
कुर्युः॥ पाठस्तु॥ नमो भूत्यै येदं चकारेति। या देवी इदमग्निलक्षणं कर्म चकार कृतवती। तस्यै भूत्यै श्रीरूपि

ण्यै दैव्यै नमोस्तु॥ का०॥ शालाद्वार्येपि स्थानं निवेशन इतीति॥ पाठस्तु॥ निवेशनः संगमनो० पृथ्वीनामीति।
अयमग्निर्निवेशनः यजमानानां स्वगृहे निवेशयिता वसूनां संगमनः प्रजापशुरूपाणां द्रव्याणां प्रापकः ता
दृशः सन् शचीभिः स्वकीयाभिः शक्तिभिर्विश्वास्वरूपा सर्वाणि रूपाणि अभिचष्टे सर्वतः ख्यापयति। तत्र
दृष्टांतः सविता देव इव यथा सूर्यः सर्वाणि रूपाणि प्रकाशयति तद्वत्। कीदृशोग्निः सत्यधर्मा सत्योवश्यं
भाविफलोपेतो धर्मोग्निहोत्रादिलक्षणो यस्यासौ सत्यधर्मा इंद्रः परमैश्वर्यवान् अतएव पथीनां स्समरे
न तस्योपरि पंथिनां शत्रूणां युद्धे स्वयमागत्य न तिष्ठति किं तु स्वकीयनामग्रहणमात्रेण ते पलायंते तद्वत्त
र्थः॥ का कुर्वा॥ का०॥ नियुज्यमानमभिमंत्रयते सीरायुंजंतीति। बलीवर्दैः सह नियुज्यमानं लांगलं
सीरायुंजंतीत्यादिमं ऋचद्वयेनाभिमंत्रयेत्॥ तत्र प्रथममंत्रपाठस्तु॥ सीरायुंजंति० सुम्नयेति। कवयः कृषि
कर्माभिज्ञाः सीराः सीरं लांगलं युंजंति सज्जीकुर्वंतु। तथा युगा सुखदा दशा कक्ष्माविश्लेषेष्वपेक्षितानि
युगानि वितन्वते। एकैकं विस्तारयंतु कीदृशाः कवयः धीरा धैर्ययुक्ता अनलसा इत्यर्थः तथा देवेषु
देवताविषयेषु सुम्नया सुम्नं सुखमिच्छंतीति सुम्नायवः॥ अथ द्वितीयः॥ युनक्त सीरा० मेयादिति। हे
कर्षकाः सीरा युनक्त लांगलं योजयत। युगा वितनुध्वं युगानि विस्तारयत। कृते कर्षणेन संस्कृते इहा

गिरा च श्रुष्टिः सभरा असदिति वाग्वै गिरन्नं श्रुष्टिरिति शतपथश्रुतेः =

स्मिन्योनौ क्षेत्रस्थाने बीजं व्रीह्यादिकं वपत किंच तद्बीजं गिरा आशीर्वादरूपेण मंगलवाक्येन युक्तमिति शे
षः श्रुष्टिस्तत्र निष्पन्नस्तंबः नोस्मदर्थं सभरा असत् फलभारयुक्तोस्तु पक्वं फलं नेदीय इत् अंतिक
तममेव अल्पकाले निष्पाद्यमेव सत् सृण्यः सृण्या लवनसाधनेन दात्रेण लूनं सत् आ इयात्। अस्मत्स
मीपमागच्छतु ॥ का० ॥ कर्षति शुनं सुफाला इति प्रस्तरमिति। शुनं सुफाला इत्यादि त्रिष्टुब्तस्तुतिर्कृ
षिः कर्षणं कुर्यात् ॥ तत्र प्रथमा॥ शुनं सुफाला० मस्मे इति। सुफालाः शोभनफला विदारणे शोभनं फालं अ
धिरोपणमाकर्षणं येषां ते सुफलाः कीनाशाः कर्षकाः भूमिं शुनं सुखं यथा भवति तथा विकृषंतु कर्षणं कु
र्वंतु। कीदृशाः कर्षका वाहैर्बलीवर्दैः सह शुनं सुखं यथा भवति तथा अभियंतु अभितः प्रवर्तंतां। हे शुना
सीरा शुनो वायुः सीरः आदित्यः तौ युवामेवं क्षेत्रे कृषे सति। हविषा उदकेन तोशमानौ तोशमानौ तोशतिर्वधकर्मा
भिं निघ्नंतौ सुपिप्पलाः शोभनफलोपेता ओषधीः अस्मे अस्मभ्यं कर्तं कुरुतं बीजावापं कुरुतमित्य
र्थः ॥ अथ द्वितीया॥ घृतेन सीता० वर्त्स्वेति। इयं सीता लांगलपद्धतिर्मधुना मधुरेण घृतेन उदकेन २५५
समज्यतां संसिच्यतां। अत एव सा सीता विश्वैर्देवैर्मरुद्भिश्चानुमता समीचीनेयमित्यंगीकृता सा पु
नरूर्जस्वती रसवती पयसा पिन्वमाना जलेनाप्यायिता वर्त्तते हे सीते त्वं जलेनाप्यायिता अस्मान्प्र
विरणव्यसयस्मद्दसः =

लिंगव्यत्ययः सृण्यर्हमित्यर्थः

२५५

तस्मिन्यजमानरूपायां भूमौ सरू सरणशीलं। एतत्कर्षणेन फलाधिक्ये सति गवादिबाहुल्यप्रसा
रणं यजमानः ~

सम्यावर्तस्व अभित आवर्तस्व। अभित आवर्तताम्॥ अथ तृतीया॥ लांगलं पवीरव० हणमिति। इदं लां
गलं उद्वपति शुद्धतानि प्रौढलोष्ठानि यथा भवंति तथा कर्षणं कुर्यादित्यर्थः। कीदृशं लांगलं पवीरवत्
वज्रवत्तीक्ष्णोपांतं सुशेवं कर्षकैः सुष्ठु सेवितुं शक्यं अतितीक्ष्णत्वेन सहसा भूमिभेदात् कर्षकाणां नास्ति त्रीधं
प्रयास इत्यर्थः। सोमपित्सरु सोमं पिबतीति सोमपा यजमानः प्राप्नोति इति शेषः। तत्र गोरथिरिव सु
ज्यं प्रसिद्धं प्रफर्वी प्रथमवयस्का कन्या पीवरी पुष्टांगी प्रस्थावत् प्रयाणसमर्थं रथवाहणं रथं वोढुं
योग्यमश्वादिकं यदा हि कृषिः समृद्धा भवति तदानीमेतत्सर्वं यजमानस्य सुलभं ॥ अथ चतुर्थी॥ का
मं कामदुघे० ओषधी स्विदिति। काम्यंत इति कामा भोगास्तान्कामान्दोग्धि संपादयतीति कामदुघा लांगलपद्धतिः
हे कामदुघे मित्रादीनामोषध्यं तानां कामम् अपेक्षितं भोगं धुक्ष्व संपादय॥ का०॥ अनडुहो विमुच्य विमुच्यध्व
मिती ति। बलीवर्दान्विसर्जेत्॥ पाठस्तु॥ विमुच्यध्वं० पामेति। हे अघ्न्या अहंतव्या गावो बलीवर्दा यूयं वि
मुच्यध्वं युगाद्विनिर्मुक्ता भवत देवयाना देवतार्थं कर्मकारिणो यूयं अस्य क्रियात्मकस्य तमसः पारं तीरं वयं गन्म
पारं गताः स्म इति संदध्व इति शेषः। अतो वयं ज्योतिः सुखात्मकं जलं कयस्न लक्षणं आपाम प्राप्नवंतः॥ का०॥ आस्त्युगन्मो

तद्देवेभ्यः प्रीतेभ्यः स्त कार्याद्दितिवा =

अग्निर्जुहोति सजूरब्द इत्यनीति। कुत्रासंवेज्जुहुयात्॥पाठस्तु॥सजूरब्दो॰ स्वाहेति। अयवोभिरित्यनेन पदे
नमासाश्चार्द्धमासाश्चोच्यंते तेरब्दः संवत्सरः सजूः समानप्रीतियुक्तो भवत्विति शेषः। तथा उषाः अ
रुणीभिः अरुणवर्णाभिः कांतिभिः सजूः समानप्रीतियुक्ता। तथाश्विना अश्विनौ देवौ दंसोभिः क
र्मभिः सजोषसौ समानप्रीतियुक्तौ भवतां तथा सूर्य आदित्य एतशेन एतन्नाम्नाश्वेन वा समा
नप्रीतियुक्तः तथा वैश्वानरोग्निः इडया अन्नरूपेण हविषा सजूः समानप्रीतियुक्तो भवतु। एवंविधे
भ्यः सर्वेभ्यो देवेभ्यः घृतेनाहुतिरूपेण क्षरणरूपेणानेन स्वाहा सुहुतमस्तु॥इति पंचमोनुवाकः॥
पंचमेनुवाके ध्रुवः कर्षणमुक्तं। षष्ठे ओषधीवापोभिधीयते॥का॰॥या ओषधीरिति पंच त्वेवैर्वपतीति।
या ओषधीरित्यादिभिः पंचदशसंख्याकाभिर्ऋग्भिः पंच त्वानि संपद्यंते। तैस्त्वैः सर्वा ओषधी
र्निर्वपेत्। तत्रेयं प्रथमा॥या ओषधीः पूर्वा॰ सप्त चेति। युगशब्दः कालवाची। त्रियुगं वर्षा शरद्वसंत
इति कालत्रयमुद्दिश्य पुरा सृष्ट्यादौ देवेभ्यः सकाशाद्या ओषधयः पूर्वाः प्रथमा जाता उत्पन्नाः ब
भ्रूणां प्राणिभरणसमर्थानां परिपाके न पिंगलवर्णानां वा। तासामोषधीनां शतं धामानि शतसंख्या
कानि धामानि भेदान् सप्त च विविधोषाकारेण ग्राम्यानारण्यांश्च सप्त धान्यभेदान् अहं मन्ये जानामि॥

प्रातःकालाभिमानिनी=

२५६

२५६

अथ द्वितीया॰॥शतं वो अंब॰ रुहतीतिति। हे अंब मातृस्थानीया ओषधयः वो युष्माकं धामानि जातिभेदाः शते
ष्वणि वा शतं संति उत अपि च वो युष्माकं रुहः प्ररोहाः अंकुराश्च सहस्रं संति शतं सहस्रमित्याभ्यामपरिमित
त्वमुपलक्ष्यते अथा अथैवं बहुभेदोपेतत्वे सति शतसंख्याकाः क्रतवो याभिर्युष्माभिर्निष्पाद्यंते ता हद्रयः
शतक्रत्वो यूयं मे मदीयमिमं यजमानं अगदं कृत। क्षुत्पिपासादिरोगरहितं कुरु॥अथ तृतीया॰॥ओषधीः
प्रतिगृह्णीत॰ धिष्व इति। ओषधीः प्रतिगृह्णीत यूयं प्रतिगृहीत कीदृश्यः पुष्पवतीः पुष्परूपेताः प्रसू
वरीः फलप्रसववतीः अश्वा इव सजित्वरीः संग्रामे यथाश्वा जयशीलाः तद्वत्सलपर्यंतत्वा जयशी
लाः वीरुधो लतारूपाः पारयिष्णवः फलपाकांतत्वपरिसमाप्त्यपारं बहुसंवत्सरावसानं प्राप्नुं शीलं
यासां तास्तथाविधाः॥अथ चतुर्थी॥ओषधीरिति॰ पुरुषेति। हे मातरो मातृसमाना देवी दैव्यः इति श
ब्दोत्र हेत्वर्थे वर्तते यस्मादोषधीर्यूयमोषध्यः तस्माद्युष्मानुपब्रुवे प्रार्थये कथं प्रार्थनमिति तदुच्यते हे
पूरुष तव त्वदीयं सनेयं सह नेतव्यमश्वं त्वदीयं गां पुष्णुवासस्त्वदीयं वस्त्रं स्थानं वा आत्मानं त्व[illegible]
दीयं शरीरं एतत्सर्वमोषधयोभिवृद्धिं प्रापयंति सहमोषधीः प्रार्थये हे ओषधयो वो यूयं यजमा
नस्याश्वादिकमभिवृद्धिं प्रापयतेत्यर्थः॥अथ पंचमी॥अश्वत्थे वो॰ पूरुषमिति। हे ओषधिदेवता वो यु

हे ऋत्विजः।

यजमान

ष्माकमश्वत्थे निषदनं अश्वत्थवृक्षच्छायायामुपवेशनं स्थानं भवति। पर्णे पलाशवृक्षे वो युष्माकं वस
तिः कृता निवासकारणं गृहं कृतं देवताधिष्ठितला देवलोके अश्वत्थवृक्षः प्रदक्षिणनमस्कारादिभिः
पूज्यते पलाशवृक्षस्य ब्रह्मादिरूपेण इदं सर्वं यागोपयोगित्वं गोत्राजनत्वं भवदीयेन स्थावररूपेण भूमिभागे
एवं कृता असध इति किल स्थिता इतरलोके प्रसिद्धं तत्किमर्थमिति तदुच्यते। यस्मात्कारणात् पूरुषं इमं यज
मानं मनुष्यं सनवथ अन्नदानेन पोषयथा तस्मादिदं स्थावररूपेण स्थानमित्यर्थः॥ अथ षष्ठी॥ य
त्रौषधीः समग्मत॰ वचातनइति। अत्र अस्मिन्क्षेत्रे ओषधीरोषधयो यूयं समग्मत फलप्रदानाय
संगतास्थ। तत्र दृष्टांतः राजानः समिताइव यथा युद्धप्रतिपक्षिणः सेनां जेतुं परस्परमनुकूला
राजानः संगच्छते। एवं संगता यत्रौषधीषु विप्रः मेधावी सवीर्यविपाका भिज्ञोयः पुरुषः स भिषगु
च्यते। क्षुधादिरोगस्य चिकित्सक इत्यभिधीयते कथंभिषक्कमिति तदुच्यते। रक्षोहा पकारिता भि

२५७

रोषधीभिः पुरोचसंरक्षो रक्षसां हंता तदुपद्रवरूपं रोगं निवारयति अमीवचातनः ओ
षधीजन्यपथ्यादिभिरमीवान्रोगान्घातयति नाशयतीत्यमीवचातनः॥ अथ सप्तमी॥ अश्वावतीं
सोमा॰ तयइति। काचिदोषधीजातिरश्वावती अश्वा अस्यां संति सा अश्वावती छांदसो दीर्घः॥ ओष

२५७

धि समृद्धौ सत्यां धनद्वारेणाश्वा लभ्यंत इत्यर्थः। अन्या काचिदोषधिः सोमावती सोमयागोस्यामस्ती
ति सोमावती तस्यां सत्यां सोमयागः कर्तुं शक्यत इत्यर्थः। अपरा जातिरूर्जयंती दुर्बलं प्राणवंतं वा
करोतीत्यर्थः। अन्या जातिरुदोजा उत्कृष्टमोजो धातुरंगे यस्याः सा उदोजाः अन्नद्वारेण शरीरधातुबलं
पोषयतीत्यर्थः। ताः सर्वा ओषधीः अहं अवित्सि सर्वतो लब्धवानस्मि किमर्थं अस्मा अरिष्टतातये अ
रिष्टस्य भावः अरिष्टतातिः अस्य यजमानस्य हिंसाराहित्यायेत्यर्थः॥ अथाष्टमी॥ उच्छुष्मा ओषधी
नां॰ पूरुषेति। ओषधीनां शुष्माः तदुपयोगजन्यबलविशेषा उत्कृष्ट ईरते। उद्गच्छंति। तत्र दृष्टांतः।
गावो गोष्ठादिव। यथा गावः स्वनिवासस्थानात् गृहादरण्यदेशं प्रति उद्गच्छंति तद्वत्। कीदृशानामो
षधीनां हे पूरुष तव सदीयमात्मानं शरीरं प्रति धनं सनिष्यंतीनां धनं दातुमिच्छंतीनां॥ अथ नवमी॥
इष्कृतिर्नाम वो॰ निष्कृथेति। हे ओषधयो युष्माकं इष्कृतिर्नाम नकारलोपश्छांदसः। निष्कृतिर्निष्क्र
यणं क्षुधादिविनाशनं। क्षुधादिकं निवारयितुमेव हि जनवतीनामुत्पत्तिः अथो अपि चैवं सति
यूयं निष्कृतीस्थनिः कृतः क्षुधादिविनाशकाः स्थ सीराः क्षुधादीनामपसारयित्र्यः पतत्रिणीः
पतत्रं पतनं अस्मात्प्रसागमनं तेन गमनेनोपेताः स्थन भवथ यत् क्षुधादिकमामयति रोगवद्बाधते

॥ एवं मातामात्वदुसत्ति भिभिन्ने ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जीवो गच्छेतेयस्येति जीवगर्त्रः भत्संशोदसे =

तन्निष्कृधयिनाशयत॥ अथ दशमी॥ अतिविश्वाः ०रथइति। परिष्ठाः शरीरस्य परितः स्थिताउ
दरमध्ये प्रविष्टाः विश्वाः सर्वाः ओषधयः अति अजीर्णादिदोषमतिलंघ्य अक्रमुः क्रांता देहेव्या
माद सर्थः। तत्र दृष्टांतः स्तेन इव व्रजं यथा रात्रौ गुप्तचोरो गोष्ठं प्रविश्य गामपहर्तुं सावधानं गोत्रा
लायां सर्वतो व्याप्नोति तद्वत्तन्वः सैं शरीरस्य संबंधीय किं च रपः ज्वरशिरोव्यथा गुल्मातिसारादि
रूपं पापफलं यत्किंचिदस्ति तत्सर्वमोषधीरोषध्यः प्राचुच्यवुः विनाशितवत्यः॥ अथैकादशी॥ यदि
मा० यधेति। यद्यदा हं वाजयन्नन्नमिव इमा ओषधीर्हस्त आदधामि तदानीमेव यक्ष्मस्य क्षुद्रादि
रोगस्यात्मा स्वरूपं पुरा नश्यति। जनना स्नागेव नष्टमदृश्यं भवति तत्र दृष्टांतः यथा लोके जीवे
जीवस्य प्राप्तादेर्ग्रहणात्पुरा जीतःशंभुः कर्णाभ्यां नेत्रे पिधाय भूमिं संश्लिष्टोमृत इव तिष्ठति तद्व
॥ अथ द्वादशी॥ यस्यौषधीः प्रसर्पथ० मध्यमशीरिवेति। यस्य रोगिणः अंगमंगं सर्वाण्यंगानि परुष्परुः
सर्वः पर्व वचनः सर्वाणि पर्वाणि। हे ओषधीः ओषध्यो यूयं प्रसर्पथ प्रगच्छत यात ततोनंतरमे
व यक्ष्मं व्याधिं विबाधध्वे तस्मादंगपर्वसमुदायात् व्याध्यपगमं कुरुध्वं तत्र दृष्टांतः उग्र उग्रो मूर्ण
बलः क्षत्रियः मध्यमशीरिव मध्यमं मर्म नागं शृणाति विध्यति हिनस्तीति मध्यमशीर्मर्मघातकः

यक्ष्म उवनश्यति जातुः =

२५८

२५९

सन्नय यथा शत्रून् बाधते एवमोषधयो यूयमपि रोगिणो रोगं बाधध्वमिति सर्थः॥ अथ त्रयोदशी॥ साकं
यक्ष्म प्रपत० कृकेति। श्लेष्मावरुद्धकंठजन्यध्वनेरनुकरणार्थोयं किकिशब्दः। किकिना ध्वनिविशेषेण दीव्यति
व्यवहरतीति रोगविशेषः किकिदीविः सच श्लेष्मजन्यः चाषः कश्चित्पक्षिविशेषस्तद्वन्नीव्रत्वात्पित्तजन्यो
रोगश्चाषः। हे यक्ष्म राजयक्ष्मादिरोग त्वं श्लेष्मजन्येनापि च जन्येन च बाधेन साकं प्रपत प्रकर्षेण नष्टो
भव। तथा वातस्य ध्राज्या वातरोगस्य गत्या व्याध्या संहृतः प्रनष्टो भव ध्यायपापीडया निहतो स्मिहा क
व। ॥ अथ चतुर्दशी॥ अन्या वो० वचइति। हे ओष
धयो वो युष्माकं मध्ये अन्या काचिदोषधी व्यक्तिरन्यामितरामोषधिव्यक्तिं अवतु। तया रक्षितासा न्या अ
न्यामपरां रक्षितायाउपावत। समीपमागत्य तामप्यवतु संहृत्य काश्चिद्वा परस्पर रक्षकत्वमुचितं। ताःस
र्वास्तथाविधा ओषधयो यूयं संविदानाः परस्परमैकमत्यं गताः सत्यो मे मदीयमिदं वचो वाक्यं प्रार्थना
रूपं प्रावत प्रकर्षेण रक्षत॥ अथ पंचदशी॥ याः फलिनी० हसइति। या ओषधयः फलिनीः फलिन्यः
फलयुक्ता याश्चापफलाः फलरहिताः याश्चापुष्पाः पुष्परहिताः याश्च पुष्पिणीः पुष्पयुक्ताः ताः सर्वा बृह
स्पतिप्रसूताः बृहस्पतिना प्रेरिताः सत्यो नोस्मान् हसः पापात्मुंचंतु मोचयंतु। एवमोषधिभिर्वा बाधार्था

वचनव्यत्ययश्छं दसः॥ =

निपंचदश्चान्याम्नातानि। अथात्रैव विकल्पितानादत्तुर्वं आम्नायंते॥ अथ प्रथमः॥ मुंचंतु मा शपथ्या० त्वि
मादिति। शपथ्यात् शपथेत्वं शपथ्यं तस्मात् किल्बिषान्मा मोषध्यो मुंचंतु अथो अपि च वरुण्यात् वरुणे
न वंवरूण्यं तस्माद्वरुणापराधनिमित्तान्पापान्मां मुंचंतु। उतापि च यमस्य से बंधिनः पड्बीशात् ब्रेत्रवं
धनवाची बंधन निमित्तात्पापान्मां मुंचंतु। अथो अपि च सर्वस्माद्देवकिल्बिषाद्देवतापराधनिमित्तात्पा
पान्मां मुंचंतु॥ अथ द्वितीयः॥ अवपतीः ० पूरूष इति। द्युलोकात् सतं तो वृष्टिबिंदव ओषधीरूपेणोत्पद्यं
ते। तथा चैत्तिरीये अग्निहोत्र ब्राह्मणे समाम्नायते। यावंतस्तोका आप अवापद्यंते तावतीरोषधयो जायं
ते इति अतात्रापि दिवः परिस्वर्गस्योपरि तनप्रदेशादवपतीरवपतंः अधस्ताद्भूमौ पतंत्य ओषधयः स
मवदंत परस्परं संभाषगे तद्वचन मुक्त वत्यः कीदृशं वचनमिति तदुच्यते। यं जीवं प्राणिनमश्नवामहै ध्या
नु मः स पूरुषो न रिष्याति नैव विनश्यतीति॥ अथ तृतीया॥ या ओषधीः सोमराज्ञी० हृदयेति। सोमरा
ज्ञीः सोमो राजा यासां ताः सोमराज्ञ्यः बह्वीर्बह्व्यः शत विचक्षणाः शतं विविधं तं प्रोच्यंत इति शत विध
चक्षणा अनेक प्रकाराः एवं भूता या ओषधीरोषध्यः संति तासामोषधीनां मध्ये हे ओषधे उत्तमो
त्कृष्टा त्वं कामाय अरं अलं समर्थासि। ततो हृदे हृदयाय शं सुखकारिणी भवेति शेषः॥ अथ चतुर्थी॥

२५९

अरुः क्षतमुच्यते। पुरुषपाकः क्षतस्य नाशिनी। यद्वारुचदीप्तौ। अन्न पाकस्य रुचिरः पचोदरादित्वाच्चकार लोपः। मंदा
ग्निः तस्य नाशिनी स्यर्थ इति भाष्यांतरं =

या ओषधीः सोमराज्ञीः० वीर्यम्। पृथिवीमनु विष्ठिताः बृहस्पति प्रसूताः प्रेरिताः सोमराज्ञ्यो या ओषधयोः स्यंत्र अ
स्मै पत्थिव्यै वीर्यं सामर्थ्यं संदत्त सम्य क्प्रयच्छत॥ अथ पंचमी॥ याश्चेदमुप० वीर्यमिति। याश्चोषधिदेवता इदं
मदीयं प्रार्थनं समीपस्थाः सत्य उपश्रृण्वंति याश्चान्या ओषधिदेवता दूरं यथा त्कवतित थापरागताश्चव
हिताः सत्य इदं शृण्वंति हे वीरुधो लतास्पाः सर्वा ओषधयो यूयं संगत्य संगताः सत्यो अस्यै पृथिव्यै वीर्यं साम
र्थ्यं सम्यग्दत्त॥ अथ षष्ठी॥ नाशयित्री० नाशनीमि। हे ओषधे त्वं बलासस्य बलमस्यति क्षिपतीति बलासस्त
स्य अर्शसो नाशयित्री त्वं नाशयित्र्यसि किं च उपचितां शरीरे उपवीयंते न्येये रोगास्ते उपचितस्तेषा मपिना
शयित्र्यसि अथो अपि च शातस्य पद्माणां व्याधीनां नाशयित्री त्वमसि। पाकारोः क्षय व्याधेरपि
नाशिनी त्वमसि॥ अथ सप्तमी॥ मा वो रिषत्० तुरमिति। हे ओषधयो वो युष्माकं खनिता चिकित्सायै युष्मदी
यमूलं गृहीतुं खनन तस्य कर्त्ता मा रिषत् मा विनश्यतु। अहं च यस्मै रुग्णाय चिकित्सार्थं वः खनामि युष्मन्मू
लं गृहीतुं खननं करोमि सो ऽहमपि मा विनश्यामि। किं बहुना अस्माकं संबंधि द्विपच्चतुष्पद्वा प्राणिजातं युष्मा
नुपजीवति। तत्सर्वमनातुरं रोगरहितमस्तु॥ अथाष्टमी॥ ओषधयः सं० पारयामसीति। ओषधय ओषधि
देवताः स्वकीयेन स्वामिना सोमेन राज्ञा सह संवदंते संवादं कुर्वंति। कथं संवाद इत्युच्यते। यस्मै रुग्णाय चि

किंस्वामस्मदीयम्ऽत्वा दीना ब्राह्मणः कृणोति करोति हे राजन् तमालुरं पारयाम सिवयं पारयामः ॥ तं ब्रो चेरुत्तारयाम ॥ अथ नवमी ॥ त्वां गंधर्वा० इमुच्यते ति । हे ओषधे त्वां गंधर्वाः स्वापेक्षित कार्य सिध्यर्थं अखनन् खननं अकुर्वन् स्वामिंद्रेप्यखनत् तथा बृहस्पतिस्त्वां खनतु इति द्वानोषधिसामर्थ्यं ज्ञात्वा सोमो राजा त्वामखनत् अतस्त्वाम पन्नुज्य यक्ष्माद्रोगादमुच्यत मुक्तो भवतु ॥ दशमी ॥ त्वमुत्तमास्यो० सतीति । हे ओषधे त्वमुत्तमा

लतारूपे

उत्कृष्टासि तव वृक्षा उपस्तयः त्वदीयबाधापरिहाराय उपस्थिता भवंतु । योस्मानभिदासति अभिहंति स पुरुषो

दसुरुपस्ये २

स्माकं उपस्तिरस्तु । अस्मदुपद्रवपरिहारायोपस्थीतो भवतु ॥ इति षष्ठोनुवाकः ॥ षष्ठेनुवाके ओषधिवापो निरूपितः ॥ अथ सप्तमे लोकेष्टकोपधानादिमंत्रा उच्यंते ॥ का० ॥ मामाहिंसीदितिप्र त्यक्षं प्रतिदिशमिति । मामाहिंसीदित्यादिभिर्मंत्रैः पञ्चभिः पूर्वादिक्रमेण लोकेष्टकसंज्ञकाः लोकरूपा इष्टका उपदध्यादिति शेषः ॥ तत्र प्रथमः ॥ मामाहिंसीज्जनिता० विधेमेति । यः प्रजापतिः पृथिव्या जनिता उत्पादकः यो वा प्रजापतिः सत्यधर्मा अवितथधारणशक्तिः सन् दिवं द्युलोकं व्यानट् व्याप्तवान् पुनरपि यः प्रजापतिः प्रथमो मुख्यः सन् चंद्रा आह्लादकारिणीः अपः उदकानि जजान उत्पादयामास तादृशाय कस्मै प्रजापतये देवाय हविषा विधेम वयं परिचरेम । एवं भूतः प्रजापतिः मा मां माहिंसीत् हिंसां माकरोतु ॥ अथ द्वितीया ॥ अभ्यावर्त्तस्व० अरोह इति । हे पृथिवि यज्ञेन व्रीह्यादिना पयसा च तत्फलभूतेन सह अ

२६१

२६०

एतं पवित्रं यच्चाप्यन्यदंगं

अभ्यावर्त्तस्व । अस्मदभिमुखेन आगच्छ । इषितः इष्टवानग्निः ते वपां त्वदीयं वपासदृशमिमं प्रदेशं अरोहत् आरोहतु स्वीकरोतु ॥ अथ तृतीया ॥ अग्ने यत्ते शुक्रं० मसीति । हे अग्ने ते त्वदीयमंगं शुक्रं दीप्तिमत् यच्चान्यदंगं चंद्रमाह्लादकरं यदप्यन्यदंगं यज्ञियं यज्ञार्हं तत्सर्वं श्रेष्ठरूपं देवेभ्यो देवानामर्थे भरामसि संभारयामः

धारयामः ॥ अथ चतुर्थी ॥ इषमूर्जमहतन्त्विति । एतस्य यज्ञस्य योनिस्थानं महिषस्य महतोग्नेः धारणं च इषमन्नं ऊर्जं रसं च इतोस्मात्प्रदेशादहमादं स्वीकरोमि एतत्सर्वं मामां आविशतु । आगत्य प्रविशतु किंच तन्मम मदीयपुत्रादिशरीरेषु मदीयगोषु च आविशतु ॥ का० ॥ सिकताः प्रमार्ष्टि जहामि सेदिमिति तानि । तत्र स्थिता वालुकाः प्रमार्जयेत् ॥ पाठस्तु ॥ जहामि सेदिमभिरामममीवामिति । अभिरामन्नेसेदिमिति तानि । तत्र स्थिता वालुकाः प्रमार्जयेत् । जहामि सेदिं सिकतारूपां भूमिं जहामि परित्यजामि ॥ का० ॥ कुरुस्तं बेग्नेतवेति सिकताः हितामममीवां रोगयुक्तां सेदिं सिकतारूपां भूमिं जहामि परित्यजामि ॥ का० ॥ कुरुस्तं बेग्नेतवेति सिकता न्युप्येति । कुरुस्तं बे अग्ने तवेत्यादिभिः षड्भिः ऋग्भिः सिकताः प्रक्षिपेदित्यर्थः ॥ तत्र प्रथमा ॥ अग्ने तव० कवइति । वीयते प्राणिभिरत्र्यत इति वयोन्नं हे अग्ने तव श्रवः त्वदीयत्वेन श्रूयमाणं वयोन्नं महि महदस्ति । विभावादीप्तिरेव वसु धनं यस्यासौ विभावसुः हे विभावसो अर्चयस्तव दीप्तयो भ्राजंते दीप्यंते बृहतो तानवीरत्नमयो यस्यासौ बृहद्भानुः कविर्दिद्यान्य जमानानभिप्राय ज्ञः तादृशहे अग्ने दाशुषे हविर्दत्तवते

यजमानाय उरुष्यं उरुष्य रक्ष्य दुपेलं यज्ञस्योग्यं वाजमन्नं त्वावसा त्वदीयेन बलेन दध्यासि संपादयसि॥ अथ
द्वितीया॥ पावकवर्चाः० ऊने इति। पावकवर्चाः शोधकदीप्तिः शुक्रवर्चा निर्मलदीप्तिः अनूनवर्चाः इंदुरा
स्त्वं सूनुना पुत्रेण साउदियर्षि उत्कर्षेण गच्छसि कुले रोदसी द्यावापृथिव्यौ विचरन्त्य अग्निरनुपावासि समीपमागत्य
रक्षेसि पुत्रेण सिंचतयोः संपर्कमपि करोषि परिचरणे दृष्टांतः पुत्रो मातरं यथा लोके प्राप्नोति यमार्गेणानुदि
ष्टः पुत्रो माता पितरौ परिचरति तद्वत्॥ अथ तृतीया॥ ऊर्जो नपाज्जात० वेदा इति। ऊर्जो नपात् अपां नपाद् विना
प्राप्यता तादृशो हे जातवेदः धीतिभिर्हितः दीप्तिभिर्युक्तः सन् सुशस्तिभिः शोभनाभिः स्तुतिभिर्मंदस्व ह
न्हविर्प्सः नानारूपा यजमानाः त्वे त्वयि इषो हविर्लक्षणान्यन्नानि संदधुः संपादितवंतः इंद्रा
यजमानाः चित्रोतयः विचित्राः स्वयाकृता तुल्ययारक्षा येषां ते चित्रोतयः वामजाता वननीये संभजनीये
देवो कुले चोसन्ना॥ अथ चतुर्थी॥ इरज्यन्नग्ने० ऋतुमिति। हे अमर्त्य मरणरहिताग्ने त्वं ऋतुभिः पुरोडाशा
दिहविः प्रदैः प्राणिभिः इरज्यन् दीप्यमानः सन् अस्मे अस्मासु राधो धनानि प्रथयस्व विस्तारय स त्वं द
र्शतस्य वपुषो दर्शनीयस्य चित्स्याग्निरूपस्य शरीरस्य मध्ये विराजसि विशेषेण दीप्यसे सानसिं भ
दुविप्यदानार्हं क्रतुमस्मदीययज्ञं संपर्णक्षि परस्य पारंगमये सर्थः॥ अथ पंचमी॥ इष्कर्तार० रध्वरमिति। अध्व
दुकूशब्देनापृच्यते। नपाद् शब्देन पौत्रः कथ्यते। हे ऊर्जो नपात् अपां पौत्र अद्भ्य ओषधिवनस्पतयो जायंते। तास्य ओ
षधिवनस्पतिभ्यो ग्निर्जायत इति रिवमूर्जो नपादग्निरिति श्रुत्यभिप्राय इति भाष्यांतरं। ८

अनूनवर्चा इति

२६१

२६१

रस्य इष्कर्तारं निष्कर्तारं यज्ञस्य निष्पादकं प्रचेतसं प्रकृष्टचित्तयुक्तं क्षयं वं विप्रेष्टस्थाने निवसंतं यजमानं
म
वामस्य वननीयस्य हो महतो राधसो धनस्य रातिं करोषीति शेषः। किंच सुरणां सुष्ठु भजनीयां महीं मह
तीं इषमन्नं सानसिं संभजनीयं रयिं पश्वादि धनं च दध्यासि ददासि॥ अथ षष्ठी॥ ऋतावानं महिषं०
सुपीति। मानुषा जनाः मनुष्यजातियुक्ताः ऋत्विग्यजमानाः पुरः पूर्वस्मिन्काले युगा गिरायोग्यं
मानुषि सुपया वाचा सुम्नायि सुखार्थम् अग्निमत्र दधिरे स्थापितवंतः कीदृशमग्निं ऋतावानं सत्यवंतं
यज्ञवंतं वा महिषं महांतं विश्वदर्शतं सर्वतो दर्शनीयं घृतकर्णमिव तत्कर्णयद्धि हूयते तस्य समेव कर्णेनि
श्रुत्वा संपादयतीत्यर्थः स प्रथमं अतिशयेन प्रथा सहितं की। त्वमिमं तं तादृशं त्वामग्निं देवं देवेभ्यो हि
तं दधिरे इत्यन्वयः॥ का०॥ आप्यायस्वेति सिकताल्वं शनमृक्छामिति। पूर्वन्युप्ताः सिकता आप्याय
स्वसृता स्याम्रुच्यां संस्पृशेत्॥ तत्र प्रथमा॥ आप्यायस्व समे० संगथ इति। हे सोम त्वमाप्यायस्व
सर्वतो वर्द्धस्व ते तव वृष्ण्यं वीर्यं विश्वतः सर्वस्मात्समेतु संप्राप्नोतु। वाजस्यान्नस्य संगथे संगमने त्व
भिमित्ते भव॥ अथ द्वितीया॥ संते पयांसि० धिषेति। हे सोम ते तव पयांसि पातव्यानि क्षीरादीनि
समुयंतु संप्राप्नुवंतु। तथा वाजा अन्नान्यपि समुयंतु वृष्ण्यानि रेतांस्यपि संयंतु कीदृशस्य तव

सुपां सुलुक् जस आकारः

अत्रिषाहः॥ अत्रिमातिं पाप्मानं सहते तिरस्करोतीत्यत्रिमातिषाट्‌ तस्य क्षीरादि संपत्तौ सत्यां तमाप्या
यमानो वर्द्धमानः अस्मत्‌ तायय जमानस्याम्लत्वाय देवत्वावाप्यादि विपुलो केउत्तमान्भूत्वानि
श्रवांस्यन्नानि धिष्व धारय संपादयेत्यर्थः॥ आप्यायस्व मदिंतमेत्यादीनां चतुर्णां मंत्राणां विनि
योगोन्वेष्टव्यः॥ तत्र प्रथम मंत्रपाठस्तु॥ आप्यायस्व मदिंतम० वयइति। हे मदिन्तम अतिशयेन म
दवन्‌ सोम त्वं आप्यायस्व प्रवर्द्धस्व। ततो विश्वेभिर्विश्वैः सर्वैरंशुभिः सूक्ष्माङ्गैः सखा सखिवत्‌ स
नः सन्तोस्माकं वृद्धि वर्द्धनाय सप्रथस्तमः सप्रथयितृतमो भव॥ अथ द्वितीयः॥ आते वत्सो मनो० गिरेति।
हे अग्ने ते तव वत्सः प्रियो पुत्रो यजमानः त्वां कामयमानस्त्वां कामयमानया गिरा वाचा परमात्त्रिसधस्थात्‌ द्र
दुरूपादधिष्ठानात्‌ मनो अंतःकरणं आयमत्‌ नियच्छतु॥ अथ तृतीयः॥ तुभ्यं ता अंगिरस्तम० मिरइ
ति। हे अंगिरस्तमाग्ने तुभ्यं यजमानैरानीताः स्तुतयः संति सर्वाः पृथक्‌ प्रत्येकं सुक्षितयः श्रोन
ते। हे अंगिरस्तमाग्ने तुभ्यं यजमानेः कृताः स्तुतयः संति सर्वाः पृथक्‌ प्रत्येकं सुक्षितयः शोभ
नधिवासाः स्तुतयः कामाय यजमानानां मानसाभिलाषपरिपूरणार्थं येमिरे नियम्यंते॥ अथ चतुर्थी॥
अग्निः प्रियेषु० विराजतीति। कृतस्यो सन्तस्य भव्यस्य भविष्यतश्च तन्नः कामः कामपूरकः सम्राट्‌ सम्यग्रा
जमानोग्निः प्रियेषु धामसु अभिरुचितेषु स्थानेषु एकोऽसाय वतः सन्‌ विराजति विशेषेण दीप्यते॥ इति

अन्नं भरती संभिराः अतिशयेन ताद्वत्रास्त्वं भिरस्तम सत्त्वं बोध्यतं

सप्तमोनुवाकः॥ ॥ वेदार्थस्य प्रकाशेन० ॥ ॥ इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रका
शे काण्वसंहिताभाष्ये त्रयोदशोध्यायः॥ ॥ यस्य निश्वसितं० ॥ ॥ त्रयोदशेध्याये यजमानस्य क
र्तृकमचारणादि मंत्रा उक्ताः। अथ चतुर्दशेध्याये यजमानजप पुष्करपर्णाद्युपधानमंत्रा उच्यंते॥ त
त्र प्रथमेनुवाके यजमान जपादि स्रुगुपधानपर्यंता मंत्रा निरूप्यंते॥ का०॥ उत्तरवेदिमपरेण तिष्ठ
न्यजमानो मयि गृह्णामीति जपतीति॥ पाठस्तु॥ मयि गृह्णाम्य० सचं तामिति। अहं यजमानः अग्ने प्र
थमं मय्यात्मनि अग्निं गृह्णामि धारयामि किमर्थं रायस्पोषाय धनस्य पुष्ट्यर्थं सुप्रजास्त्वाय शोभ
न पुत्रादि निष्पादनार्थं सुवीर्याय शोभन सामर्थ्यार्थं च किंच उ कारोप्यर्थे देवता अपि एवं स्थितं
मां सचंतां सेगछंतां प्राप्नुवंतु॥ का०॥ पुष्करपर्णमुपदधाति स्तन्ते पूर्ववदिति। पूर्वं मदाहरण
काले येन मंत्रेण कृष्णाजिने पुष्करपर्णमुपादधात्‌ इदानीं तेनैव अपां पृष्ठमसीति मंत्रेण कुर्यात्‌ स्त
वे पुष्करपर्णमुपदध्यादित्यर्थः॥ पाठस्तु॥ अपां पृष्ठमसि० प्रथस्वेति। अयं मंत्रो द्वादशेध्याये व्या
ख्यातः॥ का०॥ तस्मिन्‌ रुक्मम पोविलं ब्रह्मजज्ञानमितीति। तस्मिन्‌ पुष्करपर्णे रुक्मं अधस्तन बि
लं यथा भवति तथा उपदध्यादिति शेषः॥ पाठस्तु॥ ब्रह्मजज्ञानं० वरिति। प्रथमं जज्ञानमादावुत्प

मेधावीवा ... मूर्त्तस्यपृथिव्यादेःकारणमसतश्चामूर्त्तस्यवाय्वादेर्योनिमि भाष्यांतरं =

न्मिदंरुक्मस्वरूपंब्रह्मपरिदृढंअसंतंमहृद्विसर्थः।तस्यरुक्मस्यदृष्टांतत्वेनसूर्यःप्रपंच्यते।पुरस्ता
त्पूर्वस्यांदिशिअवस्थितोवेनःकमनीयःसूर्यःसीमतःसर्वस्यांसीम्नि सुरुचःरोचमानःरश्मीन्वि
शेषेणावःआवरणात्अस्यरुक्मस्योपमाःउपमानभूताविष्ठाःविशेषेणावस्थिताबुध्न्याःबुध्नेमूले
पृथिवीरूपेस्थिताः पादायःसंतितानविसवेनोविवःविवृतवान्प्रकाशितवानित्यर्थः।सतोविद्य
मानस्यघटपटादेर्योनिंकारणंमृदादिरूपंअसतश्चाविद्यमानस्यनरविषाणादेःकारणंमनुष्य

उत्तानं प्राचं

मूर्द्धादिकमपिदविवाविवृतवान्तथाविधेनसूर्येणसदृशोयंरुक्मःप्रकाशरूपइतितात्पर्यार्थः॥
॥का०॥हिरण्यपुरुषंमस्मिन्हिरण्यगर्भइतीति॥तस्मिन्नुक्मेसुवर्णेननिर्मितंपुरुषंउर्ध्वांगमुखंय

॥२६३

थान्नवतितथाहिरण्यगर्भइतिमंत्रद्वयेनोपदध्यादितिशेषः॥तत्रप्रथममंत्रपाठस्तु॥हिरण्यगर्भः०
विधेमेति।हिरण्यंब्रह्मांडरूपेणगर्भरूपेणावस्थितःप्रजापतिर्हिरण्यगर्भःसचभूतस्यप्राणिजा
तस्याग्रेसमवर्त्ततप्रजातोस्तःपुरास्वयंशरीरधारीबभूवसचजातएकएवमात्रएकएवासत्त्य
मानस्यसर्वस्यजगतःपतिरासीत्अतएवपृथिवींविस्तीर्णांदिवंदाधारधृतवान्उतापि

२६३

चेमांभूमिंदाधारतादृशायकस्मैप्रजापतयेदेवायहविषाविधेम।वयंपरिचरेम॥इतिद्वितीयः॥द्रप्स

पि३ कायेतिप्राप्तेकस्मैइतिछांदसः =

गा३

श्चस्कंद०होत्राइति।द्यावांतरसंघट्टनेनस्फुरितोहिरण्यपुरुषावयवलक्षणोद्रप्सःसपृथिवीमनुचस्कंदपृथि
व्यांपतितइत्यर्थः।सचद्रप्सोहुतःसन्स्थानत्रयेषुसंचरतिद्युलोकेंतरिक्षलोकेभूलोकेच।तदेतद्वि
प्रैस्समर्प्यते।अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते।आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजापतिइति।
सोयमर्थोद्यामित्यानाभिधीयते।द्यामिमंचयोनिमनुअंतरिक्षरूपमिदंस्थानमनुसंचरदितियश्चपूर्वः
योनिपृथिवीमनुचस्कंदेतिपूर्वोक्तस्थानविशेषः।तमप्यनुसंचरद्इतिसमानंसदृशंस्वस्ययोगंयंयोनिं

यः

द्युलोकरूपमादित्यस्थानमनुसंचरतितमिमंत्रिषुस्थानेष्वनुसंचरंतंद्रप्संजुहोमिमनसाहुतमिव
भावयामि।कुत्रहोमइतितदुच्यते।अनुसप्तहोत्राःयस्यांदिशिद्रप्सःपतितःतद्यतिरिक्ताहोमयोग्या
याःसप्तदिशःसंतिस्वनुक्रमेणजुहोमियथायंद्रप्सोहुतआदित्यादिस्थानत्रयेषुसंचरंलुपकरोतितथा
भावयामीत्यर्थः॥का०॥उपतिष्ठतेयजमानोनमोस्त्वितीति।नमोस्त्वित्यादिभिस्त्रिभिर्मंत्रैर्यजमानउपस्था
नंकुर्यात्॥तत्रप्रथमः॥नमोस्तुसर्पेभ्यो०नमइति।येकेचित्सर्पाःपृथिवीमनुगतास्तेभ्यःसर्पेभ्योनमोस्तु।
अंतरिक्षेयस्तत्लोकेवर्त्तमानायेसर्पायेचदिविद्युलोकेवर्त्तमानाराहुप्रभृतयस्तेभ्यःसर्पेभ्योनमोस्तु॥
अथद्वितीयः॥याइषवो०नमइति।याःसर्पजातयोयातुधानानांराक्षसानामिषवोबाणरूपेणवर्त्तंते

असौवाआदित्योद्रप्सोदिशःसप्तहोत्राअमुंतदादित्यंप्रतिष्ठापयतीतिश्रुतेः। =

नां रा गुरु

येचान्येवनस्पतींरनुद्ध्वं दनादिवक्षोनन्नुवेष्टाव॒ स्थिताः येचान्ये अवटेषु बिलेषु शेरते तेभ्यः सर्पेभ्यो नमोस्तु। ।अथतृतीयः॥ येवामी० नमइति। दिवो द्युलोकस्यरोचने दीप्तस्थानेयेचामीसर्पा अस्माभिरदृश्यमानाः संति तथा सूर्यस्यरश्मिषु येवा सर्पाविसंति ये चासर्पाणामप्सुजलेषु सदः स्थानं कृतं तेभ्यः सर्पेभ्यो कृत्स्नेभ्यो नमोस्तु॥ काण्ड॥ पंचगृहीतंजुहोति पुरुषे कृणुष्वपाजइतीति प्रत्यृचं प्रतिदिशमिति। पंचवारं गृहीतमाज्यं हिरण्मये पुरुषे कृणुष्वपाजइत्यादिभिः पंचभिर्ऋग्भिः क्रमेण प्राच्यादिषूर्ध्वांतं पंचदिक्षु विलक्ष्यं जुहुयात्॥ तत्र प्रथमा॥ कृणुष्वपाजः० स्त्रपिष्ठैरितिं। कृणुष्व कुरुष्व पाजो बलं प्रसितिं न गबंधनहेतुभूतां या मिव पृथ्वीं प्रसारितां अमवान् स्पयुक्तः इभेन गजेन त्विषीक्षिप्रगामिनीं प्रसितिं अह्रुहसेनां कृणानो हिंसन अस्ता प्रसारितां अग्ने मगबंधनाय प्रसारितं। पृथ्वीमिव जोम। धाववितारक्षसोराक्षसांतपिष्ठैरतिसंतापकैर्बाणैर्हे अग्ने मगबंधनाय प्रसारितं। पर्ययामिव परकीयरक्षो निरोधाय प्रौढं बलं कुरु। अमासमुक्तो गजेन सहितो राजेवरक्षसामुपरियाहि क्षिप्रगामिनी परकीयरक्षोविध्य॥ अस्तिनानुपश्चलोगत्वापलायनविक्षिप्तयाधावन्निना भव। पलायमानान्विराक्षसान्बाणैस्तीक्ष्णैर्विध्य॥ अथद्वितीया॥ नवत्त्रमास० गुल्काइति। अमासो भ्रमणशीला विस्फुलिंगा आशुयां शीघ्रगामिनः पतंति शुचिप्रा अनुस्पृशन् धृषता शोशुचानः। तस्त्वं धार्ष्ट्येनरक्षो मुशुचानो मुह्यमानो दप्यमानोसंतापान्पतंगानस्तनशीलान् विस्फुलिंगानुअसिं दितो रवंडितः विसृज तपूंषि तापधित्वा राक्षसाननुस्यकरो दितिमाय्यांतरं।

हे अग्ने

मास ८

कृणानो हिंसो

कर्म =

२६८ म

तपूंषि

च्या

म ६

।पाज इति बल नाम सुपठित सोऽह

२६८

सुपि शिशितेन सो

पादेशः

विद्धो वेगेनोत्साद्य विष्वक्सर्वतः उल्का महाज्वाला हे अग्ने तवसंबंधिनो विस्फुलिंगाः शीघ्रगामिनः सर्वतः पतंतु त्वमपि नष्टांदप्यमानस्तेविस्फुलिंगेस्तान सुरान् धार्ष्ट्येनास्तं तूणादमनुसृत्य पुनरपिजुहूाहुतेन रुविथाव प्रतिमविछिन्नः सन्संतापान्विस्फुलिंगान्महाज्वालाश्च सुरवा धनाय सर्वतो बाहुल्येनोत्साद्य॥ अथतृतीया॥ प्रतिस्पशो विसृज० दधर्षीदिति। स्पशः स्पशबंधने। पान्तानूतत्वं णितमोतिवरितः पायुः पालयिता विशः प्रजाया अस्यानोविसृज दधर्षीत्सर्वतो घ्नस्तोलवेतु शः केनाप्यहिंसितः अघशंसोविचित्रवधकारीअंतिसमीपे नेव व्याधिर्व्याधाकारीआदधर्षी सर्वतो घ्नस्तोलवेतु शः केनाप्यहिंसितः॥ हे अग्ने विचित्रवधकारीराक्षसोयोस्माकं वैरी दूरे वर्त्ततेयश्चांतिके वर्त्तते तं प्रति त्वमति त्वरितो बंधहेतून्पाशान् विविधान्सृज केनाप्यहिंसितस्त्वमस्मदादिकाया अस्याः प्रजायाः पालको भवं धेतारा क्षसनाशिर्माकिः माकाचिदपि तेतवत्वदीयानामास्माकं व्याधिर्व्यथयित्री दूरे अंतिकवा आदधर्षीद्धष्टामालवलु॥ अथचतुर्थी॥ उदग्नेतिष्ठ० शुष्कमिति। हे अग्ने त्वमुत्तिष्ठ ततः प्रत्यातनुष्वशत्रून्प्रति सर्वतः प्रवर्त्तस्व। हे तिग्महेते तीक्ष्णज्वाले युधं त्वमभिशान्त्रान् निओषताल्नितरां दह हे समिधान सभिध्यमानाग्ने योनो स्माकं अरातिं शत्रुं तं चक्रे तं नीचानीचं हत्वा शुष्कमतसन्न शुष्कं काष्ठमिव धक्षि भस्मकुरु॥ अथपंचमी॥ ऊर्ध्वोभव० शत्रूनिति। हे अग्ने त्वमूर्ध्वो भव उद्युक्तो भव अस्मद्ध्यस्माकमुपरि येशत्रवः प्रवर्तास्तान्प्रतिविध्य हे अग्ने दैव्यानिवीर्याणि आविष्कृणुष्व आविष्कुरु। यातुजनां गमनेजवत्र यानीनां यातुधानानां स्थिराणि वीर्याणि अवअवमनानि

अवतनानि

तीक्ष्णज्वाले तिवा =

उषदाहे =

अिप्यु स्वेप त्वष्ट्रितेन वायुनेति व्याख्यांतरं =

यथा जवं तितथा तन्द्रहि कुरु आभिः पुनः पुनस्ताडितः शत्रुरत्नाभिरताडितः तादृशान्सर्वान्शत्रूनत्र प्रमॄणीहि म्रणातिर्मारणार्थः =
मारय ॥का०॥ काश्मर्यमयीं दक्षिणतो घृतपूर्णमग्ने ष्टूतीति ॥ काश्मर्यो नाम वृक्षविशेषः तेन निर्मितां घृ
तेन पूरितां स्रुवं पुरुषस्य दक्षिणभागे उपदध्यादिति शेषः ॥ पाठस्तु ॥ अग्ने ष्टूतेनसा ० सि जिन्वतीति । हे
कृत्वा सौ अग्नेः संबंधिना तेजसा सादयामि अग्नेर्मूर्द्धा यं मंत्रस्त्वती याध्याये व्याख्यातः ॥ का० ॥ औदु
बरीमुत्तरतो दधिपूर्णामिंद्रस्यौजेति । उदुंबरवृक्षेण निर्मितां दध्ना पूरितां स्रुवं उत्तरभागे स्थापयेत् ॥ पा
ठस्तु ॥ इंद्रस्यौजेसा ० वाहमिति । हे स्रुगिंद्रस्य ओजसा बलेन त्वां सादयामि । अयमग्निर्नो लोकस्य
तत्रानुष्ठेयस्य यज्ञस्य तस्मिन्यज्ञे प्रवर्तकस्य रजसो रजोगुणस्य नेता निर्वाहकः हे अग्ने तादृशस्त्वं
यत्र यस्यां दिवि सूर्यरूपो भूत्वा नियुद्भिः रथे नितरां योज्यमानाभिः शिवाभिरुत्तमाभिरश्वैर्गतिभिः स
च सैमवे षितस्यां दिवि मूर्द्धानं शिरो वदुन्नत स्थितिं सूर्यं दधिषे धारयसि कीदृशं महत्तं स्वर्षा सुवः स्व
र्गे स्यति सर्वदा तिष्ठतीति ॥ स्वर्षाः तं स्वर्षां सोमपाः शब्दवत्सु लिंगो यं । हे अग्ने त्वमस्मिन्यज्ञे हव्यवाहं हवि २६५
२६५ षः प्रापिकां जिह्विकां ज्वालां च वृषे करोषि ॥ इति प्रथमोनुवाकः ॥ ॥ प्रथमेनुवाके यजमानजपादि स्रुगु
पधानांतामंत्रा उक्ताः ॥ द्वितीये तु स्वयमातृण्णादीष्टकोपधानमंत्रा उच्यंते ॥ का० ॥ स्वयमातृण्णां पुरुषे
शर्करां ध्रुवासीनीति । शर्करारख्यानां क्षुद्रपाषाणानां मध्ये पुरुषप्रयत्नमंतरेण याखवतरं वृद्धि

आस्तृता विश्वकर्मणा सर्वकर्त्रा प्रजापतिनोपहितासीति व्याख्यांतरं = तैत्तिरीयब्राह्मणायां सृष्ठुतेसर्वभि कथा नात्र दर्शितप्रायमिदं व्याख्यानं =
उयुक्ता सेयं शर्करा स्वयमातृण्णा उतां सुवर्णनिर्मितपुरुषे ध्रुवासीत्यादिमंत्रेणोपदध्यादिति शेषः ॥ तत्रायं प्र
थमः ॥ ध्रुवासि धरुणा ० दृहेति । हे स्वयमातृण्णे त्वं ध्रुवा स्थिरासि कीदृशी धरुणा भूमिरूपेण विश्व
स्य धारयित्री अत एवास्तृता केनाप्यहिंसिता विश्वकर्मणा जगत्कर्त्रा सुकृता सुष्ठु निर्मिता समुद्रस्त्वां
मोद्वधीत् त्वोदरमध्ये निमज्जनलक्षणं वधं माकार्षीत् । सुपर्णः पक्षिराजोपि सर्पोचमनवेलायां त्वा
मादाय मोद्वधीत् दूरे परिक्षेपागलक्षणं वधं माकार्षीत् । एवं सत्य व्यथमाना जवैयरहिता त्वं पृथिवीमिमां
दृंह दृढीकुरु ॥ अथ द्वितीयः ॥ प्रजापतिष्ट्वा ० माहि परसीति । हे स्वयमातृण्णे प्रजापतिः अपां पृष्ठे उदका
नामुपरि समुद्रस्य समुद्रनकीलस्योदकसंघातस्य एमन्नेते दुर्गतोर्मनिन सम्येक्व चनं एमनि जेव
स्थाने सादयतु स्थापयतु । कीदृशीं त्वां व्यचस्वतीं व्यचिर्व्याप्तिर्युक्तां प्रथस्वतीं विस्तारयुक्तां त्वमपि
प्रथस्व । अस्याश्चिनेः प्रथनं कुरु । किंच पृथिव्यामुत्पन्नत्वात् त्वं पृथिव्यासि भूरसि सुखानां भावयि
त्र्यसि भूमिरस्मिन्मय पृथिव्यभिमानिनी भूमिदेवतासि अदितिरसि अखंडनीयासि विश्वधाया
विश्वस्य पोषयित्र्यसि तथा विश्वस्य भुवनस्य सर्वस्य लोकस्य धर्त्री धारयित्र्यसि तादृशी त्वं पृथिवीं

यच्छ नियतां कुरु पृथिवीं दृंह दृढां कुरु पृथिवीं मा हिंसीः पृथिव्या हिंसां मा कुरु ॥ अथ तृतीयः ॥
विश्वस्मै प्राणाय० सीदेति । विश्वस्मै सर्वस्मै प्राणापानव्यानोदानरूपवायुवृत्तिलाभाय प्रतिष्ठायै स्वर्गे हे स्थि
तिलाभाय चरित्राय चरणस्त्री यावरणाय प्राणिनामितस्य सर्वस्य सिद्ध्यर्थं अयमग्निस्त्वामभितः पातु रक्षतु ।
केन रक्षणमिति मह्याख्यस्या महत्या योगक्षेमसंपत्या शांतमेन छर्दिषा असंतप्तसुखकारणाद्वितीयेन त
केनाभिरक्षतु । तया देवतया तया देवतयानुगृहीता ध्रुवा स्थिरा सती सीद दृढा उपविश । अंगिरस्वत् अंगिर
सां चयनानुष्ठाने यथा तत्र ध्रुवा स्थिरा तद्वत् ॥ का० ॥ मूलाग्रवती दूर्वा कांडात्कांडादिति । मूलाग्रोपेतां
दूर्वां कांडात्कांडादिति मंत्रद्वयेनोपदध्यादिति शेषः ॥ तत्र प्रथममंत्रपाठस्तु ॥ कांडात्कांडात्० नचेति । कां
दूर्वाम्बस्य संबद्धानि
म्बाभिसंबद्ध दूर्वा शब्दः स्तंबवाची यावंतः कांडाः स्तंबाः संति तत्रैकैकस्मात् स्तंबात् प्रकर्षेण दूर्वे त्वं प्ररोहति एकस्मिन्नपि स्तंबे कांडान्यनंतानि
स यावंति पर्वाणि संति तत्रैकैकस्य पर्वणः परितः प्रकर्षेण दूर्वे त्वं संचित्य प्ररोहसि तेहे दूर्वे त्वं तत्र कांडान्नि
र्वणः प्रकर्षेणो संचमाना वर्तसे । परुषः परुषस्परि कांडात्कांडात्कांडात् सर्वतः प्ररोहंती सती यथा प्ररो
२६६
२६६
तांकुरान् वसि एवमनेन प्रकारेण नोस्मदर्थं शतसंख्याकेन सहस्रसंख्याकेन च त्वदीयच्छेदनतत्तत्व
रूपं प्रतनु विस्तृतं कुरु ॥ अथ द्वितीयः ॥ या शतेन० वयमिति । हे दूर्वे या त्वं शतसंख्याकेन स्वरूपेण प्र
हे दूर्वे एवं पुत्रपौत्रनप्त्रादिभिः शतसहस्रसंख्येनों ऽस्मान् प्रतनु विस्तारयेति तात्पर्यार्थ इति शेषः । =

माहात्म्यं तनोषि त्वं तं विस्तारयसि तथा सहस्रसंख्याकेनाकारेण विरोहसि हे इष्टके देवि तस्यास्ते वयं हविषा वि
धेम परिचरेम ॥ का० ॥ यास्त इति द्वियजुषमिति । यास्त इति मंत्रद्वयेन मंत्रद्वयोपेतामिष्टकामुपदध्या
त् ॥ तत्र प्रथममंत्रपाठस्तु ॥ यास्ते अग्ने० रुचे धेहीति । हे अग्ने सूर्ये सूर्यमंडले स्थितास्ते त्वदीया या रुचो
दीप्तयो रश्मिभिः रश्मिस्वरूपेण दिवमंतरिक्षमातन्वंति सर्वतो व्याप्नुवंति । या अग्ने दीप्तयस्ता एवस्तूर्यो द
यकाले सूर्यरश्मयो भवंति । एतच्छ्रुतेस्तैत्तिरीये अग्निहोत्रब्राह्मणे समाम्नातं । उद्यंतं वादित्यमग्निर
नुसमारोहतीति । ताभिः सर्वाभिर्दीप्तिभिरद्यास्मिन्दिने नोस्मदर्थं नो ऽस्मदीयाय पुत्राय च साधियजना
य च रुचे अधिकप्रकाशाय कुरु ॥ अथ द्वितीयः ॥ या वो देवाः० बृहस्पतिरिति । हे देवा वो युष्माकं संबंधि
न्यः सूर्यमंडले वर्तमानायाः रुचो दीप्तयः संति तथा गोष्वश्वेषु च या दीप्तयः संति हे इंद्राग्नी हे बृह
स्पते त्रयोपि यूयं नोस्मदर्थं रुचं धत्त ॥ का० ॥ विराड् स्वराड्ज्योतिरेतस्मिन्नेवोपरि मंत्रमिति । एतःसमा
ख्ये द्वे इष्टके विराड्स्वराडित्येकैकेन मंत्रेण उपदध्यात् ॥ तयोः पाठस्तु ॥ विराड्ज्योतिरधारयत् स्वरा
ड्ज्योतिरधारयदिति । विशेषेण राजत इति विराड् एवं विधा रेतःसमाख्या प्रथमेष्टका अस्मदनुग्रहार्थं
॥ का० ॥ प्रजापतिरिति विश्वज्योतिषमिति । विश्वज्योतिःसंज्ञकामिष्टकां प्रजापतिष्ट्वेति मंत्रेणोपदध्यात् ।
× ज्योतिरग्निमधारयद्धारयतु । स्वयं राजत इति स्वराड्रेतःसमाख्या द्वितीयेष्टका ज्योतिरादित्याख्यमधारयत् ।
विराडयं लोकः स इममग्निं ज्योतिर्धारयत्यसौ वै लोकः स्वराट् सोमुमादित्यं ज्योतिर्धारयतीति श्रुतेः ॥ =

।।पाठस्तु।। प्रजापतिष्ट्वा सादयतु पृष्ठे० सीदेति। पृथिव्याः पृष्ठे उपरि ज्योतिष्मतीं ज्योतिषोपेतां त्वां विष्ट
कां प्रजापतिः सादयतु स्थापयतु विश्वस्मै सर्वस्मै प्राणादिसंपत्त्यर्थं विश्वं ज्योतिः सर्वं ज्योतिर्यच्छ हे इष्टके
त्वं नियच्छ विष्वग्निश्च ते तवाधिपतिः स्वामी देवता तया देवतया ध्रुवा स्थिरा सती सीद उपविश अंगिर
स्वत् पुरा अंगिरसां यथा नाख्ये कर्मणि यथा स्थिरा सीः तद्वदत्रापीत्यर्थः।। का० सा०।। ऋतव्ये मधुश्च माध
वश्चेति।तीति। ऋतव्याख्ये द्वे इष्टके उपदध्यादिति शेषः।।पाठस्तु।। मधुश्च माधवश्च० सीदतमिति। मधुश्चैत्रो
मासः माधवो वैशाखः। तौ तु वसंत संबंधिनौ वसंत अवयवौ हे तादृशौ हे इष्टके युवां तादृशौ मासौ मानिनं
संवत्सर स्वरूपस्याग्नेः अंतः श्लेषोऽसि यथा कुड्यस्यांतर्दीर्घ काष्ठ पाषाणादयः श्लिष्यंते तद्वत् भवथ।।ममाग्नेः
श्रैष्ठ्यायेति। यजमानस्य श्रैष्ठ्याय उत्कर्षार्थं इमे द्यावापृथिव्यौ कल्पेतां स्वोचितमुपकारं संपादयतां। आपश्चौ
षधयश्च कल्पंतां स्वोचितमुपकारं संपादयंतु समानं व्रतं कर्म येषां ते सव्रताः एकस्मिन् कर्मण्यावस्थि
ताये अग्नयः आहवनीयाद्यग्नयो पृथक् कल्पंतां प्रत्येकं स्व स्वोचित व्यापारं संपादयंतु। किंच इमे
द्यावापृथिवी अंतरा अनयोर्द्यावापृथिव्योर्मध्ये वर्त्तमानाः समनसः एकमनस्काः ये अग्नयस्ते सर्वे
पि। वसंत संबंधिनावृतू अवयवाविव अभिकल्पमानाः सर्वतः संपादयंतः एतत्कर्माभिसंविशंतु।

ऋतायते यजमानाय वाता वायवो मधु मधुमंतः सुखकारिणो वांछितिति शेषः। मधुमद्दिसेत्र सस्य मतुप्रत्ययस्य सर्वत्रानुषंगो
द्रष्टव्यः सांकांक्षत्वात्। सिंधवः स्यंदमाना नद्यः माध्वीर्मधुररसोपेता नोऽस्माकं संक्षिपंतु आप्यायंतु। = १२
इष्टव्यः। इंद्रमिव देवाः यथा अन्ये सर्वे देवा इंद्रमभितः सेवंते तद्वत् हे ऋतव्ये इष्टके युवां तया देवतया अं
गिरस्वत् कर्मणीव। ध्रुवे स्थिरे स सो सीदतं उपविशतं।। का०।। अषाढासीति सषाढामिति। अषाढसंज्ञका
मिष्टकां अषाढासीति मंत्र द्वयेनोपदध्यादिति शेषः।। तत्रायं प्रथमः।। अषाढासि सहमाना० जिन्वेति।
हे इष्टके त्वं अषाढा केनाप्यपरिभूता सहमाना विरोधिनः परिभवंती त्वा असि ये अस्मत्स्यंदातव्यं
पृतनं प्रयच्छंति तथाविधा अरातीः शत्रून् सहस्व अभिभव पृतनायतः ये च संग्राममिच्छंतः शत्रव
स्तानपि सहस्व किंच। या त्वं सहस्रवीर्या स्वभाव तः सहस्रधा वीर्यवत्यसि सा त्वं मां जिन्व प्रीणय।
।।अथ द्वितीयः।। सहस्वेमा० स्योषधाइति। हे ओषधे इष्टके इमान् अभिमातीः शत्रुभूताः प्रजाः सहस्व
अभिभव तथा पृतनायतः संग्रामकांक्षिणः शत्रून् सहस्व सहमाना त्वं स्वभावतः अभिभवनशीला
सि अतस्त्वं सर्वपाप्मानं सहस्वाभिभव।। ।।इति द्वितीयोऽनुवाकः।। ।।द्वितीयेऽनुवाके स्वयमातृ
ण्णादीष्टकोपधान मंत्रा उक्ताः। तृतीये तु कूर्माख्येष्टका मंत्रा उच्यंते।। का०।। कूर्मं दधिमधुघृतैरनक्ति
मधु वाता इतीति। मधु वाता इति मंत्रत्रयेण दध्यादिभिः कूर्मं अंज्यात्।। प्रथमं मंत्र पाठस्तु।। मधु
वाता० रोषधीरिति। ऋतं यज्ञमात्मन इच्छतीति ऋतयत् तस्मै यजमानाय वाता वायवो मधु क्षरंति

ऋतायते दीर्घश्छांदसः

मधुररसं स्त्रावयंतीति सिंधवः समुद्राश्च मधुररसं स्त्रावयंति। ओषधीरोषधयो पि नो स्मदर्थं माध्वीर्मधुर
रसोपेताः संतु॥ अथ द्वितीयः॥ मधुनक्तमुतो० पितेति। नक्तं रात्रिर्मधुमदस्तु उतापि च उषसो मधुमत्यः
संतु। पार्थिवं पृथिव्यात्मकमिदं रजो मात्मत्वतो यं लोकः मधुमत्वम् मधुररसोपेतमस्तु। नो स्माकं पिता पि
तृरूपतो द्यौर्द्युलोकम् मधुमत्वम् मधुमानस्तु॥ अथ तृतीयः॥ मधुमान्नो० भवंतु नइति। वनस्पतिरश्व
त्थादिर्नोस्मदर्थं मधुमानस्तु माधुर्यरसोपेतो भवतु। सूर्यो पि मधुमान् संतापराहित्यलक्षणमाधुर्य
रसोपेतोस्तु। तथा गावो नो स्मदर्थं माध्वीर्मधुरक्षीरोपेता भवंतु॥ का०॥ अपां गंभन्नित्ति स्वयंचि
दयतीति॥ पाठस्तु॥ अपां गंभन्त्सीद० सचतामिति। हे कूर्म अपां गंभन् गंभीरे स्थाने सीद उपविश। २६८
एवमुपविष्टं त्वां सूर्यो माभितापसीत् अग्निर्मां संतापयेत्। वैश्वानरः सर्वेषां नराणां मुदस्थो ग्निस्त्वा
माभिमासंतापयेत्। त्वं अछिन्नपत्रा अनवखंडितपक्षाः प्रजाः रूपादिद्दष्टका अनुवीक्षस्व दिव्यादि
दिव्यवा वृष्टिश्च त्वामनुसंचतां सेवतां॥ अथ द्वितीयः॥ त्रीन्समुद्रान्समं० परे ताइति। इष्टकानां वृष हे कूर्म=
भोवर्षिता अपां पतिर्भव स्वर्गान् स्वर्गसाधनभूतान् त्रीन्समुद्रान्समुद्रवंति खलु कारणात् समुद्रं
नीतिः समुद्रा लोकास्तान् समस्त पर्यस्पृक्ष व्याप्नो भव। अस्मिन् यत्र यस्मिन् स्थाने पूर्वे पुरातनाय कूर्म अ
पुरुषव्यस्य:=

२६८

ग्नेय अग्निषु उपहिताः संतः परेताः पारंगताः सुभूतस्य पुत्रो ऽग्ने तत्त्वतस्याग्नेस्तत्र तस्मिंल्लोके स्थाने पुरीषं
सुखं पांसुरूपां मदं वसादनः आछादयन्गछ॥ अथ तृतीयः॥ महीद्यौः पृथिवी० भरीमभिरिति। अयं मं
त्रो नवमे ध्याये व्याख्यातः॥ का०॥ मुसलं दक्षिणमुलूखलाद्विष्णोः कर्माणीति॥ अत्र चयने उलूख
लमुलूखले उपधातव्यं तत्र उलूखलस्य दक्षिणभागे मुसलं उपदध्यात्॥ पाठस्तु॥ विष्णोः कर्माणि०
सखेति। अयं मंत्रः षष्ठे ध्याये व्याख्यातः॥ का०॥ ध्रुवासीत्युखामिति। ध्रुवासीति मंत्रद्वयेनोखां उप
दध्यात्॥ तत्र प्रथम मंत्रपाठस्तु॥ ध्रुवासि धरुणेतो जज्ञे० प्रजानन्निति। हे उखे धरुणा धारयित्री त्वं ध्रु
वा स्थिरासि। इदानीमुखा स्तूयते। इतोस्या उखायाः सकाशात् प्रथममादौ जातवेदा अग्निः जज्ञे प्रा
दुर्भूतो भवति। ततः एभ्यो योनिभ्यः स्वकारणेभ्यः अधियज्ञे। ततः स च गायत्र्यादिछंदस्त्रयेण देवान्
हविश्च प्रकर्षेण जानन्। अस्मदीयं हव्यं हविः देवेभ्यो देवानां प्रीणनाय वहतु॥ अथ द्वितीयः॥ इषेरा
ये० ग्रावतामिति। हे अग्ने इषे न्नार्थं राये धनार्थं सहसे बलार्थं द्युम्ने ऽन्नाय निमित्तं। ऊर्जे क्षीरादिर
सार्थं अपत्याय पुत्रार्थं रमस्व त्वमत्र क्रीडां कुरु। किंच सम्यग्राजत इति सम्राडसि स्वयमेव राजत इ
ति स्वराडसि। एवं भूतं त्वां उत्सावत्सः सकोसारस्वतो सरस्वतीसंबंधिनावृग्वेदसामवेदौ प्रावतां अ
= सारस्वतो मनोवाचो सां अवतां। मनो वै सरस्वान् वाक् सरस्वती तौ सारस्वतावुत्सावितिश्रुतेरितिभाष्यांतरं =

कर्षणार्हतां। तथा तैत्तिरीये श्रूयते। ऋक्सामे वै सारस्वतावुत्साविति॥ का०॥ अग्नेयुक्ष्वाहीति प्रसवं स्रु
वाहुतीर्जुहोतीति। अग्नेयुक्ष्वाहीति मंत्रद्वयेन स्रुवेण द्वे आहुती जुहुयात्॥ तत्र प्रथममंत्रपाठस्तु॥
अग्नेयुक्ष्वाहि ये तवा० मन्यपदीति। हे अग्ने देवत वस्तं बंधिनो ये केचिदश्वासो अश्वाः साधवो दांताः सं
तो मन्ववेयज्ञार्थं जरं अलंवहंति सुष्ठु वहंतीत्यर्थः॥ तानश्वान्युक्ष्व रथे योजय॥ अथ द्वितीयः॥ युक्ष्वाहि०
सदश्विति। हे अग्ने देवहूतमान् देवानामतिशयेनाह्वातॄन् अश्वान्युक्ष्व योजय यद्विशब्दः प्रसिवार्थः प्रसि
द्वे स्मिन्कर्मणि स्वर्थः। योजने दृष्टांतः। रथीरिव रथी रथ्यानिकेति रथस्वामी यथाश्वान्योजयति तद्वत्॥ किं
च त्वं पूर्व्यः पुरातनो होता होमोत्पादको भूत्वा निषदः अस्मिन्यागस्थाने निषीद॥ इति चतुर्दशो ध्यायस्य ती
योनुवाकः॥ तृतीयोनुवाके तु रुक्मांजनादिमंत्रा उक्ताः। चतुर्थेनुवाके तु हिरण्यपुरुषस्वादिच्छिद्रेषु सु
वर्णशकलस्थापनादिमंत्रा उच्यंते॥ का०॥ प्रतिशिरः सप्तसप्तहिरण्यशकलानि मुखे करोति। वक्ष्य
माणहिरण्यपुरुषास्यादीनां मध्ये एकैकस्य शिरःस्थितेषु सप्तसु च्छिद्रेष्वपि सप्तसप्त सुवर्णशकला
निक्षिपेत्॥ तत्र सप्तस्वप्यक्षत्रवंतीत्यनेन मंत्रेण प्रथममास्ये स्थापयेत्॥ पाठस्तु॥ सम्यक्स्रवंति० अग्ने
रिति। अंतःशरीरस्याभ्यंतरे हृदा मनसा पूयमानाः कर्णनाम मनसा निरीक्षणयुक्तेनांतःकरणेन

रक्तास्य स्वर्णी यः

२६९

२६९

घृतलक्षणदीप्त्योरिति धातोः ==

न पूयमानाः पवित्रीक्रियमाणा धेना अन्नलक्षणाः अन्नं वै धेना इति श्रुतेः। घृतस्य दीप्तियुक्तस्य सुवर्ण
स्य धाराः सम्यक्स्रवंति सुष्ठु प्रवहंति। तत्र दृष्टांतः सरितो नेति यथा नद्यः प्रवहंति तद्वत्। अपि च उरव्याग्ने
र्मध्ये हिरण्मयः सुवर्णमयो वेतसः पुरुषो वर्तते तं पुरुषमभिलक्ष्य स्रवंती स्ताधाराः अभिचाकशी
मि अहमभिपश्यामि॥ का०॥ उत्तरौ द्वौ द्वौ नासिकयोर्ऋचे त्वेत्यक्ष्योः श्रोत्रयोरन्नदिदिति
ति। अवशिष्टानामितरेषां स्वानां सुवर्णशकलानां मध्ये द्वौ शकलौ ऋचे त्वेति मंत्रद्वयेन नासिकाच्छि
द्रयोः स्थापयेत् द्वौ भासे त्वेति मंत्रद्वयेन नेत्रयोः स्थापयेत्। अन्नदिति मंत्रद्वयेन द्वौ श्रोत्रयोः प्रक्षिपेत्।
। तेषां पाठस्तु॥ ऋचे त्वा रुचे त्वा० वर्चस्वानिति। हे हिरण्यशकल ये यं रुक्कू रुक्तिरूपात्वदर्थे त्वां दक्षिण
नासिकाछिद्रे प्रास्यामि। तथा हिरण्यशकल यारुक्दीप्तिस्तदर्थे त्वां वामनासिकाछिद्रे प्रक्षिपामि। त
था भासे प्रकाशाय त्वां दक्षिणाक्षिगोलके प्रक्षिपामि। तथा ज्योतिषे दीप्त्यै त्वां वामाक्षिगोलके प्रक्षिपामि।
इदं दक्षिणश्रोत्रे प्रक्षिप्यमाणं सुवर्णं विश्वस्य भुवनस्य सर्वस्य भूतजातस्य वाजिनं अन्नं वीर्यरूपं इ
द्रियं वै वीर्यं वाजिनमिति श्रुत्यंतरात्। तथा वैश्वानरस्य विश्वेषां नराणां स्वामिनोग्नेश्च वीर्यरूपमभूत्।
अयं मग्निर्वामश्रोत्रगोलकस्थितेन हिरण्येन ज्योतिषा स्वयं ज्योतिष्मान् भूत। तथा रुक्मा रोचमानो अ

विस्तारय

ग्निर्वर्चसा हिरण्येन कांत्या वर्चस्वां अश्वकांतिर्वर्द्धेति नेदः ॥ का० ॥ सहस्रदा इति पुरुषं शिरउद्धृत्येति ॥
पाठस्तु ॥ सहस्रदा असि सहस्राय त्वेति । हे हिरण्यपुरुष त्वं सहस्रदाः सहस्रस्य धनस्य दाता
सि तत्त्वां सहस्राय सहस्रधनलाभाय उद्धरामीति शेषः ॥ का० ॥ मध्ये स्मन्योरुत्तरतः पूर्वापरगो
लयोश्च दक्षिणत आदित्यं गर्भ मिति मिति मंत्रमिति । अश्वादीनां मध्ये हिरण्यपुरुषमुपदध्यात् । त
स्यो त्तरतः प्राचीनदेशे अश्वं स्थापयेत् । अविं पश्चिमे तथा तस्याद्दक्षिणतः प्राचीनदेशे गां स्थाप
येत् । अजं पश्चिमे स्थापयेत् । अत्र पुरुषादीनामेकैकस्य स्थापने आदित्यं गर्भमित्याद्याः पंचमंत्राः क्र
मेण प्रयोक्तव्याः ॥ तत्र पुरुषोपधानमंत्रपाठः ॥ आदित्यं गर्भं० चीयमान इति । हे अग्ने त्वं चीयमानः
सन् आदित्यं । अदितिदेवताया संबंधितत्कार्यरूपं गर्भं गर्भसदृशमिमं पुरुषं पयसा त्वदीयज्वाला
रूपेण तेजसा माक्षिमं स्थाः अग्निपर्वैमिनिर्हिंसार्थः । यजमानं माहिंसीः । किं तु शतायुषं शतसं
२७० वत्सरपरिमितकालं जीवितं कृणुहि कुरु ॥ अथाश्वोपधानमंत्रपाठः ॥ वातस्य जूतिं० व्योमन्निति । २७०
हे अग्ने त्वं अश्वं माहिंसीः ज्वालया मा दह विविधं व्योम रक्षणं व्योमसतति सहस्राश्वस्य रोगास्तेषां
पालनमिसर्थः । तत्र परमसुखेन रक्षितस्याश्वस्य पुनरुपद्रवः कदाचिदपि न जायते । तथा करणे रक्षण
× धीरेतासमद्धिः सम्यगारी कुरु । सहस्रस्य प्रतिमां बहुधनस्य प्रतिमानभूतं विश्वरूपं परिवृद्धि परिसज्जहरसा ×५
= वीर्यापहारकेण तेजसा परिवृद्धीति संबंधः ज्वालया मा दहेत्यर्थः =

स्य परमत्वं तादृशे परमे व्योमन् एनमश्वं स्थापयेति शेषः । कीदृशमश्वं वातस्य जूतिं वायोर्गतिस्वरूपवच्छी
घ्रगतिमित्यर्थः । वरुणस्य नाभिं अपामधिपते वरुणस्य नाभिस्थानीयं यथा स्वोदरमध्यवर्तिनी नाभि
र्वस्त्राभरणादिना पाल्यते तद्वदसौ तत्प्रियत्वाद्वरुणेन पालनीयमित्यर्थः । अत एव प्रियतमं मध्ये सप्रजापति
वरुणायाश्वमनयदिति तैत्तिरीये समाम्नातं । सरिरस्य सलिलस्य मध्ये जज्ञानं समुद्रजलस्य मध्ये वडवा रूपेण संजातं ।
अप्सु योनिर्वा अश्व इति श्रुतेः तत्र । नदीनां शिशुं यदा नदीनां पतिः समुद्रः पूर्वोक्तव्यायेन पितात दान
दीनां मातृत्वाद्यं तच्छिशुः । पुनः कीदृशं हरिं उपर्यारूढस्य पुरुषस्य हर्तारं नेतारं । पुनः कीदृशं अद्रिबुध्नं अ
द्रिभिर्बुध्यते सो तथा । नकारो धिकश्छांदसः मार्गमध्ये रबुरैश्चूर्णीकृतायेऽवनच्छुद्रपाषाणास्तैर्बुध्यते ता
दृशान् पाषाणान् दृष्ट्वा मार्गे स्मिन्नश्वो गत इति बोद्धुं शक्यते ॥ अथ गोः स्थापन मंत्रः ॥ अजस्रमिंदु० विरा
जमिति । पूर्वचितिं पूर्वैर्महर्षिभिश्चित्येषुयमेतमग्निं नमोभिर्नमस्कारैर्युक्तो हं दृष्टे स्तोमिभिः कीदृशमग्निं अ
जस्रमिंदुं निरंतरं परमेश्वर्येपितं । अरुषः क्रोधं मर्मवावी अरुषं मर्मसंघातं शरण्यं शरं तं पोषयंतं यथा यज
मानस्य मर्माभिवैरिणा नो द्वारयंति तथा कुर्वंतमित्यर्थः । सोऽग्निरादित्यस्वरूपेण स्थित्वा पर्वतिरमावास्यादि
तिथिभिस्तत्तकुर्वास्त्वं मिं तस्मिंस्ततो कल्प्यमानः कर्माणि संपादयन्वर्तते । तादृशं हे अग्ने गां माहिंसीः

मीयते निर्मी
यत इति माया

श्रुवदी सो

२७१

कीदृशीं गां अदितिम् अखंडनीयां विराजं विशेषेण राजमानां ॥ अथावेस्थापनमंत्रः ॥ वरूत्रीं त्वष्टुर्वरुणस्य० व्यो
मन्निति । हे अग्ने परमे व्योमन् उत्कृष्टे विविधरक्षणे स्थितामविं मा हिंसीः । कीदृशीमविं त्वष्टुर्वरूत्रीं
रूपाणां निर्माता यस्त्वष्टा तस्यानुग्रहात् । वरणीयरूपयुक्तां । वरुणस्य नाभिं अनिष्टनिवारकस्याग्नेर्नाभि
स्थानीयां परस्मात् असो जज्ञानां उत्कृष्टात् प्रजापते रजसः उत्पन्नां तथा तैत्तिरीये उरसो बाहुभ्यामि
त्यादिवाक्ये अविः पशुनामिति श्रुतं मंहीं महतीं साहस्रीं सहस्रमूल्यार्हां । असुरस्य मायां त्वष्टानिरस्य
रस्य संबंधिचेतसा निर्मितां । अत एव तैत्तिरीये त्वष्टुर्वरूत्रीमित्यादिवाक्ये साहस्र्या दिवस्सवदितिश्रुतं । अ
थाजस्थापनमंत्रः ॥ यो अग्निरग्ने० वणक्विति । पृथिव्यान्तमेरूपपरिस्थितात् उत वा अथवा दिवस्परि
द्युलोकस्योपरि स्थितात् शोकाद्दीप्तियुक्तादग्ने प्रजापतिरूपात्सकाशात् यो अग्निरजरूपो अध्यजाय
त उत्पन्नो महत्येन अजरूपेण विश्वकर्मा जगत्स्रष्टा प्रजापतिः प्रजाः पशून् जजान उत्पादितवान् अजस्य
प्रजापत्युत्पत्तिसाधनत्वं तैत्तिरीये समाम्नातं ततो ऽजरूपः समर्थवत्वाद्धु स्वाये देवताया अनुज्ञातो
वै स प्रजाः पशून् स्रष्टवत् तेति हे अग्ने त्वदीयो हेडः कोपः तं तादृशमजं परिवृणक्तु परिवर्जितं करोतु । २७१
माविनद्यायत्तिसर्थ ॥ का० ॥ चित्रं देवानामिति सर्द्धर्चद्वाः स्रुवाहुतीरिति जुहुयादिति शेषः ॥ पाठस्तु ॥ चित्रं दे

वानां० तत्सु चक्षुरिति । अयं मंत्रः पूर्वमष्टमाध्याये व्याख्यातः ॥ ॥ इति चतुर्थोऽनुवाकः ॥ ॥ चतुर्थेऽनुवाके हि
रण्यपुरुषादीनां शिरःसु इष्टकासुवर्णशकलस्थापनादिमंत्रा उक्ताः पंचमे तेषामुपस्थानमंत्रा
उच्यंते ॥ का० ॥ उदङ् तिष्ठन्नुपतिष्ठते उत्सर्गैर् इमं मा हिंसीरिति प्रतिमंत्रमिति । अध्वर्युरुदङ्मुखो भू
त्वा इमं मा हिंसीरित्यादिभिः श्लोकपरित्यागलक्षणैर्मंत्रैः क्रमेण पुरुषाश्वादीनामुपस्थानं कुर्यात् ॥
पुरुषोपस्थानमंत्रपाठस्तु ॥ इमं मा हिंसीर्द्विपादं० मृगं वृक्षितिति । हे सहस्राक्ष सहस्रसंख्याक ज्वाला
रूप चक्षुर्युक्ताग्ने मेधाय यज्ञाय चीयमानश्चयनेन संस्क्रियमाणस्त्वं इमं द्विपादं पादद्वयोपेतं पुरु
षरूपं पशुं मा हिंसीः । दाहरूपां हिंसां माकार्षीः । यद्यपि तव ज्वालापेक्षा तर्हि तव भक्षणाय मेधं
शुद्धं मयुं किंपुरुषं मृगरूपं पशुं जुषस्व सेवस्व तत्सेवयेत्यर्थः । तेन मयुभक्षणेन ज्वालारूपास्तन्वस्त्वदीय
तन्वश्चिन्वानः पोषयन्निहानिष्टौ दते तव शुक् शोकः संतापो मयुं किंपुरुषं मृगं अन्वेतु प्राप्नोतु किंच वयं यं
पुरुषं प्रति द्विष्मो द्वेषं कुर्मः । तं पुरुषं त्वदीयः शुक् संतापः ऋच्छतु प्राप्नोतु ॥ अथाश्वोपस्थानमंत्र
पाठः ॥ इमं मा हिंसीरेकशफं० मृगं वृक्षितिति । हे अग्ने इममेकशफयुक्तमश्वरूपं पशुं मा हिंसीः

दोहरूपां हिंसां मा कार्षीः। कीदृशमश्वं कनिक्रदं हेषाशब्देनाऽसंतं क्रंदनेनोपेतं वाजिनेषु त्वरी शीघ्रगतिं गति
युक्तेषु प्राणिषु सर्वतः शीघ्रगतियुक्तं यदि तव भक्ष्यापेक्षा तर्हि ते तव भक्षणाय इममारण्यं गौरं सिंहमनु
दिशामि पुरुषशरीरमनुलक्ष्य भक्षयेत्। तेनातिसृजामि तेन गौरभक्षणेन त्वदीया ज्वालारूपाः तनूः पोषयन्नि
ह निषीद शिष्टं पूर्ववत्॥ अथ गोरूपस्थानमंत्रः॥ इमं साहस्रं १० शुगृच्छत्विति। हे अग्ने इमं गां मा

किं हिंसीः। कीदृशं साहस्रं सहस्राहं। शतधारमुत्सरूपं। बहुस्रोतसं कूपमिव बहूपकारकं वाहदोहादिनिः
सरिरस्य मध्ये व्यज्यमानं विविधमुपजीव्यमानं। इमे वै लोकाः सरिरमिति श्रुतेः। जनाय जनेभ्यो घृतं दु
हानां घृतपूरणीं वा घृतस्य कारणत्वात्। तत्क्षीरदोग्ध्रीमदितिमखंडनीयां गवयो गोसदृश आरण्यो मृगविशेषः।

२७२ शिष्टं स्पष्टं॥ अथाविरूपस्थानमंत्रः॥ इममूर्णायुं १० शुगृच्छत्विति। हे अग्ने इममूर्णायुमूर्णावंतं मा हिं
सीः। कीदृशमिमं वरुणस्य नाभिं शीतनिवारकस्याग्नेर्नाभिस्थानीयं द्विपदां मनुष्याणां चतुष्पदां गवादी
नां उपयरूपाणां पशूनां त्वक्सदृशं यथा लवाकारी स्मार्तं भवति तथा द्विपदो मनुष्याः शीतनिवार
णार्थमविजन्येन कंबलेनाछादिता भवंति चतुष्पदोप्यश्वा बलीवर्दाश्च भारवहने मार्दवार्थं पृष्ठे कंबले २७२
नाछादिता भवंतीति चतुष्पदोप्यश्वा बलीवर्दाश्च पुष्ट्यर्थं पृष्ठे कंबलेनाछादिता भवंति। तथा चैः

काण्वब्राह्मणे तु यद्वै प्रजापतेः शोकादजायत तदग्नेः शोकादजायतेत्युक्तं। अग्नेः शोचिषा प्रजापतेः संतापादजो जनिष्टेत्यर्थः— ५

प्रजापतेः सकाशादुत्पद्यमानानां प्रजानां मध्ये प्रथमं जनित्रं प्रधानत्वेनोत्पन्नं। प्राधान्यं च वीर्यवत्त्वात् वीर्यवत्त्वं
च बाहुजन्यानां सर्वेषां तैत्तिरीयैराम्नातं। तस्मात्ते वीर्यवतो वीर्याद्धि सृष्टत्वं तेति। उत्कृष्टः प्रसिद्धः। शिष्टं पूर्व
वत्॥ अथाजोपस्थानमंत्रः॥ अजो ह्यग्ने १० शुगृच्छत्विति। हि यस्मादयमजः शोकादिति युक्तादग्नेः सका
शादजनिष्ट अत एव ते तैत्तिरीये आम्नातं॥ आत्मनो वपामुदखिदत्तामग्नौ प्रागृह्णात्ततोऽजस्तूपरः स
मभवदिति। स एवाग्नेः प्राजापतिरूपादुत्पन्नोऽजः जनितारं स्वोत्पादकं प्राजापतिरूपमग्निमग्रे पश्यत्

नायं देवशब्दः स्वार्थिकस्त लपितुनावा र्थिकः—

उत्पत्त्यनंतरमेव दृष्टवान्। यस्मादेवमजः प्रशस्तस्तस्मादिदानीं वर्त्तमाना देवा अग्रं पूर्वस्मिन् जन्मनि
तेनैवाजेन कर्माण्यनुष्ठाय देवतामायन् देवत्वं प्राप्ताः किंचेदानीमप्यस्मै यागयोग्याय यजमानायापि तेना
जेन रोहणीयं स्वर्गं उपायन् सामीप्येनैव प्राप्ताः बिलंबमन्तरेण प्राप्ता इत्यर्थः। शारभः सिंहघाती क्रूरमृ
गः शिष्टं पूर्ववत्॥ का०॥ त्वं यविष्ठेति चित्योपस्थानमिति। चित्याग्नेरुपस्थानं कुर्यात्। पाठस्तु॥ त्वं यविष्ठ १०
त्मनेति। हे यविष्ठ युवतमाग्ने त्वं दाशुषो हविर्दत्तवतो यजमानस्य नॄन् मनुष्यान्पाहि। तिसृ
भिर्गीर्भिः आत्रेयः शृणुधि शृणुहि। उतापि च त्मना आत्मना त्वदीयेन प्रयत्नेन तोकमपत्यं रक्ष॥
॥ इति पंचमोनुवाकः॥ ॥ पंचमेनुवाके हिरण्यपुरुषाश्वादीनामुपस्थानमंत्रा उक्ताः। षष्ठे पश्वोरुख्येष्टको

=द्रागमताधिसस्य धातोर्मनिन्प्रत्ययांतस्य रूपं सप्तमी विभक्तिकस्येतद्रूपं अपामेयनेवायो सादयामि त्वां। तामुर्वा अपाम्ने मवयोतां सा= दयामीति मा घ्यांतरं=३

पधानमंत्रा उच्यते।।का०।। अपस्याः पंचापंचान्तकां ते षपां देमन्निति प्रतिमंत्रमिति। अध्वि गेर्मंत्रैरूपधेया इष्टका अपस्याः तत्संज्ञकाः पंचपंचेष्टकाः अपान्त्वेमन्नित्यादिभिर्मंत्रैः क्रमेणान्तकांते क्षपूदध्यादिति बोधः।

।।तत्र प्रथमपंचकमंत्रपाठः।। अपान्त्वेमन्सादयाम्य० येनसादयामीति। हे इष्टके त्वामपामेमन् एमनि जलं संबंधि प्रवाहादिगमनप्रकारे सादयामि स्थापयामि एवमुत्तरत्रापि योज्यं। ओमन्वीची तरंगादिरूपे कुंदने तस्मिन् सासकेस्थ ... ज्योतिषि प्रकाशने भल्यइत्यर्थः।। अयनेन दीरूपाधारे। अथ द्वितीयपंचकमंत्रपाठः।। अर्णवे त्वा० सधिषि सादयामीति। अर्णवशब्देन सादस्त्वा ... कादुपलक्ष्यते। अपांसदनं स्थानं तस्मिन्स्थाने हे अपस्या रख्ये इष्टके त्वा सादयामि स्थापयामि। समुद्रः प्रसिद्धः। सरिरशब्देन निर्झरितविशेषो जलमात्राधार उपलक्षितः। क्षीयं तेनुष्यं त्या पात्रे तिरकतटाकादिः क्षयः। जलेन सह धीयते ऽवस्थाप्यते इति सधिर्वर्षोपलादिः।। अथ तृतीयपंचकमंत्रपाठः।। अपां त्वा सदने० पाथसि सादयामीति। हे इष्टके अपां सदने स्थाने नद्यादौ त्वां सादयामि। स्थापयामि। अद्भिः सह विद्युदादयो यत्र मेघे तिष्ठंति सोयं मेघः सधस्थः। योनिशब्देन जलकारणं पृतोऽग्निरुच्यते। अग्नेरापइति श्रुतेः। पुरीषशब्देन नद्यादिगताः सिकता उच्यंते। पीयते ऽत्र जलं जीमूतैरत्रेति पाथः समुद्रः।। अथ चतुर्थपंचकमंत्रपाठः।।

अन्नं वा। अन्नं वा अपां पाथो न्नेतां त्वां सादयतीति श्रुतेः=

ससत्तर्ह्णनदी प्योरितिधातुः

२७३

२७३

गायत्रेण त्वा छंदसा० पांक्तेन त्वा छंदसा सादयामीति। हे इष्टके त्वां गायत्री संबंधिना छंदसा सादयामि स्थापयामि। एवमुत्तरत्रापि योज्यं।। ।।इति षष्ठोनुवाकः।। ।।षष्ठेनुवाके ऽपस्येष्टकोपधानमंत्रा उक्ताः। सप्तमे प्राणभृत्संज्ञिकानामिष्टकानामुपधानमंत्रा उच्यंते।।का०।। प्राणभृतः कर्णसंहितादन्नादन्नायपुर इति त्रीतिमंत्रमिति। यासां प्राणभृत्संज्ञकानां पंचानामिष्टकानां कर्मणि ... इत्यादि ... सा इष्टका उपदध्यादिति बोधः।। तत्र पूर्वस्यां दिश्युपधेयानां दशेष्टकानां मंत्रपाठः।। अयं पुरो भुव० प्रजाभ्य इति। तव सस्माज्जगद्भवतीति भुवः शब्दः प्रजापतिमाचष्टे। पुरः पूर्वस्यां दिशि अयं भुवोऽवर्ततइति बोधः। हे इष्टके त्वं तद्रूपासीति अभिप्रायः। एवमुत्तरत्रापि ... स्येषु योज्यं।। तथा तस्य भुवः शब्दाभिधेयस्य प्रजापतेः संबंधी प्राणः अतएवास्य ... वर्यते। तो वा यन इत्युच्यते। तस्य च प्राणस्य श्वासवृत्तिरूपस्यापि प्रयत्नेनोपचरितः प्राणायनो वसंतऋतुः तस्य च वसंतस्य संबंधिनी गायत्री तस्याः छंदोरूपायागायत्र्याः संबंधि गायत्रं साम तस्माद्गायत्रसाम्न उत्पन्न इत्युपांशुर्ग्रहः तस्मादुपांशुग्रहादुत्पन्न इव त्रिवृत्स्तोमस्तस्मात्त्रिवृत्स्तोमादुत्पन्नमिव रथंतरं साम यथोक्त ... सि। हे इष्टके यथोक्तप्रकारेण प्राजापतिप्राणवसंतादिरूपोपचारेण प्रजापतिस्वरूपासि। हे इष्टके यथोक्तप्रकारेण प्राजापतिप्राणवसंतादिरूपोपचारेण प्रजापति ... तया त्वया प्रजाभ्यः सर्वासां प्रजानां प्राणं गृह्णामि प्रजानां प्राणसिद्ध्यै त्वामुपदधामीत्यर्थः। यथ

दक्षिणस्यामि
त्यर्थः =

प्यमेकवाक्यत्वादेकत्वमंत्र तथापि प्रतीष्टकमावृत्त्याद्वत्रमंत्राः संपद्यंते ॥ अथ दक्षिणस्यां दिश्युपधेयानां
द्वयोरिष्टकानां मंत्रपाठः ॥ अयं दक्षिणा० प्रजाप्यत्विति । विश्वानि कर्माणि जगद्व्यापारादीनि यस्यासौ विश्वकर्मा हे
इष्टके त्वद्रूपा त्वमसि । प्राणवसंतादि परंपरैव मनोग्रीष्मादि परंपरा व्याख्येया । स्वारमिति सामविशेषः ॥
अथ पश्चिमायां दिश्युपधेयानामिष्टकानां मंत्रपाठः ॥ अयं पश्चाद्विश्वव्यचा० प्रजाप्यत्विति । विश्वं सर्वं जग
द्व्याप्नोतीति विश्वव्यचाः प्रजापतिः शेषं पूर्ववद्योजनीयं । वर्षाः वर्षर्तुः ऋक्सममिति सामविशेषः ।
।अथोत्तरस्यां दिश्युपधेयानामिष्टकानां मंत्रपाठः ॥ इदमुत्तरात्स्वस्तस्य० प्रजाप्यत्विति । सोतीति सर्वं जगत्प्र
सूयतीति स्वः शब्दः प्रजापतिवाची । उत्तरस्यां दिशि यदिदं स्वः प्रजापतिशरीरं हे इष्टके त्वं तद्रूपा ० सीति योज्यं ।
ऐळमिति सामविशेषः । शेषं पूर्ववद्योज्यं ॥ अथ मध्यमदेशे उपधेयानामिष्टकानां मंत्रपाठः ॥ इयमुपरि०
प्रजाप्यत्विति । मन्यते कृत्स्नं जगज्जानातीति मतिः प्रजापतिः ऊर्ध्वायां दिशि योयं प्रजापतिः हे इष्ट
के तद्रूपा त्वमसि मतिनाम्नः प्रजापतेस्त्वं प्रसरूपा येयं वाक् सा मास्या वाचो प्रसवाच्यः ॥ निधनवदिति सा
मविशेषः । अत्रैकैकस्मिन्मंत्रे प्रजापतिरिंद्रियमलुब्धं दः साम विशेषो ग्रहः स्तोमः पंचदशस्तोत्रं सामऋषि
रिति प्रनाडी नाम तेषां पदार्थानां यद्यपि लोकप्रसिद्धो न्यत्न नक तावो नास्ति तथापि मंत्रार्थत्वेन मनसा

सूप्रसवे =

२७४

२७४

भावयितुमिदमुक्तमित्यविरोधः ॥ का० ॥ लोकंपृणां दक्षिणार्धे सत्र्याद्यान्तमध्यादिति । लोकंपृणसंज्ञकाइ
ष्टका दक्षिणांसमरस्यमध्ये प्रापर्यंता लोकंपृणेत्यादि त्रिभिस्त्रिभिर्मंत्रैरुपदध्यादिति विशेषः । तेषां मंत्राणां
प्रतीकान्याह ॥ लोकंपृणता अस्ये इंद्रं विश्वा इति । लोकंपृणेति इदं प्रथममंत्रप्रतीकं । ता अस्येति द्वितीयमं
त्रस्य प्रतीकमिदं । इंद्रं विश्वा इति तृतीयमंत्रस्य प्रतीकं । तेच मंत्रास्त्रयोदशेऽध्याये व्याख्याताः ॥ ॥ इति
सप्तमोनुवाकः ॥ ॥ वेदार्थस्य प्रकाशेन ॥ इति श्री० सायणाचार्येण विरचि० तेमाधवीये वेदार्थप्रका
शे काण्वसंहिताभाष्ये चतुर्दशोध्यायः ॥ ॥ यस्य निःश्वसितं० ॥ चतुर्दशोध्याये यजमानपुष्करपर्णास्तरणा
दि प्रथमचितिमंत्रा उक्ताः ॥ एतावता प्रथमा चितिः समाप्ता ॥ अथ पंचदशोध्याये द्वितीयतृतीयचित्या
दिमंत्रा उच्यंते । तत्र प्रथमेनुवाके द्वितीयचितावाश्विन्याख्या इष्टका अभिधीयंते ॥ का० ॥ आश्विनी ध्रुव
क्षितिरिति प्रतिमंत्रमिति । अग्निदेवत्युक्तैः मंत्रैरुपधेया इष्टका आश्विन्यस्ताः ध्रुवक्षितिरित्यादिभिः
पंचभिर्मंत्रैः क्रमेणोपदध्यादिति शेषः ॥ तत्र प्रथममंत्रपाठस्तु ॥ ध्रुवक्षितिर्ध्रुवयोनि० मिहत्वेति । ध्रु
वास्थिरा क्षितिर्निवासभूमिर्यस्या इष्टकायाः ध्रुवक्षितिः यस्यां भूमो इष्टका निवसति तस्या नाने

त।· ध्रुं·

श्वां चल्या नावास्थैर्यं उष्टव्यं ध्रुवा विनाशरहिता योनिरूत्पत्तिहेतुर्भूरूपाय स्यां इष्टकायां । सा ध्रुवयोनिः । हे इष्टके तादृशीं त्वं स्वरूपेण ध्रुवासि आमक्षाणादिभिः संयोज्य निर्मितत्वाद्ध्रुवत्वं । सा ध्रुवा अस्मिन्नि साधनी याउपधाता तया त्वं ध्रुवं योनिं स्थिरमग्निक्षेत्ररूपं स्थानं आसीद आग सोपविश । किं चउरव्यस्य उरवायां स्थितस्याग्नेः केतुं ज्ञापकं प्रथमं द्वितीयायां चितौ मुख्ये स्थानं कृषाणो सेवमानो देवानाम श्वर्युऽमावश्विनावि हास्मिन्नग्निक्षेत्रे हे इष्टके त्वां सादयतां स्थापयतां ॥ अथ द्वितीयः ॥ कुलायिनी॰

कुलायोनीडं विद्यतेयस्याः = मि ह हे ॥ हे इष्टके त्वं कुलायिनी । निवासस्थानवती घृतवती होष्यमाणेनाज्येन संयुतासती पुरंधिः पुरुबहु धाधीयते सम्यग वस्थाप्यत इति पुरंधिः तादृशीसती पृथिव्याः प्रथमचितिरूपायाः कृमे: संबंधिनि स्योने सुखरूपे सदने स्थाने सीद उपविश । किं च रुद्रा वसवः सर्वे देवाः सर्वे ॥ त्वा त्वां अग्निगणं कुर्वन्तु इमानि ब्रह्म ब्राह्मणानि मंत्रात्मकानि पिपीहि आप्यायस्व किमर्थं सौभगाय महदैश्वर्यार्थं । शेषं पूर्ववत् ॥ अथ तृतीयः ॥ स्वैर्दक्षैः॰ मि ह ह्वैति । स्वैर्दक्षैः स्वकीयैर्बलैर्दक्षपिता बलस्य पालयित्री हे इष्टके त्वं एवं विधासती इहास्यां द्वितीयां चितौ सीद उपविश किमर्थं बृहते महते रणाय रमणीयाय देवानां संबंधिनि सुम्ने सुम्नाय सुखाय सुखप्राप्त्यर्थं तत्र आसर्वतः सुशेवा । सुखेन सेवितुं शक्यार्थ इव

२७५

तस्य वाऽरतस्य यज्ञयोरस्य वोपनिषदिति शतपथश्रुतेः ।४

का इवसूनवे पितेव यथा पुत्रार्थः पिता सुखेन सेव्यो भवति किं च तन्वा स्वकीयेनैन शरीरेण स्वावेशा सुखेन प्रवेशवती सती संविश स्व अव स्थानं कुरु । अश्विनेत्यादि पूर्ववत् ॥ अथ चतुर्थः ॥ पृथिव्याः पुरीषं॰ मि न्वेति । हे इष्टके त्वं पृथिव्याः प्रथमचितिरूपाया भूमेः पुरीषं पूरकमसि अप्सो नाम अपः सनोतीत्यपो रसः यास्त्वा मेव रसगुणयुक्ता प्रसिद्धा तां त्वां तादृशीं त्वां विश्वेदेवाः सर्वे पि देवाः अभिगृणंतु सर्वतः कीर्तयंतु । स्तोमपृष्ठा स्तुतेऽदृत्यादि स्तोमयुक्तानि पृष्ठस्तोत्राणि यस्याः सा स्तोमपृष्ठा घृतवती होष्यमाणेनाज्येन संयुता सती इहास्मिन्क्षेत्रे सीद तिष्ठ अस्मे अस्मभ्यं प्रजावत् पुत्रपौत्रादियुक्तानि द्रविणानि धनानि आयजस्व सर्वतो देहि अश्विनेत्यादि पूर्ववत् ॥ अथ पंचमः ॥ अदित्यास्त्वा पृष्ठे॰ मि हत्वेति । हे इष्टके त्वां अदित्याः पृष्ठे प्रथमचितिरूपाया भूमेरुपरि सादयामि स्थापयामि । कीदृशीं त्वां अंतरिक्षस्य लोकस्य स्वभर्त्रीं धारयित्रीं तथा प्राच्यादीनां दिशां विष्टंभनी क्षितिधम सा कार्येण स्तंभयंती व्यवस्थापयंती भुवनानां सर्वेषां अधिपत्नी आधिक्येन पालयित्री यस्यास्तत विश्वकर्मा प्रजापतिर्ऋषिर्दृष्टा सा त्वं अपां यदूर्मिः पयसा तनु भूरूपासि निष्टृ पूर्ववत् ॥ का॰ ॥ रुक्मं च रुचिश्चैव तव्येदिति । अतव्यसं हा केद्वे इष्टके उपदध्यादिति शेषः ॥ पाठस्तु ॥ रुक्मश्च रुचिश्च॰ सी ।

दत्तमिति। शुक्रो ज्येष्ठमासः शुचिराषाढः। तावुभावग्नीष्मसंबंधिनावृत्ववयवौ हे अग्ने सापत्नाःस्त्वं चीयमान
स्याग्नेरंतःश्लेषोसि यथा कुड्यस्यांतर्दार्ढ्यार्थं काष्ठपाषाणादयः श्लेष्यंते तद्वत्त्वमग्निं चिन्वतो यजमान
स्य ज्येष्ठमासो कर्षार्थं इमे द्यावापृथिवी स्वोचितमुपकारं कल्पेतां संपादयेतां आपश्चौषधयश्च कल्पं
तां स्वोचितमुपकारं संपादयंतु। समानव्रतकर्मणा ये ते सन्नतारः अस्मिन्कर्मण्यवस्थिता आहवनीयादयोग्न
योपि पृथक्कल्पंतां। प्रत्येकं स्वस्वोचितव्यापारं संपादयंतु। किंच इमे द्यावापृथिवी अंतरा अनयोर्द्या
वापृथिव्योर्मध्ये वर्त्तमानाः समनसः एकमनस्का येग्नयः ते सर्वेपि ग्रीष्मसंबंधिनावेतावृत्ववयवा
वभिकल्पमानाः सर्वतः संपादयंतः एतत्कर्माभिसंविशंतु। तत्र दृष्टांतः। इंद्रमिव देवाः यथान्ये सर्वे दे
वा इंद्रमभितः सेवंते तद्वत्। हे इष्टके त्वमेतयोर्ऋत्वोः तया देवतया अंगिरस्वत् अंगिरसो कर्मणीव ध्रुवे स्थिरे
वा इंद्रमभितः सेवं तेतद्वत्। हे ... ॥ इति प्रथमोनुवाकः॥ ॥प्रथमेनुवाके आश्विन्यादीष्टकोपधानमंत्रा उक्ताः॥ द्वि
तीयेनुवाके वैश्वदेवीत्यादिरुपधानमंत्रा उच्यंते॥ का॰॥ वैश्वदेवीः सजूर्ऋतुभिरिति प्रतिमंत्रमिति। नानाविध
तीये वैश्वदेवीष्टकाद्युपधानमंत्रा उच्यंते॥ का॰॥ वैश्वदेवीः सजूर्ऋतुभिरित्यादिभिः पंचभिर्मंत्रैः क्रमेणोपदध्या
देवतायुक्तैर्मंत्रैरुपधेया इष्टका वैश्वदेव्यः। ताः सजूर्ऋतुभिरित्यादिभिः पंचभिर्मंत्रैः क्रमेणोपदध्या
दिति शेषः॥ तत्र प्रथममंत्रपाठस्तु॥ सजूर्ऋतुभिः॰ मिहत्वेति। हे इष्टके ऋतुभिर्वसंतादिभिर्ऋतुभिः सजूः

देवैः सामान्यैः सजूः समानजोषणा हे इष्टके त्वमसि

अर्द्धीदः सर्वैर्विहितं।

समानप्रीतिरसि। वसंतादिनायादृग्नी प्रीतिस्तादृग्नी तवेसर्वाः। एवमुत्तरत्रापि सजूः शब्दो योज्यः। विविधं
जगद्धयति पोषयंतीति ब्रह्मादयो विधाः। तैः समानप्रीतिरसि। यद्वा विधा शब्देनापउच्यंते। अपो वै विधा इ
ति श्रुतेः। ताद्दृग्भिः समानप्रीतिरसि। वयोनाधैः पदैः छंदोरूपैः प्राणरूपैर्वा देवैः समानप्रीतिरसि। त
था चाम्नायते। प्राणा वै देवा वयोनाधाः प्राणैर्हीदं सर्वं वयुनं नद्धमथो छंदांसि वै वयोनाधाः छंदोभिर्हीदं
सर्वं वयुनं नद्धं प्राणैर्वै सयुग्वा प्राजनपदित्यादि सजूर्देवैरिति पुनर्वचनमादरार्थं एवं ताद्दृशैर्देवैः
समानप्रीतियुक्तां त्वां वैश्वानराया ग्नये सर्वपुरुषाणां हितकारिणे हव्यार्थं महमुपदधामीति शेषः। एव
मुपहितां त्वां देवा नाम अश्विनौ इहास्मिन् क्षेत्रे सादयतां स्थापयतां। एवमुत्तरेष्वपि मंत्रेषु योज
नीयं॥ तेषां पाठस्तु॥ सजूर्ऋतुभिः सजूर्विधाभिः सजूर्वसुभिः॰ मिहत्वेति॥ का॰॥ प्राणभृतः प्राणम्म
इतीति। प्राणभृत्संज्ञका इष्टका उपदध्यात्॥ पाठस्तु॥ प्राणं मे पाह्यव॰ श्लोकयेति। हे इष्टके त्वं मे मदीयं प्रा
णं पाहि पालय। एवमुत्तरत्रापि उर्व्या विशालया द्यावा मदीयं चक्षुर्विशालाहि विशेषेण प्रकाशयर्द्धर्वी
न समर्थं कुर्विसर्पः॥ का॰॥
न समर्थं कुर्वित्यर्थः। मदीयं श्रोत्रं वचां संघातेन पूर्णं कुरु। बहुविधश्रास्त्रश्रवणसमर्थं कुर्वित्यर्थः॥ का॰॥
अपः पिन्वेत्यपस्या इति। अपस्यनामका उपदध्यात्॥ पाठस्तु॥ अपः पिन्वो॰ रयेति। हे इष्टके त्वमपो

सेचयपिन्वसेचनार्थ इति आख्यांतरं = जिन्वतिः प्रीणनार्थः = द्विपादं चतुष्पादमिति द्वितीयार्थे सुपामिति सूत्रेण द्वितीया =

जलानि पिन्व प्रीणय ओषधीरपि जिन्व प्रीणय। द्विपान्मनुष्यशरीरं अव रक्ष। चतुष्पात्पशुशरीरं पाहि पालय दिवः सकाशाद्वृष्टिमेरय अस्मान् आसमंताद्वर्त्तय॥ ॥इति द्वितीयोनुवाकः॥ ॥द्वितीये नुवाके रुक्त

व्येष्टका द्युपधानमंत्रा उक्ताः। तृतीये वयस्याख्येष्टकोपधानमंत्रा उच्यंते॥ का० ॥ वयस्याः पंच पंचानुवाकं तेषु मूर्धा वय इति प्रति मंत्रमि वयः शब्दोपेते मंत्रे रूपधेया इष्टका वयस्याः। ता अनुवाकांते पंच पंचो पदध्यात्॥ पाठस्तु॥ मूर्द्धा वयः प्रजापतिः० तुर्यवाड्वयो नुष्टुप् छंद इति। पुरा खलु सृष्टिवतः प्रजापतेर्वि स्रस्तो लोका शालस्रष्टाः पशवः छंदोरूपमास्थाय निरगच्छन्। ततः स प्रजापतिः स्वयमपि गायत्र्यादि छंदोरूपं स्वीकृत्य पशुसंबंधिन्या तत्तद्वयस्यया तान्यापन्। तत्र तावदादि तस्मिन् मंत्रे प्रजापतेर्मूर्धा त्यवालके गायत्रीरूपं परिकल्पते। एवं गायत्रछंदोरूपेण परिकल्पितो सो प्रजापतिः स्वयमेव मूर्द्धा पशुसंबंधिभिः शरीरावस्थाप्रजापतिरेव मूर्द्धा लक्षणं वयो भवत्। अनंतर मूर्द्धि इत रावयवेभ्यः श्रेष्ठ्यान्यं दृश्यते। तथा प्रजापतिः स्वयमेव छंदो भवत्। अस्मिन्मंत्रे शिव छंदसो वि ग्नो पेषस्याकथनात् छंदः सामान्यं विवक्षितं। अनेन मंत्रेण प्रजापतेर्द्वयवोपरिकल्पितो। क्षता त्रायत इति क्षत्रं तादृशं वयः शरीरावस्था प्रजापतिरभवत्। मयं सुखं ददातीति मयंदं तादृशो छंदस्था नेवत्। कुत्स्नं शरीरं

प्रजापते विस्रस्तात्स्मावउदक्रामत्। स इत्तत्वा तान् गायत्री छंदो कृत्वा वयसाप्नोत् प्रजापतिरित्यादि श्रुतिमूलं =

२२७

प्रजापतिर्विष्टंभः सहीदं सर्वं विष्टभ्नोतीति श्रुतेः =

विष्टभ्नोति स्थिरी करोतीति विष्टंभः। प्रजापतिः स्वयं धिष्टंभात्मकं वयो भवत्। अधिष्ठापयतीत्यधिपतिः एतदा त्मकं छंदो भवत्। विश्वं कर्म कर्त्ता वयस्या सो विश्वकर्मा प्रजापतिः इदं रूपं वयो भवत्। परमे उत्कृष्टे स्थाने तिष्ठतीति परमेष्ठी एतदात्मकं छंदो भवत् एवं प्रतिमंत्रं द्वे द्वावयवाविति अष्टावयवः प्रजापतिः परिकल्पितः तथा चाष्टसंख्योपेतत्वात्सर्वं छंदः प्रकृतित्वं गायत्रीरूपमस्य संपन्नं एवं गायत्रीरूपः प्रजापतिः किमकरोदिति तदाह। बस्तो वय इत्यादिना एकपदा वै विवलं छंद इति श्रुतेः। प्रजापतिः स्वयमेकपदा गायत्री छंदो भवा वयः वयसा सुपां सुलुगिति तृतीयालुक्। बस्तः छंदः अत्रापि द्वितीये कवचनस्य सु आदेशः वयसा शरीरावस्थया निर्गतं बस्ताख्यं पशुं पर्यगृह्णात् एवमुत्तरेष्वपि मंत्रेषु विनिक्षिप दिणामे कृत्वा तत्तच्छंदोरूपं मास्थाय प्रजापतिस्तत्तद्वयसा तं पशुं गृहीतवानिति योज्यं। विशेषस्तु कथ्यते। वृष्णिः सेचनसमर्थो मेषः। द्विपदा गायत्री विशालाख्यं छंदः द्विपदा वै विशालं छंद इति श्रुतेः। पुरुषः प्रसिद्धः। तंद्रं पाङ्क्तिरिति तंद्रं सर्वाणि रूपाणि छंद इति श्रुतेः। विराट्छंदः अनड्वान् विराट् अनाधृष्यमिति श्रुतेः। अनाधृष्यं ख्यो विराट्छंदः। पञ्च छंदांसि छादयतीति छदिः अतिछंदः। अतिछंदो वै छदिरिति श्रुतेः। पष्ठौ पष्ठ भागो वहतीति पष्ठवाट् पंच

पाङ्क्तैर्वितंद्रे=

बस्तः पशुर्विवलं छंदो रूपमास्थि सोदक्रामीत् प्रजापतिर्गायत्रीरूपो वसाप्नोदित्यादि व्याख्यांतरं = ४

वर्षः पशुः । उक्षा सेचनसमर्थः पशुः । अंतिमौ द्वावक्षरौ पादौ मध्यमपादो द्वादशाक्षर इत्येतिर्यस्याः सा ककुप् ।
ऋषभः सेचनसमर्थः । धेनुरिष्टा प्रथमतृतीयौ पादौ द्वादशाक्षरौ द्वितीयोऽष्टाक्षरोऽसौ सतोबृहती । अनड्वान् बृह
ती । अनड्वान् बलीवर्दः । धेनुः नवप्रसूता सवत्सा गौः । त्रिष्टुप्वतीति त्रिष्टुप् यद्वा अविश्रृंखलेनद्वीराद्विकमर्तं
तमपि सतामायातिविहितः षण्मासात्मकः कालो लक्ष्यते तथा च तिष्ठो अवयोऽस्य संज्ञाता इति त्र्यवि
र्षाद्वर्षमात्रः पशुरिति । दित्यौहीत्यवेनाहृत्तौ ति दित्यवाडु । यद्वा द्विवर्षः पशुर्दित्यवाडु कथ्यते ।
पंचधा अवलीति पंचाविः यद्वा पंचावयोऽस्य संज्ञाता इति सार्धद्विवर्षः पशुः पंचाविः । त्रयो वत्सा यस्यासौ
त्रिवत्सः यद्वा त्रिसंवत्सरः पशुस्त्रिवत्सः तुर्यं तु धुर्यं वहतीति तुर्यवाडु । एकवयः इत्यादीनां मंत्राणां
मनुसारेणैवं व्याख्यानं कृतं । अतस्तत्सर्वं तत्पथा दवगंतव्यं ॥ का० ॥ लोकं पृणाः पूर्ववदिति । लो

२७८ ।

कंपृणसंज्ञका इष्टका यथापूर्वमुपदध्यात् । इति शेषः । तेषां मंत्राणां प्रतीकान्याह । लोकं पृण ता अस्यं
दं विश्वा इति पूर्ववद्व्याख्येये ॥ इति तृतीयोऽनुवाकः ॥ ॥ तृतीयेनुवाके वयस्या एव लोकंपृणसंज्ञका
इष्टका उक्ताः । एतावता द्वितीया चितिः समाप्ता ॥ अथ चतुर्थे तृतीयस्यां चितौ स्वयमातृण्णा धाउच्यं
ते ॥ का० ॥ तृतीयायां स्वयमातृण्णामिंद्राग्नी इति । तस्या ठस्तु ॥ इंद्राग्नी अव्यथमाना० सीदेति ।

२७८

ष्टेयमिष्टकां पृष्ठेन स्वकीये । नोपरिभागेन द्यावापृथिवी अंतरिक्षं च लोकत्रयं विबाधसे पुरुषव्यासः ।
विबाधते अग्निरवति । हे इंद्राग्नी युवं युवां अव्यथमानां गरहितां स्वयमातृण्णाख्यां तामिष्टकां दृंहे
ते । दृढीकुरुतं । किं च विश्वानि कर्माणि यस्यासौ प्रजापतिः । हे स्वयमातृण्णे स प्रजापतिस्त्वामंतरिक्षे
पृष्ठे उपरिसादयतु । कीदृशीं व्यचस्वतीं अग्निव्याप्तियुक्तां प्रथस्वतीं विस्तारोपेतां यथेयं स्वयमातृण्णा सा
त्वमंतरिक्षं यच्छ । गंधर्वाप्सरोगणादिधारकृतयानियमय । तथांतरिक्षं दृंह परोपद्रवराहित्येन दृढीकुरु
त्वमपि तदंतरिक्षं माहिंसीः । विश्वस्मै सर्वस्मै प्राणापाना व्यानोदाना ख्यवायुवृत्तिलाभाय प्रतिष्ठायै स्वर्ग
स्थितिलाभाय चरित्राय स्वकीयाचरणाय प्राणिनामतः सर्वस्य सिद्ध्यर्थमग्निं वायुस्त्वामभितः पातु । केन
रक्षणामिति । तदुच्यते । महा स्वस्त्या महत्या योगक्षेमसंपत्त्या छर्दिषा अत्यंतसुखकारिणा
दीप्तिविशेषेण तव स्वामिन्त्या या देवता तया देवतयानुगृहीता ध्रुवा स्थिरा सती सीद इहोपविश । अंगि
रस्वत् । अंगिरसां चयनानुष्ठाने यथा ध्रुवा स्थिरा तद्वत् ॥ का० ॥ पंच दिश्यावैश्वदेवीवत् राज्ञ्यसीति प्र
तिमंत्रमिति । दिक्शब्दपंचकोपेतैर्मंत्रैरुपधेया इष्टकाः पंच दिश्याः राज्ञ्यसीति मंत्रपंचकेनोपदध्या
दिति शेषः ॥ पाठस्तु ॥ राज्ञ्यसि प्राची दिग्वि० बृहती दिग् इति । हे इष्टके त्वं राज्ञी राजमाना दीप्यमाना सती प्रा

ची दिगसि पूर्वं दिगसि त्वसि। विराड्विविधं राजमानाद्दक्षिणा दिगसि सम्राडसि सम्यग्राजमाना। सम्राडुदीची
दिगसि स्वराडसि निरपेक्षतया स्वयमेव राजमाना उदीची दिगसि अधिकं पाती सूधिपत्नी नाम त्रासंबृह
ती प्रोढे ऊर्ध्वा दिगसि। का०॥ विश्वकर्मा त्वा विश्वज्योतिषमिति॥ पाठस्तु॥ विश्वकर्मा त्वा सादयं० सीदेति।
हे इष्टके ज्योतिष्मतीं त्वां विश्वकर्मा ऋषिः स्वस्य पृष्ठे उपरि सादयतु। आसादयतु। किं च सर्वं प्राणादि बधिं लोकना
र्थं हे इष्टके त्वं सर्वं ज्योतिर्यच्छ प्रयच्छ। वायुस्ते तव अधिपतिरधिदेवता याथ ध्रुवा स्थिरासती सीद उपविश
अंगिरस्वत्। अंगिरसां चितो पूर्वं ध्रुवा सती यथा स्थिरा तद्वदत्रापी सूर्थः॥ का०॥ ऋतव्येन नभश्च नभस्यश्चे
ति॥ पाठस्तु॥ नभश्च नभस्यश्च० सीद तमिति स्पष्टोऽर्थः॥ का०॥ इषश्चोर्जश्च सपरे इति। इतरे द्वे ऋतव्ये इ
ष्टके उपदध्यादिति शेषः॥ पाठस्तु॥ इषश्चोर्जश्च शारदो० सीद तमिति। व्याख्या समानार्थः॥ ॥इति चतु
र्थोऽनुवाकः॥ ॥ चतुर्थेऽनुवाके स्वयमातृण्णादिइष्टकोपधानमंत्रा उक्ताः। पंचमे प्राणभृत्संज्ञकेष्टको
रकैकेन मंत्रेणोपदध्यात्॥ तेषां पाठस्तु॥ आयुर्मे पाहि० यच्छेति। हे इष्टके मे मदीयमायुः पाहि रक्ष
रक्ष तरत्रापि योज्यं। पिन्व प्रीणय जिन्व प्रीणय आत्मानं जीवस्वरूपं ज्योतिः कीर्तिं यच्छ देहि॥ का०॥ छं
दस्याछादन्नाछादन्न। पश्येषु मा छंद इति प्रतिमंत्रं वालखिल्या लोकं पश्या छिद्र्वेति। छंदः इत्यादीयं लेर्मं

२१ २३१ २३९

= अयं वै लोको मा यश्च हि लोको मितरवेति। अंतरिक्षलोको वै प्रमांतरिक्षलोको ह्यस्मात् लोकात् प्रमितरवेति। द्यौः प्रतिमासा ह्यंतरि =
४ = क्षलोके प्रतिमिते तिष्ठति प्रमक्षीव यदि तियदेभ्यो लोकेभ्य आकृतिपरिमाणाम नृत मन्नं स्रवति परलो निरुक्तानां साहित्यात प्रथमत्रा तुसधेयं =

त्रैरूपध्येयाः इष्टकाः छंदस्याः ताः षड्विंशति संख्योपेता वालखिल्येष्टकोपधानार्थं पश्चिमभागे स्थाने
स्वकोऽन्तरदिक्रूपावस्थितेषु संधिविशेषेषु दश द्वादश एकैकेन मंत्रेणोपदध्यात्॥ पाठस्तु॥ मा छं
दः० इंद्रो देवता वरुणो देवतेति। अत्र मामप्रमा प्रतिमादिकाः ब्राह्मणे मास्यं हे विशेषाः केचिदछंदस्त्वेव प्रसि
द्धाः। केचिल्लोकेष्वपि प्रसिद्धाः। हे इष्टके त्वं मा नाम छंदोरूपासि। प्रमा नाम छंदोरूपासी त्येवं सर्वत्र योज्यं।
अग्न्यादीनां तु देवतात्वं प्रसिद्धं। हे इष्टके त्वं अग्निदेवतारूपासी त्येवं तत्रापि योज्यं॥ ॥इति पंचमो
नुवाकः॥ पंचमेनुवाके प्राणभृदिष्टकादिमंत्रा उक्ताः। षष्ठे वालखिल्यादीष्टकोपधानमंत्रा उच्यंते॥ का०॥
वालखिल्याः सप्त पुरस्तात् द्वादशस्योपरास्तु मूर्द्धासि राडिति प्रतिमंत्रमिति। वालखिल्येष्टकाः
सप्त पूर्वभागे मूर्द्धासि राडिति सप्तभिर्मंत्रैरुपधेयाः॥ इतराः सप्त पश्चिमभागे यंत्री राडिति सप्त
भिर्मंत्रैरुपदध्यात्॥ पाठस्तु॥ मूर्द्धासि राड्० यो वायत्वेति। हे इष्टके त्वं मूर्द्धा मूर्द्धवदुत्तमा [illegible]
नामासि। हे इष्टके त्वं ध्रुवा स्थिरा धरुणा धारणहेतुश्चासि हे इष्टके त्वं धर्त्री धारणं कुर्वती धरणीरू
पा चासि आयुषे आयुर्वृद्ध्यर्थं त्वामुपदधामि वर्चसे कांत्यर्थं त्वामुपदधामि। कृष्यै क्षेमस्य निष्प

नयेत्वामुपदधामि। क्षेमाय संपादितस्य धनस्य रक्षणाय त्वामुपदधामि। हे इष्टके त्वं यंत्री नियमनो-
पेता राट् दूराज्जमाना वासि। तथा यंत्री स्वयमपि नियंत्री यमनी सर्वेषां नियमनकारिणी चासि तथा
ध्रुवासि स्थिरासती धरित्री भूमिरूपा चासि। हे इष्टके इषे अन्नाय त्वामुपदधामि। ऊर्जे बलाय त्वामुपद-
धामि। रय्यै धनार्थं त्वामुपदधामि। पोषाय तद्धनपुष्ट्यर्थं त्वामुपदधामि॥ का० ॥ लोकंपृणाः पूर्व-
वदिति। तन्मंत्रप्रतीकपाठस्तु॥ लोकंपृण ता अस्येन्द्रं विश्वा इति। पूर्ववद्व्याख्येयं॥ ॥ इति षष्ठोनु-
वाकः॥ षष्ठेनुवाके वालखिल्याख्येष्टकोपधानमंत्रा उक्ताः। एतावता तृतीया चितिः समाप्ता॥ अ-
थ सप्तमेनुवाके चतुर्थ्यां चितौ वक्ष्यमाणाः स्तोमभागाख्या या इष्टकास्तासामुपधाने केचिन्मंत्रा उ-
च्यंते। सूत्रं तु चतुर्थ्यामनूकांतेषु दक्षिणोत्तरे द्वे द्वे इत्यारभ्य प्रत्नर्त्विष्टा द्वादश इत्यंतं कात्यायने-
२५० नोदाहृतं॥ तेषां पाठस्तु॥ आशुस्त्रिवृत्॰ अत्रै चतुष्टोम इति। अत्र त्रिवृत्पंचदशसप्तदशैकविंशाद्याः
स्तोमविशेषवाचिनः। स्तोमाख्य त्रिवृन्निष्ठस्य साम्न आवृत्तिभेदा निष्पद्यंते। आवृत्तिप्रकारस्तु त्रि-
वृत्पंचदशसप्तदशानां राजसूयाभिधायके एकादशाध्याये सामब्राह्मणोदाहरणेनास्माभिर्व्या- २५०
ख्यातः। एकविंशत्रिणवत्रयस्त्रिंशाद्याख्या अपि स्तोमाः सामब्राह्मणे पठिताः। अष्टादशानवद

स्तु
शास्यस्तोत्राद्यायेनोन्नेया स्तोमा न तु ब्राह्मणाम्नाताः। तदुन्नयनार्थं स्वावृत्तिप्रकारः सामसूत्रादवगंत-
व्यः। अत्र त्रिवृदाद्यश्चतुष्टोमांताः स्तोमविशेषा अष्टादशसंख्याका आम्नाताः। आशुरित्यादीनि
स्तोमविशेषणानि कानिचिद्गुणवाचिकानि कानिचिद्द्रव्यवाचीनि तथा सति गुणसंबंधं द्रव्यतादात्म्यं वा स्तो-
मेषूपवर्ण्यते। अत्र स्तोमस्तुत्या तत्तदिष्टकायाः प्रशंसनार्थमुपन्यस्यते। तत्रैवमक्षरयोजना। आशुः
शीघ्रगुणोपेतोयः त्रिवृत्स्तोमः हे इष्टके त्वं तद्रूपासि। एवमुत्तरत्रापि योज्यं। भांतो भासमानः व्योमेति
प्रसिद्धं द्रव्यं व्यत्ययेन पुल्लिंगता। धरुणो धारकः। प्रकृष्टा तूर्त्तिस्त्वरा यस्यासौ प्रतूर्त्तिः [illegible]
यर्थः। तपः प्रसिद्धं। अभीवर्त्तः सामविशेषस्तद्यो सौ दीर्घः। सहधिन्नां संख्यया वर्त्तमानः सवित्राः
स्तोमविशेषः वर्चो बलं विशेषः। संभरणः सम्यक्पोषकः। योनिः प्रजोत्पादकः। गर्भः प्रसिद्धः। ओ-
जोष्टमो धातुः। क्रतुर्ज्योतिष्टोमादिः प्रतिष्ठा स्थितिहेतुः ब्रध्नस्यादित्यस्याधिष्टपं निवासस्थानं अ-
सौ वा आदित्यो ब्रध्न इति श्रुतेरंतरालं। नाकः स्वर्गाख्यो लोकः। गरुत्मिः विपूरितत्वेन वर्तनं यस्यासौ वि-
वर्त्तः। त्रिवृत्पंचदशसप्तदशैकविंशत्रिणवत्रयस्त्रिंशा अनेनैवाम्नातक्रमेणाष्टसु दिक्षु धीयंते
= अधो वायुर्वा आयुरिति। वज्रो वै स्तोतः पंचदश इति। व्योमेति प्रजापतिर्वै व्योमा प्रजापतिः सप्तदश इत्यादिश्रुतयः पाठमंत्रानुसंधेयाः =
३

क्रमिनु विपरीतक्रमेण। अतएवापस्तंबाचार्येण क्वचिदुक्तं त्रयस्त्रिंशमारभ्य त्रिवृदंतमादिति। धर्त्रे
धारकस्थलुङोमस्त्रिवृत्संवत्सरस्तदर्थे कविद्यंशानां समूहः। एतैः स्तोमवादिभिरष्टादशभिर्मंत्रैः
स्तोमरूपत्वमापादिता अष्टादशेष्टकाउपदध्यादित्यर्थः॥ इति सप्तमोनुवाकः॥ ॥सप्तमेनुवाके
केचिदीहूयाः स्तोमीयाख्येष्टकोपधानमंत्राउक्ताः। अथाष्टमे तद्वदशिष्टेष्टकोपधानमंत्राउच्यंते॥
अग्नेर्भागइत्यारभ्यावरुणो भाग इत्यंतेन कात्यायनेन स्त्रिवृतं॥ तेषां पाठस्तु॥ अग्नेर्भागोसि॰ त्रय
स्त्रिंश स्तोम इति। हे इष्टके योयमग्नेर्भागोहविर्लक्षणः तद्दीक्षादेवता याः अधिपत्यं स्वामित्वं स्पृतं
देवानां प्रीतिकरं ब्रह्मनमंत्रजातं ब्राह्मणजातिर्धियोपि त्रिवृदाख्यः स्तोमविशेषस्तत्सर्वंत्वमसि। हे इष्ट
केयोयमिंद्रस्य भागोहविर्विशेषः यच्च विष्णोः परमेश्वरस्याधिपत्यं यदपि स्पृतं प्रीतिकरं क्षत्रं क्षत्रिय
जातिर्वायोपि यं चदशाख्यः स्तोमः तत्सर्वंत्वमसि। येमनुष्याः संतः चक्षुतवेदं व्यक्तमुच्चारयंति तेनृ
चक्षुसः ऋभिगादयस्तेषां भागो दक्षिणरूपो गवादिर्धाता तु प्रजापतेर्यदाधिपत्यं यच्च स्पृतं प्रीतिकार
णं जनित्रं जननशीलमन्नं तत्सर्वंत्वमसि। स्पृतः प्रीतिहेतुर्वायोवायुर्दिवः शाकाश्चादिदागतावक्षि
श्वचक्षुष्यात् गवाश्वादिगर्जाङ्घ्रिपदांबोदरगताः स्पृताः प्रीतिहेतवः ओजो बलमष्टम धातुर्वाया २२१

शुद्दिक्षवस्थिताः प्राणिनामनुकूलाः तादिशः समीच्यः युतोमित्र्येरवतः शुक्लकृष्णपक्षावन्ने
मियवामासाः अतएवाविधत्वादयवा अर्द्धमासाः ऋतुशब्दो देवसामान्यवाची गणविशेषाविश्वेदेवाः
तं निष्पन्नं स्पृतं प्रीतिकरं स्थानं हे इष्टके तं तत्सर्वमसि॥ का॰॥ ऋतव्ये सहस्रस्य सहस्यस्येति ॥पाठस्तु॥
सहस्य सहस्यस्य॰ सीदतमिति। व्याख्यातसमानार्थः॥ इत्यष्टमोनुवाकः॥ ॥अष्टमेनुवाके अवशिष्य
नामस्तु पास्तोमीयानामिष्टकानामुपधानमंत्रा उक्ताः। नवमे तु स्पृष्टिशब्दाभिधेया इष्टकाः सप्तदशः ता
एकयास्तुवतेत्यादिभिः सप्तदशभिर्मंत्रैः क्रमेणोपदध्यादिति विशेषः॥ तेषां पाठस्तु॥ एकयास्तुवत॰ प्रजा
मे ध्याधिपतिरासीदिति। अत्र निदानं पुरा प्रजापतिरिंद्रियादिवर्गान्देवान् मांस्तुवध्वमित्यब्रुवीत्। ते
वदेवाः केनस्तोष्याम इत्यवोचन्। एवमुक्तः प्रजापतिर्मयात्र युष्माभिश्च स्तुतिः क्रियतामित्यादि कं सर्वं
एतदेव प्रजापतिरित्यादिकेऽत पथब्राह्मणेनुसंधेयं। एकया वाचा ते देवाः प्रथममस्तुवत स्तुतिमकुर्वत् केवलंरसनया =
ततः प्रजापतिना प्रजा अधीयंत उदपाद्यंत तदानीं तासां स्पृष्टानां प्रजानां प्रजापतिरेवाधिपतिरासीत्। त्वा
म्यन्तः। तथा तिसृभिः त्रिभिः प्राणउदानोव्यानइत्येतैरस्तुवतेन तत्सामर्थ्यात् ब्रह्म ब्राह्मणजातिरस्

यतस्सृष्टानन्तरं ब्रह्मणस्पतिरितियोदेवः सोयं ब्राह्मणजातेरधिपतिरासीत्॥ ततः पंचभिः प्रा
णादिभिरस्तुवत तदानीं पंचभूतानि सृष्टान्यभूवन् तेतानांपतिः शितिकश्चिद्देवविशेषः अत्र
स एवाधिपतिरासीत् श्रोत्रे द्वे चक्षुषी नासिके वागिति ये सप्त शीर्षण्याः तैः सप्तभिरस्तुवत ततः स
प्तर्षयः सृष्टा अभूवन् धाता जगत्स्रष्टा यो देवः स एवाधिपतिरासीत्॥ नवभिरस्तुवत सप्त शीर्षण्याः
द्वाववांचाविति ये नव प्राणास्तैः स्तुतिमकुर्वन् ततः पितरोऽग्निष्वात्तादयः सृष्टा अदितिरखंडितस्य
प्रजापतेरनवखंडितायाम्नाक्तिः सैव तेषां सृष्टानां पितॄणामधिपत्नी स्वामिनी नाधिकं पालयित्री आ
सीत्॥ दश प्राणा आत्मैकादश इति एकादशसंख्याकास्तैः हृतारः इंद्रियाधिष्ठातारो देवाः प्रजापतेः
स्तुतिमकुर्वन् ततः ऋतवो वसंतादयः सृष्टास्तेषामार्तवा ऋतुपालकाः केचिद्देवविशेषा स्त एव
स्वामिनो भूवन् समानिकादश प्राणाः द्वे प्रतिष्ठाख्यो पादौ एक आत्मेति ये त्रयोदश संख्याकास्तैर
स्तुवत ततो मासा श्चैत्रादयः सृष्टाः मासाभिमानी यः संवत्सरस्तेषां स एवाधिपतिरासीत्॥ दश ह
स्त्याअंगुलयश्चत्वारो दोर्बाहवः नाभेरूर्ध्वं यच्छरीरं एतैः पंचदशभिरस्तुवत ततः क्षत्रं क्षत्रिय

२८२

स्याअंगुलयश्चत्वारो दोर्बाहवः नाभेरूर्ध्वं यच्छरीरं एतैः पंचदशभिरस्तुवत ततः क्षत्रं क्षत्रिय
जातिः सृष्टा इंद्रस्तदभिमानी देवः स्वाम्यभूत्॥ दशपादांगुलयः ऊरू द्वयं मध्ये वद्वयं येनाभे

पादद्वयं

अर्थः स्वामिवैश्ययोरितिपाणिनिः –

रवाग्य च्छरीरं एतैः सप्तदशभिरस्तुवत तदा ग्राम्याः पशवः सृष्टास्तेषां बृहस्पतिस्तदभिमानी स्वाम्यभूत्
दशहस्त्या अंगुलयो नवप्राणस्तैर्नवदशभिः शूद्रार्यावसृज्येतां शूद्रो वैश्य श्च सृष्टौ तयोरहोरात्रे स्वामि
न्यौ दशहस्त्या अंगुलयो नवप्राणस्तै एकविंशति एकविंशतिः संख्या तया
स्तुवत ततो हस्तगता दशांगुलयः दशपादगता आत्मैकविंशः इति यास्त एकविंशतिः संख्या तया
स्तुवत तत एकशफा अश्वादयः पशवः सृष्टाः तेषां वरुणोऽधिपतिरासीत्॥ दशहस्त्या अंगुलयो द
शपाद्या द्वे प्रतिष्ठे आत्मा त्रयोविंशः इति यास्त्रयोविंशतिः ख्या तया स्तुवत ततः क्षुद्राः क्षुद्राः
पशवः सृष्टास्तेषां पूषा स्वाम्यासीत्॥ दशहस्त्या अंगुलयो दशपाद्याश्चत्वारः करचरणा आत्मा पंच
विंशः इति यापंचविंशतिः संख्या तया स्तुतिमकुर्वन् तदा आरण्याः पशवो मृगादयः सृष्टास्तेषां
वायुरेवाधिपतिरासीत्॥ दशहस्त्या अंगुलयो दशपाद्यो नव प्राणा इति या नवविंशतिः या स्तु
वत। ततो वनस्पतयस्तत्र सोमोऽधिपतिरासीत्॥ दशहस्त्या अंगुलयो दशपाद्या दश प्राणा आत्मैकः
त्रिंशः इत्येकत्रिंशता तयास्तुवत ततः प्रजाः सृष्टास्तासां प्रजानां यवाः सर्वे पशवा अवयवा अपरपक्षा
ह्वाधिपत्यआसन् दशहस्त्या अंगुलयो दशपाद्या दश प्राणा द्वे प्रतिष्ठे आत्मा त्रयस्त्रिंशः इ
त्येतेनास्तुवत ततः सर्वाणि भूतान्यशाम्यन् सर्वे प्राणिनः शांता अभूवन् भरमेसस्य लोकेति श्च

२२२

तीति परमेष्ठी प्रजापतिः सर्वेषां भूतानां सह वाधिपतिरासीत् अत्र यायेष्टकायेन येन मंत्रेणोप-
धेयात्तत्तदिष्टकात्तत्तन्मंत्रप्रतिपादकदेवतारूपत्वेन ध्यातव्येत्यर्थः ॥ का० ॥ लोकंपृणाः पूर्व-
वदिति । लोकंपृणसंज्ञका इष्टकाः पूर्ववदुपदध्यात् । तन्मंत्रप्रतीकपाठस्तु ॥ लोकंपृण ता अस्यं-
द्वंदिन्वाइति । पूर्ववद्व्याख्येयं ॥ ॥ इति नवमोनुवाकः ॥ वेदार्थस्य प्रकाशेन० ॥ ॥ इति श्री सायणा-
चार्येण विरचिते माधवीये काण्वसंहितायां वेदार्थप्रकाशे पंचदशोध्यायः ॥ ॥ यस्य निश्वसितं० ॥
॥ १ ॥ ७०३ म ॥ पंचदशोध्याये द्वितीयतृतीयचतुर्थचितिविषये इष्टका मंत्रा उक्ताः । षोडशे तु पंचम-
चितिविषयेष्टका मंत्रा उच्यंते ॥ तत्र प्रथमेनुवाके असपत्नाख्येष्टकादीनामुपधानमंत्रा उच्यंते ॥ का० ॥
पंचम्यां असपत्ना अग्ने जातानिति प्रतिमंत्रमिति । पंचम्यां चितौ प्रथमं असपत्नाख्या इष्टका
अग्ने जातानिति पंचभिर्मंत्रैः क्रमेणोपदध्यात् ॥ तत्र प्रथममंत्रपाठस्तु ॥ अग्ने जातान्प्रणुद ० उक्ष्णा
इति । हे अग्ने नोस्माकं जातान् सपत्नान्ये पूर्वमुत्पन्नाः शत्रवस्तान्प्रणुद प्रकर्षेण नाशय । किंच हे जा-
तवेदो जातप्रज्ञाग्ने इये पूर्वमुत्पन्नाः इतः परमुत्पत्स्यन्ति प्रसक्तियुक्तास्तानजातान् शत्रून् प्रतिनुदस्व
उत्पत्तिप्रतिबंधेन निराकुरु सुमनाः सानुग्रहचित्तस्त्वं अहेळमानः क्रुध्यन्नोस्माकं अधिब्रूहि

अक्रुध्यन्निति शेष्यांतरं=

२२३

अत्र यज्ञे इति कर्तव्यतामुपदिशत इन्द्रादीनोपभु धनधान्यादिभिरुद्धृते संभुज्यत इत्युक्तिः तस्मिन्
नु शर्मन् त्रिशर्मणि सुखात्मके यज्ञे ते शिवरूथे प्राग्वंशसदे हविर्द्धानरूपे यज्ञगृहे तव प्रसादात् वयं
स्याम सुखिनो जिवेम ॥ अथ द्वितीयः ॥ सहसा जाता० सपत्नानिति । सहसा बलेन जातान्शत्रून्त्वया उ-
त्पन्नान्नः शत्रून्प्रणुद । हे जातवेदः अजातांश्च प्रतिनुद किंच सुमनस्यमानः अस्मासु सौमनस्यं प्रा-
प्तः सन्नोस्मानधिब्रूहि शत्रुभ्योधिकान्वद । वयमपि त्वदनुग्रहादधिकाः स्याम नोस्मदीयान्सपत्ना-
न्शत्रून्प्रणुद । न्यो न्ययः प्रणुदेत्यर्थः ॥ अथ तृतीयः ॥ षोडशी स्तोम ओजो द्रविणमिति । षोडशावृ-
त्तिभिरूपेतः षोडशीयस्तादृशः स्तोमः यच्च ओजो द्रविणं । बलरूपं धनं । हे इष्टके तदुभयरूपा त्वमसि ।
॥ अथ चतुर्थः ॥ चतुश्चत्वारिंशः स्तोमो वर्चो द्रविणमिति । योयं स्तोमश्चतुश्चत्वारिंशदावृत्त्या संपन्नः

कांति=

यच्च वर्चो बलरूपं धनं हे इष्टके तदुभयरूपा त्वमसि ॥ अथ पंचमः ॥ अग्नेः पुरीष० यजस्वेति । हे इष्टके त्वं
अग्नेः पुरीषमसि अप्सो नामासि अस्पर्शति स्तृयति विनाशयतीति प्सः न प्सातीत्यप्सः योग्नि-
स्तादृशं नामासि तस्याग्नेरित्यर्थः इत्येवं व्याख्यातसमानार्थः ॥ का० ॥ विराजो दोहो दशैव

प्सादशे=

अयंवैलोकोरवश्छंदोंतरिक्षंवरिवश्छंदोद्यौरातपथमंत्राङ्गुसंचेयं ।=

स्छंद इतिप्रतिमन्त्रमिति ।विराट्संज्ञाश्चत्वारिंशदिष्टकास्ताः प्राच्यादिदिक्षु क्रमेण दशदशोपद
ध्यात् ।। तेषांपाठस्तु ।। एवश्छंदो ० अंकांकंछंद इत्यन्ति ।एतिगच्छत्यस्मिन्सर्वप्राणिनिकाय इति एवः पृथि
वीलोकः सएव छंदोरूपेण स्थितत्वाद्वा छंदः । हे इष्टके त्वंतद्रूपासीतिशेषः । एवमुत्तरेष्वपि योजना ।
वरिवः प्रत्यन्तरिक्षे नाश्रियत इति वरिवोंतरिक्षं तदेव छंदः । शंभूः शंनिरतिशयंसुखं अस्मिन्भवतीति शंभू
लोकः ।परितोभवति व्याप्य वर्त्तत इति व्युत्पत्त्या परिभूः शब्दो दिग्वचनः । आच्छादयति आलायेन रसेन सर्वं
शरीरमित्याच्छंदः तत्प्रथमस्रष्टं प्रजापत्यात्मकं यन्मनस्तदेव छंदः । विचरति व्याप्ति कर्मा व्यविचरति व्याप्नोति
सर्वंजगदिति व्यचो सावादित्यः स्यंदति नाडीः शरीरं व्याप्नोतीति सिंधुः प्राणवायुः समुद्रवत्सस्माद्धिक
ल्पजातमिति समुद्रं मनः यद्वा समुद्रो यथा सर्वाभिर्नदीभिः पूरितोपि पर्याप्तिं न प्राप्नोति तथा शब्द
स्पर्शादिविषयैरनुग्रहमानैरस्त्वप्तिं न प्राप्नोतीति समुद्रसाम्यात्समुद्रमेवमनः शरीरवदनगच्छत्यग्नि
२५४ गच्छतीति सरिरंवाक् । कंसुखं स्तत्पनोति शरीरे धारयतीति ककुप्प्राणः त्रेधा केपीतमुदकं स्तत्प्ना
तिपिबतीति त्रिककुप्पूर्वंपक्षिदानः त्रयात्मकाः स्फूर्जः कावं अंकुपं अंकं अगकुटिलायां गतो कु
टिलगत्या आप्नोतीत्यंकुपं उदकं अंक्षेत्रोरात्र । नानारक्षितानेदक्षाणांपंक्तिरावलियस्यांसा घोरदि २८८

=उदानवायुः उदानो वै त्रिककुबिति श्रुतेरिति पाठ्यांतरं=

= विष्टारपंक्तिर्दिक् । दिशो वै विष्टारपंक्तिरिति श्रुतेः ।। क्षुरो भ्रजः असौ वा आदित्यः क्षुरो भ्रजः स्तीक्ष्णधाम्ना समानत्वात् । आच्छछंदः प्रच्छछं =
= द इत्यन्नं । तस्य सर्वप्रकारेण शरीरछादकत्वात् अन्नंवा आछछंदः प्रच्छछंद इति श्रुतेश्च । संयत् रात्रिर्वै संयच्छंद इति । वियत् द्युलोकः असौ =
= वैलोकः । असौ वैलोको वियच्छंद इति श्रुतेः । बृहत् अयं वै लोको बृहच्छंद इति । रथंतरं अंतरिक्षं वै रथंतरं छंद इति । निकायः वायुः वायुर्वै =
रपंक्तिः पदानां पंक्तयो यस्मिन्सोयंलोकः पदपंक्तिः विष्टारपंक्तिः विस्तारिता आपणे प्रसारितावस्त्र
नां पंक्तयो यस्याः सा वैश्यजातिः विष्टारपंक्तिः एवं क्षुरो भ्रज प्रभृतीनामुत्तरेषां छंदसां योगिक्या व्याख्याय
र्थातिरेषुवृत्तिः शतपथब्राह्मणादवगंतव्या यद्वा गायत्र्यादिवदक्षरसंख्याविशेषाभिधेतोतरणपत्रेष्ट
वो वरिवस्यादिभिर्नामभिः प्रतिपाद्यंते । तानिवै छंदांसि सुवर्ग्याण्यासंस्तैर्देवाः सुवर्गंलोकमा
यन्निति तैत्तिरीयश्रुत्या तेषामेवः प्रभृतीनां छंदसां स्वर्गसाधनता म्नाता अत्रेष्टकासु तद्रूपेणस्तु
तिः ।। इति प्रथमोनुवाकः ।। ।। प्रथमेनुवाके असपत्नादीष्टकोपधानमंत्रा उक्ताः । द्वितीये लोकंताग्ने
स्तोम= ष्टकोपधानमंत्रा उच्यंते ।। का० ।। लोकंताग्नारश्मिना सत्याय त्वेति प्रतिमंत्रमिति । अस्यानुवाकस्य स्तो
मा व्यनुज्ञापने विनियोगात् त्रिवृदादिस्तोमसंबंधात् स्तोमा इति वा मन्या स्तोमभागाः तदनुवाक
संबंधिनोमंत्राः । तदुपधेया इष्टकाश्च तथैव व्यपदिश्यंते । तास्त्रिंशदिष्टका अनेनानुवाकेन प्रति
मंत्रमुपदध्यादित्यर्थः ।। तत्पाठस्तु ।। रश्मिना सत्याय सत्यं जिन्वेति । हे इष्टके त्वं रश्मि
उपहितासती ना तेजोरूपेण अन्नेन सत्याभिमानिदेवतार्थं सत्यं जिन्व प्रीणय । रश्मिरसावित्यमिति श्रुतेः प्रेतिना प्रके
= निकाय इति । विवधः अंतरिक्षं वै विवध इति गिरः अन्नं वै गिरश्छंद इति । भ्रजः अग्निर्वै भ्रजश्छंद इति । वागेव सधस्तुप्छंदो वागनुष्टुप्छंद इ =
= ति । एवो वरिवः सर्ववत् । अन्नं वै वयश्छंद इति । अग्निर्वै वयस्कृच्छंद इति । असौ वै लोको विष्पर्द्धा इति । अयं वै लोको विशालं छंद इति । अंतरि =
= क्षं वै प्रदिश्छंद इति । असौ वा आदित्यो दूरोहणं छंद इति । पंक्तिर्वै दतंद्रं छंद इति आपो वा अंकांकं छंद इति पाठ्यांतरं ।। = २

र्षाणा देहमेति गच्छतीति प्रेतिरन्नं तेन धर्मं जिन्व प्रीणय। प्रेतिरन्नमिति श्रुतेः। किमर्थं धर्मणा। अत्र विकल्पे
र्यस्य धर्माय धर्मार्थं। अन्विसा अन्नेन अन्वितिरन्नमिति श्रुतेः दिवं द्युलोकं जिन्व तर्पय दिवा द्युलो
कार्थं संधिना सम्यग्बलादिकं धीयते स्मिन्निति संधिरन्नं तेन अंतरिक्षं जिन्व अंतरिक्षेण अंत
रिक्षार्थं। प्रतिधिना प्रतिधीयते स्मिन्निति प्रतिधिरन्नं तेन पृथिव्या पृथिव्यै पृथिवीं जिन्व विष्टंभेन

देहादिविष्टंभननिमित्तत्वात् विष्टंभोन्नं तेन वृष्ट्यै वृष्ट्यर्थं वृष्टिं जिन्व प्रवया प्रवाप्यत इति
प्रवा अन्नं तेन अह्ना अह्ने अहर्जिन्व देहांतर्गत द्वासप्ततिसहस्राणि नाडीरन्वीयते नुगच्छतीत्य
नीरन्नं तया अनुया ... रात्र्या रात्र्यभिमानिदेवतार्थं रात्रीं जिन्व उशिजा सर्वैः काम्य
मानत्वादुशिगन्नं तेन वसुभ्यो र्थाय वसून् जिन्व। प्रकेतेन प्रकर्षेण केतयन्ते ज्ञायन्ते अनेनेति प्रके
तमन्नं तेन आदित्येभ्यो र्थाय आदित्यान् जिन्व। तंतुना तन्यते विस्तार्यत इति तंतुरन्नं तेन राय
स्पोषेण धनपुष्ट्यर्थं उपहिता सती रायस्पोषं जिन्व। संसर्पेण सर्प्यते गम्यते इतस्ततो यदर्थं सं
सर्पोन्नं तेन श्रुताय श्रूयत इति श्रुतं तदर्थं श्रुतं जिन्व। ऐडेन इडा अन्नं तद्रसो रेडः तेन ओषधीभिः ओष
धीस्त्वमोषधीर्जिन्व उत्तमेन तनूभिस्तन्यते ... तनूर्जिन्व। वयोधसा वयः शरीरा

अन्वीयते इव - नैव्य

२८५

२८५

क्षीण

वस्थानं धत्ते पोषयतीति वयोधोन्नं तेनाधीतेनाधीतार्थं अधीतं जिन्व अभिजिता सर्वजयहेतुरन्नम
भिजित् तेजसा तेजसे तेजो जिन्व येन जीवनं प्रतिपद्यत इति प्रतिपदन्नं हे इष्टके यतस्त्वं तादृग्रूपासि
तदर्थं त्वां उपदधामीति शेषः प्रतिदिवसमनुपद्यत इत्यनुपदन्नं हे इष्टके यतस्त्वं तादृग्रूपासि तद
र्थं त्वामुपदधामीति शेषः। संपादसि। हे इष्टके त्वं संपद्रूपासि तदर्थं त्वां उपदधामि। अन्नं वै संपदिति
श्रुतेः। तेजसः कारणत्वात्तेजोन्नं त्रिधावर्त्तत इति त्रिवृदन्नं प्रकर्षेण प्रवर्त्तत इति प्रवृदन्नं विशेषे
णवर्त्तत इति विवृदन्नं समेन वर्त्तत इति सवृदन्नं सुधमाक्रमतीत्याक्रमोन्नं देहस्य सर्वविषयत्वात्से
... उत्क्रामतीत्युत्क्रमोन्नं उत्क्रांतिरूत्क्रमेष्टं गमनं य
क्रमत इति संक्रमोन्नं अपत्योत्सर्थं च तादृग्रूपेणोत्क्रामती ... वेषश्रीर्वै ... अस्यत
स्यान्नस्य अधिपतिना अधिकं पालकेन ऊर्जोन्नं रसेन ऊर्जं जिन्व॥ ॥इति द्वितीयोनुवाकः॥ ॥द्वितीयेनुवाके लोक
दन्नं। सत्र। ता त्रायत इति त्रमन्नं तदर्थं सत्रं जिन्व॥ ॥ तृतीये नाकसदाख्या इष्टका उच्यंते॥ का०॥ नाकसदो राज्यसीति प्रतिमंत्रमि
नागारष्टका उक्ताः। तृतीये नाकसदाख्या इष्टका उच्यंते॥ का०॥ नाकस्य पृष्ठे स्वर्गलोके यजमानं
ति। नाकः स्वर्गः सद्यते यैर्मंत्रैस्ते नाकसदः तथा च मंत्रलिंगं नाकस्य पृष्ठे स्वर्गे लोके यजमानं

रेतोरूपे =

न सादयंत्विति। तैर्मंत्रैरुपधेया इष्टका अपि नाकसद इत्युच्यंते॥ तत्र प्रथम मंत्रपाठस्तु॥ राज्ञ्यसि
प्राची दिक्॰ सादयन्त्विति। हे इष्टके राज्ञी राजमानाया प्राची दिक् त्वं तद्रूपासि ते तव वसवो इष्टसंरक्ष
का देवा अधिपतयो अधिकं पालयितारः। अग्निस्त्वां उपद्रवकारिणीनां हेतीनां परकीयायुधानां प्रतिधर्त्ता नि
वारकर्त्ता यो यं त्रिवृदाख्यः स्तोमः स त्वां पृथिव्यां श्रयतु स्थापयतु यदाज्यमुक्थं आज्यनामकं प्रउगे वायाग्न
येइत्यादिकं शास्त्रं मस्मिन् स्थाने त्वामव्यथायै चलनराहित्याय स्तभ्नातु दृढीकरोतु अंतरिक्षे त्रैलोक्ये प्र
तिष्ठित्यै प्रतिष्ठापनस्य रथंतरं साम त्वां स्तभ्नातु। देवेषु मध्ये प्रथमजाः प्रथमजा विन ऋषयः प्राणाः
प्राणा वा ऋषय इति श्रुतेः यद्वा ऋषयो नारदाः अतएव स्मर्यते देवर्षिनारदस्तथेति एवं ऋतार ऋषय
स्त्वां दिवो मात्रया आकाशस्य यत्परिमाणं तेन परिमाणेन प्रथंतु प्रथयंतु विस्तारयंतु। कीदृश्यामा
त्रया वरिम्णा श्रेष्ठया न केवलम् ऋषयः प्रथयंतु किंतु विधर्त्ता चायमधिपतिश्च योयमिष्टकानां निष्पाद
यिता यश्च पालकस्तावपि प्रथयतां यद्वा अयं विधर्त्ता विशेषेण धारयिता तत्पोषयिता वा गभिमानी
देवः अधिपतिः प्रधानभूतो मनो अभिमानी देवश्च प्रथयतामिति यावंतः ते सर्वे दिगग्निवस्वादयः सं

उरुत्वेन चेति वा

विदानाः परस्परमैकमत्यं प्राप्ता नाकस्य पृष्ठे स्वर्गसदृशस्य क्षेत्रस्योपरि त्वां त्वां सादयंतु। एतत्स्थल
तोगाथ्यं यजमानं च स्वर्गे लोके सादयंतु एवमुत्तरेष्वपि योज्यं॥ अथ द्वितीयः॥ विराळसि दक्षिणा॰
सादयन्त्विति। स्तोमाः सामानि राजसूय प्रकरणे व्याख्यातानि। वायुरग्रेगा इत्यादिकं शास्त्रं प्रउगं त्रि
ष्टुंसमानं॥ अथ तृतीयः॥ सम्राळसि प्रतीची॰ सादयन्त्विति। इदं वसो सुतमंध इति मरुत्वतीयं शा
स्त्रं॥ अथ चतुर्थः॥ स्वराळस्युदीची॰ सादयंत्विति। अभि त्वा शूर नोनुम इत्यादिकं शास्त्रं निःकेवल्यं
॥ अथ पंचमः॥ अधिपत्न्यसि बृहती॰ सादयंत्विति। अधिकं पालयित्री अधिपत्नी बृहती दिक् ऊर्ध्वे
र्ध्वा दिक् तत्सवितुर्वरेणी महइत्यादिकं शास्त्रं वैश्वदेवं वैश्वानराय पृथुपाजसे इत्यादिकं शास्त्रमाग्नि
मारुतं। शिष्टं व्याख्यातानि प्राय मेतत्। अतो यान्युदाहृतानि आज्यादिशास्त्राणि तान्याश्वलाय
नोदर्शयिति। प्रवो महइत्याज्यमुपसंतनुयात् दिति वायुरग्रेगा यज्ञप्रीरिति सप्तानां पुरोरुचां तस्यां
स्तस्य उपरिष्टात् चतुर्ऋचाशिष्टायवी हि समतन्वाद्वितीयां प्रउगे त्रिरिति मरुत्वतीयं शास्त्रं शंसेद्ध
र्यो वो भितिमाध्यंदिन शास्त्रादिष्वाहाव अन्वारंभं अन्वारथं यथोयथोत यइदं वसो सुतमंध इति मरु
त्वतीयं स्य प्रतिपदनुचरा विति निष्केवल्यस्या भित्वा शूर नोनुमो भि त्वा पूर्वपीतय इति प्रगाथो स्तो

श्रियानुरूपोयदिरथंतरंपृष्ठमितितत्सर्वंविकुर्वाणमिहेधानोदेवसवितरित्यत्रवैश्वदेवस्यप्रतिपदनुचरावि
तिस्वयग्नमाग्निमारूढंतंतस्याप्राच्छन्नावायच्छ्रास्यावेदधर्वसइतिरासेतानमुत्तमेनवचनेनवैश्वानरा
यपृथुप्राकंसंस्तुतिःइति॥ ॥इतितृतीयोनुवाकः॥तृतीयेनाकसदाख्याइष्टकाउक्ताः।चतुर्थेतुपं
चचूडाख्याइष्टकाउच्यंते॥का०॥अयंपुरइतिपंचचूडाः प्रतिमंत्रंप्रतिदिशमिति।याःसर्वासामिष्टका
नांशिखास्थानीयास्ताःपंचपंचमंत्रैरुपदध्यादित्यर्थः॥तत्रप्रथममंत्रमाहस्तु॥अयंपुरोहरिकेशःसू
दध्मइति।हरिकेशःहिरण्यवर्णकेशसमानाज्वालायस्यासौहरिकेशः।सूर्यरश्मिमयश्चरश्मयोयस्यासौ
सूर्यरश्मिः।एवंभूतोयोयमिष्टकारूपोग्निःपुरःपूर्वस्यांदिशिव्यवस्थापितःतस्याग्नेःरथगृत्सःरथगृ
त्सोमेधावीरथयुद्धकुशलइत्यर्थः।रथेओजोबलंयस्यसरथौजाः।चकारौसमुच्चयार्थौ।एतन्नामकौसे
नांनयतीतिसेनानीःग्रामंनयतीतिग्रामणीःतौसेनानीग्रामण्यौवासंतिकौमासौपरिचारकौ।तथापुंजी
कृतरूपलावण्यसौभाग्यगुणस्थलापुंजिकस्थला।क्रतूनांसंकल्पानांस्थलानिवसितावताक्रतुस्थलाएत
दाख्येदिगुपदिष्टेप्सरसौपरिचारिकेदंदशूकाःपशवोदंशनशीलाव्याघ्रादयःपशुवर्गःपौरुषेयः
पुरुषसंबंधीहेतिरायुधंवधोहननशीलःप्रहेतिःप्रकृष्टमायुधंएवंभूतोहेतिप्रहेतीअथायुधविशेषौ।

२५७

यस्याग्नेरिदंसर्वमस्ति।हेइष्टकेत्वंदग्निस्वरूपासीत्यर्थः।योयमग्निर्यौचसेनानीग्रामण्यौयेचाप्सरसौ
येचहेतिप्रहेतीतेभ्यःसर्वेभ्योनमोस्तुतेसर्वेनोस्मान्मृळयंतु।तेनोस्मानवंतुरक्षंतु।यंवैरिणंतेवयं
द्विष्मःयद्वेषंकुर्मः।यश्चवैरीनोस्मान्द्वेष्टितंवैरिणंएषांहेतिप्रहेत्यादीनांजंभेदंष्ट्राकरालेमुखेवोद
ध्मःस्थापयामः।अथद्वितीयः॥अयंदक्षिणा०दध्मइति।विश्वानिकर्माण्यग्निहोत्रादीनियस्यसो
यमग्निर्विश्वकर्मादक्षिणाद्दक्षिणस्यांदिशिस्थितस्तस्यरथस्वनःसेनानीःरथेचित्रोग्रामणीर्मा
वयंसेनांजनाइतिमेनासैवमेनकासमानाजननानांसहजन्यामेनकेतिसहजन्येतिचाप्सरसोर्नामधे
यं।यातुधानारक्षांसिवेसर्वांतरजातिभेदोवसंतव्यः।हेतिप्रहेतीअप्यायुधविशेषौ।तत्रयातुधा
नाःक्रूरास्तीक्ष्णाहेतिस्वरूपाः।रक्षांस्यतिक्रूराणिअतितीक्ष्णाप्रहेतिस्वरूपाणि।यस्याग्नेरिदंसर्वं
हेइष्टकेत्वंदग्निस्वरूपासीत्यभिप्रायः।शिष्टंव्याख्यातं।अथतृतीयः०।अयंपश्चाद्विश्वव्यचा०
दध्मइति।विश्वंव्यचतिव्याप्नोतीतिविश्वव्यचाः।सोयमग्निःपश्चात्प्रतीच्यांदिशिवर्त्तते।तस्यरथप्रो
तःरथेवस्थितः।प्रोतइव।असमरथोन्यैरथिभिरतुल्यः।प्रम्लोचंतीपुमांसंप्रसाद्यानंदयंतीसद्दि

तथा चोर्वशी वाक्यं। ध्रु तस्य स्तोकं सश्चद् स्त्रे आ भा मिति = ४

तस्याः स्वभावः। अनुम्लोचंतीसरवार्थः। सर्वमन्यत्पूर्ववद्व्याख्येयं॥ अथ चतुर्थः॥ अयमुत्तरात्सयं०द
ध्वसुरिति। सम्पकूयत्त्वात्संवसु धनंयस्याग्नेः सोयंसंयद्वसुः सोग्निः उत्तरादुत्तरस्यां दिशि वर्ततेता
र्क्ष्यः तीर्णे तरिक्षे क्षियति निवसतीति तार्क्ष्यः। अरिष्टनेमिः अनुपहिंसितो युधः। विश्वाचीति विश्व
दृष्ट्वा प्रत्येकं नत्रीलाघताची। घृताची घृतं वै अप्सरसाम् अन्नं आपो हे तिर्वातः प्रहेतिः शेषं पूर्ववत्॥
॥ अथ पंचमः॥ अयमुपर्यर्वाग्वसुः० दृष्टमुरिति। अर्वाग्वसुरर्वाङ्मुखत्वेन वसानात्मेघाङ्कूरो पततत्वा
द्वैधतोग्निस्तस्य वसुच्यते। सर्वोपर्यूर्ध्वायां दिशि वर्त्ततेऽस्याग्नेः सेनां जयतीति सेनजित् सेनानी
ग्रामणी सेनानायस्यासौ सुषेणो ग्रामणीः उरुः पृथुः कामो वद्गीयस्याः अस्या अस्ती सुर्वशी॥ रूपलावण्या
दिभिर्या सर्वमेव पुरुषाणां चित्तमन्युपैतीति पूर्वचित्तिः। एतेष्वप्सरसो जयहेतुः शब्दविशेषोऽवस्फूर्जन्
तिशयया सर्वमेव पुरुषाणां चित्तमन्युपैतीति पूर्वचित्तिः। एते अप्सरसो जयहेतुः प्रकाशो विद्युत्प्रसिद्धा एतावपि हेतिप्रहेति रूपावायुधविशे
स्फूर्जतिर्वज्रनिर्घोषः जयहेतुः प्रकाशो विद्युत्प्रसिद्धा एतावपि हेतिप्रहेतिरूपावायुधविशे

स्फूर्जतिर्वज्रनिर्घोषः जयहेतुः प्रकाशो विद्युत्प्रसिद्धा एतावपि हेति प्रहेतिस्तूपावायुधविशे
षो॥ त्रिष्टुप्स्पष्टं॥ इति चतुर्थेनुवाकः॥ ॥ चतुर्थेनुवाके चूडाख्या इष्टका उक्ताः। पंचमे छंदस्या इष्टका
उच्यंते॥ का०॥ छंदस्यास्तिस्र स्तिस्त्रो नैकांतेषु पुरस्ताद्गायत्रीरग्निर्मूर्द्धेति प्रत्यृचमिति। गायत्र्या
दिछंदस्काभिरूपधेया इष्टका छंदस्याः। ता अनूकादि प्रदेशेषु तिस्रस्तिस्रउपदध्यात्। तत्र पूर्व

२२८

भागे गायत्री छंदस्काभिर्ऋग्भिरूपधेया इष्टकाः अग्निर्मूर्द्धेति तिसृभिरृचेनक्रमेणोपदध्यात्॥ तत्र प्रथमा॥
अग्निर्मूर्द्धा० जिन्वतीति। अयमग्निरादित्यरूपेण दिवो द्युलोकस्य ककुदिव स्थितो मूर्द्धा शिरः स्थानीयः
तथा पृथिव्याः पतिः दाहपाकादिकारित्वेन पालकोप्ययं। किंच अपां रेतांसि उदककार्याणि स्थाव
रजंगमशरीराणि जाठराग्निरूपेण जिन्वति प्रीणयति॥ अथ द्वितीयः॥ अयमग्निः० रयीणामिति। अ
यं समिध्यमानोग्निः सहस्रिणः सहस्रसंख्यावतः शतिनः शतसंख्यावतः वाजस्यान्नस्य पतिः अत
श्च मूर्द्धा शिर एव उत्तमः कविर्विद्वान् तादृशो रयीणां धनानां दाता भवतु॥ अथ तृतीयः॥ त्वामग्ने पुष्क
रा० वाघत इति। हे अग्ने अथर्वाख्य ऋषिः पुष्करादधि पद्मपत्रस्योपरि त्वां निरमंथत् मथनेन उत्पादितवान्
इति। कीदृशं त्वां विश्वस्य वाघतः सर्वस्य जगतो वाहकं। पुष्करपर्णे ह्येनमुपश्रितं मथित्वा दर्शितं कि
थितवान्। अत एव तैत्तिरीये पंचमकाण्डे ब्राह्मणमाम्नातं। पुष्करपर्णे ह्येनमुपश्रितमविंददिति। किं
दृशात् पुष्करात् मूर्द्ध उत्तमांगवत् शिरसस्थात्। विश्वस्य वाघतः सर्वस्य जगतो वाहकात्। इदं हि पुष्क
रपर्णमग्निमंथनस्य यज्ञनिष्पादनादिद्वारा सर्वं जगन्निर्वहति॥ का०॥ उत्तरा अयुरस्तात्त्रिष्टुभोरे
तः त्रिष्टुप्छंदस्काभिर्ऋग्भिरूपधेया इष्टकाः त्रिष्टुभः ता स्त्रि
तः श्रीणवेलायां भुवो यज्ञस्येतीति। त्रिष्टुप्छंदस्काभिर्ऋग्भिरूपधेया इष्टकास्त्रिष्टुभः ता स्त्रि
स्रो गायत्रीष्टकानां पूर्वभागे उपदध्यादिति त्रिष्टुभः॥ तत्र प्रथमा॥ भुवो यज्ञस्य० हव्यवाहमिति। अय

२८९

मग्निहोत्रिणां

अयातेरामुमिति नाकमणिः

अयमग्निर्नृलोकस्य तत्रानुष्ठेयस्य यज्ञस्य तस्मिन्यज्ञे प्रवर्त्तकस्य रजसो रजोगुणस्य च नेता निर्वाहकः।
तादृशाहे अग्ने यत्र यस्यां दिवि सूर्यस्य पोषकत्वानि युक्तिः रथेभिरंतरायो ज्यनानाभिः द्विवाभिरूक्षा
माभिरस्वजातिभिः सचसे सम्भवेषि। तस्यां दिवि मूर्द्धानं शिरोवदुन्नतिं दधिषे धारयसि कीदृशं मूर्द्धा
नं स्वर्षा स्वः स्वर्गस्य पतिः सर्वदा तिष्ठती ति स्वर्षास्ते स्वं चर्षा सोमपात्रा द्रवत्सु द्विङ्गोपां। हे अग्ने त्वमस्मि
न्यज्ञे हव्यवाहं हविषः प्रापिकां जिह्वां ज्वालां च कृथ करोषि॥ अथ द्वितीयः॥ अबोध्यग्निः० नाकमच्छेति।
जनानामृत्विजां संबंधिन्या समिधा अयमग्निरबोधि प्रबोधितः प्रज्वलितो भूत् तत्र दृष्टांतः। आ
यतीमुषासं प्रति धेनुमिव उषःकाले समागते सति दोहनाय यज्ञाग्नां धेनुं यथोत्थापयंति तद्वत् किं
चाहुतिभिर्दीप्तस्य बुध्यमानस्याग्नेर्भानवो रश्मयः अर्चींषि प्रोहं जिहानाः प्रकर्षेणोद्गच्छंतो नाक
मच्छ स्वर्गमभिप्राप्तुं प्रसिस्रते अतिशयेन प्रसरंति। तत्र दृष्टांतः। यह्वा इव वयां वीनां पक्षिणां मध्ये
यह्वाः महांतः पक्षिणो यथा प्रकर्षेणोत्पतंति तद्वत्। यद्वा यथा महांतो जातपक्षाः पक्षिणः प्रवयां तंगे
वयस्कां वृक्षस्य शाखां उज्जिहानाः ऊर्ध्वं गच्छंति तद्वत्॥ अथ तृतीया॥ अवोचाम कवये० मन्त्रेदिति।
वयं कवये क्रांतदर्शिने वेधसे वचो वाक्यं अवोचाम। कीदृशाय कवये मेध्याय यज्ञयोग्याय अग्नये चायच

२८९

च्छोकामानां वर्षयित्रे गविष्ठिरः गविष्ठिराय भूमौ स्थिरत्वेनावस्थिताय कीदृशं पूर्ववचः अग्नौ नमस्या
स्तोमं अग्निविषये नमस्कारेणायुक्तं स्तोत्ररूपं अत एव वंदारु वंदनशीलं तत्र दृष्टांतः। दिवि द्युलोके
रुक्मं रोचमानं उरुव्यचं विस्तीर्णां तिमादित्यं संख्यावंदनादिषु ब्राह्मणैः प्रयुक्तं स्तुतिरूपं वाक्य
मध्वरं आश्रयति तद्वदस्मद्वचोपि वह्निमाश्रयतु॥ का०॥ जगती पप्वादय भिर्हेतीति। जगती छं
दस्काभिर्ऋग्भिस्तरूपधेयाइत्यस्याः जगत्यः स्याः पश्चिमतोऽयमिहसादिभिस्त्रिस्त्रिभिर्ऋग्भिः रूपधेयाद्
ति॥ तत्र प्रथमा॥ अयमिह प्रथमो० धायि धातृभिरिति। सेयमत्र तृतीयेध्याये उपप्रयंतद्त्सेतस्मिन्नेवाके
व्याख्याता॥ अथ द्वितीया॥ जनस्य गोपा० जुवितिरिति। अयमग्निर्जनिष्ट सन्नः किमर्थं सुवितायनव्यै नवायसे सर्वः।
से सुष्टुतायस्तुतियुक्ताय कर्मणे एतत्कर्मसिध्यर्थमित्यर्थः। कीदृशोग्निर्जनस्य गोपाः प्राणिनां
रक्षकः जुदक्षोत्यंतकुशलः जागृविः कर्मणि सावधानः घृतप्रतीकं मुखे यस्यासौ घृतप्रतीकः
तादृशोयमग्निर्बृहता प्रौढेन दिविस्पृशा द्युलोकस्पर्शिना ज्वालासमूहेन द्युमद्दीप्यमानः शुचिः शु
द्धः सन् भरतेभ्यो यजमानेभ्यः आकुलयजमानार्थं विभाति विशेषेण भासते॥ अथ तृतीया॥ सो

मुखं प्रतीकं मुखेनेत्येतदिति मुखे

अग्निर्देवेभ्य उदक्रामत् लोपः प्रावित्रादिस्यादिशातपथाश्चैरव्यपि। का०भिरतानमिसवधेये। =

मग्ने अंगिरसो गुहा० मेमिरिइति। हे अग्ने अंगिरसो महर्षयस्त्वामन्वविन्दन् अन्विष्यौ लब्धवंत। कीदृशं त्वां गुहाहितं
अरण्याश्रंतिषुगोप्यस्थानेषु अवस्थितं वनेवने भूतिश्रियाणं तस्मिंस्तस्मिन्नरण्ये दावाग्निरूपेणाश्रितं।
स० त्वं सह श्रेष्ठं बलमबलं व्यमथ्यमानो जायसे हे अंगिरः अंगसोधवयु० अग्ने त्वां सहसस्पुत्रं बल
स्यपुत्रमाहुः। महताबलेन मथने सति जायमानत्वात्॥ का०॥ अपरास्ताश्योनुष्टु० सखायः सं
वश्चतीति तिस्रोनुष्टुभोग्निरूपस्यात्॥ तत्र प्रथमा॥ अनुष्टुप् छंदस्का निर्ऋग्निरूपधेयाइष्टका अनु
ष्टुभः ता जगती इष्टकानां पश्चिमभागे सखायः संवइति तिस्रो निर्ऋग्निरूपदध्यात्॥ तत्र प्रथमा॥ सखा
यः संवः० सहस्वत इति। हे सखायः परस्परसख्ययुक्ताऋत्विग्यजमाना वो युष्माकं सम्यंचमभिषंसमीचीनम
तो स्तार्थं संपादयत समित्स्योपसर्गस्यापच्छित ऋषो ध्याहृतः एष्यं चाग्नये सोमं स्तोत्रं संपादयत। की
दृशायाग्नये क्षितीनां निवासहेतूनां मध्येव र्षिष्ठाय बृहत्तमाय ऊर्जोनपात्रे बलस्यऔपत्याय चित्रे विनाभ्रम
कुर्वते सहस्वते सयमतिशयेन बलवते॥ अथ द्वितीया॥ सं सं समिद्युव० न्याजरेति। हे वृषन्कामानां वर्ष
कोग्ने विश्वानि सर्वाणि फलानि आ आलोच्य संसमिद्धसंपाद्य संपादयेव युवसे यजमानेन निश्रयसि
अर्यईश्वरस्समागस्य इळस्पदे पृथिवीरूपाया वेद्याः स्थाने समिध्यसे सम्यक् ज्वाल्यसे सता द्वत्रोम
यद्वा ऊर्जो निश्चे अपांपौत्राय। अद्भ्य ओषधिवनस्पतयो जायंते तेताभ्योग्निर्जायत इति श्रुतेः। पुनः कीदृशाय =३

हाऋत्नावस्त्वं नो अस्मभ्यं वसूनि धनानि संभाजर सम्यगाहृत्य प्रयच्छ॥ अथ तृतीया॥ त्वामग्ने हविष्मंतो० नुष
भिति। हे अग्ने मर्त्तासो मरणधर्माणो मनुष्या हविष्मंतः पोषोगृहीतहविषो यजमाना देवं देवनादिगुणयुक्तं
त्वांईळते स्तुवंति। अहमपि त्वां जातवेदसं सर्वज्ञं मन्ये जानामि। सत्वं आनुषक् अनुषक्तः सन् हव्याहवींषि
वक्षिवहसि॥ तत्र वैकल्पिकी इष्टका तुरीया॥ सोग्निश्चित्रश्रवस्तमं० वोळ्हवइति। चित्रं श्रवो विचित्राकीर्तिर्यस्या
सोचित्रश्रवाः अतिशयेन चित्रश्रवाः चित्रश्रवस्तमः पुरूणां बहूनां यजमानानां प्रियः पुरुप्रियः तथाविं
धहे अग्ने विश्वप्रजासु मध्ये जंतवः ऋत्विग्रूपाजनाः त्वां हवंते आह्वयंति किमर्थं हव्याय वोळ्हवे हविर्वोढुं
कीदृशं त्वां शोचिष्केशं शोचीषि ज्वालास्वके शस्थानीयायस्यासौ शोचिष्केशस्तं॥ का०॥ अथो ऋग्वेलो
याः पुरस्ताद्बृहती एनावइतीति। बृहती छंदस्का निर्ऋग्निरूपधेयाइष्टकाः बृहत्यः ता अषाढ इष्टकायाः
एवं जागे एनावइति तिस्र निर्ऋग्निरूपदध्यात्॥ तत्र प्रथमा॥ एनावो अग्निं० मस्तमिति। हे ऋत्विग्यज
मानावो युष्माकं संबंधिनमग्निं एनानमसा एतेन नमस्कारेण युक्तोहमाहुवे आह्वयामि। कीदृशमग्निं
ऊर्जोनपातं नपातमविनाशयितारं प्रियं यजमानानां प्रीतिहेतुं चेतिष्ठं अतिशयेन चेतयितारं अरतिं
स्वध्वरं शोभनस्य क्रतोर्निष्पादकं विश्वस्य दूतं सर्वस्य ज
गतिरूपरमस्तद्रहितं सर्वदोषयुक्तमित्यर्थः।

२९०

२९

गतो दूतवत्कार्यकारिणं सर्वस्य हिंगं हे दाहपाकादिकार्यं करोति अमृतं मरणरहितं मनुष्यवद्देवानां
सहसा मरणं नास्ति ॥ अथ द्वितीया ॥ विश्वस्य दूतं० स्वाहुत इति । विश्वस्य दूतं सर्वस्य जगतो दूतवत्का
र्यकारिणं अमृतं अमरणं त्वा त्वाम् अग्निं आहुयामि । पुनर्वचनमादरार्थं यमग्निमाहुवे सोऽग्निर्विश्वतो

अक्रोधमाना

जसा । विश्वस्य नो कारो अरुषा अरोचमाना वश्वा योजते रथे युनक्ति ततः स रथाग्निः स्वाहुतः सुहुतः आ
हुतः सन्न दुद्रवत् गच्छति ॥ अथ तृतीया ॥ स दुद्रवत्स्वा० जनानामिति । स्वाहुतः ऋत्विग्भिः सुष्ठु कर्मण्या
हुतः सोऽग्निर्वसूनां जनानां निवासिनामर्थिनां प्राणिनां संबंधि देवं दीप्यमानं राधो हविर्लक्षणं धनं प्र

अध्यासआ
दरार्थः=

ति दुद्रवत् । आगच्छतु ईद्रः इन्द्रोऽग्निः सुब्रह्मा ऋत्विग्रूपो ब्रह्मा यस्यासौ तादृशः यज्ञेन मंत्रैर्युक्तो वा
यज्ञीयः यजनीयः सुष्ठु अमी यज्ञेन कर्मवान् ॥ का० ॥ अपरा गायत्री यज्ञ उष्णिहग्ने वाजस्येतीति ।
यज्ञीय जनीयः पूजनीयः सुशमी शोभन कर्मवान् ॥ का० ॥ ... उपधेयाद्दष्टका उष्णिहस्तागायत्री ष्टकाख्यः पश्चिमजविनीरू
उष्णिक् छंदस्काभिस्तिसृभिर्ऋग्भिः उपधेयाइष्टका उष्णिहस्तागायत्रीष्टकाख्यः पश्चिमजविनीरू

२९२

पद्याल् ॥ तत्र प्रथमा ॥ अग्ने वाजस्य० श्रवद् इति । सहसो बलस्य यहो हे सूनो जातवेद उत्पन्नं जगद्वि

२९१

आग्ने गोमतो गोभिर्युक्तस्य वाजस्यान्नस्य ईशानः त्वं अस्मे अस्मासु महि प्रभूतं श्रवो महती कीर्तिं महद्धनं
वा धेहि संपादय ॥ अथ द्वितीया ॥ स इधानो० दीदिहीति । पुरूवसु बहुलं अनीकं मुखं सैन्यं वायस्यास्मा

पुर्वणीकः तादृशा हे अग्ने सत्वमस्मभ्यं रेवत् रयिवत् धनवत् धनयुक्तं गृहक्षेत्रादि दिके दीदिहि दीपयस्व
कीदृशस्त्वं इधानो दीप्यमानः वसुर्निवासहेतुः कविः क्रांतदर्शी अग्निरग्रणीः प्रथमं यज्ञं प्रवर्त्तकृदसथः ।
गिरा मंत्ररूपया वाचा ईळेन्यः स्तुत्यः ॥ अथ तृतीया ॥ क्षपो राजन्नुत० दहप्रतीति । हे अग्ने वस्तोरहनि रक्षसेराक्षसान्
क्षपः क्षपय उतापि च उषसः उषःकालान् अपि च तृतीया या असं तं संयोगवाचि त्वात् सर्वेष्वहस्तु स
वेषप्युषः कालेषु राक्षसान्विनाशयेत्यर्थः हे राजन् दीप्यमानाग्ने न केवलं स्वकीयसेनामुखेन संदह
सां तेषणं उत त्मना आत्मनापि स्वयमपि क्षपयेति मुखविदारणेवाजिनाजं न शब्देन ज्वाला ... दपल दह
ने तिग्मास्ती क्ष्णा जंभ ज्वाला यस्यासौ तिग्मजंभः हे तिग्मजंभ न वर्त्म दह सततं रक्षसोराक्षसान् प्रति प्रसकं
दह भस्मीकुरु ॥ का० ॥ भद्रोन इति ककुभ इति । ककुप्छंदस्काभिर्ऋग्भिरूपधेयाइष्टकाः ककु
भस्ता भद्रोन इति तिसृभिर्ऋग्भिरुपधेयाल् ॥ तत्र प्रथमा ॥ भद्रो नो अग्निः० प्रशस्त्यय इति । आहुत
ऋत्विग्भिराहूतोऽग्निर्नोऽस्माकं भद्रो भंदनीयः कल्याणो भवत्विति शेषः । किं च हे अग्ने भद्रा कल्याणी रा
तिस्त्वदीयं दानमस्माकमस्तु । हे सुभग सुधनजननीयाग्ने तव प्रसादादध्वरोऽस्मदीयो यज्ञो भद्रः क० ल्या

ग्रोकनैस्वार्या

सहः। वह मर्षणे। छंदस्यपि दृश्यते च। दीर्घश्छांदसः=

तो भवंतु उतापि वयमग्ने स्तयः प्रशंसनानि नरः संतु॥ अथ द्वितीया॥ मंड३ उत प्रशस्तये० सासहा१ इति॥ उ
तापि वयमग्ने स्तयो नरः संतु। समत्सु संग्रामेषु येन मनसा सासहेत् शत्रुजातमभिभवती सर्थः। तन्मनः वृत्रतू
र्ये। तुर्यति हिंसार्थः। वृत्रवधाय पाप्मा वै वृत्र इति श्रुतेः। तद्वध्यार्थमितिवा। नो इदं कल्याणं कृणुष्व कुरुष्व।
॥ अथ तृतीया॥ ये त्वा समत्सु सासहो० अभिष्टिभिरिति। हे अग्ने त्वं येन मनसा समत्सु संग्रामेषु सास
हः शत्रुजातमभिभवसि तेन मनसा नू रिवर्द्धितां अफलं बलं कुर्वतां शत्रूणां संबंधीनि स्थिराणि
दृढानि धनानि भूषीति शेषः। अवतनुहि अवतारय वयं ते तव अभिष्टिभिः अभ्येषणसाधनै येगिर्वणमम
स्तनेमहि॥ का०॥ अनुकांतेदक्षिणपंक्ती रग्निं तमिति तीति। पंक्तिश्छंदस्काभिस्तृग्भिरूपधेयाइष्टकाः
त... ता अनुकांते दक्षिणप्रदक्षो अग्निं तमित्यादि त्रिस्रस्तृग्भिरूपदध्यादिति शेषः॥ त
त्र प्रथमा॥ अग्निं तं मन्ये० आभरेति। वसुर्निवासहेतु धनरूपो वा यो अग्निरस्ति अहं तं ताद्दृशमग्निं म
न्ये जानामि येन वः सायंकाले प्रदीप्यमानमग्निं दृष्ट्वा अयमस्मद्दोहनकाल इति ज्ञात्वा अस्तं स्वकीय
यजमानगृहं यंति किंच आशवः शीघ्रगामिनो अर्वतो अश्वा यमग्निं दृष्ट्वा अस्तं गृहं यंति गच्छंति। पुन
स्तदेवाह नित्यासो नित्याः रक्षाश्च तो वाजिनो बलवंतो अश्वा यमग्निं दृष्ट्वा अस्तं गृहं गच्छंति। हे
देवानां

सूर्द्ध इति बल नाम =

२९२

२९२

गवाः दीप्यमानोऽस्त्वाम्यग्निर्हि। यज्ञातः पशून्विंदते खुपक्रम्य तस्मात्सर्वान्नु तृप्यन्नग्निमभिसर्पतीति श्रुतिः प्राप्य मे तल। ३
ताद्दृशाग्ने त्वं स्तोतृभ्यो अस्मभ्यं इषमन्नं आभर संपादयेसर्थः॥ अथ द्वितीया॥ सो अग्निर्यो० आभरेति। यो
निवासहेतुरग्निरस्ति स ताद्दृशोऽग्निर्गुणे अस्माभिः स्तूयते। येन वः पश्वो यमग्निं दृष्ट्वा समायंति स
म्यगाभिमुख्येन गच्छंति किंच रघुद्रुवः लघुद्रवः शीघ्रगामिनो अर्वतो अश्वाः प्रतिसमायंति सुजातासः शो
भनजन्मानः। सूरयो विद्वांसः ऋत्विगादयः यमग्निं प्रतिसमायंति हे अग्ने ताद्दृशस्त्वं स्तोतृभ्य इषमन्नं
संपादय॥ अथ तृतीया॥ उभे सुश्चंद्र० आभरेति। हे सुश्चंद्र सुष्ठु आह्लादनकराग्ने आसनि त्वदीय आ
स्ये सर्पिषि आज्यस्य संबंधिन्यौ उभे दर्वी दर्वी संदधो... श्रीणीषे सेवसे हृतप्रेरणपर्यंतं सर्पिस्त्वया
पीतमित्यर्थः। उतो अपि च हे शवसस्पते बलस्याधिपते उक्थेषु शंसेषु सुयज्ञेषु नोऽस्मान् उत्पूर्या
उत्कर्षेण पूरय प्रापयेसर्थः। स्तोतृभ्यो यजमानेभ्य इषमन्नं आभर संपादय॥ का०॥ उत्तरे पद पंक्ती रग्ने
तमद्येतीति। पदपंक्तिछंदस्काभिस्तृग्भिरूपधेयाइष्टकाः पदपंक्तयस्ता अनंतरस्या तस्रा उपदध्यात्।
॥ तत्र प्रथमा॥ अग्ने तमद्याश्वं न० ३ हे रिति। हे अग्ने हृदिस्पृशं हृदयस्पृशं प्रियं तं त्वामद्यास्मिन्कर्म
णि ॐ हेः फलप्रापकैः स्तोमैः ऋध्याम समृद्धं करवाम॥ तत्रैको दृष्टांतः॥ अश्वं न यथा लोके अश्वं घा
सादिप्रदानेन समृद्धयंतितद्वत्॥ अथापरो दृष्टांतः। क्रतुं न भद्रं यथा समीचीनं ज्योतिष्टोमादि क्रतुं

वहेरर्जंतस्य रूपमेतत्। =

सर्वांगानुष्ठानेनसमर्द्धयंतितद्वत्। नइंकल्याणमित्यग्निर्विशेषणंवास्तु॥ अथद्वितीया॥ अधाह्यग्ने क्रतो०
बरूथेति। हे अग्ने अद्य अस्मदीयस्तोत्राणां तरं क्रतोरनुष्ठीयमानस्यकर्मणोऽ र्थीर्ब्रूयहि। रथो स्या
स्तीतिरथीसारथीर्यथा निर्वाहकस्तथात्वंनिर्वाहकोभव कथंखलु कीदृशस्यक्रतोर्नइस्यकल्याणरूप
स्यदक्षस्यस्वफलप्रदानसमर्थस्यसो घोरस्माभिः साध्यस्यसत्यस्यामोघफलस्यबृहतः प्रौढस्य
॥ अथतृतीया॥ एभिर्नोअर्कै० अनीकेरिति। हे अग्ने विश्वेभिरनीकैः सर्वैस्त्वदीयसैन्यैः सहितः सुम
नाः सौमनस्यंप्राप्तः सन् एभिरिदानींक्रियमाणैर्नोस्मत्संबंधिभिरर्कैरर्चनीयैः स्तोत्रैर्नोस्मान्प्रतिअ
र्वाङ् नवसमीदेशवर्त्ती नत्वा प्रकाशंकुरु। अवरंसमीपदेशमंचतिगच्छतीत्यर्वाङ् तत्र दृष्टांतः। स्वर्ण
र्वाङ् नवसमीदेशवर्त्ती नत्वाप्रकाशंकुरु अवरं समीपदेशं यथा... ॥ का०॥ पुरीषवस्साः एवीमतिवं
ज्योतिः स्वर्गलोके प्रकाशमानरूप आदित्यो यथा समीपवर्त्ती भवति तद्वत्॥ का०॥ पुरीषवत्याः पृथ्वीमति वं
ज्योतिः स्वर्गलोके प्रकाशमानरूप आदित्योयथासमीपवर्त्ती भवतितद्वत्॥

२९२

दसंप्रा चोपुरीषसहितेक नद्वारातिर्वत्रत्रूर्येग्निं होतारमितीति। अतिछंदस्का त्रिकेऽग्निरूपधेया
दृष्टकास्तिस्त्रोतिछंदसस्तासांमध्येरकामिति छंदसमिष्टकांपुरीषवतीमष्टकायाः पूर्वभागेउपद

२९३

दृष्टकास्तिस्त्रोतिछंदसस्तासांमध्येरकामिति छंदसमिष्टकांपुरीषवतीमष्टकायाः पूर्वभागेउपदध्यात्॥ तत्रैकस्याः पाठः॥ अग्निं होता० तारं० सर्पिषद्रति। इममग्निं होतारं देवानामाह्वातारमहंमन्ये
कीदृशमग्निं वसुं धनं दास्वंतं प्रयच्छंतं सहसः सूनुं बलस्यपुत्रंजातवेदसंउत्पन्नजगदभिज्ञं। तत्र

वशाकूतो। कांतिरिक्षा

दृष्टांतः॥ विप्रंनजातवेदसं यथा ब्राह्मणं कुटुंबिनं उस नपुत्रा घनि सं मन्यंते तद्वत्। योग्निर्देवकुर्द्धपा अ — श्रेष्ठयामीणाः
सुन्नतया देवाच्या देवान्प्रतिगच्छंत्याकृपा कृपया ज्वालया स्वध्वरः सुष्ठुयागनिष्पादको भवति सोग्निर्घृ
तस्यविभ्राष्टिं विशेषदीप्तिंशोचिषा स्वकीयेनतेजसा अनुवष्टि अनुकामयते कीदृशस्यघृतस्य आग्ने
ह्वानस्य सर्वतो हूयमानस्य सार्पिषः सर्पणशीलस्य॥ का०॥ अग्नेत्वंमिसनूकांते परइति अनूकस्य अंते
पश्चिमभागे द्विपदाछंदस्कास्तिस्रइष्टकाउपदध्यात्॥ तत्र प्रथमा॥ अग्ने त्वं नो अंतम० वरूथ्यइति। हे
अग्ने त्वं नो अस्माकं अंतमो अंतिकतमो भव। उतापि चत्राता रक्षकः शिवो मंगलस्वरूपी त्वं वरूथ्यो वरू
थे गृहे नित्यसंनिहितो भव॥ अथद्वितीया॥ वसुरग्निः० रयिं दाइति। वसुर्वसुमानयमग्निर्वसुश्रवि
श्रादिदेवेतेरादरेण श्रूयतइतिवसुश्रवा हे तादृशाग्ने अच्छास्मदभिमुखो नक्षिप्रमाक्षुहि। कीदृशस्त्वंद्युमत्त
मं अतिशयेन दीप्तियुक्तं रयिं धनं दाः प्रयच्छ॥ अथतृतीया॥ तन्त्वाशोचिष्ठ० सखिभ्यइति। हे
शोचिष्ठदीदिवः शुद्धतमदीप्यमान सखिभ्यः सखीनामस्माकंसुम्नाय सुखाय तं पूर्वोक्तगुणयुक्तं त्वां
ईमहे प्रार्थयामः॥ इति पंचमोनुवाकः॥ पंचमेनुवाके छंदस्या इष्टकाउक्ताः॥ अथ षष्ठे गार्हपत्यस्य पु
नश्चितिमंत्राउच्यंते॥ का०॥ मध्ये ष्टकं गार्हपत्यं पुनश्चितिं चोपदधितद्धयेतक्रूषयइति भूर्भुवस्त्वमिति। प्र

२९४

र्मनुपहितायांगार्हपत्यस्य स्थंडिले र्मध्ये पुनरध्याविष्टकायेन ऋषय इष्टभिर्मंत्रैरुपदध्यात्॥ तत्र प्रथमम्मं
त्रंपाठ स्तु॥ येन ऋषयस्तपसा० बर्हिषमिति। येन स्वर्गेण निमित्तेन तेन पूर्वं महर्षयस्तपसा संतापयु
क्तेनाग्निना सत्रमायन्ननुष्ठितवंतः। कीदृशम् हर्षयः अग्निमिंधानाः प्रज्वालयंतः स्वराभरंतः स्व
र्गमाहर्तुं समुद्यताः अहमपि तस्मिन्नाके निमित्तभूते सति अग्निं निदधे स्थापयामि। यमग्निं मनवः स्त
र्णमाहुः तमग्निंनिदधइत्यन्वयः॥ अथ द्वितीयः॥ तं पत्नीभिः०
वै मनुष्यास्तीर्णबर्हिषं प्रसारितयज्ञमाहुः तमग्निं निदधइत्यन्वयः॥ सर्वैर्मनुष्यैः उत वा हिरण्यैर्हिरण्यादिभिः सर्वैः सा धनै
दिवइति। हे देवा ऋत्विजः सर्वे वयं पत्न्यादिभिः सर्वैर्मनुष्यैः उत वा हिरण्यैर्हिरण्यादिभिः सर्वैः सा धनै
रुपेयुः सहितास्तमग्निमनुगच्छेम अनुगताः संतः फलं प्राप्स्याम इत्याशयः। स एव स्पष्टीक्रियते॥
दिवः पृष्ठे स्वर्गस्योपरि नाकं दुःखरहितं स्थानं गच्छन्तो नाग्रहीलुकामा वयमित्यर्थः। कीदृशोऽदितः पृष्ठे
दिवः पृष्ठे स्वर्गस्योपरि नाकं दुःखरहितं स्थानं गच्छन्तो न गृहीतु कामा वयमित्यर्थः। कीदृशौ त्रिसंख्यापूर्वके
सुकृतस्य लोके सम्यगनुष्ठितस्य कर्मणः फलभूते तृतीये पृथिवीमारभ्य गणनायां त्रिसंख्यापूरके
अधिरोचने अधित्वेन दीप्यमाने॥ अथ तृतीयः॥ आवाचोमध्यमरुहत्० एतन्यवइति। अयम
ग्निर्वाचो मध्यमरुहत् स्तोत्ररूपाया वाचः मध्यं प्रतिपाद्य मर्धमारूढः स्तोत्रगतसर्वगुणयुक्त इत्यर्थः।
कीदृशोग्निर्भुरण्युर्जगद्भरणशीलः सस्पतिः सत्यालकं श्चिकितानो ज्ञानवान्स च पृथिव्याः पृष्ठे मेरू २९४

परिनिहितः स्थापितो दविद्युतत् अतिशयेन द्योततये तु त्रिवः पृतन्यवो अस्माभिः सह कलहं कर्तुमि
च्छंति तानधस्पदं कृणुतामस्माकं पादयोरधस्तादवस्थितान्करोतु॥ अथ चतुर्थः॥ अयमग्निर्वीरतमो० निधा
मेति। अयमग्निर्धत्तां अस्मिन्कर्मणि प्रकाशतां। कीदृशः वीरतमः अतिशयेन शूरः वयोधाः वयस आयुषः अन्नस्य वा
स्थापयिता सहस्रियः सहस्रकास हस्रेण संमितः अप्रयुच्छन् अस्मिन्कर्मणि प्रमादरहितः सरिरस्य जलस्य
मध्ये विभ्राजमानः आकृतवेकृतादिरूपेण विशेषैः प्रकाशमानः हे अग्ने एवं भूत स्त्वं दिव्यानि धामस्था
नानि उपप्रयाहि प्राप्नुहि॥ अथ पंचमः॥ संप्रच्यवध्वमुप० तंतुमेतमिति। हे अग्ने त्वं संप्रच्यवध्वं स्वकीय
स्थानात्संप्रच्यवध्वं सम्यङ्निर्गच्छ। ततः अस्मदीयदेवयजनं उपउपेससंप्रयात सम्यक्प्रयाहि। ततो देवयानो

वचनव्यत्ययेन व
हुवं

न्देवलोकप्राप्तिहेतून्पथो मार्गान्न्कृणुध्वं कुरु सर्वत्रपूजार्थं बहुवचनं किं कुर्वन् पितरामाता पितरो
युवानायुवानौ तरुणौ पुनः भूयो नस्यः कृण्वाना कुर्वन् एवं भूतः सोग्निः हे यजमान त्वयि निमित्तभूते
सतिएतं तंतुं यज्ञप्रवाहं अन्वातांसीत् अनुक्रमेण ततानु संपादयतु॥ अथ षष्ठः॥ उद्बुध्यस्वाग्ने० सी
दतेति। हे अग्ने त्वमुद्बुध्यस्वा स्मद्विषये सावधानो भव। एवं भूत स्त्वं यजमानं प्रति० जागृहि प्रतिदिनं जा
गरूकं सावधानं कुरु। अयं च त्वं च मिलित्वा उद्धापूर्ते श्रौतस्मार्तकर्मणी संसृजेथां संपादयतां। किंच

९५२

पितरा स्म हु अन्नसी युवाना तरुणे अतिपटुस मुक्ते कुर्वाणः। वा कृत्वम नश्च पितरा युवानेति श्रुतिरिति ज्ञाप्यां तरं=

२९५

विश्वेदेवायजमानश्चसर्वेपश्यंसस्यस्थेसहस्थितियोग्येस्मिन्कर्मणिसीदतउत्तरस्मिन्स्वर्गेलोके अधिकत्वेनसी
दत॥ अथपाठमः॥ येनवहसि०गं तवइति। हे अग्ने येनव्यापारेणसहस्रंवहसिसहस्रदक्षिणाकं
यज्ञंनिर्वहसितथायेनव्यापारेणसर्ववेदसंसर्वस्वदक्षिणाकंयज्ञंवहसि। तेनव्यापारेणनोस्मदीयं
इमंयज्ञंस्वः स्वर्गलोके देवेषु देवान्प्रतिगंतवेगंतुंनयप्रापय॥ अथपाठमः॥ अयंतेयोनि०रयिमिति
अयंमंत्रः पूर्वंव्याख्यातः॥ इतिषष्ठोनुवाकः॥ षष्ठेनुवाके गार्हपत्येष्टकोपधानमंत्राउक्ताः॥ अथ
सप्तमेपु०नराहवनीयस्यपंचमचितिशेषभूतेष्टकोपधानमंत्राउच्यंते॥ का०॥ भूतव्येतपश्चतपस्य
श्चेतीति। इष्टकेव्येष्टकेउपदध्यादितिशेषः॥ पाठस्तु॥ तपश्चतपस्यश्च०सीदतमिति। व्याख्यातस
मानार्थः॥ का०॥ विश्वज्योतिषंपरमेष्ठीत्वेतीति॥ पाठस्तु॥ परमेष्ठीत्वासादयतु०सीदेति॥ अय
मपिव्याख्यातसमानः॥ का०॥ लोकंपृणाः पूर्ववदिति। लोकंपृणछिद्रंपृणेसादयस्वयोलोकंपृण
इष्टकोपधानमेवत्राव्याख्याताः॥ का०॥ प्रोथदश्वइत्युत्तरांविकर्णीमिति। उपदध्यादितिशेषः॥ पाठस्तु॥
प्रोथदश्वोन०कृष्णमस्तीति। अयमग्निरश्वोनअश्वइवप्रोथत्प्रोथतिउच्चाल्यमानः शब्दंकरोति। जौ
दृष्टांतमातोश्वः कदाशब्दंकरोतीतितदुच्यते। यदामहोमहतः संवरणादश्वशालारूपात्संबन्धन

स्थोलोकात्

२९५

अतः कृष्णवर्त्मा भग्निरितिलोकप्र सिद्धिः =

तस्थानात्तव्यवस्थात्तविनिर्गच्छति। तदानीमरण्येयवसेअविष्यन्घासार्थंगमिष्यन्शब्दंकरोतितद्वदग्निरपि
ज्वलनशब्दंकरोति। आह अतोनंतरंअस्यशब्दंकुर्वतोग्नेः शोचिरनुदीप्तिमनुवातोवातिवायुःप्रवर्ततेअ
ग्निज्वालाशब्दसमनंतरमेववायोरवश्यंप्रवृत्तेरस्यमग्निर्वायुरवइतिलोकेनिधीयते। अथशब्दोवर्ग
चतुर्धयुक्तोप्यानंतर्यमेवाचष्टे हे अग्ने ते तव वृष्टालायावास्युसंयोगानंतरं व्रजनं अरण्येगमनं स्थानं
कृष्णमस्तितस्यदाहेनकृष्णवर्णमिवभासते॥ का०॥ आयोष्ट्वेति स्वयमातृण्णामिति॥ पाठस्तु॥
आयोष्ट्वासदने०सीदतमिति। आएतिनिरंतरंगच्छतीत्यायुरादित्यः सर्वस्सर्वंजगदवतितस्यावतः
समुद्रस्यसमुद्रसमानस्याक्षिस्यस्यहृदयेप्रधानभूतेकुण्ड्याम्। यां आश्रयभूतेसदनेस्मिन्स्थाने
सादयामिकीदृशीत्वांरश्मीवतीरश्मिसंयुक्तांभास्वतींदीप्तिमतीं हे इष्टके यात्वंद्यांद्युलोकंआभा
सिप्रकाशयसितथापृथिवीभूलोकंउरुविस्तीर्णमंतरिक्षंचव्याप्नोसितादृशींत्वांसादयामीतिसं
बंधः शिष्टंव्याख्यातं॥ का०॥ अग्निंप्रोक्षतिहिरण्यशकलसहस्रेण शतेद्वेद्वेप्रकिरतिसहस्रस्ये
तिप्रतिमंत्रमिति। हिरण्यसंबंधीनोशकलानांसहस्रेणाग्नेः प्रोक्षणंकुर्यात्तत्रशकलसह
स्रस्यमध्येद्वेद्वेशतेसहस्रस्यसेत्येकेकेनमंत्रेण प्रकिरेत्॥ तेषांपाठस्तु॥ सहस्रस्यप्रमासि०

सहस्रायत्वेति। हे चित इष्टका त्वं सहस्रस्य पूर्वभागावस्थितस्य प्रमा तुल्या असि। तथा दक्षिणावस्थित स्येष्टकासहस्रस्य प्रतिमा तुल्या असि एवं पश्चिमदिग्भागावस्थितस्येष्टकासहस्रस्य उन्मा तुल्या असि। हे चित्ये त्वमुत्तरस्यां दिशि सहस्रः सहस्रसंबंध्यसि। तथा ऊर्ध्वायां दिशि सहस्रसंख्याक फल सिध्यर्थं त्वां प्रोक्ष्यामि॥ इति सप्तमोनुवाकः॥ ॥वेदार्थस्य प्रकाशेन० ॥ इति श्रीसायण चा र्यविरचिते माधवीये काण्वसंहिताभाष्ये वेदार्थप्रकाशे षोडशोऽध्यायः॥ ॥ छ॥ ॥ यस्य नि श्वसितं वेदा यो वेदेभ्योऽखिलं जगत्॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ ॥ॐ इन्द्र॥ षोडशोऽध्या येपं चमचितिविषयामंत्रा उक्ताः। एतावता सर्वचयनमंत्राः समापिताः। अथ सप्तदशेऽग्नि चित्यागेनोऽशतरुद्रीयहो ममंत्रा उच्यंते। कर्मप्रकरणे पाठात् कर्मांगत्वम पीष्यते। ज्ञानहेतुत्वमप्यस्य तदीयोपनिषदीरितं॥ किं जप्ये नामृतत्वं नो ब्रूहि त्युक्तो मुनिर्जगौ। शतरुद्रियकेणेति जाबालाम्नानतीति हि। स्मृत्यागमपुराणेषु रुद्राध्या यप्रशंसनं। बहुस्तितद्विस्तरेण रुद्रकल्पेऽभिधास्यते। इह कर्मांगतायाद्वग्वर्णिता ब्राह्मणेन ताः। बो द्धुं शब्दार्थमात्रस्य विवृतिः क्रियते स्फुटा॥ का०॥ शतरुद्रियहोम उत्तरपक्षस्यापरस्यां स्रक्त्यां परिश्रि तं स्वर्कपर्णेनार्ककाष्ठेन रशातयन् संततं जर्तिलमिश्रा नु गवेधुकसक्तून् नाग्नी रमेके तिष्ठन् कुर्दतून

२९६

२९६

यद्वा सतो रोरूयमाणः द्रवतीति रुद्रः। तथा च यास्कः। रुद्रो रौतीति सतो रोरूयमाणो द्रवतीति वा रोदयतेर्वा यदरुदत्तद्रुद्रस्य रुद्रत्वमिति काठकं यदरोदीत्तद्रुद्रस्य रुद्रत्वमिति हारिद्रविकं तस्यैषा भवति मा रुद्रायेति। =१०

नमस्त इत्यध्याये अनुवाकांते स्वाहाकारो जानुमात्रे पर्वाते च नाभिमात्रे प्राग्भ्रसवरोहेभ्यो मुखमात्र इति। पलाकारस्य चितस्याग्नेरपरकोणे जर्तिलमिश्रगवेधुकसक्तुभिरजाक्षीरेण वार्कपर्णवर्तौ

आरण्यतिलाइत्य र्थः =

अर्ककाष्ठमयेन पात्रेण विच्छिन्नया धारया अनेनाध्यायेन शतरुद्रीयहोमः कर्तव्यः। तत्र नमस्त रुद्र इत्याद्यनुवाकत्रयमुक्त्वा स्तु चं जानुजंघे धारयमाणः स्वाहाकारं कुर्यात्। ततश्चतुर्थं पंचमा वनुवाकावु क्त्वा नाभिदघ्ने धारयमाणः स्वाहेत्युच्चारयेत्। ततः षष्ठानुवाकादि नमोऽस्तु रुद्रेभ्यो ये दिवीत्यतः प्रा क्तनं सर्वमुक्त्वा स्रुचं मास्यदघ्ने धारयमाणः स्वाहाकारं कुर्यात्॥ तत्र प्रथमोऽनुवाके प्रथमं मंत्रमा ह त्वा॥ षोडशाध्यायस्य परमेष्ठिन आर्षं देवानां वा प्रजापतेर्वा। अध्यायः परस्यार्षभि सैन्य। एकरुद्रदेवत्यः॥ नमस्ते रुद्र०

तत्राद्यानुवाके षोडर्चे एकागा सप्तेति स्रोत्रनुष्टुभः तिस्रः पंक्तयः सप्तानुष्टुभः द्वे जगत्यौ॥ नमस्ते रुद्र० यद्वा रुद्रः [illegible] श्रवं [illegible] विनाशयतीति रुद्रः। यद्वा रुग्णतो रुत्वा [illegible] ततरातिदद्दातीति रुद्रः। यद्वा

रुदिरश्रुवि मोचने =

नमस्तेति। रुत् दुःखं तद्धेतुः [illegible] द्रावयतीति रुद्रः एवं सत हे रुद्र ते तव यो मन्युः क्रोधः तस्मै नमोऽस्तु। सम पि नो दुःखं [illegible] का लेरो दयनी ति रुद्रः एवं सत हे रुद्र तेतव दीयो यो मन्युः क्रोधः पास्त स्मै नमोऽस्तु। सम न्युरस्मदद्वेषि स्वप्रसरतु। न तस्मासु। यद्वा मन्युर्यतो यत्मात्मनेते उभ्यः नमः उतो अपि च ते तव दीयाय इषवे बाणाय नमोऽस्तु। उत अपि च ते बाहुभ्यां तदीयाभ्यां धनुर्बाणोपेताभ्यां नमोऽस्तु। एतत्सर्वं वैरिण्य वर्त

र्त्तानां तनुमयी सन्निधायः॥ अथ द्वितीयः॥ याते रुद्र शिवा० करी ही इति। हे गिरिशंत ह्रदय स्थ तनु। तनुर्या चैत्यस्य तैत्तिरीये
ति। रुद्र वा एष यदग्निस्तस्यैते तनु वो घोरान्या शिवान्येति। हिंसिका घोरा अनुग्राहिका शिवा। हे रुद्र तव
याते तनुः शिवा स्मास्वनुग्रहकरी। अतएव चाघोरा हिंसिका न भवति। सैव स्पष्टी क्रियते अपापकाशिनी।
पापं हिंसा स्वरूपम निष्टं का शयती तिपापकाशिनी। तादृशा न भवती स पापकाशिनी॥ गिरिशे कैलासे स्थित्वा
निसंप्राणि स्यो यः सुखं तनोतीति स गिरिशंतः। तथाविध हे रुद्र शंतमया अतिशयेन सुखकारिण्या त
या तन्वा नो स्मान् भिलक्ष्य चाकशीहि प्रकाशां कुरु तादृशी त्वदीया तनुः प्रकाशय अस्मान् सुखिनः कुर्वित्य
र्थः॥ अथ तृतीयः॥ यामिषुं गिरिशंत० जगदिति। हे गिरिशंत परम सुखस्य पापकत्वं यामिषुं बाणं अस्तवे
शत्रुषु प्रक्षेप्तुं हस्ते बिभर्षि धारयसि गिरिः कैलासस्तं त्रायते पालयतीति गिरित्रः हे तादृश रुद्र तां
हस्तेस्थितामिषुं शिवामस्मासु शांतां कुरु पुरुषमस्मदीयं मनुष्यं जगदिति मनुष्यव्यतिरिक्तमपि जंगमं गा
वादिकं मा हिंसीः॥ अथ चतुर्थः॥ शिवेन वचसा० असदिति। गिरिशे कैलासे शेते तिष्ठतीति गिरिशः हे गि
रिश त्वामच्छ प्राप्तुं शिवेन मंगलेन स्तुतिरूपेण वचसा वदामसि वयं प्रार्थयामहे। यथा येन प्रकारेण नो
स्मदीयं सर्वमिज्जगत् सर्वमपि मनुष्यपश्वादिकं जंगमजातं अयक्ष्मं रोगरहितं सुमना असत् सौमनस्या

वा सुखं तनोति
तिवान्तं तनोतीति

२९७

पतं भवति तथा कुरु॥ अथ पंचमः॥ अध्यवोचदधिवक्ता० सुवेति। यो रुद्रो धिवक्ता अधिको यमि से वं सर्व
प्राणये मंप्रति वक्तुं क्षमः। तेनोक्ते सति मम सर्वा धिक्यं तदानीमेव सिध्यति। अतस्ताद्गृशो रुद्रः अध्यवो
चत्मां सर्वाधिकं वदतु। कीदृशोधिवक्ता प्रथमः देवानां मध्ये मुख्यः देव्यः सर्वान्देवान् हतीति दैव्यः
देवान्याल्लयितुं क्षमः स्वर्थः। भिषक् रतस्य स्मरणमात्रेण सर्वरोगोपशमनाद्यं चिकित्सकः। किंच अहीं
श्च सर्वान् सर्पव्याघ्रादीन् सर्वानपि जंभयन् विनाशयन् सर्वाश्च यातुधान्यः। सर्वानपि राक्षसान् अधर
राची अधोगमनान् कृत्वा परासुव। परान्कृतान्प्रेरय॥ अथ षष्ठः॥ असौ यस्ताम्रो० यश्चाद्येसः
इमहे इति। यो रुद्रः असौ मंडलस्यादित्यस्वरूपः स च ताम्र उदयकाले संतरक्तः अरुण उदयादू
र्ध्वमीषद्रक्तः उतापि बभ्रुस्ततोप्यूर्ध्वं पिंगलः एवमन्योपि वर्णास्तकालगत्साउन्ने यः सुमंगलः नाना
वर्णः स नन्तथै तदोधकारनिवर्तनादत्यंतं मंगलः ये रुद्राः स्वकृतसंतापेन प्राणिनो नोदयंति। रुद्राः
रश्मयः सहस्रशः सहस्रसंख्याकाः दिक्षु प्राच्यादिषु एनमभितः सर्वतः श्रिताः एषां रश्मिरूपाणां
सर्वेषां रुद्राणां हेडः क्रोधं सद्दशांतीस्तवमवयजामहे भक्तिनमस्कारादिनानिवारयामः॥ अथ सप्त
मः॥ असौ योवसर्पति० नइति। यो रुद्रो नीलग्रीवः कालकूटधारणेन नीलवर्णा ग्रीवा यस्यासौ

इष्टोरुमागमः छांदसः निङः परस्यादायुदात्तत्वमिति मावे मंथौदनेति नेत्सूत्रेणकुदकस्योदादेशः =

नीलग्रीवः सत्यविलोहितो विशेषेण लोहितवर्णः सन् असौ मंडलवर्ती सूर्यात्मा अवसर्पति उदयास्तमयार्थं पादपि लुप्रवर्त्ततितस्य रुद्रस्य मंडलवर्त्तिस्वरूप धारण प्रयोजनमुच्यते। उतगोपाः वेदशास्त्रसंस्काररहिता गोपालाः अपि एनं मंडलवर्त्तिनमादित्यस्वरूपं रुद्रमश्रन्नुपश्यंतिउदहार्यः उदकहारिण्यो योषितोऽपि एनमदृश्रन् पश्यंति एवं सर्वेषां दर्शनार्थमेव हि रुद्रस्यादित्यमूर्त्तिधारणं केवलं सादिव्यवर्त्तिस्वरूपं तु वेदशास्त्राभिज्ञैरेव दृश्यते नान्यैः स तादृशो दृष्टः सन्नो स्मान्मृडयाति सुखिनः करोतु॥ अथाष्टमः॥ नमोस्तु नीलग्रीवाय० नम इति यः पूर्वोक्तरीत्या नीलग्रीवः सत्वेन मूर्त्तिधारणेन सहस्राक्षः पर्जन्यमूर्त्तिधारणेन मीढ्वान्सेचको वृष्टिकर्तेत्यर्थः। तादृशाय रुद्राय नमोस्तु ते। अथो अपि च ये के चित् अस्य रुद्रस्य सत्वानाः सत्वरूपाः प्राणिनस्तेभ्यः सर्वेभ्योऽहं नमोकरं नमस्करोमि॥ अथ नवमः॥ प्रमुंच धन्वन० न्वपति। हे भगवो भगवन् महैश्वर्यसंपन्न रुद्र त्वं धन्वनः उभयोरार्त्न्योः कोट्योरवस्थितां ज्यां मौर्वीं प्रमुंच अवरोपय याश्च ते हस्ते इषवो वर्त्तंते ता अपि परावपपरिस्तज॥ अथ दशमः॥ विज्यं धनुः० पदिरिति। कपर्दो जटाजूटः सोऽस्यास्तीति कपर्दी तादृशस्य धनुर्विज्यं विगतज्याकमस्तु। उताऽपि च बाणवान् अस्य इषवस्सन्तीति बाणवान्निषुधिः सच विशल्यो स्तु। इषुगतानां शल्यानां तदुदरगोपितत्वेन बहिरधिकृतशल्यरहितोस्तु। अस्य रुद्रस्य या इषवो बाणास्संति ता अपि नेशन् नष्टा भवंतु यद्वा अनेशन् ईश्वरो स्स समर्था माभूवन्। किंचास्य निषंगः इषुधिः आभुरस्तु निषंगोऽधिः स च आभुराभुः खड्गोऽर्थः इषुधिश्च प्रभुनिषज्यते इति निषंगः खड्गः सयत्र धीयते स कोशो निषंगधिः सच आभुः रिक्तोऽस्तु। किंतु आरणमात्रस्य पुरस्स्यात्रवयः। युद्धसमये यथा खड्गस्याकिरणे नातिप्रभुर्भवति न तथेदानीमस्तु। किंतु आरणमात्रस्य अयं रुद्रस्य वलिस्सन्निभ्रायः॥ अथैकादशः॥ परितेधन्वनो० हेतिमिति। हे रुद्र ते तव धन्वनः हेतिर्बाणसंज्ञायाः मीढुष्टम अतिशयेन कामान्निवर्षक यासे हेधि त्वं वसंवं धिरवद्युद्धिस्त्वं यदायुधं। यदर्पितं हस्ते धनुस्त्वं हेतिर्वध्य रूपा अस्मान्विश्वतः सर्वतः परिवृणक्तु वर्जितान्करोतु माबाधतामित्यर्थः। अथो अपि यस्तवेषुधिस्तमस्मदारे अस्मत्तो दूरे निधेहि स्थापय॥ अथ द्वादशः॥ याते हेति० भुजे ति। हे मीढुष्टम अतिशयेन कामान्निवर्षक यासे हेधि त्वं वसंवं धिरवद्युद्धिस्त्वं यदायुधं। यदर्पितं हस्ते धनुस्तवाहस्यात्तथाविधेन धनुषा च त्वमस्मान्विश्वतः परिभुज सर्वतः परिपालय॥ अथ त्रयोदशः॥ अवतत्य धनु० नवेति। उग्ररूपेण सहस्रसंख्याकानि इषुधयो बाणस्थापनकोशाः यस्यासौ शतेषुधिः स्त्वं बोधनं हे शतेषुधे सहस्राक्ष शतसंख्याका इषुधयो बाणस्थापनकोशा यस्य स त्वं धनुरवतत्य ज्यारहितं कृत्वा शल्यानां मुखानि रुद्र त्वं धनुः पिनाकसंज्ञं शरासनं अवतत्य अवतानर्यहस्तादुत्तीर्य

२९९

रामक्रोधे

निनिरुद्रीर्यन्यग्रागेनद्रीर्णानिखानोस्मान्प्रतिसुमनाभक्ग्रहयुक्तः शिवः शांतोस्तव॥अथचतुर्दशः॥
नमस्तआयुधायाव० धन्वनाभृति। हेरुद्रत्वदीयायआयुधायबाणरूपायनमोनमस्कारोस्त्विति शेषः।
कीदृशायायुधाय्अनाततायधनुषिसंधानाभावादप्रसारितायधृष्णवेस्वरूपेण प्रहर्तुंप्रग
ल्भायकिंचतत्वदीयाभ्यामुभाभ्यांबाहुभ्यांनमोस्तुतथातत्वदीयायधन्वनेनमोस्तु॥अथपंचदशः॥
मानोमहांतमुत०रीरिषइति। हेरुद्रनोस्मदीयंमहांतंस्थविरंपुरुषंमारीरिषः मा हिंसीः उतापिचनोस्मदीयमर्भ
कंबालंमारिषः किंचनोस्मदीयमुक्षंतंसेचनसमर्थंपुरुषंतरुणंमाहांतंभिस्सनेनसिद्धंमारीरिषः उतापि
चनोस्माकमुक्षितंसिक्तंगर्भस्थंमावधीनःपितरंमावधीः उतापिचमातरंमावधीः तयोर्मातापित्रोःप
थग्रहणमादरार्थंहेरुद्रनोस्मदीयाः प्रियास्तन्वः शरीराणिपुत्रपौत्रलक्षणानिमारीरिषः मा हिंसीः
रिषातिर्हिंसाकर्मा॥अथषोडशः॥मानस्तोके०हवामहइति। हेरुद्रनोस्मदीयेतोकेअपत्यमात्रेतन
येविशेषतः पुत्रेमारिषः हिंसांमाकुरु। नोस्मदीयेआयुषिमारीरिषः। नोस्मदीयेषुगोषुमारीरिषः नो
स्मदीयेष्वश्वेषुमारीरिषः। नामिनः क्रोधयुक्तःनोस्मदीयान्वीरान्भृत्यान्मावधीः वयंहविष्मंतो
हविर्युक्ताः सदा त्वामेवसदमित्सर्वदैवहवामहेयागार्थमाह्वयामः॥॥इतिप्रथमोनुवाकः॥ ॥प्रथमे

मारीरिषः =

२९९

नुवाकेभगवतोरुद्रस्ययाप्रधानमूर्तातनुस्तांबहुधाप्रसाद्यततःशस्त्रयेलीलाविग्रहाजगन्निर्वाहहेत
वस्तेषड्भिरनुवाकैः प्रसाद्यंतेतेषुवानुवाकेषुसर्वेपिमंत्रायजुरूपाःतेचद्विविधाउभयतोनमस्कारो
अन्यतरतोनमस्कारश्चेति॥तत्रद्वितीयतृतीयानुवाकयोश्चतुर्थानुवाकप्रथमार्धविनिमंत्रपंचके
चनमस्कारादिर्नमस्कारांतएकैकोमंत्रइतरेषुचतुर्थानुवाकशेषपंचमषष्ठसप्तमेषुनमस्कारादिक
एकैकोमंत्रः॥तत्रद्वितीयानुवाकेप्रथममंत्रपाठः॥षट्स्वनुवाकेषुसर्वाणियजूंषितेषांमहागा
यत्रीछंदःएकरुद्रोदेवताअघोरऋषिर्नमोहिरण्यबाहवेसेनान्येदिशांचपतयेनमइति। हिरण्यनि
र्मितान्याभरणानिबाह्वोर्यस्यासौहिरण्यबाहुःसचसंग्रामेषुसेनांनयतीतिसेनानीस्तादृशायभव
धारीयोरुद्रस्तस्मैनमोस्तु।यश्चदिशांपालकोरुद्रस्तस्मैचनमोस्तु॥अथद्वितीयः॥नमोवृक्षेभ्यो
हरिकेशेभ्यःपशूनांपतयेनमइति। हरितवर्णाःकेशाःपर्णरूपायेषांवृक्षाणांतेहरिकेशास्तादृशेभ्यो
लोकाकाररुद्रमूर्तिभ्योनमोस्तुयोरुद्रःपशूनांपालकस्तस्मैचनमोस्तु॥अथतृतीयः॥नमःशष्पिंज
रायत्विषीमतेपथीनांपतयेनमइति। शष्पम्बालतृणंतद्वत्पीतरक्तःसंकीर्णवर्णःपिंजरः
शष्पिंजरःवर्णलोलपश्चांदसः।सचत्विषीमान्दीप्तिमान्।दीर्घश्छांदसः।तथाविधरुद्रमूर्तये

शष्पवत्पिंजरः =

रु

३००

नमोस्तु। पथीनां इश। स्वोक्तदक्षिणोत्तरतृतीयमार्गाणांपतिः पालकोयोरुद्रस्तस्मैनमोस्तु॥ अथचतुर्थः॥
नमोहरिकेशायोपवीतिने पुष्टानांपतयेनमइति। नीलमर्द्धं जायपलितैरहितायव्यर्वीति नेमेंमंगलार्थं
यज्ञोपवीतधारिणेरुद्रायनमोस्तु। पुष्टानांपरिपूर्णगुणानांपुरुषाणांपतयेस्वामिनेनमोस्तु॥ अथ
पंचमः॥ नमोबभ्लुशायाव्याधिने। अन्नानांपतयेनमइति। बिभर्त्ति रुद्रमिति बभ्लुर्वृषभस्तस्मिञ्छेते
तिष्ठतीति बभ्लुशः सच आसमंताद्बेधिणा विध्यतीत्याव्याधीतथाविधायनमोस्तु। अन्नानांपाल
कोरुद्रस्तस्मैनमोस्तु॥ अथषष्ठः॥ नमोभवस्यहेत्यैजगतांपतयेनमइति। भवः संसारः तस्यहेतिरा
युधं संसारच्छेत्रे जगतांपालकायस्तस्मैनमोस्तु॥ अथसप्तमः॥ नमोरुद्रायाततायिनेक्षेत्राणांपतये
नमइति। आततेनविस्तृतेन धनुषासह अपतिगच्छतीत्याततायीतस्मै रुद्रायनमोस्तु। क्षेत्रा
णां पालकोयोरुद्रस्तस्मैनमोस्तु॥ अथाष्टमः॥ नमः सूतायाहंत्यैवनानांपतयेनमइति। सूतः सा
रथिः अहंतिरहननरूपः तादृशायरुद्रायनमोस्तु। योवनानांपालकस्तस्मैनमोस्तु॥ अथनव
मः॥ नमोरोहितायस्थपतये वृक्षाणांपतयेनमइति। विश्वकर्मरूपेणरोहितोलोहितवर्णः स्थ
पतिर्गृहादीनांकर्त्ता तस्मैरुद्रायनमोस्तु। योवृक्षाणांपालकस्तस्मैनमोस्तु॥ अथदशमः॥ नमो

३००

वंतयेवारिवस्कृतायौषधीनांपतयेनमइति। भुवंतनोतीतिभुवंतिवरिवाधनं तस्य कर्त्ता वरिवस्कृत्स एववारिवस्कृ
तः। तस्मैरुद्रायनमोस्तु। ओषधीनांग्राम्यारण्यानांपालकायनमोस्तु॥ अथैकादशः॥ नमोमंत्रिणेवाणिजा
यकक्षाणांपतयेनमइति। राजसभायांमंत्री आलोचनकुशलो मंत्री सचवणिक् वणिजांजातस्वभिलेनवाणि
जस्तस्मै रुद्रायनमोस्तु। वनगता गुल्मादयः कक्षास्तेषांपालकायनमोस्तु॥ अथद्वादशः॥ नमउ
च्चैर्घोषायाक्रंदयतेपत्तीनांपतयेनमइति। युद्धकाले उच्चैर्घोषो ध्वनिर्यस्यासावुच्चैर्घोषः। आक्रंदय
त्यैरिणांरोदयिता तस्मैरुद्रायनमोस्तु। पत्तीनांपादचराणांपद्भ्यांचराभयोधाः पत्तिशब्दवाच्यास्तेषां
पालकायनमोस्तु॥ अथत्रयोदशः॥ नमः कृत्स्नायतयाधावतेसत्वनांपतयेनमइति। कृत्स्नसेन्यमा
यतंविस्तृतं येनासौकृत्स्नायतस्तस्मैकृत्स्नायतस्त्यापलायमानानांपरकीयसेन्यानांपृष्ठतोधावतीति
धावन्तस्मैरुद्रायनमोस्तु। सत्वानः सात्विकाः शरणागतास्तेषांपालकायनमोस्तु॥ अथचतुर्दशः॥
नमः सहमानायनिव्याधिनआव्याधिनीनांपतयेनमइति। सहमानोविरोधिनोभिभवन् नितरांवि
रोधिनोविध्यतीतिनिव्याधी तादृशायरुद्रायनमः। आसमंताद्विध्यंतीत्याव्याधिन्यः शूरसेनाः तासांपा
लकायनमः॥ अथपंचदशः॥ नमः कुकुभायनिषंगिणेस्तेनानांपतयेपतयेनमइति। ककुभइति
महन्नामस्कुपठितं। ककुभायमहतेनिषंगः खड्गस्तद्वतेतस्मैनमोस्तु। स्तेनागुप्तचोरास्तेषांपालका

पनमः। रुद्रो हि लीलया तत्तद्वेषान्धत्ते यद्वा तस्य सर्वजगदात्मकत्वात् ये ये यत्र यथा वर्त्तंते तत्र तथा तत्त
द्रूपेण रुद्रा एव वर्त्तंत इति रुद्रस्य सार्वात्म्यमनुसंधातुमेवमुच्यते। तादृशाः शरीरेषु रुद्रा द्विधा वर्त्तंते जी
वरूपेणैशस्वरूपेण च तत्र यज्जीवरूपं तत्स्तेनादिभिर्व्याख्यातं॥ स एव रुद्रास्त्रौ कामस्य यदीश्वररूपः तत्
स्तेनादिभिर्देवस्वरूपं लक्ष्यते। तदनुसंधानरूपलक्ष्यहेतुत्वेन परमपुरुषार्थ इति लक्ष्यार्थविवक्षया मंत्रे
पुल्लौकिकाः शब्दाः प्रयुज्यंत इति द्रष्टव्यं। उपलक्षकवाच्यार्थद्वारेण लक्ष्यार्थो मुख्योऽपि सहसावबो
द्धुं शक्यते यथा शाखाग्रे चंद्र इत्यत्र तस्माल्लक्ष्यार्थस्यैव विवक्षायामपि सुखावबोधद्वारत्वेन मुख्यार्थ
वाचकाः शब्दाः प्रयोक्तव्याः॥ अथ षोडश॥ नमो निचेरवे परिचरायारण्यानां पतये नम इति। स्वामि
द्रव्यं कदापहरिष्यामी एतया बुध्या सावधानो निरंतरं चरणशीलो निचेरुः परित आपणवित्रवादि
कादाः वपसूरिछायावरणशीलः परिचरः तद्रूपाय नमः मार्गे गंतृजनद्रव्यापहारेण बाधितुं नि
रंतरं अरण्ये वर्त्तमानाश्चोरा आरण्यास्तेषां पालकाय नमः॥ अथ सप्तदश॥ नमो वंचते परिवंचते स्ता
यूनां पतये नम इति। स्वामिन आप्तो भूत्वा तदीयक्रयविक्रयादिव्यवहारेषु यत्र क्वापि किंचिद्द्रव्याप
हारं वंचनं। सर्वथापि हारेष्वपरूवः परिवंचनं तद्रूपाय नमः। गुप्तचोरा द्विविधा दूराद्दा ह्मास्सरा
त्रावस्ताताः संतः कपाटाद्युद्घाटनेन ये द्रव्यापहर्त्तारस्ते स्तेनाः स्वकीया एव न्हवा रात्रावेव निवान्ये रक्षा

खड्गो वा

ताः संतोपहर्त्तारो ये ते स्तायवस्तेषां पालकाय नमः॥ अथाष्टादश॥ नमो निषंगिण इषुधिमते तस्कराणां
पतये नम इति। धनुषि संधातुं हस्ते धृता बाणा निषंगः पृष्ठे बद्धबाणाधार इषुधिस्तद्रूपयुक्ताय न
मः। तस्कराः प्रकटचोरास्तेषां पालकाभ्यो नमः॥ अथैकोनविंश॥ नमः सृकायिभ्यो जिघांसद्भ्यो
मुष्णतां पतये नम इति। सृकशब्दो वज्रवाची। तेन सह अयंति गच्छंतीति सृकायिनः प्राणांस्तानि गृहीतुमिच्छं
तश्चोरा जिघांसवस्तद्रूपाय नमः। कर्षकाः संतः स्वभिधान्यापहर्त्तारो मुष्णंतस्तेषां पालकाय
नमः॥ अथ विंश॥ नमोऽसिमद्भ्यो नक्तं चरद्भ्यो विकृंतानां पतये नम इति। असिमंतः खड्गधारिणो
ये रात्रौ चरंतो वीथिनिर्गतान्प्राणिनो बाधमानाश्चोरा नक्तं चरंतस्तद्रूपाय नमः। हृत्वैवापह
रंतो विविधैर्भृतास्तेषां पालकाय नमः॥ इति द्वितीयोनुवाकः॥ ॥ द्वितीयेनुवाके उक्तयतो नमः आद्य
युक्ताः केचिद्धनुरूपा मंत्रा उक्ताः॥ अथान्ये तथाविधा एव तृतीयेनुवाके केचिद्दृश्यंते॥ तत्र प्रथमः॥
नम उष्णीषिणे गिरिचराय कुलुंचानां पतये नम इति। शिरोवेष्टनवानुष्णीषी। ग्रामजनवदुष्णी
षेण शिरोवेष्टयित्वा जनमध्ये प्रविश्य वर्त्तमानश्चोर उष्णीषी गिरिः काष्ठादिसेपादकानां वस्त्रादिकम
पहर्त्तुं चरतीति गिरिचरः तद्रूपाय नमः। कुंचकुंभिं गृहक्षेत्ररूपां लुंचंति अपहरंतीति कुलुं
चास्तेषां पालकाय नमः॥ अथ द्वितीयः॥ नम इषुमद्भ्यो धन्वाविभ्यश्च वो नम इति। तीक्ष्णवेलुं स्ते

बाणधारिण इषुमंतः तथा गृहीतेन धन्वना धनुषा सह अयंति गच्छंतीति धन्वायिनः धनुर्धारिणा
इत्यर्थः। यद्वा तत्स्वरूपा हे रुद्रा वो युष्मभ्यं नम इति विशेषणद्वयेन वाक्यं ते तु द्विर्नमस्कारः॥ अ
थ तृतीयः॥ नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नम इति। धनुषि ज्यामारोपयंतीति आतन्वाना
दुस्तद्रूपेभ्यो युष्मभ्यं रुद्रेभ्यो नमः॥ धनुषि बाणसंधानात्तद्रूपेभ्यो युष्मभ्यं नमः॥ अथ चतुर्थः॥
नम आयच्छद्भ्योऽस्यद्भ्यश्च वो नम इति। ज्याकर्षणं कुर्वत आयच्छंतः शत्रून्प्रति बाणान्क्षिपंति तेभ्यो
नमः। आयच्छद्भ्यो ... बाणं क्षि
पंतः॥ शेषं पूर्ववद्व्याख्येयं॥ अथ पंचमः॥ नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नम इति। बाणं
वतो विसृजंतः। मुक्तस्य बाणस्य लक्ष्ये प्रवेशो वेधस्तस्य कर्तारो विध्यंतः॥ अथ षष्ठः॥ न
नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नम इति। स्वपंतः स्वापं कुर्वंतो नमः। तथा जागरणं कुर्वद्भ्यो नमः॥
सप्तममारभ्य द्वादशपर्यंता मंत्रा विस्पष्टार्थाः॥ तेषां पाठस्तु॥ नमः शयानेभ्य आसीनेभ्यः॰ स्वप
तिभ्यश्च वो नम इति॥ अथैकादशः॥ नम आव्याधिनीभ्यो विविध्यंतीभ्यश्च वो नम इति। सम
ताद्धिंसकाः स्त्रीमूर्तय आव्याधिन्यः। विशेषेण वेधं कुर्वंत्यो विविध्यंत्यः॥ अथ द्वादशः॥ नम
उगणाभ्यस्तृंहतीभ्यश्च वो नम इति। उग्णाहूयगणरूपाः सप्तमात्रकाद्याः स्त्रियः उगणाः हिंसि
तुं समर्था दुर्गाद्या उग्रदेवतास्तृंहत्यः॥ अथ त्रयोदशः॥ नमो गणेभ्यो गणपतिभ्यश्च वो नम इति।

उदुपसर्गस्यात लोपः उकारूण गणा उगणा याः सं ताउगणा इति भाष्यांतरं=

३०२

तृहि हिंसायां=

देवस्यानुचरा भूतविशेषगणाः। तेषां पालका ये गणपतयः॥ अथ चतुर्थः॥ नमो व्रातेभ्यो व्रातपतिभ्यश्च
वो नम इति। नानाजातीयानां संघाता व्राताः। तेषां पालका व्रातपतयः॥ अथ पंचदशः॥ नमो गृत्सेभ्यो ग
त्सपतिभ्यश्च वो नम इति। गृद्धुनशीला गृत्सा विषयलंपटा इत्यर्थः। तेषां पालका गृत्सपतयः॥ अथ
षोडशः॥ नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नम इति। विरूपा विकृतरूपा नग्नमुंडाद्यः विश्वरू
पाः तुरंगवदनादिनानाविश्वरूपधारिणो रुद्राः॥ अथ सप्तदशमारभ्य विंशतिपर्यंता मंत्राः स्प
ष्टार्थाः॥ तेषां पाठस्तु॥ नमः सेनाभ्यः॰ अर्भकेभ्यश्च वो नम इति॥ इति तृतीयोऽनुवाकः॥ तृतीयानुवा
के उक्तयनमस्कारमंत्रा उक्ताः। तेभ्योऽन्ये केचिदुत्तरतो नमस्काररूपाः पंच मंत्रा अस्मिंश्चतुर्थे विधीयते।
तेषां पाठस्तु॥ नमस्तक्षभ्यो रथकारेभ्यश्च॰ श्वपतिभ्यश्च वो नम इति। तक्षाणः शिल्पेना जातिविशेषाः र
थं कुर्वंतीति रथकारास्तत्संघविशेषाः कुलालाः कुंभकाराः कर्माराः लोहकाराः निषादाः शिल्पिनः प
र्वतमांसाशिनः पक्षिपुंजघातकाः पुंजिष्ठाः पुल्कसाः। शुनां गलेषु बद्धानां पाशानां धारकाः श्वनयः। म
गान्कामयंत इति मृगयवः। किरातवेषदेवस्यानुचराः। अत्र द्वितीयोऽनुवाको लीलार्थदेवतामूर्तिप्राधा
न्येन प्रवृत्तः। तृतीयानुवाकस्य पूर्वभागस्तु ... प्राधान्येन उत्तरभागस्तु नानाजातिरूपमूर्तिप्रा
धान्येन चतुर्थानुवाके नमस्तक्षभ्य इत्यादि पंच मंत्रा नानाजातिनिरोषभृतां पृत्ताः इति विभागो द्रष्टव्यः॥

गृत्सा मेधाविन इति भाष्यांतरं=

सेनानिभ्यश्चेत्यस्य हस्वश्छांदसः=

शुनो नयंतितेभ्यः इत्यत्रं छांद

सृत्क्षाः प्रमाणादिशिः=

इदं तु इदं कामयमाना इति यास्कोक्तेः। स्वपचा इत्यर्थः। नः क्वयजितिन क्वच। क्वचित्विति प्रायस्तस्पेतस्पन छंदस्य पुत्रस्येति निषे
धः। मृगायवो लुब्धकाः। श्वानः कुक्कुराः शुनां पतयः श्वपतयः श्वपालकाः = ३

एतावतोऽनंतरनमस्कारमंत्राः समापिताः इत उत्तरं नमस्कारोपक्रमा मंत्रा उच्यंते । तत्र चतुर्थानु-
वाके नमो ह्रस्वाय चेत्यारभ्य नमो नादेयाय च द्वीप्याय चेत्यंतानां पंचदशानां पाठः ॥ नमो ह्रस्वाय च०
द्वीप्याय चेति । सर्वं हि प्राणिनो स्मादिति भवः । रुद्रो रुदन हेतुभूतं दुःखं द्रावयतीति रुद्रः । शृणाति
हिनस्ति पापमिति शर्वः । पशुसमानानज्ञानिनः पुरुषान्पालयतीति पशुपतिः । कालकूटधारणेन
नीलवर्णा ग्रीवैकदेशो यस्यासो नीलग्रीवः । शितिनी नलं रूपं कंठेयस्य स शितिकंठः श्वेतकंठ इति के-
चिद्वदंति । स्तुतिवादे पुनरुक्तिर्न दोषमावहति । अपि त्वादरातिशयं कथयति । कपर्दो जटाजूटोऽस्या-
स्तीति कपर्दी व्युप्ता मुंडिताः केशा यस्य स व्युप्तकेशः । पाशुपतादिवेषेण कपर्दित्वं यत्यादिवेषेण मुंडित-
केशत्वं । इंद्रवेषेण सहस्राक्षत्वं सहस्रनुआवातारेणानंतसंख्याकेऽर्वभिरूपत्वं । गिरौ कैलासे शेते
गिरिशः । शिपिविष्टाय विष्णुमूर्तिधारी शिपिविष्टः विष्णुः शिपिविष्ट इति श्रुतेः यद्वा पशुषु प्रविष्टः
शिपिविष्टः पशवो वै शिपिरिति श्रुतेः । अथवा यज्ञो वै शिपिर्यज्ञाधिदेवतात्वेन तत्र प्रविष्टः सर्व
प्राणिष्वंतर्यामितया प्रविष्टो वा शिपिविष्टः । मेघरूपेण सर्वं तं वर्षयितामीढुष्टमः । बाणधारक इषु-
मान् । शरीरेण लघुप्रमाणत्वं ह्रस्वत्वं । अंगुल्याद्यवयवसंकोचो वामनत्वं । आकारेण प्रौढो बृहन् गु-
णैः समृद्धो वर्षीयान् । वयसाधिको वृद्धः । वृद्धाः पंडिताः तैः सहितः सवृद्धः । अथ वृद्धो अन्ये स्यापि इ-

स्यत इति क्षिप्रं जगदुत्पत्तेरग्ये भवो अग्र्यः । सभायां मुख्यः प्रथमः । आशु व्याप्नोति अजिरो गमनकुशलः शीघ्रः अन्यद्व्याप्नो-
शीघ्रगमन शीलः । शीभ्य उदकप्रवाहवाची । तत्रावस्थिता शीभ्यः । ऊर्मिस्तरंगे स्थित ऊर्म्यः अवस्वने च
निरर्ह्रते स्थिरजलेवस्थितोऽवस्वन्यः नद्याः प्रवाहरूपेण भवो नादेयः द्वीपन द्वीपवर्तिभू मो स्थितो द्वीप्यः
अत्रैकस्मिन्यजुषि चतुर्थ्यंतास्यां पदाभ्यां नमः शब्दं पृथगन्वेतुं समुच्चयार्थौ द्वौ चकारौ पठितौ ॥ इति
चतुर्थानुवाकः ॥ चतुर्थेनुवाके अन्यतरतो नमस्काररूपाः पंचदश मंत्रा उक्ताः । अथ पंचमे तथाविधाः
एव केचिन्मंत्रा उच्यंते ॥ तेषां पाठस्तु ॥ नमो ज्येष्ठाय च कनिष्ठाय च सुधन्वने चेति । विद्यैश्वर्यादिभिरधिको
ज्येष्ठः । अल्पः कनिष्ठः पूर्वं जगदादौ हिरण्यगर्भरूपेण सन्नः पूर्वजः अपरस्मिन्जगदवसानकाले सं-
हर्तृकालाग्न्यादिरूपेण सन्नोपरजः । मध्यकाले देवतिर्यगादिरूपेण सन्तो मध्यमः अपगल्भो प्रगल्भो एकगर्भेति रि-
रूढो दुग्धो बालः । जघनेगवादीनां पश्चाद्भागे वत्सरूपेण भवो जघन्यः बुध्ने वृक्षादीनां मूले शाखा
दिरूपेण सत्ता बुध्न्यः उभाभ्यां पुण्यपापाभ्यां सह वर्ततेसोभ्यो मनुष्यलोकः । अत एवाथर्वणिका आम-
नंति पुण्येन पुण्यलोकं नयति पापेन पापमुभाभ्यां मनुष्यलोकमिति । तत्र भवः सोभ्यः प्रतिसरो विवाहादौ
हस्ते धार्यमाणो रक्षासूत्रमर्हतीति प्रतिसर्यः यमलोके पापिनां शिक्षकरूपेण भवो याम्यः क्षेमो मोक्षस्तम-
र्हतीति क्षेम्यः । श्लोका वैदिकमंत्राः । तत्प्रतिपादकत्वेन तत्र भवः श्लोक्यः अवसानं वेदांतास्तत्प्रतिपा-

हर्तृग्रामाः शीघ्रगा

यद्वाऽसौ यं गंधर्वनगरं तत्र भवः सो
नो वक्ष्य अवस्कंदः सः =

खलः खल्के कुचि धने भूरे कर्णेजपे ऽधनेदसदिधाने

धलेनन्नेवोदस्यान्य ऽर्व रासर्वसस्या भूमिस्तामर्हतिधान्यविशेषेणेसुर्वर्यः खलौं धान्यविवेचनदेशः तम

कच्चोवा रुधिदोर्म्ललेर्हति मेघादिरूपेणेति खल्यः। वनेवृक्षादिरूपेण जेवोवन्यः कैस्रेत्यणनदीरूपेणन्नवः कद्यः श्रूयतऽइतिश्र

कच्चे रुक्के वनेलतू‍न्वः शब्दः। प्रतिश्रवः प्रतिध्वनिः अ शुः शीघ्रगामिनी सेनायस्यासावाशुषेणः। आशुः शीघ्रगामीरथो

यस्यासावाशुरथः शूरोयुद्धे धैर्यवान्। शत्रूनवारयतीनयथान्तवृतितथाके सुश्रीलमस्यसपलेदीक्षितूपेतं

शिरस्त्राणादिकं बिल्मं तदस्यास्तीति बिल्मी। पटस्यूतंकार्पासादिशर्कराशारदत्वक्कवचंतदस्यास्ती निव

तिकवची। लोमहमर्हयं वर्मतद्वान्वर्मी। गजस्योपरि रक्षार्थं गृहाकारेण स्थितं वरूथं तदस्यास्तीति व

रूथी। श्रुतावंदिषुप्रसिद्धः श्रुतावंदिषु प्रसिद्धसेनायस्यासो श्रुतसेनः। दुंदुभो भेर्यां भवः शब्दो दुं

दुभ्यः। आहन्यते ताड्यते अनेनेसा हननं दुंदुभ्याघातार्थं दंडः तद्रूपेणोत्पन्न आहनन्यः। धृष्णु

र्युद्धेपलायनरहितः प्रगल्भःपरसैन्यवृत्तांत परामर्शकः। निषंगीखड्गयुक्तः इषुधिमान्बाण

धारणयुक्तः। तीक्ष्णानिशिताइषवोबाणायस्यासो तीक्ष्णेषुः। वेद्मूल्याद्यायुधान्यस्यसंसायुधी।

शो भनमायुधं त्रिशूललरूपं यस्यासो स्वायुधः। शोभनंधन्वपिनाकरूपं यस्यासो सुधन्वा॥ इतिपंचमो

नुवाकः॥ ।पंचमेकेवाकेयेन्यतरस्तोनमस्कारमंत्राऽक्ताः। तेष्योऽन्ये केचिस्सप्तमे निधीयंते॥ याऽस्तु।

नमः स्रुत्यायचं० शिवतरायचेति। स्रुतिपादसंचारमात्रयोग्यः क्षुद्रमार्गः तमर्हतीति स्रुत्यः पदगतिः।

वरूथं कलनुत्राणे रथगोपनवेश्मनोः = ६

३०४

३०४

कूपसरिसप्रसयः। घ्रांतरूपसर्गेऽपई सप्तम्यद्व्यकारः =३ कुल्यासूत्रिमासदित्तत्र भवः कुल्यः कुलेषु देहेषु चर्मास्थिमांसरूपेणास्त

वः कुल्योवा। कुलं देहेन्वयेगणे इसनिधानात् =३

पथः रथाश्वादिसंचारक्षमः प्रौढमार्गः तमर्हतीति पथ्यः सेनान्यादिकल्पितानध्यति जलमत्रेति काटो ल

प्रवाहयोग्यः कुल्याप्रदेशः तत्रजलरूपेण भवः काट्यः। यस्मिन्प्रदेशे पर्वतादौ प्राप्यनुत्पत्तौ वेनपतंतिस

प्रदेशोनीपः तमर्हतीति तत्रत्यजलरूपेणावस्थितानीप्यः कुल्येजलसमूहे भवः कुल्यः। सरः प्रसिद्धं।

नयां भवः नद्यादित्ये दरूपं शिदस्येयादे रादिकंद्धिः = ८

तत्रस्जलरूपः सरस्यः। नदीगतजलरूपो नादेयः। अल्पसरोवेशंतः तत्रसजलरूपो वैशंतः। कूपस्य

जलरूपः कूप्यः अवटोगर्त्त स्तत्रसजलरूपो वट्यः। ईध्रं निर्मलत्वेन दीप्यमानं शरदभ्रं तत्र भवं ईध्रियः।

आतपेभवआतप्यः। मेघेषुस्थितोमेघ्यः। विद्युतासह वर्त्तितोविद्युत्यः। वर्षजलरूपोवर्ष्यः वर्षनि

रूपेलः सहैकुङ्डादिजलरूपेणवर्ष्यः। वातेनसहवृष्टीवातस्य। रिष्यतिधिनस्यंतिकालान्यत्रेति

यद्वा अवर्षोवर्षस्थिति बधस्तत्रभवोवर्ष्यः

रेष्मः प्रलयकालः तत्र भवः शर्करापाषाणादिसहितो वृष्टिजलविशेषोरेष्म्यः। वस्तुधनविशे

षः गवाश्वादिपदार्थरूपः तत्र नक्तौर्येरूपेणावस्थितोवास्तव्यः गृहनिर्माणभूमि वस्तुतत्रले

कोवास्तुपः। उमया सह वर्त्तत इतिसोमः रुद्रः शोकसंहारकः आदित्यरूपेणोदयकाले संतरक्त

स्ताम्रः। उदयाहूर्ध्वं ईषद्रक्तरूपः अरुणः। शंसुखंगमयतिप्रापयतीति शंगुः। यद्वा सुखं प्रतिगावः भ

वदादिलक्षणावाचोयस्यसशंगुः। पशूनांपालयितापशुपतिः। वीरोधीनोनाशयितुंक्रोध

युक्त उग्रः। दर्शनमात्रेण विरोधिनां भयहेतुर्भीमः। अग्रेपुरतोवधोस्यसअग्रेवधः। एवं दूरेवधः।

यद्वा वास्तुनिगृहभुवित्रवोवास्तव्यस्तस्मै। वेश्मभूर्वास्तुरस्त्रियां = ५

दूरतो ह्रस्वावर्तमानं विरोधिनमनायासेनैव हंतीत्यर्थः। लोके यः प्रियो यत्र विरोधिनं हंति तत्र त
द्रूपेणायमेव हंता॥ अत एव स्वरेणार्जुनं प्रत्युक्तं। मयैवैते निहिताः पूर्वमेव निमित्तमात्रं भव
सव्यसाचिन्निति। संहारकालेऽतिशयेन सर्वेषां हंता हनीयान्। हरितवर्णानि केशस्थानानि
पर्णानि येषां ते हरिकेशाः तथाविधा ये वृक्षाः कल्पतरुप्रभृतयस्त द्रूपायेत्यर्थः॥
तारः प्रणवप्रतिपाद्यः शं सुखं भावयत्युत्पादयतीति शंभुः। मयः सुखं भावयतीति मयोभुः। एकं
विषयसुखमपरं मोक्षसुखमिति तयोर्विवेकः॥ पित्रादिरूपेणैहलौकिकसुखं करोतीति शंकरः॥
आचार्यशास्त्रादिरूपेण मयो मोक्षसुखं करोतीति मयस्करः॥ साक्षात्सुखकारित्वमेताभ्यां
पदाभ्यामुक्तं। एतत्सुखकारयितृत्वं पूर्वाभ्यां पदाभ्यामिति विवेकः॥ शिवः कल्याणरूपः स्वयं निष्कल्मष इत्य
र्थः। अतिशयेन शिवः शिवतरः स्वभक्तानपि निष्कल्मषान्करोतीत्यर्थः॥ इति षष्ठोनुवाकः॥ ॥षष्ठेनुवा
केऽन्यतरतो नमस्कारमंत्रा उक्ताः। तेष्वान्ये किंचित्समने उच्यंते॥ तेषां पाठस्तु॥ नमः पार्याय च॰ ॐ आ
निर्हतस्य इति। पारे संसारसमुद्रस्योत्तरतीरे मुमुक्षुभिर्ध्येयत्वेनावस्थितः पार्यः। अ
वारे अर्वाक्तीरे संसारमध्ये काम्यफलप्रदत्वेनावस्थितोऽवार्यः। प्रकृष्टेन मंत्रजपादिरूपेण पा
पतरणहेतुः प्रतरणः। तत्त्वज्ञानेन संसारोत्तारहेतुरुत्तरणः। तीर्थं प्रयागादि तत्संनिहितस्तीर्थ्यः। कू

ले नदीतीरे प्रतिष्ठापितलिंगरूपेणावतिष्ठत इति कूल्यः। शष्पं बालतृणं गंगादितीरादावुत्पन्नं कुशांकुरादि
तदर्हतीति शष्प्यः। नदीमध्यगतं फेनमर्हतीति फेन्यः। सिकतामर्हतीति सिकत्यः। प्रवाहमर्हतीति प्रवाह्यः॥
यः पुरुषः श्रद्धालुः सन्स्नानादितत्परं निरंतरं गंगातीरे वर्तते तद्रूप इति शष्प्यादिशब्दानां चतुर्णां तात्पर्या
र्थः। कुत्सिताः क्षुद्राः शिला यत्र प्रदेशे तादृशाः शार्करिलाः प्रदेशाः किंशिलाः। क्षयणो निवासयोग्यो
देशः। कपर्दी जटाबंधवान्। भक्तानां पुरस्तिष्ठतीति पुलस्तिः। इन्नं तत्त्वे [illegible]। इरिणमूषरं तत्र भ धवलं च
व इरिण्यः। प्रपथो बहुभिः सेवितो मार्गः तत्र भवः प्रपथ्यः। व्रजे गोव्रजे भवो व्रज्यः। गावस्तिष्ठंत्यस्मिन्नि
ति गोष्ठं तत्र भवो गोष्ठ्यः। तल्पः खट्वादिस्थानं तत्र शयानस्तल्प्यः। गेहे प्रासादे भवो गेह्यः। ह्रदेष्वगाधज
लेषु भवो ह्रद्यः। निवेष्यो नीहारजलं तत्र भवो निवेष्यः। कुत्सितमटति कंटकलतादिपूर्णतया दुःप्रवे
शं प्राप्नोतीति दुर्गमोऽरण्यविशेषः काटः तत्र भवः काट्यः। गह्वरे विषमे गिरिगुहादौ तिष्ठतीति गह्वरेष्ठः।
शुष्केषु काष्ठेषु भवः शुष्क्यः। हरितमार्द्रं तत्र भवो हरित्यः। पांसुषु परमाणुष्ववस्थितः पांसव्यः। रजसि
विस्पष्टायां धरण्यामवस्थितो रजस्यः। लुप्यते तृणादिकमस्मिन्निति लोपः कठिनप्रदेशः तत्र भवो लोप्यः।
उलपा बल्बजास्तृणादयस्तत्र भव उलप्यः। ऊर्व्यां पृथिव्यां भव ऊर्व्यः। दीर्घ आर्षः। यद्वा ऊर्वी वडवानले

स्त्रत्वं तत्र भवः कुर्यः। स्रोतः तन्तुर्वै स्त्र्वस्तत्र भवः स्त्र्व्यः॥ पर्णः पत्रासां शुष्काणां पर्णानां संघातः पर्णद्यः उरूरमा
णाउ उद्यतायुधः अभिघ्नन् प्रहरन् आखिदन् ईषत् खेदयत् प्रखिदत् असंतं खेदयत् इषवो बाणास्तान् कु
र्वन्तीति इषुकृतः। धनूंषि कुर्वन्तीति धनुष्कृतः॥ किरंति नष्टेभ्यो धनानीति किरिकाः उदारा रुद्रा वे तारास्ते
तु देवानां हृदयभूताः। विचिन्वं सपेक्षितमर्थं संपादयंतीति विचिन्वत्काः विविधं क्षिण्वंति हिंसंति सर्वं पाप
मिति विक्षिणत्काः आसमं तान्निः शेषेण हतं दुरितं यैस्ते आनिर्हताः। तादृशेभ्यो रुद्रावतारेभ्यो वायुभ्यस्यं
नमस्त्वर्थः। नमो नवाय्यचे सारस्य न मआनिहतेभ्य इत्यंताः सर्वेन्यतरतो नमस्कारा बहवो यजुः स्वरूपाम
त्रा अभिहिताः। ते सर्वे परमेश्वरस्य सार्वात्म्यं प्रतिपादयितुमेकैकेन यजुषा स्थावरजंगमं चैकैकं रूपं
अभिहितं। अतो बहिः प्रयोगे तु मंत्र लेदस्त सुरश्चरणादि प्रकारकारश्च रुद्रकल्पेऽभिधास्यते॥ इति सम
मोनुवाकः॥ ॥द्वितीयमारभ्य सप्तमेष्वनुवाकेषु विविधानि यजूंषि नयतोनमस्काराण्यन्यतरतो नम
स्काराणि वोक्तानि अथाष्टमेनुवाके समदक्षरूपा मंत्रा व्याख्यास्यंते॥ तत्र प्रथममंत्रपाठस्तु॥ रुद्रदेव
या आस्तारपंक्तिः॥ द्रापेअन्धस ० ममदिति। द्रापयति कुत्सितां गतिं प्रापयतीति द्रापिः पापिनो नरकप्रदा
नेन पातयतीत्यर्थः। अंधोन्नं तस्य पतिः अन्नपालकः जानामन्नपालकः दरिद्र अकिंचनो दरिद्र इत्यर्थः। कंठे
नील लोन्यत्र लोहित इति नीललोहितः आसामस्मदीयानां पुत्रादीनां प्रजानामेषामस्मदीयानां गोमहिष्या
दीनामिह रुद्र स्वसंबोधनस्य चामीधरं प्रार्थ्यते। =

दीनां पशूनां च सम्बन्धिमान्येः मा भीषय। किं च मो रोकमेव नंगं कार्षीः रुजो भंग इति धातुः। नोस्मदीयानामा
सामेषां च मेवाममत् रोगोमा भूयात्। अमरोग इति धातुः। अस्मदीयानां पश्वादिकं रोगसंयुक्तं मा कुर्वित्य
र्थः॥ अथ द्वितीयः॥ इमारुद्रायतवसे ० न्ननातुरं क्षिति। यथा येन प्रकारेण स्मदीयाय द्विपदे पुत्रपौत्रा
दिरूपाय मनुष्याय चतुष्पदे गोमहिष्यादि रूपाय पशवे स्वेपाय चन्द्रामसत् सुखं स्यात्॥ किं चास्मिन्ग्रामे वि
श्वसर्वप्राणिजातं पुष्टं सुखपूर्णं अनातुरमुपद्रवरहितं स्यात्। तवसे बलयुक्ताय अस्मदपेक्षितं कर्तुं स
मर्थायेत्यर्थः। कपर्दिने जटाबंधयुक्ताय तापसवेषायेत्यर्थः। क्षयद्वीराय क्षीयमाणप्रतिपक्षपुरुषाय
पापविनाशन हेतवइत्यर्थः। तथा मतीर्वाचः या मीरुद्र स्तूयते ताः प्रभरामहे प्रेरयामः॥ अथ तृतीयः॥
या ते रुद्र शिवा ० जीवसइति। हे रुद्र ते त्वदीया शिवा शांता तनूर्मूर्तिर्विद्यते तया तन्वा नोस्मान् जीवसे जीवयि
तुं मृडय। कथं तया सुखस्य सिद्धिरिति तदुच्यते। यस्मादेवं विश्वाहा नेपजी सर्वेष्वहःसु रोगदा
रिद्र्यादेरोषधवर्गरूपा तस्मा च्छिवा किं च यस्मात् कृतस्य सस्यैः ऋतस्य रुद्रस्य तादृशस्य प्राप्त्यै भेषजी
औषधरूपज्ञानप्रदातेन जन्ममरणादिकं दुःखं निवारयति तस्मादप्येषा शिवा॥ अथ चतुर्थः॥ परिणो
हेती रुद्रस्य ० मृळेति। हन्यतेहनयेति हेतिरायुधं रुद्रस्य हेतिर्नो स्मान्परिवृज्यात्। परिवर्जयतु परितो व

ऊर्ध्वमनशी लेवा=
३०६
ऊहती
दरिद्रः पापैः। निष्पत्तिय हरति वा=२
स्वरूपाणामन्त्रा ४ रुद्रस्यांगता लितिधातु:=३
३०६
समर्पयामः=३
सम्पूर्णः
ईशाय रुद्राय नवावते=७

र्जितान्करोतु। कदाचिदपि माविधष्या इत्यर्थः। किंच। त्वेषस्य क्रोधोज्ज्वलितस्य रुद्रस्य या दुर्मतिरूप
बुद्धिर्मेघ महती सापि परिगात्। परिगच्छतु सर्वतोस्मान्परिहृत्यैव गच्छतु। मघवद्भ्यः हविर्लक्षणान्न
युक्तेभ्यो यजमानेभ्यो धर्थाय स्थिरा स्थिराणि दृढानि धनूंषि अवतनुष्व तदर्थे विस्तारय धनूंषि विस
ज्यानि कुरुष्वेत्यर्थः। हे मीढ्वः कामाभिवर्षक तोकायास्मत्पुत्राय तनयाय तदीयपुत्राय च मृडय
सुखं देहि॥ अथ पंचमः॥ मीढुष्टम शिवतम॰ गहीति। हे मीढुष्टम अतिशयेन सेवककामाभिवर्षक हे
शिवतम अतिशयेन शांतस्वरूप नोस्मान्प्रति शिवः शान्तस्वरूपः सुमनाः सौमनस्येन युक्तश्च भव।
आयुधं त्रिशूलादिकं परमे अत्युच्चे वृक्षे वटाश्वत्थादिरूपे निधाय यथास्माभिर्न दृश्यते तथावस्था
प्य कृत्तिं वसानो व्याघ्रचर्ममात्रं परिदधान आचर अस्मा॥ शत्रि मुख्येनागच्छ आगच्छन्नपि पिनाकं बि
भ्रत् रक्षणार्थं धनुर्मात्रं हस्ते धारय। न तु ज्याबाणादिकं परिसज्ज्यागहि आगच्छ॥ अथ षष्ठः॥ विकिरि
द विलोहित॰ नाऽइति। किरहिंसायां विशेषेण किरति हिंसां घनिष्टं द्रावयतीति विकिरिदः विलोहितो लो
हित्यरहितः श्वेत इत्यर्थः। अतएव मांत्रिकाः पंचवक्त्रध्याने स्मरंति। ध्येयो मुक्तापरागामलरसकलि
तं द्विपत्र इति। अथवा विशेषेण लोहितो विलोहितः। अतएवाष्टवक्त्रध्याने स्मरंति कोचनाननो ध्येयः

मपमितिघन

नाम = २

३०७

३०७

पञ्चासहस्र्यो भगवान्षड्गुणसंपन्नो भगशब्दस्य षड्गुणवाचित्वं स्मर्यते। ऐश्वर्यस्य समग्रस्य धर्मस्य य
शसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा। प्रकारांतरेणापि स्मर्यते। उत्पत्तिं च विनाशं च भूता
नामागतिं गतिं। वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति। तथोक्तविशेषणद्वयविशिष्ट हे रुद्र तेतु
भ्यं नमोस्तु। ते तव सहस्रं सहस्रसंख्याकाया हेतयो यान्यायुधानि संतिता: सर्वा अस्मदन्यं विरो
धिनं निवपंतु विनाशयंतु॥ अथ सप्तमः॥ सहस्राणि सहस्रशो॰ बाधीति। हे रुद्र तव बाह्वोः हस्त
योः हि हेतयः सहस्रशः सहस्रप्रकाराः सहस्राणि सहस्रसंख्याका विद्यंते धनुरिषुखड्गत्रिशू
लमित्येवं जातिभेदेन सहस्रप्रकारत्वं यस्यां जातौ बहवः सहस्रसंख्याः हे भगवः षड्गुणैश्वर्यसंप
न्न ईशानः समर्थः समर्थस्त्वं तासां हेतीनां मुखा मुखानि शल्यानि पराची॰ना कृधि अस्मत्तः परा
ङ्मुखानि कुरु॥ अथाष्टमः॥ असंख्याता सहस्राणि॰ तन्मसीति। अधि भूम्यां भूमेरुपरि ये असंख्या
ता असंख्याता नि सहस्राणि बहवः सहस्रसंख्याका रुद्राः स्थिताः तेषां स्थितानां रुद्राणां संबंधी
नि धनूंषि सहस्रयोजने अस्मत्तः सहस्रयोजनव्यवहिते मार्गे अवतन्मसि। अवतनुमः अव
तारयामः अवतारितज्याकानि कुर्मः॥ अथ नवमः॥ अस्मिन्महत्यर्णवे॰ तन्मसीति॥ अस्मिन्दृश्य

आर्णिसिंस्लोनि विधंतेयत्रेति =

मानेन सहस्रार्णवे महासमुद्रे सहस्रशो प्रौढेन तद्दिशो अधिभिधिभिस्सवर्तमाना तेषां रुद्राणां त्रिविशेषायसे
ति। तेषामित्यादि पूर्ववत्। योजनीयं॥ अथ दशमः॥ नीलग्रीवाः शितिकंठा० तन्मसीति। ग्रीवायामेकदेशे
अदेशे नीलवर्णाः नीलग्रीवाः प्रदेशांतरे श्वेतवर्णाः शितिकंठाः तादृशाय रुद्रा दिवं द्युलोकमुपाश्रिताः शि
ष्टं पूर्ववत्॥ अथैकादशः॥ नीलग्रीवाः शितिकंठाः शर्वाः० तन्मसीति। नीलग्रीवाः शितिकंठाः शर्वा
रुद्राः त्रिविशेषाः। अधःक्षमाचरा रुनेरधस्तात्पाताले संचरंति तेषामित्यादि पूर्ववत्॥ अथ द्वादशः॥
ये वृक्षेषु० तन्मसीति। यथा लोके ष्ववस्थितास्तथा वृक्षेष्ववस्थिताः तेषु केचित् शष्पिंजराः शष्प
वद्बाललतृणवत्पिंजरवर्णाः। नीलग्रीवाः केचित् ग्रीवादेशे नीलवर्णोपेताः अपरे पुनर्विलोहिताः विशे
षेण रक्तवर्णाः ईदृशाये रुद्राः संति तेषामित्यादि पूर्ववत्॥ अथ त्रयोदशः॥ ये भूतानामधिपतयो० तन्मसी
सीति। भूतशब्देनात्र हिंसाशरीराः संतो मनुष्यायद्वेष्यपिशाचा गणविशेषा उच्यंते। तेषामधिपतयो ये रु
द्रास्तेषु केचिद्विशिखासः मुंडितमूर्द्धानः अपरे कपर्दिनो जटाबंधोपेताः। तेषामित्यादि पूर्ववत्॥ अथ
चतुर्दशः॥ ये पथां० तन्मसीति। ये रुद्राः पथिरक्षिणो लौकिकवैदिकमार्गाणां रक्षकाना त्रके धर्विदवमा
र्गाणां किंतु सर्वेषां प्रधाने रक्षकाः। ऐळबृदाः इळापृथिवी तत्संबंधि ऐळमन्नं तद्बिभ्रती सैळभृतः ऐळ

३०२

शितिशब्दःश्वेतवचनः = ३

२०८

वर्णव्यत्यय: =

बृंदैः। अन्नप्रदानेन पोषकाः इत्यर्थः। आयुर्युधः आयुषायुध्यंति यावज्जीवयुद्धं कुर्वंतीत्यायुर्युधः ये रुद्रास्तेषा
मित्यादि पूर्ववत्॥ अथ पंचदशः॥ ये तीर्थानि० तन्मसीति। ये रुद्रास्तीर्थानि काश्यादीनि रक्षितुं प्रचरं
ति कीदृशा रुद्राः सृकाहस्ताः सृका क्षुरिका तीक्ष्णायुधधरा विशेषस्तत्पाणयः केचित् अपरे तु निषंगिणः
खड्गयुक्ता तेषामित्यादि॥ अथ षोडशः॥ ये अन्नेषु० तन्मसीति। ये रुद्रा अन्नेषु भुज्यमानेषु गूढत्वेनावस्थि
ताः संतो जनान् विविध्यंति विशेषेण पातुं येषत्रम्यादिना बाधंते। तथा पात्रेषु पानेषु क्षीरोदकादिषु गूढ
त्वेनावस्थिताः पिबतो जनान्विविध्यंति तेषामित्यादि॥ अथ सप्तदशः॥ य एतावंत० तन्मसीति। ये रुद्रा ए
तावंतश्च अत्र यावे तउक्ताः तेभ्यांसश्च बहुतरा भ्योकेभ्योधिकाः सर्वादिशः वितस्थिरे प्रविश्य स्थिताः
तेषामित्यादि। इत्थं सप्तदशसंख्याकाः पायामंत्रा उक्ताः। अथ त्रयो यहूरूपा मंत्रा उच्यंते॥ का०॥ अति
लोमं प्रस्रवरोहां जुहोति प्रमाणेषु नमोस्त्विति प्रतिमंत्रमिति। नमोस्त्विति मंत्रत्रयेण जानुमात्रं नाभिमा
त्रं मुखमात्रमित्येषु त्रिषु प्रमाणेषु प्रातिलोम्येन प्र० स्रवरोहनामकं होमं कुर्यात्। प्रथमं मुखमात्रेप
श्चान्नाभिमात्रे ततो जानुमात्र इति प्रतिलोमशब्दस्यार्थः॥ तत्र प्रथममंत्रपाठस्तु॥ [illegible] रुद्रे दे
वसानिष्टेमोरस्तु रुद्रेभ्यो ये दिवि० इत्यादि। ये रुद्रा दिवि द्युलोके वर्तंते तेषां येषां रुद्रविशेषाणां वर्ष

वर्षमिषव इषवः अतिवृष्टेन नाशयित्वा प्राणिनो हिंसंतीति तेभ्यो दिविस्थितेभ्यो वर्षेषुभ्यश्च रुद्रेभ्यो नमोस्तु। की
दृशो नमस्कार इति स एव विभज्य दर्श्यते। दश प्राचीः प्राङ्मुखत्वेनांजलिकरणेन दशांगुलयः प्रागग्रा भवं
ति। एवं दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वा इदृशैरंजलिविभागविशेषैस्तेभ्यो रुद्रेभ्यो नमोस्तु। ते रुद्रा नोस्मान्र
क्षंतु सुखयंतु। किंच ते रुद्रा नोस्मानवंतु मृडयंतु संघाऽद्यं कुर्वंतु। ते वयं नमस्कृतरुद्राः संतो यं वैरिणं प्र
तिद्विष्मः द्वेषं कुर्मः। यश्च वैरी नोस्मान्द्वेष्टि तमुभयविधं वैरिणं तेषामेषां रुद्राणां जंभे विदारितमुखे दंष्ट्राकराले
दध्मः। स्थापयामः॥ अथ द्वितीयः॥ नमोस्तु रुद्रेभ्यो ये न्तरिक्षे० इत्यस्मरति। ये रुद्रा अंतरिक्षे वर्तंते ते
षामपि मध्ये येषां वात इषवस्तत्प्रेरणेन वायुना रोगमुत्पाद्य हिंसंति तेभ्यो ऽतरिक्षवर्तिभ्यो रुद्रेभ्यो वातेषुभ्यश्च
नमोस्तु॥ दश प्राचीरित्यादि पूर्ववत्॥ अथ तृतीयः॥ नमोस्तु रुद्रेभ्यो ये पृथिव्यां० इत्यस्मरति। ये रुद्राः

३०९

पृथिव्यां वर्तंते तेषामपि रुद्रेषु येषां रुद्राणामन्नमेवेषवो बाणा यथा बाणान्तर्लक्ष्ये प्रविश्य बाधं अन्यथान्न
न्नार्थचौर्यकारयित्वायान्हिंसंति तान्प्रति हिंसकानां रुद्राणां अन्नमेवेषवः तेभ्यः पृथिवीस्थितेभ्योन्न ३०९
बाणकेभ्यश्च रुद्रेभ्यो नमः॥ दश प्राचीरित्यादि पूर्ववत्तेयोऽर्थः॥ ॥इत्यष्टमोनुवाकः॥ ॥वेदार्थस्य प्रकाशेन०
॥इति सायणाचार्येण विरचिते माधवीये काण्वसंहितायां वेदार्थप्रकाशे सप्तदशोध्यायः॥ ॥यस्य नि

कदन्तनक्षणे

श्वसितं वेदा०॥ ॥सप्तदशोध्याये चित्याग्नेर्मूलरुद्रियहोम उक्तः॥ अथाष्टादशे परिषेचनादिसंस्कारा उ
च्यंते। तत्र प्रथमेनुवाके परिषेचनविकर्षणादयो विधीयंते॥ का०॥ चित्यं परिषिंचत्यग्नौ दक्षिणदोहला
श्मन्नूर्जमितीति॥ दक्षिणबाहुमूले पाषाणमवस्थाप्य आग्नीध्रः चित्याग्निं अश्मन्नूर्जमिति मंत्रेण प
रिषेचनं कुर्यात्॥ पाठस्तु॥ अश्मन्नूर्जं पर्वते० संररराणा इति। हे मरुतः संररराणाः सम्यग्दातारो नत्री
ल्लायध्वं तामस्मादिमंती ऊर्जं बलहेतुमिषमन्नं नोस्मभ्यं धत्त संपादयत। कीदृशामिषं ऊर्जमश्मनि पाषा
णे पर्वते मेरुविंध्यहिमवदादौ च अश्मन् अश्मवति उदकवति पर्वते मेघे श्रिश्रियाणामाश्रितां ऊर्जं
सारभूतां तथा अद्भ्यो जलेभ्यः ओषधीभ्यो व्रीहियवादिभ्यः वनस्पतिभ्य उदुंबरादिभ्यः सकाशात्
अधि संभृतं अधिकत्वेन सम्यक् संपादितं पयसो लक्षणं मन्त्रे तथाविधं प्रयच्छत॥ का०॥ अश्मंस्ते क्षु
दित्यद्रो कुंभं त्वखेति। पाषाणे कुंभं स्थापयेत्। हे अश्मन् इष्टा कार्दिर्ध्वंभिष्टी इति वाल्पा पाषाण स
दृशाग्ने ते त्वदीयाया क्षुदसौ मम वैरिणं प्राप्नोतु॥ का०॥ मयि त ऊर्गित्यादायेति। पाषाणे व स्थापित
मुदकुंभं गृह्णीयात्। हे पाषाण ते त्वदीयाया ऊर्क् सारभूता सा तु मय्येव तिष्ठतु॥ का०॥ दक्षिणस्यां वे
दिश्रोणौ प्राङ्क्षिपन्दक्षिणास्यति यं द्विष्म इतीति। नैर्ऋतदिग्भव आग्नि सा महावेदेः श्रोणौ प्राङ्मुख

समुद्रमध्यां तत्राब्दा अपि संख्याविशेषवाचकाः संख्यासामानाधिकरण्यात्॥ ३

कृत्वा दक्षिणस्यां दिशि शिक्यं प्रक्षिपेत्। तत्र मुगच्छत्विति मंत्रशेषः। हे पाषाण सद्यस्त्वाग्ने वयं यं पुरुषं
प्रतिद्विष्मः द्वेषं कुर्मः। तं पुरुषं प्रति तत्त्वदीया शुक् शोकः ऋच्छतु गच्छतु॥ का०॥ अनपेक्षमेत्यादक्षु प्रा
क्षु अनुपतीमा इमा इतीति। पूर्ववेदिश्रोण्योर्दिशोर्मध्ये स्थित्वा जपेत्॥ पाठस्तु॥ इमा मे अग्न इष्टका० अर्च्चीय
माणा इति। हे अग्ने या इष्टकाः पंच चितिषूपहिताः इमा इष्टका मे मह्यं मदर्थं तव प्रसादात् धेनवः अभि
मतफलस्य दोग्ध्र्यः संतु। लोकांतरे गोरूपास्त्वत्प्रसादात् कामदुघा भवंत्वित्यर्थः। कियत्य इष्टका इति तत्सं
ख्यामाह। एकेत्यादिना अत्रैकादिपरार्द्धपर्यंतैः शब्दैरुत्तरोत्तरं दशगुणिता संख्या उदाहर्तव्या। यद्यपि स
हस्रादिनियुतसंख्या एवेष्टका एतावत्य इष्टका हे अग्ने दशगुणिता संख्योच्यते। एकाङ्कस्वसंख्याविशि
ष्टाया इष्टका सा दशगुणिता सती दशसंख्यामापद्यते। सा च दशगुणिता सती शतसंख्या
मापद्यते। तच्च शतं दशगुणितं सत् सहस्रसंख्यं भवति तच्च सहस्रं दशगुणितमयुतं भवति अयुतं
च दशगुणितं सत् नियुतं भवति नियुतं च दशगुणितमर्बुदं भवति। अनयैव दिशा परार्द्धपर्यंतं
दशगुणितोत्तरोत्तरसंख्योदाहर्तव्या। यद्यपि सहस्रादिनियतसंख्या एवेष्टका उपधीयंते तथापि
मंत्रसामर्थ्यादृद्धिमाना एकादिपरार्द्धांतसंख्या भवंति। एका च दश चेत्यादिषु चकारा इतरेतरसमुच्चयार्थाः।

३१० रा

एवमेकादिसंख्याक्रमेणाभिवृद्ध्या या इष्टकास्ता इष्टका हे अग्ने त्वत्प्रसादान्मे मह्यं धेनवः संत्विति पूर्वोक्तस्याभि
गमनं। एतद्भवनं कुत्रेति तदाह अमुत्रेति अमुत्र परलोके तत्राप्यमुष्मिन्नुपरितने नाके नाकपृष्ठा
ख्ये लोके अपि वह इष्टकाः स्वयंकृतवत्स्थ भवथ। वसंता घासिका भवथ। ऋतं सत्यं यज्ञं वा वर्द्धयंतीति
ऋतावृधः। ऋतलक्षाः ऋतुषु वसंतादिषु तिष्ठंतः स्थ भवथ। ऋतावृध इति पुनर्वचनमादरार्थं। घृ
तं श्चोतंतीति घृतश्चुतः घृतस्राविण्यः। मधुश्चुतः मधु माक्षिकं स्रवंत्यः एवंगुणविशिष्टा भवथ। ता
यूयं विराजो नाम विशेषेण राजिता इति विराजः विराज इति प्रसिद्धा धेनवो भूत्वा लोकोत्तरे कामदु
घा यद्यत्कामयते तस्य सर्वस्य दोग्ध्र्यो भवथ। तथा अक्षीयमाणाः क्षयरहिता भवथ॥ का०॥ मं
डूकावकावेतसशाखा रज्ज्वा वेणौ बध्वा कर्षति समुद्रस्येति प्रत्यृचं मिति। विस्रस्याग्निं मंडूकादीन् दीर्घवंशा
ग्रे बद्धा तेन समुद्रस्येत्येतैस्त्रिभिः सप्तभिर्वा प्रतिमंत्रं विसमग्निं विकर्षेत्। यद्यप्यग्नेरुपस्थिः सर्वत्र मं
डूकादिभिः स्पर्शो भवति तथा दीर्घवंशाग्रेण कर्षेदित्यर्थः॥ तत्र प्रथमा॥ समुद्रस्य त्वावकया० भवति। अ
वका शैवालं। हे अग्ने त्वां समुद्रस्यावकया समुद्रनदीजलस्य उदकस्य संबंधिना शैवालेन परिव्ययाम
सि परितः संवरणं कुर्म उपरिष्टात् सर्वत्र विकर्षणमिदमित्यर्थः। सं चास्मभ्यमस्मदर्थं पावकः शोधकः

शिवः शांतश्च भव ॥ अथ द्वितीया ॥ हिमस्य त्वा० नवेति । हे अग्ने त्वां हिमस्य शीतस्य जरायुणा जरायुवद् दुः
निस्थानीयेन शैवालेन । शेषं पूर्ववत् ॥ अथ तृतीया ॥ उप ज्मन्नुप० शिवं कृधीति । हे अग्ने त्वं ज्मन् ज्मनि
ज्मा पृथिव्यां तस्यां उपावतर तथा वेतसे वंजुले शाखायां उपावतर । तथा नदीषु नदीजले अवतर । त्वं
चापां पित्तमसि ते नो भव सिरवमग्निं संबोध्याथेदानीं मंडूकीमाह । हे मंडूकि मंडूका नेकास्तेषां स्त्री
मंडूकी तत्संबोधनं हे मंडूकि त्वं ताभिः वर्षाभिः स्त्रीभिरद्भिः सह आगहि आगच्छ सा त्वं इमम नुष्ठीयमा
नं नोस्मदीयं यज्ञं पावकवर्णं अग्निसमानतेजस्कं शिवं फलप्रदत्वेन शांतं कृधि कुरु ॥ अथ चतु
र्थी ॥ अपामिदं० नवेति । इदं चित्यग्निस्थानं अपां न्ययनं नितरां गमनेन प्राप्तिस्थानं सागरः ह्यापः प्राप्य
प्यंते अतएवापां बहुलत्वात् समुद्र निवेशनं गृहस्थानीयं तद्रूप हे अग्ने तव हेतयः अस्मत्तोऽन्यान्
विरोधिनः पुरुषान् तपंतु शोधयंतु । अस्मभ्यमस्मदर्थं पावकः शोधकः शिवः शांतश्च भव ॥ अथ
पंचमी ॥ अग्ने पावक० यक्षि चेति । हे अग्ने पावक शोधक देव द्योतनात्मक रोचिषा दीप्त्या मंद्रया मदनीयया सुंदर्या=
३११ जिह्वया वा देवानावक्षि यक्षि च आह्वय यज च ॥ अथ षष्ठी ॥ स नः पावक० चन इति । हे अग्ने पावक
शोधक दीदिवः दीप्यमानः त्वं नोस्मदर्थं देवान् इह कर्मण्यावह नोस्माकं इमं यज्ञं हविश्च उपदेवसमीपे ३११

घृताशित्विदीप्तिनाम=

आप्ययेति शेषः ॥ अथ सप्तमी ॥ पावकया य० अजर इति । योग्निः पावकया पावन्या चितयंत्या चेतयं
त्या चित्तिं कुर्वाणया कृपा कल्पनया सामर्थ्येन युक्तः सन् क्षामन् क्षामनि भूमौ रुरुचे दीप्तवान् । तत्र
दृष्टांतः उषसो न भानुना सूर्यः उषसः संबंधिना भानुना सूर्यप्रकाशेन दीप्यते तद्वत् । किंच योग्निः
यामेति कर्मणा एतशस्य गमनकुशलस्याश्वस्य यामन् यामनि मार्गे रणे युद्धे तृपुः कुर्वन् परबलानि हिंसन् वैआघृणि तृपीहिंसायां= धातुरूप
नु सर्वतो दीप्यते एव खलु सोग्निः अजरो जरारहितः ततः क्षाणो न सततृष्णो न भवति । यथा लोके शीघ्र
गमनस्वभावमश्वं वामहस्तगतेन खलिनेन दृढं नियम्य रणे प्रवर्तमानः परबलानि हिंसन् संत
चरते तथाग्निः प्रज्वलति न कदाचिज्जीर्यति नाप्यसौ तृष्णायुक्तः किंतु तृप्त इत्यर्थः ॥ का० ॥ चित्यारो
हणं नमस्त इति ॥ चित्यमग्निमारोहेत् ॥ पाठस्तु ॥ नमस्ते हरसे० नवेति । हे अग्ने ते तव हरसे रसानां
हर्त्रे शोचिषे शोषणहेतवे ते ज्वलते नमोस्तु । किंच ते तव अर्चिषे पदार्थप्रकाशकाय तेजसे नमोस्तु ।
अन्यानीत्यादि पूर्ववत् ॥ का० ॥ स्वयमातृण्णायां पंचगृहीतं जुहोति नृषदे वेडिति प्रतिमंत्रमिति ।
स्वयमातृण्णायामिष्टकायां पंचवारं गृहीतमाज्यं नृषदे वेडित्यादिभिः पंचभिर्मंत्रैः क्रमेण जुहु
यात् ॥ तत्पाठस्तु ॥ नृषदे वेट्० स्वर्विदे वेडिति । नृषु मनुष्येषु आत्मरूपेण सीदतीति नृषत्

वषट्कारेण वा वे स्वाहाकारेण वा देवेभ्योन्नं प्रदीयते यद्वेद्दकार इति न्यातपथ श्रुतेः ॥ =

तस्मै वट्टइदं हविर्दत्तं और्वरूपेणाप्सुसीदतीत्यप्सुषत्। तद्वाग्निरूपेण वनेसीदतीति वरनसत्। आहवनीयादिरूपेण बर्हिषि यत्सीदतीति बर्हिषत्। आदित्यरूपेण स्वर्गं विंदते लभत इति स्वर्विद्॥ का०॥ समासिक्ता

न्कुंभोऽभिदृत्तिये देवा इति द्वाभ्यामिति। दधि मधु घृतं च संपात्यायेकुंभाः समासिक्ताः तैर्ये देवा इति द्वाभ्यां मंत्राभ्यां चित्यग्नि प्रोक्षणं कुर्यात्॥ तत्र प्रथममंत्र पाठस्तु॥ ये देवा देवानां॰ घृतस्येति। द्विविधा

देवा हविर्भुज इंद्रवरुणादयः शरीरनिर्वाहकाः प्राणापानादयश्च। दीव्यंतीति रूपसाम्निरूपत्वं प्राणेष्वपि

व्यक्ति। उभयेष्वपि यज्ञियाः तत्रेंद्रादयो यतेन पूज्यं तीति यज्ञियाः प्राणादयस्तु यत्नेन पूजकत्वाद्यज्ञि

याः। एवं सति यज्ञियानामिंद्रादीनां देवानां संबंधिनः प्राणरूपा ये यज्ञिया देवाः संवत्सरीणे संवत्सरे

गत्वा भ्यं चित्यग्निं भागं भजनीयमुपासते। ये प्राणाद्या अहुतादः हुतं स्वाहाकारेण समर्पितमदंती

ति हुतादः इंद्रादयस्तद्विपरीतत्वात्प्राणाद्या अहुतादयः तथाविधाः प्राणाद्या देवा अस्मिन्यज्ञे हवि

षोहवीरूपस्य मधुनो घृतस्य च सामर्थ्यादह्यमानं तद्भागं स्वयं पिबंतु मदीयेन स्वाहाकारसमर्पणेन

विनास्वयमेव दधि मधु घृतान्स्वीकुर्वंत्वित्यर्थः॥ अथ द्वितीया॥ ये देवा देवेष्वधि॰ अधिस्तु

षिति। ये देवाः प्राणा देवेष्विंद्रादिष्वपि अधिष्ठात्वेन देवत्वमायन्। प्राप्ताः प्राणैरधिष्ठिता एवेंद्रा

द्वियग्रहाव्यवहरंतीत्यर्थः॥ किंच ये प्राणा अस्य ब्रह्मणः ब्राह्मणस्याग्नेः परिवृढस्य पुरएतारः पुरतोगं

तारो निर्वाहका इत्यर्थः। न खलु प्राणेभ्यो नाचीयमानोऽग्निर्निर्वोढुं शक्यते किंच येभ्य ऋते प्राणा

न्विना किंचन धाम किमपि शरीरं न पवते न शुद्धं भवति न प्रवर्त्तते च। ते प्राणरूपा देवा दिवो न द्युष्वपि

न तिष्ठंति। पृथिव्या न भूमावपि न तिष्ठंति किं तर्हि स्नुषु पर्वतसानुषु दर्वोषु भ्राश्रितगतवदु[illegible]रादि स्नुप्रस्रवणे =

गोलकेषु अधि अधिप्रसवर्त्तंते॥ का०॥ प्राणदा इत्यवरोहतीति। चित्यग्नेः सकाशादवरोहेत्॥ पाठस्तु॥

प्राणदा अपानदा॰ भवेति। यजमानाय प्राणं ददाती प्राणदाश्च सोग्निरभिधीयते। प्राणं सुस्थिरं

करोतीत्यर्थः। एवमुत्तरत्रापि यो अर्थश्चोबलं वरिवोधनं। अन्यानि स्यादिपूर्ववत्॥ इति प्रथमोनुवाकः॥

॥ प्रथमेनुवाके परिषेचनादिकमुक्तं। अथ द्वितीयेनुवाके वैश्वकर्मणहोमाः सर्वे कर्त्तव्यायाए

काहुतिरस्ति सा वैश्वकर्मणहोमस्य प्रथमाहुतिश्च सूक्तमभिधीयते॥ का०॥ पंचगृहीतं जुहोत्यग्नि

स्तिग्मेनेत्यचेनेति॥ पाठस्तु॥ अग्निस्तिग्मेन शोचिषा॰ रयिमिति। अयं चीयमानोऽग्निस्तिग्मेन शो

चिषा तीक्ष्णेन तेजसा अत्र मदनं भक्षणं तदस्यास्तीत्यत्त्रीतादृशीः सर्वराक्षसादिकं नियासत्नयस्त

पक्षये। नितरामुपक्षीणं करोतु किंचायमग्निर्नोस्मदर्थं रयिं धनं नुतं ददातु॥ का०॥ षोडशगृहीता

वनोतिर्दर्शनार्थः =

ऊह्यमनुवाकद्वयेणेति । षोडशगृहीतस्याज्यस्याग्नेर्वैश्वकर्मणहोमस्य प्रथमाहुतिर्य इमेत्याद्याभिरष्ट
भिर्ऋग्भिर्जुहुयात् ॥ तत्र प्रथमा ॥ य इमा विश्वा भुवनानि० ऋषिर्होतेति । यः परमेश्वरः इमा विश्वा भुव
नानि जुह्वत् प्रलयकाले पृथिव्यादीनिमान् सर्वान् लोकान् स्वात्मन्याहुतिप्रक्षेपवत् संहरन् ऋषी नर्तीन्द्रि
यद्रष्टा सर्वज्ञः होता संहाररूपस्य होमस्य कर्त्ता नोऽस्माकं पिता जनको न्यसीदत् निषसाद स्वयं
स्थितवान् प्रलयकाले प्राप्ते सति सर्वान् लोकान् संहृत्यास्माकमपि संहृत्य पुनः स्रष्टा च सन् सर्वज्ञो पर
मेश्वरः स्वयमेवासीदत् अत एव सर्वा अप्युपनिषद एवमाहुः । आत्मा वा इदमेक एवाग्र आसीन्ना
न्यत्किंचन मिषत् । सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्याद्याः । स तादृशः परमेश्वरः आशिषा
बहु स्यां प्रजायेयेत्येवंरूपया पुनः सृष्टीच्छया द्रविणमिच्छमानः धनोपलक्षितं जगद्भोगमपेक्षमा
णः प्रथमच्छत् स्वकीयमेकमेवाद्वितीयमुत्कृष्टं रूपमाच्छादयन् परान् निष्यक्तोपाधिना प्रविवेश जीव
रूपेण प्रविष्टः । एतच्च सर्वमुपनिषद्याम्नातं सोऽकामयत बहु स्यां प्रजायेयेति । स तपोऽतप्यत ।
स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किंच तत्सृष्ट्वा तदेवानुप्राविशदिति । एवमन्या अप्युपनि २१३
षद उदाहार्याः ॥ अथ द्वितीया ॥ किं स्विदासीदधिष्ठानं० विश्वचक्षा इति । लोके हि घटं चिकीर्षुः कु
लालो गृहादिकं किंचित्स्थानमधिष्ठाय मृद्रूपेणारंभकद्रव्येण चक्रादिरूपेरुपकरणैर्घटं निष्पादयति ।

२१३

ईश्वरस्य निरपेक्षत्वात्तत्सर्वमत्राक्षिप्यते द्यावापृथिव्योरुत्पादनवेलायामीश्वरस्याधिष्ठानं निवासस्थानं
किं स्विदासीत् किं नाम भूत्वा किंचित्स्थित्वा इत्यर्थः । तथा आरंभणं कतमत्स्विदासीत् आरभ्यते अनेनेत्यारंभ
णमुपादानकारणं तदपि कतमत् कथं न हि द्यावापृथिव्योर्जनयितुं किंचिदुपादानं संभवति । तथा दंडच
क्रादिकं निमित्तमपि कथा कथंभूतं किंप्रकारमासीत् । न किंचित्संभवतीत्यर्थः । विश्वचक्षाः सर्वद्रष्टा वि
श्वकर्मा यतो यस्मिन् काले भूमिं भूलोकं द्यां द्युलोकं च जनयन् वर्तते तस्मिन् काले महिना स्वमहिम्ना सा
धनांतरं विनैव विशेषेणौर्णोत् स्पष्टो द्यावापृथिव्यावाच्छादितवान् चकार अनन्यशक्तिरयं परमेश्वर
इत्यर्थः ॥ अथ तृतीया ॥ विश्वतश्चक्षुरुत० एक इति । चक्षुरादिप्राणानां द्यावापृथिव्योश्चोत्पत्तिरूपं
विश्वरूपः परमेश्वर एव प्रशास्ते । कथमिति तदुच्यते । विश्वतश्चक्षुः सर्वतश्चक्षूंषि यस्य सो विश्वतश्च
क्षुः । परमेश्वरस्य सर्वप्राण्यात्मकत्वात्सर्वस्य प्राणिनो यानि चक्षूंषि तानि तदुपाधिकस्य परमेश्वर
स्यैवेति सर्वत्रास्य चक्षूंषि संपद्यंते । एवं मुखहस्तपादेष्वपि योजनीयं । स तादृश एको देवो द्यावापृथि
वी जनयन् बाहुभ्यां बाहुस्थानीयाभ्यां धर्माधर्माभ्यां निमित्तकारणाभ्यां सं धमति संगमयति इत्यर्थः ।

जगत्सर्वं सम्पन्नं तं प्राप्तं स्वाधीनं करोतीति तथापत्तत्वैः पतनत्री लैरनिसैः पंचभूतैरुपादानकारणैर्जगत्सं
प्रमतिस्वाधीनं करोतीति ॥ अथ चतुर्थी ॥ किंस्विद्वनं० धारयन्तीति । लोकाहि ब्रो कुप्रासादं निर्मिमाणः
कुस्मिंश्चित् सौष्ठवेनैनं केचिद्दम्महां तं स्वर्णं शिलातक्षणादिना तत्स्तम्भादिकं संपादयति । इह तु परमेश्वर — तत्र इति कूरे तिकर्मा =
प्रेरिताजगत्सृष्टारोयतो यस्माद्वनाद्यं वृक्षमाद्दापद्यावापृथिवी निष्टतक्षुः । तक्षणेन द्यावापृथिव्यौ नि
ष्पादितवंतः तद्वनं किंस्वित् । किंन्नामस्यासनं किं विसादृक्षांसं क्रवंति । तथा कउ स वृक्षः ताद्दग्गाःप्रो
क्तवल्लौपिकआसनः कुत्रचित्संभवति हे मनीषिणो धीद्धांसः मनसा स्वबुद्ध्या न विचार्य पृच्छतेदुक्तोत
दुदंसर्वं पृच्छतेव । किंच ईश्वरो भुवनानि धारयन्यदध्यतिष्ठत्तरूयत्स्थानमिति । छित्तवान् । तदपिस्था
नं सर्वथा पृच्छत तएतस्य प्रश्नस्य सर्वस्यापुनरस्मुत्तरेषु ब्रह्मवनं ब्रह्म स वृक्ष आसीदित्तिस्यमृच्या
म्नातं । स्वरूपव्यतिरिक्तवनादिनिरपेक्षतमेवास्यांतरस्यातिप्रायः । अतोत्रापि किं स्विद्वनमित्यापत्त

परत्वेनैव व्याख्यातं । पृच्छतेत्यस्याप्ययमभिप्रायः नेवद्धिः पृष्टोप्य अभिज्ञाः निरपेक्षत्वमेव वक्ष्यतीति ।

। अथ पंचमी ॥ या ते धामानि परमाणि० वृधान इति । हे विश्वकर्मन् त्वदीयानिया ॥ यानि परमाणि धामा
निं उत्तानि यामध्यमा यानि वमध्यमस्थानानि इमा तानीमानि सर्वस्थानानि सखिभ्यः सखिवंति

यानि च अवमाः वमानि कनीयांसि धामानि =

नयेध्येयजमाने ध्येहविषि हविः प्रदत्तमिभिमित्तं शिक्षोपदिशहे स्वधावः स्वधोपात स्वितहविर्लक्षणान्न
वत् विश्वकर्मन् तन्वं वृधानः यजमान शरीरं वर्द्धमानः स्वयं यज स्वत्सदनुग्रहमंतरेण कोवान्यो यष्टुं स
मर्थः । अथवा वाचस्पतिमित्य साद्या स्तिस्त्र ऋचोष्टमेध्यायेव्याख्याताः ॥ ॥ इति द्वितीयोनुवाकः ॥
॥ द्वितीयेनुवाके विश्वकर्मणहोमस्य प्रथमाहुतिरुक्ता । अथ तृतीये द्वितीयाहुतिरुच्यते ॥ का० ॥ चक्षुषः
पितेत्यपरमनुवाकेनेति । षोडशगृहीतस्याज्यस्य शेषेण विश्वकर्मण होमस्यै द्वितीयामाहुतिं चक्षुषः
पितेत्यस्य भिर्ऋग्भिर्जुहुयादिति शेषः ॥ तत्र प्रथमा ॥ चक्षुषः पिता० अप्रथेतामिति । चक्षुषश्च
क्षुरादेः प्राणसमुदायस्यापितोत्पादको धीरो धैर्यवान् विश्वमनसा स्वबुद्ध्या घृतं घृतवस्मा
नानुपभोगसाधनं कृत्वा एतेइमेद्यावापृथिव्यौ नम्नमाने परस्परानुकूल्येन नमनोपेते अजनत् उत्पादि
तवान् यदेत्यदेव पूर्वे प्रथमोत्सन्ताअन्ताजननयुक्ताभ्यव्ये पूर्वं तत्र चक्षुरादिप्राणा अदद्दहंत दृढा अ
भवन् आदित् अनंतरमेव द्यावापृथिवी अप्रथेतां द्यावापृथिव्यौ विस्तृते अभूतां ॥ अथ द्वितीया ॥
विश्वकर्मा विमना० एकमाहुरिति । विश्वविषयाणि कर्माणि सृष्टिस्थितिसंहाररूपाणि कर्माणि य
स्यासौ विश्वकर्मा सर्व विमना विभूतमनाः तस्य तेषु कर्मसु मनएव साधनमिस्य र्थः । आद् अपि व

सुपांसुलुगिति सप्तम्याः प्रथमा = नामानि दधाति करोतीति नामधाः। नाम च पितैव करोति
प्रथा=१

यस्मादेवं तस्मात् स एव विधाता धाता विहाया इति चोच्यते विधाता उत्पादकः धाता पोषकः विशेषेण हन्तुं हा हातुं यातीति वा
ति परिसज्यतीति विहायाः संहन्ते समर्थः। उतापि च अत एव परमा परमः सर्वेभ्य उत्कृष्टः सम्यक्पश्य
तीति संदृक् सर्वं तस्य समर्थः। यत्र यस्मिन् परः परस्मिन्नीश्वरे सप्त ऋषीनेकमाहुः सैव परमेश्वरः पर
ते मरीच्यत्रिप्रमुखाः सप्त ऋषयो यशिव आहूयंते सर्वसृष्टेः प्राक् परस्मिन्नेकीभूता इति वेदांत
पारगा आहुः स एव परमेश्वरस्तेषां सप्तऋषिप्रवृत्तीनामिच्छाम्यपेक्षितानि स्थानादीनि दूषास्वेच्छा
मात्रेण संपादयति तेन च ते महर्षयो मदंति हृष्यंति॥ अथ तृतीया॥ यो नः पिता० सन्येति। यो विश्व
कर्मासोस्माकं पिता पालयिता न केवलं पालकः किंतु जनिता उत्पादकोपि किमनेनास्माकमुत्पादयि
ताऽस्ति संकोचेन यो विधाता सर्वस्य जगत उत्पादकः यश्च विश्वकर्मा विश्वा विश्वानि भुवनानि स्वेतु
दृग्रूपाणि धामानि वेद जानाति किं च यः देवानां नामधाः स्वयमेव सर्वदेवरूपेणागतो इंद्रादी ३२५
निदेवतानामानि धारयंति। अत एवान्यत्राम्नातं। इंद्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मा
न्। एकं सद्विप्रा बहुधा वदंत्यग्निं यमं मातरिश्वानमाहुरिति। अत एव हूतानां देवानां नामानि धारयन्न ३२५
पि स्वयमेक एव तं विश्वकर्माणं परमेश्वरं अन्या भुवना तस्मादन्यानि सृष्टानि सर्वाणि भुवनानि तं संप्रश्नं
ईश्वरः स्रष्टानि भुवनानि तमीश्वरं संप्रश्नं स्वाधिकारं संप्रश्नयितुं यंति तानीश्वर एव स्वस्वाधिकारेषु नियुंक्त इति भाष्यां
तरं =

स्वाहेति। यः सुषुम्णः। सुयज्ञियः सूर्यरश्मिः। सूर्यस्यैव हि चंद्रमसो रश्मयः चंद्रमा गंधर्वः सुषुम्णः इति सु
यज्ञ इति खेप्तिवा सूर्यरश्मिरिति चंद्रमसो रश्मयश्चंद्रमा गंधर्व इति श्रुतेः। तस्य नक्षत्राण्यप्सरसः तासां ना
म भेकुरयः। ताः हि नक्षत्राणि कुर्वंतीति भेकुरयो नक्षत्राणि। तुल्यमन्यत्॥ अथ चतुर्थः॥ इषिरो वि
श्वव्यचा० स्वाहेति। यः इषिरः क्षिप्रः इषिगतौ कुलागतौ विश्वव्यचाः सर्वलोगमनशीलः॥ वातो वायुः स ए
व गंधर्वः। तस्य वातस्य आपः अप्सरसः ऊर्जः अन्नरसः नाम। स नः इत्यादि॥ अथ पंचमः॥ भुज्युः सुपर्णो०
पालयतीत्यर्थः स्वाहेति। यो यज्ञो भुज्युः यज्ञो हि सर्वाणि तानि भुनक्तीति श्रुतेः। सुपर्णः शोभनपतनः स एव गंधर्वस्त
स्य दक्षिणा अप्सरसः। दक्षयंतीति दक्षिणास्तास्तावा नाम। ताः प्रस्तूयंत इति स्तावाः। स नु साः।
दक्षिणाभिरेव यज्ञः स्तूयते यो वै कश्च दक्षिणां ददाति स्तूयत एव स इति श्रुतेः। तुल्यमन्यत्॥
अथ षष्ठः॥ प्रजापतिर्विश्वकर्मा० स्वाहेति। यः प्रजापतिर्विश्वकर्मा विश्वकर्ता। प्रजापतिर्वै विश्वकर्मा
स हीदं सर्वमकरोदिति श्रुतेः। समनो गंधर्वः मनोलक्षणो गंधर्वः तस्य ऋक्सामानि अप्सरसः।
एष्यो नाम। ऋक्सामानि वा एष्टयः ऋक्सामे ह्याशासत इति नो अस्त्वित्यर्थं नो स्त्विति श्रुतेः। स नः

पंचगृहीतं वरुथशिरस्याध्यव्यारुयनीयं ध्रियमाणे पंचकृत्वः सनो भुवनस्येति। पंचगृहीतमाज्यं =॰
इत्यादि व्याख्यातं॥ का०॥ रथशिरसि जुहोति सनो भुवनस्य पत इति॥ पाठस्तु॥ सनो भुवनस्य पते०
स्वाहेति। हे भुवनस्य पते प्रजापते यस्य ते तव उपरि अस्मिंल्लोके गृहाः सननानि यस्य वेह। इह वा
अस्मिन्लोके वसंति गृहाः। सत्वं प्रजापतिः अस्मै ब्रह्मणे अस्मै क्षत्राय महत् शर्म शरणं यच्छ प्रयच्छ
देहि। स्वाहेति होमार्थः॥ का०॥ वातहोमान् जुहोति समुद्रोसीति॥ पाठस्तु॥ समुद्रोसि नभस्वाना० शंभूर्
मयोभूरभिमावाहि स्वाहेति। लोकत्रयस्थवायुं ॥ लोकद्वारेण स्तुवंति। हे वायो यस्त्वं समुद्रः समुंद
नोसि। नभस्वांश्च। नभ इति नक्षत्राण्युच्यंते। तानि हि निलरां भांति तैः संयुक्तो नभस्वान्। आर्द्रदा
नुश्च वर्षां ह्यादिना आर्द्रं ददातीत्यार्द्रदानुः। शं सुखं भावयतीति शंभूः। मयः सुखं भावयतीति मयोभूः।
एवंभूतस्त्वं हे वायो मामां अभिवाहि। आभिमुख्येन यज्ञफलं प्रापय। स्वाहा होमार्थः। मारुतोसि यस्त्वं ३३८
मरुतां पुरोवात प्रभृतीनां वातानां प्रकृतिभूतोसि अंतरिक्षलोकोसीति वा। मरुतां भुक्ज्योतिः
प्रभृतीनां गणोसि। तं त्वां ब्रवीमि। शंभूस्त्वं मयोभूस्त्वं भूत्वा अभिमावाहि स्वाहेत्युक्तार्थः॥ हे वायो
३३८ यस्त्वं अवस्यूः अवनं तर्पणं रक्षणं सीव्यतीत्यवस्युः। यद्वा अवसः अन्नं तदिच्छतीति इच्छिरतेऽ औ
= अवपूर्वस्य षिवु तंतुसंताने इत्यस्य धातोः क्विपि च्छ्वोः शूडनुनासिके चेति ऊठि। संप्रसारणे च कृते ऽवस्युरिति सिध्यति =

नभ जुहोति यास्त इष्टिं प्रतिमं व्रमिति =

रोर्गादिके उ प्रत्यये च कृते अवस्युरिति भवति। अन्नं कामयामः। दुवस्वान् दुवः इति हविर्नाम। तद्वान् हवि
ष्मान् अभ्यस्मानं॥ का०॥ रुक्मतीर्जुहोति यास्त इति तिसृभिः॥ यास्त इति या वा देवा इति द्वौ मंत्रौ
चतुर्दशाध्याये व्याख्यातौ॥ तृतीयमंत्रपाठस्तु॥ रुचं नो धेहि० रुचमिति। हे भगवन्नग्ने नः अस्माकं
ये ब्राह्मणास्तेषु रुचं दीप्तं धेहि स्थापय। राजसु क्षत्रियेषु नोस्माकं संबंधिषु रुचं धेहि कुरु। विश्येषु
वैश्येषु अस्मत्संबंधिषु शूद्रेषु च रुचं कुरु। मयि च धेहि। रुचा दीप्त्या सह रुचं दीप्तिं अग्ने त्वं वा अ
कुत्सकृत्न धर्माणो यथा वयं दीप्यामहे एवमेतत् कुर्वित्याशयः। यद्वा ब्राह्मणप्रभृतिषु या रुक् तामस्म
दं धेहि देहि सर्वथा॥ किं बहुना मय्यपि धेहि। रुचा ज्ञानेन रुचं अग्ने त्वमिति॥ का०॥ अथ वारुणं
जुहोति तत्त्वा यामीति॥ पाठस्तु॥ तत्त्वा यामि० प्रमोषीरिति। हे श्री भगवन्वरुण यज्ञप्रयोजनमुद्दिश्य
त्वां वोयामि। ब्रह्मणा वेदेन वंदमानः। नमस्कारं कुर्वाणः। यद्वा वंदमानः स्तुतिं कुर्वाणो हं त्वां यामि त्वा
धं रणं प्रयामि। तदाशा हे लनं देवापरोक्षितनः कुर्वाणोयं यजमानो हविर्भिः स्तुधुते हविर्भिः। तत् तद्देव प्र
योजनं आशास्ते प्रार्थयते। हे वरुण इह बोधि तत्प्रयोजनं यज्ञसमाप्तिलक्षणं बुध्यस्व हे उरुशंस
नं तद्विपरीत महेलनं यज्ञादि सत्कर्मनाशं कुर्वाणो हेलनं मा प्रमोषीः

मोघमोघीः अस हे बहु स्तु

स्मदायु

३३९

परिधीनाल्ले

स्वयथापर्व =

सहे बहुस्तु सनः आयुषे वखं दनमाकुरुष्व ॥का०॥ अथार्कस्त्विमे पयोः संततीर्जुहोति स्वर्णघर्म इति। असहेबहुस्तु सनः आयुषेवखंडनमाकुरुष्व ॥ अत्र श्रुतिः ॥ अयं वा अग्निः अर्कोसावादित्योश्वमेधस्तो ॥पाठस्तु॥ स्वर्णघर्मस्वाहा० सूर्यः स्वाहेति ॥ अत्र श्रुतिः ॥ स्वर्ण घर्मः स्वरिव असावादित्यो ष्टगः सौनानैवांतातो देवाएताभिराहुतिभिः समतन्वन्नित्यादिः। स्वर्ण घर्मः स्वरिव असावादित्यो घर्मः। अतस्तमादित्यमग्नौ स्वाहा जुहोतिप्रति ष्ठापयति। स्वरिव योर्को ग्निस्तमग्निमादित्ये जुहो तिस्थापयति। स्वरिव असावादित्यः शुक्रः पुनरशुक्रदध्याति। तं शुक्रं पुनरग्नौ स्वाहा दधामि स्था पयामि। स्वरिव योग्निर्जोति स्तमग्निं इहादित्ये जुहोमि। स्थापयामि। स्वरिव असौ सूर्यस्तमग्नौ जुहोमि। एवं पंचचिति कोयमग्निः स्तत्पते। पंचैता आहुतीर्जुहोति पंचचितिकोग्नि रित्यादिश्रुतेः। यद्वा स्वर्णार्कः स्वार्कः एतानि अग्नेरेव पंच नामानि। अस्यै वैतान्यग्नेर्नामानीति श्रुतेः ॥ ॥ इति द्वि तीयोनुवाकः ॥ ॥ द्वितीये राष्ट्रभृतादिहोममंत्रा उक्ताः। तृतीये प्रातरनुवाकादिहोममंत्रा उच्यंते ॥ ॥का०॥ प्रातरनुवाकमुपाकरिष्यन् अग्निं युनज्मीति तिसृभिरिति ॥ तत्र प्रथममंत्रपाठः ॥ अग्निं युनज्मि० युनज्मि इति। दिवि स्थाय दिव्यं सुपर्णं गरुत्मन्तं पतंतं। वयसा अन्नेन हविर्लक्षणेन बलेन स्ववृहं तं महांतं अग्निं वा वयसा बलेन च तेन च युनज्मि। युक्तं करोमि। तेन युक्तेनाग्निना वयं व ध्नस्य सूर्यस्य ३३९

विष्टपं विगतसंघातापं सर्वदुःखोपलक्षणं सर्वतापरहितं सोरं पदं गमेम गच्छेम। ततोप्यधिकं स्वः स्व र्लोकं रुहाणाः आरोहंतः। नाकं उत्तमं सर्वेभ्यः गमेम स्तन्नुवर्त्ततेयत्र गतान कथंचन अर्कं असुखं तत्रि नप्राप्नुवंति स्वर्गो कोलोकः ॥ अथ द्वितीयः ॥ इमौ ते पक्षौ० पुराणा इति। हे अग्ने भगवन्नग्ने ते तव अत्रि णः उत्पतनशीलस्य तव इमौ मंत्र प्रतीयमानौ प्रसिद्धौ अजरौ जरारहितौ पक्षौ विन्नि गमन साधन त्वं ताभ्यां अपहंसि। वि नूतौ काविति। याभ्यां पक्षाभ्यां त्वं रक्षांसि राक्षसान् श्रेयसः परिपंथिनः। पाप्मनश्च अपहंसि। वि नाशयसि। ताभ्यां पक्षाभ्यां सुकृतामु लोकं पतेम गच्छेम। अपि च अस्मदधिकपुण्यकारिणामपि लो कं गच्छेम। लोकं विशिनष्टि। यत्र ऋषयो मंत्राणां द्रष्टारः प्रथमजाः पूर्वजाताः पुराणाः पुरातनाः विश्वसृजः। यत्र स्थाने जग्मुः गतास्तत्र पतेमेति संबंधः ॥ अथ तृतीयः ॥ इंदुर्दक्षः० मा मा हिंसीरिति। हे अग्ने यस्त्वमिंदुः ॥ इदि परमैश्वर्ये। परमेश्वरः। उंदी क्लेदने। उदरिक्तादेरिति। उंदतीतिइं दुः इंदनो वा। दक्षः। उत्साहवान्। श्येनः शंसनीयगतिः। ऋतावा। यज्ञवान्। सत्यवान्। हिरण्यपक्षः शकुनः। भुरण्युः भरणशीलः। महान्। प्रभावश्रेष्ठः उदकवान्वा। हिरण्यपक्षः शकुनः। अमृतपक्षी। सधस्थे स्थे ब्रह्मणा सहाधिष्ठित स्थाने ध्रुवः स्थिरः। आनिषत्तः। आनिषण्णः। एवंविधो योग्नि

आग्निमारुतस्तोत्रपुरस्ताद्विमोचनं परिधौ षंध्योर्दिवोमूर्द्धेति प्रसृष्टचमिति। =

दिवोमूर्द्धेति
स्तस्मैते तुभ्यं नमोस्तु। मामाहिंसीः। मम हिंसां माकुरु॥ का०॥ अग्नानामादिं प्रपञ्जनं दिवोमूर्द्धेति
द्वाभ्यां॥ तत्र प्रथम मंत्रपाठस्तु॥ दिवोमूर्द्धासि० नमस्य धरति। हे भगवन्नग्ने। यस्त्वं दिवः द्युलोक
स्य मूर्द्धासि। उत्तमांगमसि। पृथिव्याः नानागुण विशिष्टाया। नाभिः नहनमसि। अपामूर्क्। सर्वरस मृता
स्य मूर्द्धासि। उत्तमांगसि। पृथिव्याः नानागुणविशिष्टाया। नाभिः नहनमसि। अपामूर्क्। सर्वत पृथुरूपः विस्ती
मर्पां रसः सारोसि। विश्वायुः सर्वप्राणिनामायुः जीवनं च त्वमसि। सप्रथाः सर्वतः पृथुरूपः विस्ती
र्णोसि। अतः पथे मार्गाय देवाया नाऽस्व्यमार्गक्त्रिताय तुभ्यं नमः॥ अथ द्वितीयः॥ विश्वस्यमूर्द्धन्न०
र्णोसि। अतः पथे गार्गाय देवाया नाऽस्व्यमार्गक्तिताय तुभ्यं नमः॥ अथ द्वितीयः॥ विश्वस्य मूर्द्धन्नधितिष्ठसि। श्रितः
हृद्याविति। हे अग्ने यस्त्वमस्य विश्वस्य सर्वस्य प्राणिजातस्य मूर्द्धि अधितष्ठसि। श्रितः
आश्रितः बुद्धीन्द्रियाणि सुषुम्णां या नाडी। यस्य च त्वं च समुद्रे समुद्दनेऽन्तरिक्षे हृदयं। अप्सु चायु
जीवनं। तं त्वां याचे आपो दत्त। अपोदेहीति बहुवचनव्यत्ययः। एकोऽग्निरिह देवता। बहुलं छन्दसि। उद्धेः
उदधिं भिंत। उदक कस्य उदादेशः उदानि धीयंते यस्मिन्नसौ उदधिः। तमुदधिं व्यर्थैर्भिंधि। वह्ने
विदारय। हे अग्ने ततो मेघविदारणात् भिन्नाद्दिवः संबंधिनः पर्जन्यात् वृष्ट्यभिमानिदेवता त्वल
तों तरिक्षात् मेघस्थानविशेषात्। पृथिव्याः पृथिव्यैः च वृष्टिं देहि। ततस्मात् नोऽस्मान् तव पालय॥
का०॥ अध्वर्युर्यजमानं विषयामाशिषं करोतीति रुष्टोयज्ञ इति द्वाभ्यां॥ मंत्रपाठस्तु॥ इष्टोयज्ञो भृगुभि०
अध्वरसमिष्टयजुरंत इष्टोयज्ञ इति प्रसृष्टचमिति। =

२८०

२८०

गमेरिति। यस्यास्य सुवर्णदानस्य यजमानस्य इष्टः संपादितो यज्ञः भृगुभिः भृगुप्रमुखैर्ब्राह्मणैः
आशीर्दा वसुभ्यन्तिभिर्देवताविशेषैः आशिषां दाता च कृतः। तस्यास्य यजमानस्य नः इष्टस्य अस्मा
कमभिप्रेतस्य प्रीतस्य वा अस्मान् प्रति प्रीतः स्निग्ध उच्यते। या इस्य यजमानयोः स्नेह रख्यापनपरं वा
स्य मिदं तु काले दानीं द्रविणमाह। त्वमपि हे द्रविणं इह यजमाने आगमेः आगमनं कुर्याः। यजमा
नं प्रति त्रीं प्रमागच्छ। यद्वा भृगुभिरार्षेयै ब्राह्मणैरिष्टोयो यज्ञो वसुभिर्देवैराशीर्दाः कृतः। अत्र विभ
क्ति व्यत्ययः। परो द्वर्चः। स्य यज्ञोऽस्माकमिष्टस्य प्रीतस्य द्रविणमिहानयत्विति॥ अथ द्वितीयः॥ अरस्यो
अग्निराहुतः० नम इति। कृतेयोगे रग्निरिष्टस्य आहुः तस्य पर्वं। अस्माकमाहुतस्येष्टं हविः स्वस्येष्ट
न अस्माभिर्दत्तं समिष्टयजुर्लक्षणं हविः पिपर्तु हविषः परिपूरणं करोतु। किं च स्वगेदं अत्र व्यत्ययः॥
इदं हविः स्वगा। स्वगं। स्वान् स्वकीयान् हविः संबंधिनो देवान् गच्छतीति स्वगा। स्वगं तव त्विति शेषः॥
सर्वसं तुष्ट्यर्थं नमस्करोतीति देवेभ्यो नम इति। यद्वा नम इत्यन्ननाम। देवेभ्य इदमन्नं स्वगं भवत्विति॥
॥ इति तृतीयोनुवाकः॥ ॥ तृतीयप्रातरनुवाकादि मंत्राउक्ताः। चतुर्थेनुवाके स्रुवाहुत्यादिमंत्रा
उच्यंते॥ का०॥ स्रुवाहुतीं जुहोतियदाकूतादिति प्रसृष्टचमष्टाविति। यदाकूतादित्यष्टाभिर्मंत्रैः स्रुवेण

यजमाना न्त्र धेस्य धर्मुर्वीयनं =

आहुतीर्जुहुयात्॥ तत्र प्रथममंत्रपाठस्तु॥ यदाकूतात्समसु॰ पुराणाइति ॥ यत्कर्म आकूतात् आकू
तो नाम। प्राङ्मनसः प्रवृत्तेरात्मनो धर्मो मनःप्रवृत्तिहेतुराकूतिः। तस्मात्सं भृतं सुधृतं स्वमस्यं संचि
तं यत्तु समसुस्रोत्। समस्रवत् प्रजापतेर्हृदो वा बुद्धेर्वा। मनसो वा हृदयाद्वा छिन्नान्मनसः सकाशात्
चक्षुषो वा सोराद्युपासना बलाद्वा चक्षुरूपलब्धितस्यानाद्वायत्संन्तं समुसुस्रोत्। भिः स्तं
तवति। स्वफलप्राप्तेरं तार्थयत्स्वरूपं कर्माभिः स्तं तदनुसृतो सत्कर्मकारिणां अ
पि लोकं लोक्यते दृश्यते नु यत इति। कलोकः। तं लोकं प्रेत गच्छत। यत्र यत्स्थाने ऋषयः स्वार्थं कु
त्वाः नग्नुः प्रथमजाः विश्वसृजः पुराणाः देवाश्चापि निवसंति। तं लोकं गच्छतेति संबंधः॥ अथ
द्वितीयः॥ एतं सधस्थ॰ व्योमन्निति। हे सधस्थ समानस्थान देवानां सामानस्वर्ग एतं यजमा
नं परितेददामि। तेतु भ्यं परिददामि। परिदानं रक्षणार्थं। जातवेदाः सर्वज्ञोऽग्निर्यश्च यजमानं
सेवधिं देवानां निधिको स्थानीयं अविहात् आनयेत्। तं यजमानं तुभ्यं ददामि। ~~वर्जितमानं~~
~~रक्षणार्थं~~ यद्वा आहुतिपरिणामत्व तमग्न्यनुगृहीतं सुकृतमात्रे वा परिददामि। यत्र यज्ञ ३५१
पतिर्विष्णुर्यसफलफलप्रदात्वेन प्रकृतं यजमानं अत्र वः युष्मान् अ॰ त्रे स्थां वः अन्वागंता

३५१

[OrderDescription]
,CREATED=23.07.19 16:28
,TRANSFERRED=2019/07/23 at 17:33:40
,PAGES=283
,TYPE=STD
,NAME=S0001091
,Book Name=M-1945-KANYASANHITA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF

FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF

FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF

FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF

FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF

FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF

FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF

FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF
,FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,